THE FREE INDOLOGICAL COLLECTION

WWW.SANSKRITDOCUMENTS.ORG/TFIC

FAIR USE DECLARATION

This book is sourced from another online repository and provided to you at this site under the TFIC collection. It is provided under commonly held Fair Use guidelines for individual educational or research use. We believe that the book is in the public domain and public dissemination was the intent of the original repository. We applaud and support their work wholeheartedly and only provide this version of this book at this site to make it available to even more readers. We believe that cataloging plays a big part in finding valuable books and try to facilitate that, through our TFIC group efforts. In some cases, the original sources are no longer online or are very hard to access, or marked up in or provided in Indian languages, rather than the more widely used English language. TFIC tries to address these needs too. Our intent is to aid all these repositories and digitization projects and is in no way to undercut them. For more information about our mission and our fair use guidelines, please visit our website.

Note that we provide this book and others because, to the best of our knowledge, they are in the public domain, in our jurisdiction. However, before downloading and using it, you must verify that it is legal for you, in your jurisdiction, to access and use this copy of the book. Please do not download this book in error. We may not be held responsible for any copyright or other legal violations. Placing this notice in the front of every book, serves to both alert you, and to relieve us of any responsibility.

If you are the intellectual property owner of this or any other book in our collection, please email us, if you have any objections to how we present or provide this book here, or to our providing this book at all. We shall work with you immediately.

-The TFIC Team.

RIGINAL

तत्त्वचिन्तामणौ

शब्दखण्डं।

शब्दप्रामाण्यवादादि उच्छिन्न-प्रच्छन्नवादान्तं।

श्रीमद्गङ्गेशोपाध्यायविरचितं।

श्रीमथुरानाथ-तर्कवागीशविरचित-रहस्यनामकटीकासहितं

आसियाटीक-सोसाइटी-समाजानुमत्या

संस्कृतविद्यालयाध्यापक-

श्रीकामाख्यानाथ-तर्कवागीशेन

परिशोधितं।

कलिकाताराजधान्यां

वापतिस्त मिशनयन्त्रे मुद्रितं।

शकाब्दाः १८१८। ई० १८९७।

तत्त्वचिन्तामणौ शब्दखण्डे शब्दाप्रामाण्यवादादि-उपक्रम-प्रक्रमवादान्तभागस्य सूचीपत्रं।

विषयः।	पृष्ठं।
शब्दप्रमाणलक्षणं	१०
शब्दाप्रामाण्यवादिबौद्धमतं	१४
तत्खण्डनं	१७
शब्दाप्रामाण्यवादिजरन्मीमांसकमतं	८३
तत्खण्डनं	८५
शब्दाप्रामाण्यवादिप्रभाकरादिमतं	९२
तत्खण्डनं	१०२
स्वमते शब्दस्य प्रमाणान्तरत्वव्यवस्थापनं	१८१
आकाङ्क्षावादपूर्व्वपक्षः	१८५
आकाङ्क्षावादसिद्धान्तः	२०८
योग्यतावादपूर्व्वपक्षः	२४५
योग्यतावादसिद्धान्तः	२६२
आसत्तिवादः	२८६
तात्पर्य्यवादे परमतखण्डनं	३१९
तात्पर्य्यवादे स्वमतव्यवस्थापनं	३२३
तात्पर्य्यवादे मीमांसकमतं	३४०
तत्खण्डनं	३४९
शब्दानित्यतावादपूर्व्वपक्षः	३७५
शब्दानित्यतावादसिद्धान्तः	४३४
उपक्रम-प्रक्रमवादः	४६५

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY

THE ASIATIC SOCIETY OF BENGAL.

NEW SERIES.—NOS. 858, 866, 875, 883, 891.

THE TATTVA-CHINTĀMAṆI

BY

GANGES'A UPĀDHYĀYA,

PART IV; VOLUME I.

S'AVDA KHAṆḌA

FROM S'AVDAPRĀMĀṆYAVĀDA TO UCHCHHA PRACHCHHANNAVĀDA

FROM THE COMMENTARIES OF

MATHURĀ NĀTHA TARKAVĀGĪS'A

EDITED BY

PAṆḌIT KĀMĀKHYĀ NĀTHA TARKA-VĀGĪS'A,

Professor, Sanskrit College, Calcutta.

CALCUTTA:

PRINTED AT THE BAPTIST MISSION PRESS

1897.

ॐ नमः शिवाय ।

तत्त्वचिन्तामणौ

शब्दाख्यतुरीयखण्डम् ।

अथ शब्दो निरूप्यते । प्रयोगहेतुभूतार्थतत्त्वज्ञान-जन्यः शब्दः प्रमाणम् ।

शब्दाख्यतुरीयखण्डरहस्यम् ।

न्यायाम्बुधिकृतमेतुं हेतुं श्रीराममर्खिलसम्पत्तेः ।
तातं त्रिभुवनगीतं तर्कालङ्कारमादराञ्नत्वा ॥ १ ॥
श्रीमता मथुरानाथ[१] तर्कवागीशधीमता ।
विपदीकृत्य दर्श्यन्ते तुरीयमणिफक्किकाः ॥ २ ॥
आन्वीक्षिकीपण्डितमण्डलीषु
सत्ताण्डवैरध्ययनं विनापि ।
मदुक्तमेतत् परिचिन्त्य धीरा-
निःशङ्कमध्यापनमातनुध्वम् ॥ ३ ॥

प्रत्यक्षादिप्रमाणत्रयं निरूपितमिदानीं चरमप्रमाणं शब्दः[२]

---

(१) श्रीमश्रीमथुरानाथेति ख० ।
(२) इदानीं शब्द इति ख० ।

निरूपणीयोऽतः शिष्यावधानाय प्रतिजानीते[१] 'अथेत्यादिना, 'अथ' उपमाननिरूपणानन्तरक्षणनिष्ठं, 'शब्दः' शाब्दप्रमाकरणं, यथाश्रुते अर्थे प्रमाणशब्दस्य लक्षणकरणे अर्थान्तरतापत्तेः। 'निरूप्यत इत्यत्र निरूपणं लक्षण-स्वरूप-प्रामाण्यादिभिर्ज्ञापनं, लक्षण-स्वरूप-प्रामाण्यादिप्रकारकज्ञानानुकूलो व्यापार इति यावत्, आख्यातस्य च विषयत्वमर्थः, तथाचोपमानविशेष्यक-लक्षण-स्वरूप-प्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारानन्तरक्षणनिष्ठाभिन्नो यो लक्षण-स्वरूप-प्रामाण्यादिप्रकारकज्ञानानुकूलव्यापारस्तद्विषयः प्रमाणं शब्दः इत्यन्वयः। 'अथपदस्य लुप्तद्वितीयाविभक्तिकस्य निरूपण-क्रियाविशेषणतया स्तोकं पचतीत्यादाविवाभेदस्य संसर्गमर्यादालभ्यत्वात्, नान्यः क्रियाविशेषणत्वस्थले अभेदान्वयबोधस्यैव साकाङ्क्षत्वात्, व्यापारस्य शब्दप्रयोग एव तद्विषयता च व्यापारानुबन्धिनी[२] तेन शब्दस्य निर्विषयकत्वेऽपि न क्षतिः।

---

(१) अथशब्दितोत्तरकालकर्तृत्वप्रकारक-शिष्यसमवेतबोधानुकूलव्यापारः प्रतिज्ञापदार्थः, स च अथेत्यादि निरूप्यत इत्यन्तं वाक्यं, निरूप्यत-इत्यत्र वर्त्तमानसामीप्यार्थकलटप्रत्ययस्य वर्त्तमानकालाव्यवहितोत्तर-कालार्थकत्वेन अथेत्यादिवाक्यस्य निरूपणप्रतिज्ञात्वं, अथेत्यादिना इत्यत्र अभेदे तृतीया। तथाच अथेत्यादिवाक्याभिन्नप्रतिज्ञानुकूलकृतिमान् मणिकार इति शाब्दबोधः।

(२) व्यापारानुबन्धिनी व्यापारप्रयोज्या, तथाच शब्दप्रयोगस्य निर्विषयकत्वेऽपि याचितमण्डनन्यायात् तज्जन्यज्ञानरूपव्यापारविषयत्वेन तद्विषयत्वनिर्वाह इति भावः।

केचित्तु । अथशब्दस्य ध्वंसाधिकरणक्षणवृत्तित्वरूपानन्तरक्षणवृत्तित्वाश्रये[1] धर्म्मिणि न शक्तिरपि तु अनन्तरक्षणवृत्तित्वे धर्म्म एव शक्तिः अनन्तरक्षणवृत्तित्वत्वरूपेणानन्तरक्षणवृत्तित्वस्य शक्यतावच्छेदकत्वमपेक्ष्यानन्तरक्षणवृत्तित्वत्वस्य केवलस्य शक्यतावच्छेदकत्वे लाघवात् तथाचाश्रयाश्रयिभावसम्बन्धेनैवान्वयबोधः अभेदसम्बन्धेनान्वयबोधे अथपदस्य धर्म्मिणि लक्षणापत्तेः, अतएव चाव्ययातिरिक्तनाम्नः क्रियाविशेषणत्वस्थल एव अभेदसंसर्गकान्वयबोधनियमोऽव्ययातिरिक्तस्थल एव धात्वर्थ-नामार्थयोर्भेदान्वयबुद्ध्यभावनियमश्च, अन्यथा अथादिपदस्य धर्म्मिणि लक्षणापत्तेः । वस्तुतस्तु 'अथादिपदस्यानन्तरक्षणवृत्तित्वेऽपि न शक्तिः अपि त्वनन्तरत्व एव शक्तिः, अनन्तरत्वञ्च ध्वंस एव, तथाच 'अथपदोत्तरं सप्तमीलोपात् लुप्तसप्तम्यर्थे समासकालीनत्वे 'अथपदार्थस्योपमाननिरूपणध्वंसस्यान्वयः[2] न तु धात्वर्थे, धात्वर्थे च सप्तम्यर्थस्यान्वय इति प्राञ्चः । तदसत्. 'अथादिपदस्य लाघवात् अनन्तरक्षणवृत्तित्वे अनन्तरत्वे वा शक्तावपि प्रकृते उपमाननिरूपणोपस्थापकपदाभावेनोपमाननिरूपणानन्तरक्षणवृत्तित्वस्य उपमाननिरूपणानन्तरत्वस्य वा विशेषतो लाभार्थं लक्षणाया आवश्यकत्वेनाभेदान्वयबोधपक्षस्यापि सम्यक्त्वादिति ।

---

(१) 'अथशब्दस्य ध्वंसाधिकरणवृत्तित्वाश्रय इति ख० ।

(२) अपि त्वनन्तरत्व एव शक्तिः अनन्तरत्वञ्च अधिकरणतया ध्वंसविशिष्टत्वं तथाचाथपदोत्तरं सप्तमीलोपात् लुप्तसप्तम्यर्थनिष्ठतायामेवाथपदार्थस्योपमाननिरूपणध्वंसविशिष्टक्षणस्यान्वय इति ख० ।

अत्र च उपजीवकत्वमेव सङ्गतिरयं गवयपदवाच्य इत्युपमित्यात्मकशक्तिपदविषयकज्ञानस्य शाब्दधीकरणतया शब्दस्यातिदेशवाक्यार्थज्ञानात्मकोपमानोपजीवकत्वादिति भावः । ननु उपमित्यात्मकशब्दप्रमाणस्य अतिदेशवाक्यार्थज्ञानात्मकोपमानोपजीवकत्ववदतिदेशवाक्यार्थज्ञानात्मकोपमानस्यापि अतिदेशवाक्यज्ञानात्मकशब्दोपजीवकत्वेनोपजीव्योपजीवकभावाविशेषादुपमानमेवादौ कुतो निरूपितं शब्दस्तु पश्चान्निरूप्यते विनिगमकाभावात् । अथोपमाने शब्दोपजीवकत्वमेव नास्ति यत्र कीदृग्गवय इति प्रश्नानन्तरं चित्रलेखादिना तादृशपिण्डप्रदर्शनं तत्रातिदेशवाक्यं विनापि सादृश्यज्ञानात्मकोपमानोत्पत्तिः । न च चित्रलेखादिना गोसदृशोपस्थितावपि तत्र गवयपदवाच्यत्वानुपस्थितेः तदुपस्थित्यर्थमभिप्रायविषयः शब्दस्तत्रापि कल्पनीय इति वाच्यम् । चित्रलेखाद्युपस्थिते गोसदृशे प्रश्नवाक्यस्थगवयपदोपस्थापितस्य गवयपदवाच्यत्वस्य मनसैव बोधोपपत्तेः आभिप्रायिकशब्दकल्पनाया अनावश्यकत्वात् । न च पशुत्वविधे तज्जन्यशाब्दबोधे वा इच्छासत्त्वात् तद्विषयसम्पादनाय शब्दोऽवश्यं कल्पनीय इति वाच्यं । यदा पशुज्ञानमात्रे इच्छा तदा शब्दकल्पनाभावादिति चेत्, तर्हि, शब्दस्यापि नोपमानोपजीवकत्वं स्यात् व्यवहारादिनापि शक्तिग्रहात्मकशब्दोदयात् क्वाचित्कोपजीवकत्वस्य तुल्यमिति, मैवं. मानतावच्छेदकधर्मव्यापकोपजीव्यतानिरूपिता या स्वरूपोपजीवकता[१] तस्या एव प्रमाणान्तराभिधाने

---

(१) स्वरूपत उपजीवकतेति ख० ।

प्रयोजकत्वात्। मानतावच्छेदकधर्म्मश्च इन्द्रियत्व-व्याप्तिज्ञानत्व-वर्ण-ज्ञानत्व-सादृश्यज्ञानत्वान्यतमधर्म्मः, सा च[1] शब्द एव वर्त्तते न तूपमाने सादृश्यज्ञानमात्रस्यैव उपमित्यात्मकशक्तिपदविषयकज्ञानस्य शाब्दधीकरणतया शब्दस्य उपजीव्यत्वात् शब्दमात्रस्य च उपमानं प्रत्यनुपजीव्यत्वात्, उपजीवकता च स्वरूपयोग्यता बोध्या तेन निमित्तसादृश्यज्ञानस्य शक्तिपदविषयकोपमित्यनुपधायकत्वेऽपि न क्षतिः उपमितित्वेन सादृश्यज्ञानत्वेन कार्य्य-कारणभावात् सादृश्य-ज्ञानमात्रस्यैव शक्तिपदविषयकोपमितिस्वरूपयोग्यत्वात्। उपजीव-कता च प्रमाणविभाजकोपाधिनियतधर्म्मावच्छिन्ना बोध्या तेना-तिदेशवाक्यार्थज्ञानात्मकोपमानस्य वर्णज्ञानत्वावच्छिन्नोपजीव्यता-निरूपितशाब्दत्वावच्छिन्नकार्य्यताश्रयत्वेऽपि न क्षतिः शब्दत्वस्य उप-मितिकरणत्वानियतत्वात् साक्षात्कारत्व-वाक्यत्वादिकन्तु[2] अनु-मितिकरणत्वनियत तज्ज्ञानत्वेन तद्विषयकानुमितित्वेन ज्ञानत्वेन अनुमितित्वेन वा[3] कार्य्य-कारणभावात् तेन प्रत्यक्षोपजीवकत्व-

---

(1) सा च उपजीवकता इत्यर्थः।

(2) साक्षात्कारत्व-व्याप्यत्वेति ख०।

(3) ज्ञानत्वेन अनुमितित्वेन तज्ज्ञानत्वेन तद्विषयकानुमितित्वेन वा इति ख० ग० चिह्नितपुस्तकपाठः। ईदृशपाठे तु साक्षात्कारस्यानुमित्यव्यापकत्वेन पूर्वकल्प एव निर्भरः, परामर्शविशेषस्य अनुमितिविशेषं प्रति कार-णत्वव्यवस्थापनेनैवातिप्रसङ्गभङ्गात्, परामर्शस्य ह्येतादृशार्थमेव ज्ञानत्वेन अनुमितित्वेन कार्य्य-कारणभावो न तु व्याप्तिज्ञानत्वेनानु-मितित्वेन न वा तज्ज्ञानत्वेन तद्विषयकानुमितित्वेनेत्यवधेयम्।

सङ्गत्या न प्रत्यक्षानन्तरमनुमाननिरूपणानुपपत्तिः[1]। न च का ओषधी ज्वरं हन्तीति प्रश्ने दशमूलसदृशौषधी ज्वरं हन्तीत्युत्तरे उपमित्या ज्वरहरणकार्य्य-कारणभावग्रहः तत्रोपमितेः शक्तिपदाविषयकत्वेन शाब्दधीकरणत्वाभावादुपमितित्वमपि प्रमाणविभाजकशाब्दधीकरणत्वानियतमिति वाच्यम्। उपमितेः शक्तिमात्रविषयकत्वनियमेन[2] तत्रानुमानादिनैव कार्य्य-कारणभावग्रहादिति। एतेनोपमानफलस्योपमितेरतिदेशवाक्यज्ञानात्मकशाब्दफलस्यातिदेशवाक्यार्थज्ञानस्य उपजीवकतया फलतः शाब्दोपजीवकत्वस्योपमाने सत्त्वात् शब्दनिरूपणानन्तरमुपमाननिरूपणापत्तिरित्यपि प्रत्युक्तं, निरुक्तस्वरूपोपजीवकताया एव प्रमाणान्तराभिधाने प्रयोजकतया फलत उपजीवकत्वस्य तदप्रयोजकत्वात्, यदनन्तरं यन्निरूपणं तन्निष्ठतदुपजीवकताया एव लाघवात् तत्प्रयोजकतया फलनिष्ठफलनिरूपितोपजीवकतायाः कारणानन्तरं कारणाभिधाने प्रयोजकत्वासम्भवाच्च, फलनिष्ठफलोपजीवकतायाः कारणनिष्ठत्व-कारणनिरूपितत्वाभावात् तस्या अपि परम्परासम्बन्धेन कारणनिष्ठत्व-कारणनिरूपितत्वाभ्युपगमेऽतिप्रसङ्गात् गौरवाच्च। अत एवानुमानदीधितौ फलत इति विहाय स्वरूपतस्त्वित्युक्तमिति सम्प्रदायः।

तथाऽस्तु उपजीव्योपजीवकभावयोस्तुल्यत्वेऽपि न क्षतिः आन-

---

(१) ज्ञानत्वेन अनुमितित्वेन कार्य्यकारणभावात् प्रत्यक्षत्वव्यापकोपजीव्यतानिरूपितोपजीवकत्वं अनुमानस्याक्षतमिति तात्पर्य्यम्।

(२) शक्तिविषयकत्वनियमेनेति ख०।

क्रमनियमे शक्तेरप्रयोजकत्वात् किन्तु स्वतन्त्रेच्छस्येति न्यायेन[१] इच्छैव क्रमनियामिका, शक्तिश्चानन्तराभिधानव्यापकतायामुप-युज्यते अन्यथा सादृश्यलिङ्गक-पदलिङ्गकानुमितेरपि लिङ्गज्ञान-विधया ज्ञानसामान्यस्यानुमितिकरणतया वा अनुमानत्वेन तदुपजी-व्यत्वस्य सादृश्यज्ञानत्व-पदज्ञानत्वावच्छेदेन सत्त्वात् उपमान-शब्दयोः पूर्व्वमनुमाननिरूपणेऽपि किं विनिगमकमिति प्राहुरिति संक्षेपः।

लक्षण-स्वरूप-प्रामाण्यनिरूपणस्य प्रतिज्ञातत्वात् प्रथमतो लक्षणं निरूपयति, 'प्रयोगेति 'प्रयोगहेतुभूतं' प्रयोगकारणीभूतं, 'यदर्थ-तत्त्वज्ञानं' यत् अर्थविषयकतत्त्वज्ञानं, तज्जन्यः 'प्रमाणं शब्दः' इत्य-न्वयः, 'प्रमाणं शब्दः' इति लक्ष्यनिर्द्देशः, अन्यथा 'शब्दपदस्य लक्षणान्तर्गतत्वे प्रमाणसामान्यस्य लक्ष्यतापत्तौ अर्थान्तराव्याप्त्यो-रापत्तेः[२] प्रथमतो येन केनापि प्रमाणेन वक्तुर्वाक्यार्थज्ञानं ततो वाक्यार्थज्ञानज्ञानं ततः परस्य वाक्यार्थज्ञानं भवत्विति वाक्यार्थ-ज्ञानेच्छा ततो वाक्यार्थज्ञानरूपेष्टसाधनताज्ञानात् वाक्ये इच्छा[३] ततो वाक्यरूपेष्टसाधनताज्ञानात् कृतिसाध्यताज्ञानसहकृतात् कण्ठाभिघातादौ चिकीर्षा ततः कण्ठाभिघातादिसाधिका कण्ठा-

(१) स्वतन्त्रेच्छस्य पर्य्यनुयोगानर्हत्वमिति न्यायेनेत्यर्थः।

(२) अर्थान्तरं अनाकाङ्क्षिताभिधानं, प्रमाणसामान्यस्य लक्ष्यत्वे अनाका-ङ्क्षितस्य शब्दातिरिक्तप्रमाणस्याभिधानापत्तिरिति भावः। प्रमाण-सामान्यस्य लक्ष्यत्वे प्रमाणसामान्यान्तर्गतप्रत्यक्षादौ प्रयोगहेतुभूतार्थ-तत्त्वज्ञानजन्यशब्दत्वाभावादव्याप्तिरिति तात्पर्य्यम्।

(३) कृतिसाध्यवाक्ये इच्छा इति ख०।

ध्युपादानकप्रवृत्तिः ततः कण्ठादिचेष्टाविभागादिक्रमेण कण्ठाभिघाताद्युत्पत्तिः ततो वाक्योत्पत्तिरिति प्रणाल्या प्राचां नये परम्परया वक्तृवाक्यार्थबुबोधयिषापूर्व्वकवाक्यत्वावच्छिन्नं प्रति वक्तृवाक्यार्थज्ञानस्य हेतुतया च सर्व्वत्र लक्षणं सङ्गमनीयम्। वह्निना सिञ्चति इत्यप्रमाणशब्देऽतिव्याप्तिवारणाय 'तत्त्वेति यथार्थेत्यर्थः। ननु 'प्रयोगहेतुभूतेति ज्ञानविशेषणं व्यर्थं, न हि प्रयोगाहेतुभूतेनापि ज्ञानेन शब्दो जन्यते यदिदं व्यावर्त्तयेत्, शब्दाहेतुभूतं अथच शब्दं जनयतीति(१) वदतो व्याघातात्। न चार्थतत्त्वज्ञानादिजन्यसंस्कारादिवारणाय तदिति वाच्यम्। तथापि प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यसंस्कारादावतिव्याप्तितादवस्थ्यात्। तद्वारणाय शब्दपदं लक्ष्यलक्षणयोरुभयत्रापि प्रवेशनीयमिति चेत्, कृतं तर्हि भूतान्तेन। किञ्च अर्थपदमपि व्यर्थं अर्थत्वस्य ज्ञानविषयत्वस्वरूपस्य केवलान्वयितया ज्ञानमात्रस्यैवार्थविषयकत्वेनाव्यावर्त्तकत्वात्। न च वाक्यार्थज्ञानद्वारा वक्तृपदार्थतत्त्वज्ञानजन्ये साक्षादीश्वरीयपदार्थतत्त्वज्ञानजन्ये च वह्निना सिञ्चतीत्यादिबाधितवाक्येऽतिव्याप्तिवारणायार्थपदं वाक्यार्थपरमिति वाच्यम्। तथापि कण्ठताल्वाद्यभिघातादौ तद्वाक्यरूपेष्टसाधनतादिज्ञानात्मकवाक्यार्थतत्त्वज्ञानजन्यतया तादृशबाधितवाक्येऽतिव्याप्तितादवस्थ्यात् इष्टसाधनत्वादेरपि यत्किञ्चिद्वाक्यार्थत्वात्। अथार्थपदं स्वार्थपरं स्वपदं प्रकृतवाक्यपरमिति चेत्, तथापि वह्निकरणकसेकानुकूलकृतिमानित्यादिप्रकृत-

(१) शब्दाहेतुभूतेन अथच शब्दोजन्यत इतीति क०। शब्दाहेतुभूतं अथच शब्दोजन्यत इतीति ग०।

वाक्यार्थज्ञानस्यापि अंशतः प्रमात्वात् तदन्यतया वक्तव्यासिद्धा-
द्युक्तत्वात् यथार्थत्वं तदन्यप्रतिपत्तिविषयत्वं तच्च पदार्थेऽप्यस्तीति
वक्तुरीश्वरस्य वा पदार्थतत्त्वज्ञानमादायाप्यतिव्याप्तेर्दुर्वारत्वाच्च अतएव
तत्त्वपदमपि व्यर्थं तदुपादानेऽप्यतिव्याप्तेर्दुर्वारत्वादिति । उच्यते ।
इदं हि न प्रमाणशब्दसामान्यलक्षणं शब्दमात्रस्यैव प्रमाणत्वेन साका-
ङ्क्षशब्दत्वस्य शब्दत्वस्य वा तल्लक्षणत्वात् वह्निना सिञ्चतीत्यस्यापि
कस्मिंश्चिदर्थे प्रमाणत्वेनार्थतत्त्वेत्यादेर्व्यर्थत्वापत्तेश्च किन्तु कस्मिन्नर्थे किं
वाक्यं प्रमाणं तस्यैव लक्षणं, तथाच अर्थतत्त्वेत्यादेस्तद्विशेष्यक-तत्सं-
सर्गक-तत्प्रकारकयथार्थज्ञानजन्यो यः स तद्विशेष्यक-तत्संसर्गक-
तत्प्रकारकप्रमाणशब्द इत्यर्थः, एतल्लाभायैवार्थपदं, वह्निना सिञ्च-
तीत्याद्ययोग्यवाक्यस्य सेके वह्निकरणकत्वांशे प्रमाणत्ववारणाय
यथार्थेति, तादृशज्ञानजन्यसंस्कारेच्छादावतिव्याप्तिवारणाय प्रयोग-
हेतुभूतेति जन्यविशेषणं, प्रयोगहेतुभूतत्वञ्च वर्णसामग्रीजनकत्वं,
'प्रयोगस्य' वर्णस्य, 'यो हेतुः' या सामग्री, 'ततो भूतः' तत उत्पन्न-
इति व्युत्पत्तेः, तथाच वर्णसामग्रीजन्यत्वे सति निरुक्तज्ञान-
जन्यत्वं निरुक्तप्रमाणशब्दत्वमिति लक्षणं फलितं । संस्कारेच्छादिश्च
न वर्णसामग्रीजन्यः इतरसामग्र्या इतरस्याजनकत्वादिति नाति-
व्याप्तिः, ध्वनिवारणाय शब्दत्वमपहाय वर्णत्वेनोपादानं, वर्णत्वञ्च
कत्वादिव्यापक-शब्दत्वव्याप्य-ध्वनिव्यावृत्तजातिविशेषः । न च वर्ण-
प्रागभावजन्यत्वे सतीत्येव सम्यक् किं कारणकलापात्मकसामग्री-
प्रवेशेनेति वाच्यम् । यत्र वर्णप्रागभावप्रत्यक्षे वाक्यार्थोऽप्युपनीतो
भासते तत्र वर्णप्रागभावप्रत्यक्षेऽतिप्रसङ्गात् तस्य वाक्यार्थविशेष्यक-

तत्कथा निरुक्तज्ञानजन्यत्वस्यापि तत्र सम्भवात्। न च तथापि बधिरे प्रतीत्यैव सम्यक् तावतैव संस्कारादेरुपनीतवाक्यार्थविषयक-सर्वप्रागभावप्रत्यक्षस्य च वारणसम्भवादिति वाच्यम्। यथारुचि-भेदे वैयर्थ्यासम्भवात्। एतच्च ज्ञायमानशब्दस्य प्रमाणत्वपक्षे, शब्द-ज्ञानस्य प्रमाणत्वपक्षे तु तादृशशब्दविषयकज्ञानत्वं लक्षणमवसेयम्।

ननु मौनिश्लोकेऽव्याप्तिः यदा कदाचित् येन केनचित् क्रम-भङ्गेनोच्चरितानामेव तत्तत्पदानां मौनिना अर्थक्रमेणानुसन्धीय-मानानां मौनिश्लोकत्वं तत्र च यस्मिन्नर्थे यदर्थांशे प्रमाणशब्दत्वं तदर्थविशेष्यक-तदर्थप्रकारकयथार्थज्ञानजन्यत्वं नास्ति तादृशज्ञान-वता मौनिना अनुच्चरितत्वात् उच्चारकस्य च तादृशज्ञानाभा-वादिति, एवं यत्र वक्ता यदर्थमुद्बोधयिषया वाक्यमुच्चरितं श्रोता तदर्थभ्रमेण लक्षणादिना वा तदितरयथार्थोऽवगतः तत्र श्रोतु-रवगतार्थे तद्वाक्यस्य प्रामाण्याय तद्विशेष्यक-तत्प्रकारकज्ञानजन्य-त्वाभावात्, एवं शुकाद्युच्चरिते पद्ये भिक्षतीत्यादिवाक्येऽव्याप्तिः शुकादिः प्रकृतवाक्यार्थानभिज्ञतया इदं वाक्यं सुखसाधनमिति सुखसाधनताज्ञानादेव तेन तद्वाक्यप्रयोगादिति चेत्, न, तेषा-मपीश्वरीयतादृशज्ञानजन्यतया लक्षणसमन्वयात्। न चैवमेव वह्निना सिञ्चतीत्याद्ययोग्यवाक्यस्यापि करणत्वे वह्न्यंशे प्रमाणत्वा-पत्तिः, एवमीश्वरीयतादृशज्ञानजन्यतया घटमानयेत्याद्युदासीन-वाक्यस्यापि करणत्वे वह्न्यंशे प्रमाणत्वापत्तिरिति वाच्यम्। वह्नि-नेति भागस्य(१) तदंशे प्रमाणत्वस्येष्टत्वात् सिञ्चतीतिभागस्य

(१) वह्निनेति भागे इति ख०।

[illegible] न तथात्वं [illegible] वाक्यार्थविशेषक-
वह्निप्रमाजनकत्वसमर्थत्वेन कल्पनीयत्वात् तादृशप्रमाजनकयोग्यत्वेन
कल्पनात् अतएव कश्चिदाकाङ्क्षितविशेषण-वत्त्वादपि कल्पनीय-
इति स्वरूपयोग्यतया प्रमाणकोऽपि वाक्य एव । न च निरा-
काङ्क्षस्य घटः कर्मत्वमानयनं कृतिरित्यादेरपि कर्मत्वविशेषक-
घटप्रकारकयथार्थज्ञानजन्यतया कर्मत्वे घटांशे प्रमाणत्वं स्यादिति
वाच्यम् । घटपद-कर्मत्वादिपदस्य अन्वयया घटः कर्मत्वमिति
समुदितवाक्ये घटप्रकारकर्मत्वरूपविशिष्टे प्रमितत्वात् घटत्वप्रकारक-
विषयकशाब्दधीजननसमर्थत्वेन घटः कर्मत्वमित्यादिनिराकाङ्क्ष-
स्यापि तादृशप्रमास्वरूपयोग्यत्वेन प्रमाणत्वम् । न चैवमेतत्कल्पना-
द्यावृत्त्यभाव इति वाच्यम् । वह्निना सिञ्चतीत्यादि भेदे वह्नि-
करणकत्वांशे [illegible](१) व्यवच्छेदनात् । अतएव वक्तृवाक्या-
र्थज्ञानं न वाक्यहेतुः वाक्यार्थज्ञानं विनापि शुक-सारिकादिभिः(२)
वाक्यप्रयोगात् । न च वाक्यार्थज्ञानत्वेन हेतुत्वात् तत्रापीश्वरीय-
वाक्यार्थज्ञानमस्तीति वाच्यम् । तथापि विसंवादिशुकादिना [illegible]
व्यभिचारात् । न च वक्तृवाक्यार्थबुबोधयिषापूर्व्वकवाक्यत्वावच्छिन्नं
प्रति वक्तृवाक्यार्थज्ञानं हेतुरिति न व्यभिचार इति वाच्यम् ।
मानाभावात् । न च वाक्यं प्रति वाक्यार्थज्ञानस्य साक्षाद्धेतुत्वेऽपि
उभयपक्षान्त्या वक्तृवाक्यार्थबुबोधयिषापूर्व्वकवाक्यत्वावच्छिन्नं प्रति
स्वविषयकेच्छादिद्वारा वाक्यार्थज्ञानं हेतुरावश्यक इति वाच्यम् ।

---

(१) प्रमाणत्वस्येति ख० ।

(२) शुकादिभिरिति ख० ।

जनकप्रणाल्या वाक्यार्थज्ञानस्य परम्परया तादृशवाक्योपयोगित्वेऽपि वाक्यार्थज्ञानस्य हेतुत्वे मानाभावात्, वाक्यार्थज्ञानं विनापि तद्विशेष्यक-तत्प्रकारकज्ञानत्वरूपेण आप्तवाक्यानुमानादिना वाक्यार्थज्ञानज्ञानात् वाक्यार्थज्ञाने इच्छासम्भवात् लौकिकप्रत्यक्षं प्रत्येव विषयस्य हेतुत्वात् यत्र च वाक्यार्थज्ञानस्य लौकिकसाक्षात्कारादेव तदेच्छा तत्रापि वाक्यार्थज्ञानस्य तद्धेतुत्वे मानाभावः कण्ठाभिघातादिना अन्यथासिद्धत्वात्, अतएव वाक्यार्थज्ञानज्ञानमपि न हेतुः कण्ठाभिघातादिना अन्यथासिद्धत्वात् अन्यथा जलाहरणादेरपुत्रप्रणाल्या कपालसंयोगादिसाध्यकप्रवृत्तिद्वारा घटादिहेतुत्वापत्तेरिति नव्यमते लक्षणमिदमसम्भवि पयसा सिञ्चतीति वाक्ये सिद्धार्थतत्त्वज्ञानजन्यत्वविरहादित्यपि निरस्तम्। ज्ञानत्वेन ईश्वरीयतादृशज्ञानजन्यतामादायैव सर्व्वत्र लक्षणसमन्वयात्। न चैवं तत्त्वपदवैयर्थ्यं अयोग्ये तादृशवाक्यार्थज्ञानस्य ईश्वरीयस्याभावात् वक्तृवाक्यार्थज्ञानस्य चाजनकत्वादिति वाच्यम्। वक्तृवाक्यार्थज्ञानस्य वाक्यार्थज्ञानत्वेनाजनकत्वेऽपि ज्ञानत्वेन कालत्वेन च जनकत्वात्। वस्तु वा जन्यत्वमत्र समानकालीनत्वमात्रं लाघवात् तेन कार्य्यत्वावच्छिन्नं प्रति ज्ञानत्वेन कालत्वेन च कार्य्य-कारणभावासत्त्वेऽपि न क्षतिः[१]।

---

(१) तथाच यद्विशेषयोः कार्य्य-कारणभावः तत्सामान्ययोरपीति नियमे मानाभावेन कार्य्यविशेषं प्रति कालविशेषस्य ज्ञानविशेषस्य च कारणत्वेऽपि कार्य्यत्वावच्छिन्नं प्रति कालसामान्यस्य ज्ञानसामान्यस्य च हेतुत्वे मानाभाव इति भावः।

केचित्तु वाक्यार्थज्ञानस्य शाब्दहेतुत्वेऽपि वक्तुरानुपूर्वीज्ञानं हेतुरेव तथाच तत्पदार्थज्ञानादिजन्ये बाधितवाक्यानुपूर्वी-बाधितवाक्यार्थोभयविषयकसमूहालम्बनजन्ये बाधितवाक्ये(१) अतिव्याप्तिः आनुपूर्वीज्ञानविधया तत्र वाक्यार्थज्ञानस्य हेतुत्वात् न त्वर्थज्ञानत्वेन जनकत्वं विवक्षितं येन नोक्तदोषः स्यादित्याहुः । तदसत्, वाक्यार्थज्ञानवदानुपूर्वीज्ञानस्यापि वाक्यहेतुत्वे मानाभावात्(२) वाय्वाद्यभिघातजन्ये करणापाटवजन्ये च वाक्ये व्यभिचारात् । न चैवं घटमानयेत्याद्यानुपूर्वीमविदुषोऽपि मूर्खादेः तादृशानुपूर्वीकवाक्यप्रयोगापत्तिरिति वाच्यम् । आनुपूर्वीज्ञानं विना कण्ठाभिघातादौ तादृशवाक्यरूपेष्टसाधनताज्ञानस्यैवासम्भवात् । स्वोद्देश्यककृतिसाध्यवाक्यत्वावच्छिन्नं प्रत्यानुपूर्वीज्ञानस्य परम्परयोपयोगित्वेऽपि कारणत्वे मानाभावात् कण्ठाभिघातादिना अन्यथासिद्धत्वाच्च अन्यथा स्वर्गादिज्ञानस्यापि यागादिसाधकप्रवृत्तिद्वारा यागादिजन्यस्वर्गहेतुत्वापत्तेरिति ।

केचित्तु, प्रयोगो हेतुभूतो यस्येति व्युत्पत्त्या प्रयोगाद्धेतोः भूतमुत्पन्नमिति व्युत्पत्त्या वा प्रयोगहेतुभूतपदं शाब्दत्वरूपजातिविशेषविशिष्टपरं, तादृशं यदर्थतत्त्वज्ञानं तदेव जन्यं यस्येति रीत्या शाब्दप्रमाकरणत्वं लक्षणं पर्यवसितं, अर्थपदस्य स्वरूपकथनं । न चैवं लक्ष्यतावच्छेदक-लक्षणयोरभेद इति वाच्यम् । लक्ष्यप्रविष्टस्य भिन्न-

(१) विसंवादिवाक्ये इति ख० ।

(२) वाक्यार्थज्ञानवदानुपूर्वीज्ञानमपि न वाक्यहेतुः मानाभावादिति ख० ।

नतु शब्दो न प्रमाणं तथाहि करणविशेषः प्रमाणं,

लक्षणप्रमाकरणत्वस्य(१) लक्ष्येऽनिवेशात् तयोरभेदेऽपि व्यतिरेकि-त्वात्(२)। प्रमात्वञ्च पूर्ववत् तत्संसर्गक-तत्तत्पदार्थघटितं बोध्य-मिति प्राञ्चरिति संक्षेपः॥

अवसरसङ्गतिमिदानीं प्रामाण्यं व्यवस्थापयितुं प्रथमतो बौद्धमत-माशङ्क्य निराकरोति, 'नन्वित्यादिना, 'न प्रमाणं' न प्रमितिकरणं, करणत्वञ्च फलायोगव्यवच्छिन्नकारणत्वं फलोपधायकत्वमिति यावत्, न तु व्यापारवत्त्वे सति कारणत्वं, प्रमायोगव्यवच्छिन्नाभावस्य तत्प्र-माणहेतोरप्रयोजकत्वापत्तेः। नच स्वप्रत्यक्ष-(३)लिङ्गकानुमित्युपधा-यकत्वात् बाध इति वाच्यम्। शब्दाविषयकानुमितिभिन्नप्रमित्युप-धायकत्वस्य(४) साध्यत्वात्। पक्षे च शब्दपदं शब्दज्ञानपरं, अन्यथा ज्ञायमानस्येऽपि शब्दज्ञानस्यैव प्रमाणत्वात् सिद्धसाधनापत्तेः ज्ञायमान-शब्दस्य करणत्वपक्षे तु यथाश्रुतमेव साधु। न च तथापि अजनित-शाब्दबोधके शब्दज्ञाने तादृशशब्दे वा अंशतः सिद्धसाधनं एवं शब्दो गुण इति शब्दे तज्ज्ञाने वा अंशतः सिद्धसाधनमिति वाच्यम्।

---

(१) लक्ष्यप्रविष्टविलक्षणप्रमात्वस्येति क०, ग०।

(२) तथा च वस्तुगत्या लक्ष्यतावच्छेदक-लक्षणयोरभेदेऽपि उपस्थितानुप-स्थितभेदात् लक्ष्यतावच्छेदक-लक्षणभावसङ्गतिरिति भावः।

(३) अत्र प्रत्यक्षपदं लौकिकप्रत्यक्षपरम्।

(४) अत्र शब्दाविषयकेति प्रमितिविशेषणं तथा च शब्दविषयकत्वशून्या अनुमितिभिन्ना या प्रमितिः तदुपधायकत्वस्येत्यर्थः।

पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्[1]। न चैवमनुमानमेव 'नाप्रत्यक्षं प्रमाणं' इति वात्स्यायनाभिहितं तत् किमर्थमुपेक्ष्यते, इति वाच्यम्। तत्र हि अनुमानं यदि न प्रमाणं तदा तेन प्रतिपन्न एव शब्दः प्रमाणं भविष्यतीति शब्दोऽपि न प्रमाणमित्याशयः इह तु सत्यनुमानप्रामाण्ये तथापि फलव्यभिचारेण करणत्वाभावात् स न प्रमाणमित्याशयः। न च शब्दस्य प्रमोपधायकत्वानभ्युपगमे शब्दश्रवणानन्तरं विशिष्टानुभवः कथं स्यादिति वाच्यम्। एतन्मते शब्दश्रवणानन्तरं विशिष्टानुभवस्यैवासिद्धेः किन्तु पदार्थोपस्थितिस्तत्संसर्गाग्रहमात्रम्। यद्वा[2] शब्देन प्रत्येकं तत्तत्पदार्थोपस्थितौ मनसैव सर्वत्र साक्षात्कारात्मको विशिष्टानुभवः इत्यभिप्राय इति न काप्यनुपपत्तिः। अत्र च शब्दः तज्ज्ञानं वा शब्दाविषयकानुमितिभिन्नप्रमित्युपधायकं न वेति विप्रतिपत्तिः, पक्षतावच्छेदकसामानाधिकरण्येन विधेः पक्षतावच्छेदकावच्छेदेन च निषेधस्य सिद्धेरुद्देश्यत्वात् नाज्ञातशाब्दबोधके शब्दे शब्दोऽगुण इति शब्दे च विधिकोटावंशतो बाधो निषेधकोटावंशतः सिद्धसाधनमिति।

केचित्तु, शब्दत्वं तज्ज्ञानत्वं वा तादृशप्रमित्युपधायकतावच्छेदकं न वेति विप्रतिपत्तिर्नातोऽंशतो बाधाद्यवकाशः, शब्दत्वन्तु शब्दपद-

(१) तथापावच्छेदावच्छेदेनानुमितौ सामानाधिकरण्यमात्रेण सिद्धेरप्रतिबन्धकत्वात् न सिद्धसाधनमिति भावः।

(२) ननु विशिष्टमतेरननुभविकत्वात् अनुमत्यन्यथाप इत्यस्वरसादाह यद्वेति।

कारणञ्च तत् यस्मिन् सति क्रिया भवत्येव । न च शब्दे सति प्रमा भवत्येवेति नायं शब्दः प्रमाणं[१] । न च शब्दो न प्रमाणमिति[२] वाक्यस्य प्रामाण्याप्रमाण्ययोर्व्याघातः, अस्याप्रामाण्येऽपि एत-

---

प्रवृत्तिनिमित्तमुभयवादिसिद्धमेव केवलं जातिरूपत्वे अतद्व्यावृत्ति-रूपत्वे च विवाद इत्याहुः[३] ।

कुतो न प्रमाणं तत्र हेतुमाह, 'तथाहीति, 'करणविशेषः' प्रमायाः करणं, 'क्रिया भवत्येव' कार्य्यमुत्पद्यत एवेत्यर्थः, तथाच कार्य्योपधायकत्वं करणत्वमिति भावः, 'प्रमा भवत्येव' अवश्यं प्रमा भवति, आकाङ्क्षादिज्ञानविरहदशायां पदार्थस्मरणादिव्यापार-विरहदशायाञ्च शब्दात् प्रमानुत्पत्तेरिति भावः । तथाच प्रमोप-धायकत्वात्यन्ताभावो हेतुः, प्रमा च शब्दाविषयकत्वेन अनुमिति-भिन्नत्वेन च विशेषणीया तेन स्वलिङ्गकानुमितिं स्वप्रत्यक्षञ्चादाय न स्वरूपासिद्धिः । न च साध्याविशेषः, तादृशप्रमोपधायकान्यत्वस्य साध्यतया अन्योन्याभावात्यन्ताभावभेदेन भेदादिति हृदयम् । 'वाक्यस्य' भवदुक्तवाक्यस्य, 'प्रामाण्याप्रामाण्ययोः' प्रमोपधायकत्वे

---

(१) नायं प्रमाणमिति क० ।

(२) न च न शब्दः प्रमाणमितीति क० ।

(३) शब्दत्वस्य जातिरूपत्वं गुणगतजात्यनङ्गीकर्तृपरमते विवादः शब्दत्वस्य अतद्व्यावृत्तिरूपत्वे अखण्डोपाधिरूपत्वे शब्दत्वस्य जातित्वाङ्गीकर्तृ-स्वमते विवाद इति समुदिततात्पर्य्यम् ।

दुत्पाद्यमानाविसंवादादिति[१] चेत्, न, चार्वाकाद्यभिमत

अप्रमोपधायकत्वे च, 'व्याघातः' शब्दस्य प्रमोपधायकत्वव्याघातः, प्रमोपधायकत्वे आयातं शब्दस्य साक्षादेव प्रमोपधायकत्वं, अप्रमोपधायकत्वे हि अप्रमोपधायकत्वं भ्रमोपधायकत्वं, प्रमित्यनुपधायकत्वं वा, आद्ये आयातं शब्दमात्रस्यैव प्रमोपधायकत्वं, विषयबाधेनैव प्रकृतवाक्यजन्यज्ञानस्य भ्रमत्वात्[२]। अन्त्ये शब्दस्य प्रमोपधायकत्वे मानाभावः भवद्वाक्यस्यैव तत्र मानत्वादिति भावः[३]। 'अप्रामाण्येऽपि' प्रमित्यनुपधायकत्वेऽपि, 'एतदुत्पाद्यमानेति एतच्छब्दपदार्थोपस्थिति-तत्संसर्गविषयकज्ञानस्य इत्यर्थः, 'अविसंवादात्' अविसंवादिज्ञानजनकत्वात् शब्दस्य प्रमोपधायकत्वविषयकप्रमाजनकत्वादिति यावत्, तथा च मत एव शब्दस्य प्रमोपधायकत्वे मानं, हेतुनिर्देशस्य अप्रामाण्याशङ्कानुरोधेनेति भावः। क्वचित्तु 'एतदुत्पाद्यानुमानाविसंवादादिति पाठः तत्रैतज्जन्यसाध्य-साधनादिरूपपदार्थोपस्थिति-तत्संसर्गविषयकानुमानस्य शाब्दप्रमोपधायकत्वप्रयोजकत्वादित्यर्थः, तथा चानुमानमेव शब्दस्य प्रमोपधायकत्वे मानमिति भावः। न च चार्वाकेणानुमानस्यापि प्रामाण्यमनुप-

---

(१) एतदुत्पाद्यानुमानाविसंवादादितीति क०।

(२) 'प्रकृतवाक्यजन्यज्ञानस्य' शब्दो न प्रमाणमित्याकारकवाक्यजन्यज्ञानस्य, 'भ्रमत्वात्' बाधितविषयकत्वादित्यर्थः।

(३) तथा च यदि 'शब्दः न प्रमाणं' इति भवदुक्तवाक्यं प्रमित्यनुपधायकं तदा शब्दमात्रस्य प्रमित्यनुपधायकत्वं निष्प्रमाणकमिति भावः।

पदार्थस्मरणादिव्यापारवतः प्रमाणत्वेन तथाभूतात् प्रमोत्पत्तेरावश्यकत्वात् अतथाभूतत्वे च फलाजनक-

---

त्वमादिदमप्रकृतमिति वाच्यम्। एतत्पाठपक्षे सौगतमतस्य पूर्वपक्षित्वादिति ध्येयम्। स्वमते भागासिद्धिमाह, 'आकाङ्क्षादी'ति आकाङ्क्षाज्ञानादिविशिष्टस्येत्यर्थः, 'आदिना योग्यताज्ञानासत्तिज्ञान-तात्पर्यज्ञान-विरोधिनिश्चयाभावादिप्रतिबन्धकाभावपरिग्रहः[१], 'पदार्थस्मरणादी'ति पदार्थस्मरणादिरूपव्यापारविशिष्टस्येत्यर्थः, 'आदिना अवान्तरवाक्यार्थबोधपरिग्रहः। आकाङ्क्षाज्ञानन्तु न पदज्ञानव्यापारः अनुमानादिना तज्ज्ञानेऽपि शाब्दोदयादिति तस्य पृथङ्निर्देशः, 'प्रमाणत्वेन' प्रमासामग्रीविशिष्टत्वेन, 'आवश्यकत्वा'दिति, तथाच सर्वत्र शब्दे सौगतवादिभिन्नो हेतुरिति भावः[२]।

नन्वाकाङ्क्षादिज्ञानविशिष्टशब्देऽप्याकाङ्क्षादिज्ञानरूपसामग्रीविरहदशायां प्रमोपधायकत्वाभावस्याभ्युपगत इति न भागासिद्धिरित्यत आह, 'अतथाभूतत्व' इति इतरसामग्र्यसमवधान इत्यर्थः, 'चकारः' 'सांख्यादि'त्यनन्तरं योज्यः, 'फलाजनकत्वस्य' प्रमात्वोपधायकत्वाभावस्य, 'करणान्तरे'ति करणान्तरे चक्षुरादावपि सत्त्वाच्चेत्यर्थः, तथाच चक्षुरादौ व्यभिचार इति भावः। अन्योन्याभावस्य व्याप-

---

(१) आदिना योग्यताज्ञानासत्तिज्ञान-विरोधिनिश्चयाभावादिप्रतिबन्धकाभावपरिग्रह इति ख०।

(२) तथाच पक्षतावच्छेदकसामानाधिकरण्येन हेत्वभावात् भागासिद्धिरिति भावः।

वृत्तित्वनियमेन नच साध्यावत्त्वात् प्रमाकरणोपधायकत्वात्यन्ताभावस्य साध्यत्वे सिद्धसाधनादिति भावः।

अत्र केचित् शब्दस्य स्वप्रत्यक्षानुमितिभिन्नप्रमाजनकत्वे मानाभावः। न चैवं वाक्यश्रवणानन्तरं वाक्यार्थबोधः कथं स्यादिति वाच्यम्। वाक्यघटकीभूततत्तत्पदेभ्यस्तत्तत्पदार्थोपस्थितौ मनसैवोपनीतभानात्मकवाक्यार्थबोधसम्भवात्। न च तथापि वाक्यश्रवणानन्तरं शाब्दत्वजातिविशेषविशिष्टवाक्यार्थबोधः कथं स्यात्तादृशजात्यवच्छिन्नबोधस्यापि पदार्थोपस्थितिमनस्कतमनःप्राच्यहेतुकत्वे मानसत्वविशिष्टसाक्षात्कारमात्रस्यैव शाब्दत्वापत्तिरिति वाच्यम्। शाब्दत्वव्याप्यातिरिक्तजातौ मानाभावात् शाब्दत्वस्यातिरिक्तजातेरभ्युपगमे तदवच्छिन्नोत्पत्तिनिर्वाहकतया[1] वृत्त्या पदजन्यपदार्थोपस्थित्यादेर्हेतुतायाः अवश्यकल्पनीयत्वेन गौरवप्रसङ्गादित्याहुः। तदसत्, अमुमर्थं शाब्दयामि अयमर्थः शाब्दित इत्याद्यनुभवसिद्धायाः शाब्दत्वजातेरपह्नोतुमशक्यत्वात्। अतएव तदवच्छिन्नं प्रति वृत्त्या पदजन्यपदार्थोपस्थित्यादेः कारणत्वकल्पनागौरवमपि प्रामाणिकत्वान्न दोषाय। वस्तुतस्तु अमुमर्थं शृणोमि श्रुतमिदं पुराणादिभ्य इत्याकारानुभवसिद्धैव शाब्दत्वजातिः। न च श्रुधातोः श्रावणप्रत्यक्ष एव शक्तेः शाब्दत्वजातिः कथं तादृशानुभवविषय इति वाच्यम्। श्रुबोधमात्रार्थत्वात् "आत्मा वाऽरे श्रोतव्यो मन्तव्य इत्यादिश्रुतौ[2] तथा अयमर्थः श्रुत इत्यादिलौकिकवाक्ये च शाब्दबोधेऽपि प्रयोगात्।

(१) तदवच्छिन्नोत्पत्तिनिर्वाहिकाया इति ख०, ग०।

(२) "आत्मा वाऽरे मैत्रेयि श्रोतव्यः" इत्यादिश्रुताविति ख०, ग०।

न च तत्र शाब्दे व्यभिचार इति वाच्यम् । ध्रुवः प्रत्यक्षे व्यभिचारस्यापि[1] तुल्यत्वात् । अथास्तु शाब्दत्वं जातिरस्तु वा तदवच्छिन्नं प्रति पदज्ञानजन्यपदार्थोपस्थित्यादेर्हेतुत्वं, तथापि सा जातिर्मानसत्वव्याप्यैव तथाच चक्षुरादिवच्छब्दोऽपि प्रत्यक्षप्रमाणान्तर्गत एव न तु प्रमाणान्तरं । न च तस्य मानसत्वव्याप्यत्वे यागादेः शाब्दबोधानन्तरं यागं साक्षात्करोमीत्यनुव्यवसायापत्तिः तच्च इदं मानुमितं न वा साक्षात्कृतं किन्तु श्रुतमेवेदं पदेभ्य इत्यनुव्यवसायाभावापत्तिश्चेति[2] वाच्यम् । लौकिकविषयतास्वरूप[3]साक्षात्कारत्वावच्छिन्नविषयत्व-तदभावयोरुक्तविषयत्वात्[4] । अन्यथा सुरभि चन्दनं इत्युपनीतभानानन्तरं सौरभं साक्षात्करोमीत्यनुव्यवसायापत्तेः सौरभं न साक्षात्करोमीत्यनुव्यवसायाभावापत्तेश्च[5] । न च तस्य मानसत्वव्याप्यत्वे उद्बुद्धोपस्थितघटादीनामपि[6] यागादिशाब्दबोधे उपनीतभानापत्तिः तथाच यागादिकं शृणोमीत्यनुव्यवसायवत् घटादिकं शृणोमीत्यनुव्यवसायः स्यादिति वाच्यम् । शाब्दत्वावच्छिन्नविषयतायास्तत्राभावेन

---

(१) शाब्दे प्रसिद्धिः श्रावणप्रत्यक्षे व्यभिचारस्यापीति ख०, ग० ।

(२) इत्यनुव्यवसायानुपपत्तिश्चेतीति ख०, ग० ।

(३) लौकिकविषयतात्मकेति ख०, ग० ।

(४) तथाचैतन्मते शाब्दस्य मानसोपनीतभानात्मकतया लौकिकविषयताभावात् यागादेः शाब्दबोधानन्तरं न यागं साक्षात् करोमीत्यनुव्यवसायापत्तिर्वा इदं न साक्षात्कृतमित्यनुव्यवसायानुपपत्तिरिति भावः ।

(५) इत्यनुव्यवसायानुपपत्तेश्चेति ख०, ग० ।

(६) पदाजन्योपस्थितघटादीनामपीत्यर्थः ।

तादृशानुव्यवसायाभावात्, यद्यपि इच्छया पदजन्यपदार्थोपस्थित्यादि-
जन्यत्वं तत्रैव तादृशविषयतायाः सत्त्वादिति चेत्, न, शाब्दत्वजाते-
र्मानसत्वव्याप्यत्वे मानाभावात्, तदवच्छिन्नं प्रति इच्छया पदजन्य-
पदार्थोपस्थित्याकाङ्क्षाज्ञानादेर्हेतुत्वस्यावश्यकत्वेन लाघव-गौरवानव-
काशात्। न च शाब्दसामग्रीदशायां मानससामग्र्यावश्यकत्वात् मानस-
सामग्र्येव मानमिति वाच्यम्। मानसज्ञानं प्रति शाब्दसामग्र्याः प्रति-
बन्धकत्वाभावस्यासिद्धतया तदानीं मानससामग्र्या अपि सन्दिग्ध-
त्वात्। न च शाब्दत्वस्य मानसत्वविरुद्धत्वे मानसत्वावच्छिन्नं प्रति
शाब्दसामग्रीप्रतिबन्धकत्वस्य कल्पनीयतया तद्व्याप्यत्वे च न तथेति
लाघवतर्कसहकृतं(१) मानसत्वव्याप्यत्व-तदभावान्यतरसाध्यकप्रमेयत्व-
हेतुकानुमानमेव प्रमाणमिति वाच्यम्। न हि ममापि मानसत्वा-
वच्छिन्नं प्रति शाब्दसामग्रीत्वेन प्रतिबन्धकत्वं, अपि तु अनुमित्यादि-
सामग्रीसाधारणेन ज्ञानान्तरज्ञानसामग्रीत्वेन, तस्यानुमित्याद्युत्पत्ति-
दशायां मानसोत्पत्तिवारणाय भवतामप्यावश्यकमिति कुतो
लाघवं परन्तु विपरीतमेव गौरवं तथाहि शाब्दत्वस्य मानसत्व-
विरुद्धत्वे मानसेतरज्ञानसामग्र्या मानसत्वमेव प्रतिबध्यतावच्छेदकं
तद्व्याप्यत्वे तु शाब्देतरमानसत्वमेव प्रतिबध्यतावच्छेदकं अन्यथा
स्मृतिसामग्रीसत्त्वे भिन्नविषयकलौकिकप्रत्यक्षसामग्रीसत्त्वे चाक्षुषा-
द्युपनीतभानादिसामग्रीसत्त्वे च मानसान्तरवत् शाब्दात्मकमानस-
स्याप्यनुत्पत्त्यापत्तेः। किञ्च शाब्दत्वस्य मानसत्वव्याप्यत्वे यत्र पदजन्य-
यागाद्युपस्थितिरिच्छया घटाद्युपस्थितिश्च समूहालम्बनोपस्थितिरूपा

(१) लाघवज्ञानसहकृतमिति क०।

त्वस्य करणान्तरसाम्यात्[1] । तथापि शब्दो न प्रमा-

तत आकाङ्क्षा-योग्यतादिसमूहालम्बनं ततो यागादेः शाब्दबोधः तच्च शाब्दबोधसमये चक्षुरुपस्थितघटादेरपि मानसापत्तिः । न चेष्टापत्तिः, शाब्दबोधानन्तरं घटं जानामीत्यनुव्यवसायापत्तेः, अपि च, योग्यतासंशयदशायामपि शब्दश्रवणानन्तरं वाक्यार्थनिश्चयोऽनुभवसिद्धः स कथं स्यात् योग्यतासंशये सति मानससंशयसामग्रीसत्त्वात् तदर्थसंशयोत्पत्त्यापत्तेः एकपदार्थेऽपरपदार्थवत्त्वस्य योग्यतात्वादिति कृतं पल्लवितेन ।

इदानीं वैशेषिकमतमाशङ्कते, 'तथापीति आकाङ्क्षादिज्ञानविशिष्टस्य शब्दस्य शाब्दविषयकप्रमोपधायकत्वेऽपीत्यर्थः, 'न प्रमाणान्तरमिति, ननु प्रमाणान्तरत्वं यदि स्वभिन्नप्रमाणत्वं तदा तदभावे साध्ये सिद्धसाधनं[2] । अथ प्रत्यक्षानुमानभिन्नप्रमाणत्वं तदा तन्मते असिद्धिः तैरुपमानानभ्युपगमात्, अनुमानभिन्नत्वञ्चेत् तदा तदभावे साध्ये सिद्धसाधनं नैयायिकैरपि शब्दलिङ्गकानुमितौ शब्दस्य करणत्वस्वीकारादिति चेत्, न, प्रमाणान्तरत्वं हि अनुमितिभिन्नशाब्दविषयकप्रमितिकरणत्वं, तदभावः साध्यः स्वविषयकप्रत्यक्षकरणतया बाधवारणाय शाब्दविषयकेति । न च प्रत्यक्षकरणत्वमेव नास्ति व्यापाराभावादिति वाच्यम् । स्वविशिष्टबुद्धौ

---

(१) कारणान्तरसाम्यादिति ख० ।

(२) तथा च स्वस्मिन् स्वभिन्नप्रमाणत्वाभावस्य सर्व्ववादिसम्मतत्वमिति भावः ।

प्रमाणान्तरं पदार्थसंसर्गस्यानुमानादेव सिद्धेः(१)। तथाहि

करणत्वसम्भवात् निर्विकल्पकस्यैव व्यापारत्वात्। न चैवं शब्दविषयक-शाब्दकरणे शब्दो गुण इति पक्षे नैयायिकानां अंशतः सिद्धसाधनम् इति वाच्यम्। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात् तद्वि-भागेन वा पक्षत्वात्(२)। यद्वा 'न प्रमाणान्तरं' कृप्तप्रमाणान्तर्गतं, प्रत्यक्षानुमित्यन्यतरत्वव्याप्यतावच्छेदकानुभववृत्तिजन्यतात्मकमिति यावत्, इन्द्रियादावेव प्रसिद्धं, ध्वंसादेरपीन्द्रियादिजन्यतया अप्रसिद्धिवारणाय अनुभववृत्तीति. स्मृतेरनुमानजन्यतया अनु-मानस्य कृप्तप्रमाणान्तर्गतत्वसम्पादनाय ज्ञानत्वं विहायानुभवत्वोपादानम्(३)। एतच्च ज्ञायमानशब्दकरणतापक्षे, शब्दज्ञानकरणतापक्षे तु शब्दज्ञानं पक्षो बोध्यः, तत्र हेतुमाह, 'पदार्थसंसर्गस्येति, 'अनु-मानत एव सिद्धेः' अनुमितिसामग्रीत एव गतात्, अनुमिति-

(१) अनुमानत एव सिद्धेरिति क॰, अयमेव पाठः टीकाकारसम्मत इति।

(२) तादृशशब्दभिन्नशब्दस्य पक्षत्वादित्यर्थः।

(३) 'अनुभवत्वोपादानमित्यनन्तरं 'शाब्देऽप्यस्मादिसाधारणत्वाभावात् तदन-न्तर्गतत्वेन तादृशजन्यतात्मकत्वमात्रोपादाने साध्याप्रसिद्धिः कालादि-निष्ठजनकतानिरूपितजन्यताया अपि अनुभववृत्तित्वात् तद्वृत्तिजन्य-तात्वस्य घटादिजन्यतायामपि सत्त्वात् तादृशजन्यतात्वस्य व्याप्यताव-च्छेदकत्वाभावात् सामानाधिकरण्यसम्बन्धेनानुभववृत्तित्वविशिष्टजन्य-तात्वस्य तादृशव्याप्यतावच्छेदकत्वे त्वनुमानोपलक्ष्यं तादृशजन्यतावच्छेदेन तादृशान्यतरत्वव्याप्यत्वसिद्धावेवोद्देश्यत्वादपि सिद्धेरिति पूर्ववदेव सम्भवमिति ध्येयं' इत्यधिकः पाठः क-चिह्नितपुस्तके वर्त्तते।

सामग्रीभिन्नसामग्र्या अग्रहादिति यावत्, एवञ्च अनुमितिसामग्री-भिन्नसामग्रीजन्यशब्दाविषयकज्ञानाकरणत्वादिति हेतुरिति भावः। ननु अयं हेतुः स्वरूपासिद्धः घटमानयेत्यादिशब्दजन्यज्ञानस्यानुमिति-सामग्रीभिन्नसामग्रीजन्यत्वादित्यत आह, 'तथाहीति'। यद्वा अनुमिति-सामग्रीभिन्नसामग्रीजन्यशब्दाविषयकज्ञानाकरणत्वादिति हेतुरस्तु, ननु अयं हेतुः स्वरूपासिद्धः तादृशसामग्रीजन्यशब्दाविषयकज्ञानं पदार्थसंसर्गज्ञानमेव तस्यैव करणत्वात् शब्दस्येत्यत आह, 'पदार्थसंसर्ग-स्येति, 'सिद्धेः' ग्रहात्, तथाच तादृशसामग्रीजन्यत्वमेव पदार्थसंसर्ग-ज्ञाने नास्तीति भावः। अनुमानेन सिद्धिप्रकारमेवाह, 'तथाहीति, यद्यपि कृप्तप्रमाणान्तर्गतत्वे साध्ये नायं हेतुः सम्भवति अतीन्द्रिये परमाण्वादौ व्यभिचारात् तथापि तस्मिन् साध्ये 'अनुमानतः' अनु-मानविधया, 'सिद्धेः' साधकत्वादित्यर्थः, तथाच पदार्थसंसर्गानुमाप-कत्वादिति हेतुरिति भावः। पदार्थसंसर्गानुमापकत्वमेव कथं तदाह, 'तथाहीति'।

केचित्तु 'शब्दो न प्रमाणान्तरं' इत्यस्य शब्दत्वं तज्ज्ञानत्वं वा अनुभवत्वसाक्षात्त्वव्याप्यजात्यवच्छिन्नकार्य्यताप्रतियोगिककारणताव-च्छेदकं नेत्यर्थः, तत्र साधकाभावादिति हेतुरस्तु। ननु शब्दश्चेन्न प्रमाणान्तरं तदा घटमानयेत्यादिवाक्यप्रयोगानन्तरं[1] पदार्थसंसर्ग-बोधः कथं स्यादित्यत आह, 'पदार्थेति, अनुमानतः सिद्धिप्रकार-मेव विवृणोति, 'तथाहीतीत्याहुः।

---

(१) घटमानयेत्यादिवाक्यश्रवणानन्तरमिति ख०, ग०।

गामभ्याज दण्डेनेति[१] पदानि वैदिकपदानि वा तात्पर्य्यविषयस्मारितपदार्थसंसर्गज्ञानपूर्व्वकाणि

पदश्रवणानन्तरं पदार्थोपस्थितिस्तदनन्तरं पदानि पक्षीकृत्य पदार्थान् पक्षीकृत्य वा पदार्थसंसर्गः श्रोत्रानुमीयते न तु पदार्थसंसर्गस्य शाब्दबोधः इति वैशेषिकमतं तत्रादौ पदपक्षकानुमानप्रकारं दर्शयति, 'दण्डेनेति, पदार्थपक्षकमग्रे वक्ष्यते, गुरुनये लौकिकः शब्दोऽनुवादकः वैदिक एव प्रमाणं तन्मतनिरासार्थं वैदिकपदानि पक्षीकृत्य वैदिकस्थलेऽप्यनुमानात् पदार्थसंसर्गसिद्धिप्रकारं दर्शयति, 'वैदिकेति. अत्र वैदिकशब्दत्वेन न पक्षता किन्तु स्वर्गकामोऽग्निष्टोमेन यजेतेत्यादिक्रमेण अन्यथा पदार्थादेर्विशिष्टज्ञानासम्भवादिति बोध्यं। 'तात्पर्य्यविषयेति तात्पर्य्यविषयीभूतोयः स्मारितपदार्थसंसर्गः तज्ज्ञानपूर्व्वकाणीत्यर्थः'। न च तात्पर्य्यविषयीभूतोयः संसर्गस्तज्ज्ञानपूर्व्वकाणीत्येव सम्यक् किं स्मारितपदार्थेत्यनेनेति वाच्यम्। दण्डेन गामभ्याजेति प्रयोगानन्तरं गोपदार्थाम्पदार्थादिविषयकज्ञानमनुभवसिद्धं अनुमानेनापि तादृक्ज्ञानं करणीयं अन्यथा तद्विषयकज्ञानार्थं शब्दस्य प्रमाणान्तरत्वापत्तिरतस्तदुपादानात्। न च तथापि कर्मत्वे गोसंसर्गावगाहिज्ञानं कर्मत्वं गोमन्न वेति संशयनिवर्त्तकं तच्च एतदनुमानान्न वृत्तं तेन शब्दोऽवश्यं प्रमाणान्तरमङ्गीकार्य्यमिति वाच्यम्। तात्पर्य्यविषयः स्मारितपदार्थसंसर्गो यत्र तज्ज्ञानपूर्व्वकाणीतिव्युत्पत्त्या तात्पर्य्यविषयस्मारितपदार्थसंसर्ग-

(१) दण्डेन गामभ्याजेतीति ख०, एतत्पाठस्यैव टीकाकारसम्मतत्वमिति।

...ज्ञानपूर्व्वकत्वमिति[1] वाच्यम्[2]। न च स्मारितेति कथं तत्तत्पदार्थे तथा पदार्थसम्बन्धेन गोसंसर्गवत्कर्मत्वज्ञानपूर्व्वकत्वं सिद्धमिति तथा पदार्थसम्बन्धेन घटादिसंसर्गवत्कर्मत्वज्ञानपूर्व्वकत्वस्यापि सिद्ध्यापत्तेः। न च तत्संसर्गस्य तात्पर्य्याविषयतया कथं तत्संसर्गवत्कर्मत्वज्ञानपूर्व्वकत्वं सेत्स्यतीति वाच्यम्। यदा पदार्थसंसर्गोऽपि तात्पर्य्यविषयः अयं च गवादिपदेन स न स्मारितस्तदा तत्सिद्ध्यापत्तेः। न च प्रकृतपदे तज्ज्ञानपूर्व्वकत्वस्य बाधादेव न सिद्धिरिति वाच्यम्। यदा तज्ज्ञानमपि वक्तुः पूर्व्वमस्ति तदा बाधाभावात्, स्मारितत्वोपादाने तु तस्य तदानीमस्मारिततया न तत्संसर्गवज्ज्ञानपूर्व्वकत्वसिद्धिः। न च तत्सिद्धावपि न क्षतिः उद्देश्यस्य कर्मत्वे गोसंसर्गावगाहिज्ञानस्य वृत्तत्वादधिकन्तु प्रविष्टमिति न्यायादिति वाच्यम्। तथा सति दण्डेनेत्यादिप्रयोगानन्तरं घटाद्यविषयकज्ञानमनुभवसिद्धं अनुमानेन च तत्र वृत्तमिति तदर्थं शब्दस्य प्रमाणान्तरतापत्तेः एवं सर्व्वत्र बोध्यं[3]। न च घटादिरपि

---

(१) न च तथापि तत्सम्बन्धेन गोमत्त्वनिश्चयस्यैव विरोधित्वात् तस्यानिश्चयात् सद्दोषत्वादवश्यमिति वाच्यं। तत्सम्बन्धेन तज्ज्ञानस्येव तत्र तत्प्रयोजकतत्सम्बन्धवत्त्वज्ञानस्यापि विरोधित्वादिति भावः।

(२) साध्यत्वादिति क०।

(३) 'एवं सर्व्वत्र बोध्यं' इत्यनन्तरं 'न च तथाप्यनुमितौ ज्ञानपूर्व्वकत्वस्याधिकस्य भानात् शाब्दानुमानातिरिक्तविषयत्वमनुमितेरसिद्धमिति वाच्यं। ज्ञानपूर्व्वकत्वाद्यतिरिक्तशाब्दविषयविशेष्यप्रकारकसंसर्गातिरिक्तविशेष्यप्रकारसंसर्गाविषयत्वमन्यूनानतिरिक्तविषयकत्वं तच्च तादृशपूर्व्वकभानेऽपि तादृशानुमितावक्षुण्णमित्यभिप्रायादिति ध्येयं' इत्यधिकः पाठः क-चिह्नितपुस्तके वर्त्तत इति।

घटादिपदेन आसत्ति एवेति वाच्यम् । आसत्तिपदस्य ... प्रकृतपदस्मारितेत्यर्थः[1] प्रकृतपदस्मारितत्वं द्वितीयपदार्थेऽपि विशेषणं द्रष्टव्यं अन्यथा यदा कारकत्व-कर्मत्वोभयनिष्ठगोसंसर्ग एव तात्पर्य-वर्तते अथ चाम्पदेन करणत्वं न स्मारितं तदा तात्पर्यविषयकर्म-गोपदस्मारितार्थसंसर्गवत्पदार्थत्वरूपेण करणत्वज्ञानपूर्वकत्वस्यापि सिद्ध्यापत्तेः तत्सिद्धौ च तदानीं करणत्वाविषयकज्ञानस्यानुभवसिद्धस्यानुमानादनिर्वाहात्[2] तदर्थं ग्रन्थस्य प्रमाणान्तरतापत्तेः, यत्र च तात्पर्यविषयो य एतद्गोपदस्मारितार्थसंसर्गस्तद्वान् यः एतदमपदस्मारितार्थस्तज्ज्ञानपूर्वकाणि एवं तात्पर्यविषयीभूतो य एतद्गोपदस्मारितार्थसंसर्गस्तद्वान् य एतदम्पदस्मारितार्थस्तज्ज्ञानपूर्वकाणीत्यादिक्रमेण नानैव साध्यं समूहालम्बनानुमितिः । न च यदा दण्डेनेत्यादिप्रयुक्तेन गोपदेन सम्बन्धिविधया आकाशमपि स्मारितं कर्मत्वनिष्ठतत्संसर्गोऽपि तात्पर्यविषयः तदा एतद्गोपदस्मारितत्वरूपेण आकाशादिसंसर्गवत्कर्मत्वज्ञानपूर्वकत्वस्यापि सिद्धिप्रसङ्गादिति वाच्यम् । वृत्त्या[3] एतद्गोपदस्मारितत्वस्य विवक्षितत्वात् एवममपदस्य स्मारितत्वमपि वृत्त्या विवक्षणीयं, अन्यथा यत्ममपदेन येनकेनचित्

(१) प्रकृतपदस्मारितेत्यर्थादिति क० ।

(२) करणत्वाविषयकज्ञानस्यानुमानादनिर्वाहादिति ख०, ग० ।

(३) अत्र वृत्तित्वं शक्ति-लक्षणान्यतरसम्बन्धत्वं, तथा च सम्बन्धेन तादृशान्यतरसम्बन्धज्ञानजन्यपदस्मारितत्वं अत्र विवक्षणीयं, अतः उक्तस्थले आकाशस्य समवायत्वेन गगनत्वरूपसम्बन्धज्ञानजन्यपद-स्मारितत्वेऽपि न वृत्त्या पदस्मारितत्वमिति ।

सम्बन्धेन करणत्वमपि स्मारितं तन्निष्ठयोर्संसर्गोऽपि तात्पर्य्यविषयः तदा तस्यापि सिद्ध्यापत्तेः, तात्पर्य्यविषयत्वं संसर्गविशेषणञ्च[१] यदाम्-पदार्थकर्म्मत्वनिष्ठगोपदार्थस्य समवायरूपसंसर्गतात्पर्य्येण दण्डेनेत्यादि-वाक्यं प्रयुक्तं तदा एतद्गोपदस्मारितार्थसंसर्गत्वरूपेण एककालीनत्वा-दिसंसर्गवत्कर्म्मत्वज्ञानपूर्व्वकत्वस्यापि सिद्धिवारणाय। तात्पर्य्यविषय-त्वञ्च एतत्पुरुषीया एतत्कालीना या एतद्वाक्यजन्यप्रतीतीच्छा तद्विषयत्वं, यदा एककालीनत्वादौ समवाये च तात्पर्य्येण दण्डेने-त्यादिवाक्यं प्रयुक्तं तदा तात्पर्य्यविषयीभूतैतद्गोपदस्मारितार्थसंसर्गत्व-रूपेण एककालीनत्वादिसंसर्गवत्कर्म्मत्वज्ञानपूर्व्वकत्वस्यापि सिद्धिः स्यादित्याकाङ्क्षानिरूपकत्वमपि संसर्गविशेषणं देयं,[२] आकाङ्क्षानि-रूपकत्वञ्च एतद्गोपदनिरूपितैतदम्पदनिष्ठाकाङ्क्षानिरूपकत्वं, अन्यथा एककालीनत्वादेरपि कुत्रचिदाकाङ्क्षानिरूपकत्वेन तद्दोषतादव-स्थ्यात्। न च वैशेषिकैः शाब्दत्वजातेरनभ्युपगमात् तन्मते आकाङ्क्षा-निरूपकत्वं[३] दुर्व्वचमिति वाच्यम्। तैरपि शाब्दत्वजातिरभ्युपेयत-एव परन्तु सा जातिरनुमितिवृत्तिरनुमितित्वव्याप्यत्वेनैवाभ्युप-गमात्, अस्तु वा तत्तत्संसर्गभिन्नसंसर्गत्वमेवाकाङ्क्षानिरूपकत्वं,[४] एवं यदा गवि कर्म्मत्वे च तात्पर्य्येण दण्डेनेत्यादिकं वाक्यं प्रयुक्तं अथ

---

(१) संसर्गविशेषणत्वञ्चेत्यस्य अग्रिमेण सिद्धिवारणायेत्यनेन सहान्वयः।

(२) आकाङ्क्षानिरूपकत्वस्यापि संसर्गविशेषणत्वमिति ख०, ग०।

(३) शाब्दबोधानुकूलानुपूर्व्वीमत्त्वरूपाकाङ्क्षानिरूपकत्वस्य शाब्दत्वघटित-त्वेन तादृशजात्यनभ्युपगमे तस्य दुर्व्वचत्वमिति तात्पर्य्यम्।

(४) आकाङ्क्षानिरूपकसम्बन्धत्वमिति क०।

आकाङ्क्षादिमत्पदकदम्बत्वात् घटमानयेतिवत्।

च गोपदेन लक्षणया घटादिरपि स्मारितः अमुपदेन लक्षणया करणत्वमपि स्मारितं तयोः संसर्गोऽपि तात्पर्यविषयः एतदुभयन्तु न तात्पर्यविषयः तदा एतद्गोपदस्मारितार्थसंसर्गवदेतदमुपदार्थत्व-रूपेण घटादिसंसर्गवत्करणत्वज्ञानपूर्वकत्वस्यापि सिद्धिः स्यादिति गोपदस्मारितार्थेऽमुपदस्मारितार्थे च तात्पर्यविषयत्वं विशेषणं देयं। ननु गोपदार्थामुपदार्थघटितसाध्ये संसर्गे तात्पर्यविषयत्वविशेषणं व्यर्थं तात्पर्याविषयीभूतैककालीनत्वादिसंसर्गस्य प्रकृतस्थले आकाङ्क्षाया-अनिरूपकत्वादेवासिद्धेः इति चेत्, सत्यं, तदुभयघटितसाध्ये न देयमेव तत्, किन्तु यत्राध्याहृतपदमपि पक्षीकृतं तत्र सानुकूलत्व-विषयत्वाख्यसम्बन्धद्वयमेवाकाङ्क्षानिरूपकं तदभिप्रायेण मूले तदु-पादानमिति सर्वं रमणीयं। 'आकाङ्क्षादिमत्पदकदम्बत्वादिति' गोपदाकाङ्क्षादिमदमुपदत्वात् दण्डपदाकाङ्क्षादिमद्वापदत्वादित्यर्थः, समूहालम्बनस्य परामर्शः, 'आकाङ्क्षादीत्यादिना योग्यतापरिग्रहः, यत्पदाकाङ्क्षायोग्यतावत्तत्पदं भवति[1] तत् तत्तात्पर्यविषयीभूतो यः वृत्त्या तत्पदस्मारिततात्पर्यविषयीभूतस्यार्थस्याकाङ्क्षानिरूपक-संसर्गः तद्वान् यो वृत्त्या तत्पदोपस्थापिततात्पर्यविषयीभूतार्थः तज्ज्ञानपूर्वकमिति सामान्यमुखी व्याप्तिः[2] विशेषव्याप्तौ 'घटमान-

(१) यद् यत्पदाकाङ्क्षायोग्यतावद्यद्यत्पदं भवतीति ख०।

(२) अत्रेदं चिन्त्यं यतश्चाद्यां सामान्यत उदाहरणवाक्याधीनसामान्यव्याप्ति-लाभः ततो विशेषहेतुपरामर्शः, अथ वा तादृशोदाहरणानन्तरं

पीति वृत्त्यानामकृतेः। यत्र च वह्निना सिञ्चतीत्यादौ टापदाकाङ्क्षा-दिमत्सिच्पदे व्यभिचारः सिच्पदार्थस्य एतट्टापदोपस्थापितार्थ-संसर्गवत्त्वाभावादतो यत्पदयोग्यतावत्त्वं हेतावुपात्तं, तदर्थस्य न यत्पदार्थाबाधितार्थकत्वं, तथासति यत्पदद्वयेन पदार्थौ नोपस्थापितौ परस्परमबाधितार्थकन्तु भवति तत्रैव व्यभिचारापत्तेः तदुभयपद-स्मारितस्यैवार्थस्याप्रसिद्धेरपि तु वृत्त्या यत्पदस्मारितार्थाबाधितार्थस्य वृत्त्या स्मारकत्वं तत्, अत्रार्थद्वय एव तात्पर्य्यविषयत्वं विशेषणं देयं, अन्यथा तात्पर्य्यं विनैव यत्पदद्वयं प्रयुक्तं अथ च वृत्त्या स्मारितार्थकं परस्परमबाधितार्थकञ्च भवति तत्रैव व्यभिचारापत्तेः तात्पर्य्य-विषयीभूतस्यैव तदर्थस्याप्रसिद्धेः, अबाधितत्वन्तु तात्पर्य्यविषयसंसर्गेण बोध्यं अन्यथा पदार्थमात्रे तात्पर्य्येण यत्पदद्वयं प्रयुक्तं तत्संसर्गे तात्पर्य्यं नास्ति किन्तु पदार्थोपस्थापकत्वं अबाधितार्थकत्वञ्च वर्त्तते तत्रैव व्यभिचारापत्तेस्तात्पर्य्यविषयतत्पदार्थसंसर्गस्यैवाप्रसिद्धेः। न च

सामान्यहेतौ व्याप्तिज्ञानं ततोऽस्मादेव व्याप्तिविशिष्टविशेषहेतोः पक्षधर्म्मताज्ञानात् विशेषसंयोगेन साध्यसिद्धिरिति यत्तद्घटितसा-मान्यव्याप्तिज्ञापकसामान्योदाहरणस्थले कार्य्य-कारणभावः तथाच यत्पदाकाङ्क्षा-योग्यतासत्तिमत्पदं भवति तत् तत्तात्पर्य्यविषयीभूतो यः वृत्त्या तत्पदस्मारिततात्पर्य्यविषयीभूतस्यार्थस्य आकाङ्क्षादिम-त्पदसंसर्गी तद्वान् गो वृत्त्या तत्पदोपस्थापिततात्पर्य्यविषयीभूतार्थः तज्ज्ञानपूर्व्वकम्भवति इत्युदाहरणानन्तरं सामान्यहेतौ व्याप्तिग्रहणात् अमुपदं गोमत्वधर्म्मताज्ञानपूर्व्वकं गोपदाकाङ्क्षावदमुपदत्वादिति अनेन हेतुषु व्याप्ति-पक्षधर्म्मताज्ञानात् समूहालम्बनात्मकात् तत्त-द्घटितसमूहालम्बनात्मकानुमितिर्भविष्यतीति।

योग्यतासत्तिमत्त्वे सति संसृष्टार्थपरत्वात् तत्पर-

तद्वारणाय संसर्गतात्पर्य्यकत्वे सतीत्येव विशेषणमुपादेयमिति वाच्यम् । तथापि यदा घट-कर्म्मत्वयोरभेदसंसर्गे तात्पर्य्येण घटमिति प्रयुक्तं वृत्तित्वसंसर्गे तात्पर्य्यं नास्ति तदा तदमूपदे व्यभिचारापत्तेः अमूपदोपस्थापितार्थस्य तात्पर्य्यविषयीभूतसंसर्गवत्त्वाभावात् यतस्तात्पर्य्यविषयीभूतो घटतादात्म्यसंसर्गो नाम्पदार्थनिष्ठः अम्पदार्थनिष्ठ-घटवृत्तित्वसंसर्गश्च न तात्पर्य्यविषय इति, यदा चाधाराधेयभाव-सम्बन्धे तात्पर्य्येण घटः कर्म्मत्वमिति प्रयुक्तं तदा तत्कर्म्मत्वपदे[१] व्यभिचारः कर्म्मत्वपदार्थे घटपदार्थस्याकाङ्क्षानिरूपकाभेदसंसर्गवत्त्वा-भावात् अतो यत्पदाकाङ्क्षावत्त्वं विशेषणं । न च तथापि स दोष-स्तदवस्थः कर्म्मत्वपदस्यापि तादात्म्यसम्बन्धेनान्वयबोधजनने घटपदा-काङ्क्षावत्त्वादिति वाच्यं । आकाङ्क्षानिरूपकसंसर्गेणाबाधितत्वस्य योग्यताघटकत्वलाभाय तदुपादानात् तदयं निर्गलितोऽर्थः यत्पदोपस्थापिततात्पर्य्यविषयीभूतार्थतात्पर्य्यविषयाकाङ्क्षानिरूपक-सम्बन्धेनाबाधितस्य तात्पर्य्यविषयीभूतार्थस्य स्मारकं यत्पदं भवतीति सर्व्वं सुस्थम् ।

प्रकृतवाक्ये दीधितिकारोक्तहेतुद्वयं दूषयति, 'योग्यतेति, ननु संसृष्टार्थपरत्वं एकपदार्थसंसर्गवान् योऽपरपदार्थस्तत्प्रतीतीच्छ-योच्चरितत्वं, तथाच योग्यतोपादानं व्यर्थं विसंवादिवाक्यस्थेऽपर-पदार्थेऽप्येकपदार्थसंसर्गवत्त्वाभावाद्विशेष्याभावेनैव व्यभिचारस्य बाधित-

---

(१) तद्घट-तत्कर्म्मत्वपदे इति क० ।

सन्निधिमत्त्वादिति न हेतुः, संसृष्टोऽपि योऽर्थस्तत्परत्वं तत्परसन्निधिमत्त्वं वा असिद्धं संसर्गस्य प्रागप्रतीतेः।

त्वादिति चेत्, न, संसृष्टार्थपरत्वं हि एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छयोच्चरितत्वं एवञ्च विसंवादिवाक्ये व्यभिचारवारणाय योग्यतोपादानं, योग्यसतात्पर्यकेण वाक्येन यत्र पदार्थस्मरणं न जनितं तत्र व्यभिचारवारणायासत्तिमत्त्वे सतीति स्मारकत्वार्थकं, 'तत्परेति संसृष्टार्थपरेत्यर्थः, तथाचैकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छयोच्चरितत्वे सति आसत्तिमत्त्वादित्यर्थः, अत्रापि योग्यतानुषञ्जनीया। न च हेत्वोरभेद इति वाच्यं। विशेष्य-विशेषणभावभेदेन[१] भेदात्।

केचित्तु अत्र योग्यता न प्रवेशनीया।' न चात्र योग्यताया-अप्रवेशेऽयोग्यवाक्ये व्यभिचार इति वाच्यं। एतद्दोषस्यामाप्तोक्तत्यादिना स्वयमेवाग्रे वक्ष्यमाणत्वात् इति प्राहुः।

यथाश्रुते दूषणमाह, 'संसृष्टो हीति एकपदार्थसंसर्गवान् योऽपरपदार्थस्तत्परत्वमित्यर्थः, 'तत्परेति तत्परत्वे सति सन्निधिमत्त्वमित्यर्थः, 'वाकारश्चार्थे, 'असिद्धं' प्रकृतानुमानात् पूर्व्वमज्ञातं, विशिष्टज्ञाने विशेषणज्ञानं हेतुमाह, 'संसर्गस्येति एकपदार्थसंसर्गवत्त्वापरपदार्थे प्रागप्रतीतेरित्यर्थः। न चैवं भवतामपि साध्याप्रसिद्धिरिति वाच्यम्। यत्तन्मते सामान्यतोऽथाप्रसिद्धत्वेऽप्रसिद्धस्यैव साध्यस्य पक्षधर्मतावलात् सिद्धेर्हेतुप्रसिद्धिस्त्वावश्यमपेक्षितेति भावः। इदमुपलक्षणं पूर्वोक्तक्रमेण योग्यताविशेषणमपि व्यर्थमित्यपि बोध्यं।

(१) विशेषण-विशेष्यभावभेदेनेति ख०, ग०।

संसृष्टत्वप्रकारकप्रतीतिपरत्वं तत्प्रकारकप्रतीतिपरसन्निधिमत्त्वं वा अनाप्तोक्ते निराकाङ्क्षे च व्यभिचारि ।

नन्वेकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छयोच्चरितत्वं संसृष्टार्थपरत्वं तादृशोच्चरितत्वे सति सन्निधिमत्त्वं तत्परसन्निधिमत्त्वमित्यत आह, 'संसृष्टत्वप्रकारकेति एकपदार्थेऽपरपदार्थसंसृष्टत्वप्रकारकेत्यर्थः, अत्र प्रकारकत्वं विषयकत्वमात्रं अन्यथा स्वरूपासिद्धं स्यात्, 'अनाप्तोक्त' इति अयोग्य इत्यर्थः । न चैतद्युक्तं योग्यताया हेतुघटकत्वादिति वाच्यम् । 'अनाप्तोक्तपदस्य स्थिरजलाभिप्रायेण पयसा सिञ्चतीत्याद्यनाप्तोक्तविशेषपरत्वात् । न च तत्रापि न व्यभिचारः तस्याप्ययोग्यत्वादिति वाच्यम् । लीलावतीकारमते हि अन्वयप्रयोजकरूपवत्त्वं योग्यता सा च तत्र वर्तत एव जलत्वस्य सेककरणत्वान्वयप्रयोजकरूपत्वेन तस्य करकायां सत्त्वात्, केषांचिन्मते 'अनाप्तोक्त' इति द्वितीयहेतौ दूषणं तत्र योग्यताया अनिवेशात्, 'निराकाङ्क्षे' चेति हेतुद्वये दूषणमिति ध्येयं । 'निराकाङ्क्षे चेति घटः कर्मत्वमानयनं कृतिरित्यादावित्यर्थः, घटपदार्थे कर्मत्वपदार्थस्याकाङ्क्षानिरूपकसंसर्गोपस्थित्या साध्यासत्त्वादिति भावः ।

ननु यदाभ्यामधात्वर्थाख्यातार्थयोर्विषयत्वरूपसंसर्गे तात्पर्येण 'दण्डेने'त्यादिवाक्यं प्रयुक्तं अनुकूलत्वसंसर्गे च तात्पर्यं नास्ति तदा तद्वाक्यजन्यज्ञाने न्यायमतेऽनुकूलत्वसंसर्गो न भासते भवन्मते च तदानीमभ्याजपदार्थसंसर्गत्वरूपेण सदपि सिद्धेरित्यत आह, 'संसर्गस्येति आधाऽधात्वर्थाख्यातार्थयोः संसर्गस्येत्यर्थः, 'तत्प्रकारकत्वेऽपीति अनेक-

संसर्गस्य बहुप्रकारकत्वेऽपि नानभिमतसंसर्गसिद्धिस्तस्य तात्पर्य्याविषयत्वात्। अन्यथा शब्दादप्यभिमतान्वयबोधं न स्यात्[१]। अतएव विशेषण-विशेष्यभाववदर्थकानि तद्बोधपूर्व्वकाणि वेति[२] न साध्यं।

यत्त स्मारितार्थसंसर्गवन्तीति साध्यं, मत्वर्थश्च

कपत्वेऽपीत्यर्थः, 'अनभिमतेति' दण्डेनेत्यादिवाक्यजन्यज्ञानविषयतया नैयायिकानभिमतेत्यर्थः, 'तस्य' अनभिमतसंसर्गस्य, तथा चैतदर्थमेव यथा तात्पर्य्यविषयत्वं संसर्गविशेषणमुपात्तमिति भावः। 'अन्यथा' तस्य तात्पर्य्यविषयत्वे, 'शब्दात्' दण्डेनेत्यादिवाक्यात्, न्यायनये इति शेषः, 'अभिमतान्वयबोधः' अभिमतोयोऽन्वयबोधः एकसंसर्गमात्रविषयकशाब्दबोध इति[१] यावत् स न स्यादित्यर्थः, 'अतएव' अनभिमतसंसर्गसिद्धिप्रसङ्गादेव, 'विशेषण-विशेष्येत्यादि, सार्थकानीत्यादावन्यायोक्तौ संसर्गस्य न सिद्धिरित्यतो 'विशेषण-विशेष्यभाववदिति विशेषणता-विशेष्यतान्यतरवदित्यर्थः, विशेषणत्वमपरपदार्थनिष्ठवैशिष्ट्यप्रतियोगितया भासमानत्वं, विशेष्यत्वञ्चापरपदार्थप्रतियोगिकवैशिष्ट्यानुयोगितया भासमानत्वमिति भावः। 'तद्बोधेति तादृशान्वयबोधेत्यर्थः।

आचार्य्यीयं साध्यमाशङ्क्य दूषयति, 'यत्त्वित्यादिना, अत्रापि तात्पर्य्यविषयीभूतो यो वृत्त्या एतत्पदस्मारिततात्पर्य्यविषयार्थस्य

(१) अभिमतसंसर्गसिद्धिर्न स्यादितीति क०।

(२) तद्बोधपूर्व्वकाणीति वेति क०।

(१) संसर्गमात्रविषयकशाब्दबोध इतीति ख०।

लिङ्गतया ज्ञापकत्वं । न चान्योन्याश्रयः, पूर्वपूर्व-

संसर्गस्तद्वत्त्वमिति साध्यार्थः, एवं प्रत्येकं तत्तत्पदमादाय वाक्ये वाक्यं प्रत्येकमन्यपदादिकमेव पक्षः हेतुश्च पूर्वोक्त एव समूहालम्बनौ त्वनुमिति-परामर्शाविति बोध्यम् । ननु च मत्वर्थः कः सम्बन्धः(१) संयोग-समवायादेः पक्षे बाधितत्वादित्यत आह, 'समर्थश्चेति, 'लिङ्गतयेति, 'लिङ्गपदं पक्षपरं, अन्यथा पदानां लिङ्गत्वाभावेन बाधापत्तेः शब्द एव तादात्म्यसम्बन्धेन लिङ्गमित्याशयेन वा, 'ज्ञापकत्वं' कारणीभूतज्ञानावच्छेदकत्वं(२) । ननु 'लिङ्गतयेति किमर्थं ज्ञापकत्वमात्रस्यैव सम्बन्धत्वे दोषाभावात् । न चैवं नैयायिकैः सिद्धसाधनमुद्भावनीयं तैरपि शब्दस्य ज्ञापकत्वस्वीकारादिति वाच्यम् । न हि नैयायिकैः सह विवादे इदमनुमानं किन्तु वाक्यश्रोतृवैशेषिकनये यया रीत्या अनुमानविधया शब्दात् संसर्गधीः सा रीतिरुपदर्श्यते तत्र च नैयायिकैः सिद्धसाधनोद्भावनप्रसङ्गाभावात् अन्यथा 'लिङ्गतयेत्युक्तावपि सिद्धसाधनोद्भावनसम्भवात् नैयायिकैः शब्दस्य लिङ्गतयापि ज्ञापकत्वस्वीकारात् पूर्वोक्तसंसर्गज्ञानपूर्वकत्वानुमाने तदापत्तेश्च नैयायिकैरपि तत्स्वीकारादिति चेत्, न, वैशेषिकनये पदानां लिङ्गविधयैव ज्ञापकत्वेन तस्य स्वरूपकथनमात्रपरत्वात् सम्बन्धस्तु ज्ञापकत्वमात्रमेवेति दिक् । 'न चेति, पक्षे ज्ञापकत्वसंसर्गेण एतादृशसंसर्गसिद्धौ तद्ज्ञापकेन

(१) कः सम्बन्धो मत्वर्थ इति ख०, ग०।

(२) ज्ञाननिष्ठाया कारणताया विषयविधयावच्छेदकत्वमित्यर्थः ।

नुमितिहेतुत्वेन[१] अनादित्वात्। तत्र। ज्ञापकत्व-मात्रेणार्थासिद्धेः। प्रमापकत्वे तेनैव व्यभिचारात्।

दृष्टान्ते ज्ञापकत्वसम्बन्धेन तादृशसंसर्गसिद्धिः दृष्टान्ते ज्ञापकत्वसम्बन्धेन तत्तादृशसंसर्गसिद्धावेव पक्षे ज्ञापकत्वसम्बन्धेन तादृशसंसर्गसिद्धि-रित्यन्योन्याश्रयः, अन्योन्याश्रयाभावे हेतुमाह, 'पूर्व्वपूर्व्वेति पूर्व्व-पूर्व्वाणां वाक्यानां उत्तरोत्तरवाक्ये तादृशसंसर्गानुमितौ दृष्टान्त-विधया प्रयोजकत्वेनेत्यर्थः, 'अनादित्वादिति पक्षीयसाध्यसिद्धेर्दृष्टा-न्तीयसाध्यसिद्धेरादावनपेक्षितत्वादित्यर्थः।

केचित्तु 'हेतुत्वेनेत्यनन्तरं छेदः, तथाच 'हेतुत्वेनेत्यन्तमन्योन्या-श्रयाभावे हेतुः, अर्थस्तु पूर्व्ववत्। नन्वेवमनवस्थेत्यत आह, 'अनादि-त्वादिति वीजाङ्कुरवदनादित्वादित्यर्थः, तथाच प्रामाणिकी अन-वस्था न दोषायेति भाव इत्याहुः। तदसत्। पञ्चम्यन्तेनैव मुख्य-हेतुप्रयोगनियमात् तृतीयाया असङ्गतत्वापत्तेरिति ध्येयम्।

'ज्ञापकत्वमात्रेण' ज्ञापकत्वसम्बन्धेन, स्मारितपदार्थसंसर्गस्य सा-ध्यत्वे इति शेषः, 'अर्थेति एकपदार्थे अपरपदार्थसंसर्गासिद्धेरित्यर्थः, प्रवर्त्तकञ्च तथा ज्ञानमिति भावः। ननु स्मारितपदार्थसंसर्गवन्तीति न साध्यं करणीयं किन्त्वेकपदार्थसंसर्गवत्यपरपदार्थे यदेकपदार्थ-संसर्गज्ञानं तज्जनकानीति साधनीयं तथाच नोक्तदोष इत्यत आह, 'प्रमापकत्व इति एकपदार्थसंसर्गवत्यपरपदार्थे यदेकपदार्थसंसर्गज्ञानं तज्जनकत्व इत्यर्थः, साध्य इति शेषः, 'तेनैव' अनाप्तोक्तेनैव, कर-

(१) पूर्व्वपूर्व्वतत्तदनुमितिहेतुत्वेनेति ख०।

स्वाभिप्रायमनुरुध्य विप्रतीत्यादिवाक्येनैवेति यावत्, एतदनु-
मानस्याप्रामाण्यापत्तिमते वाक्यप्रयोजकरूपवत्त्वस्य योग्यताकाङ्क्षा-
योग्यतागर्भपूर्व्वोक्तहेतोस्तत्रापि सत्त्वादेकपदार्थसंसर्गवत्त्वस्यापरपदा-
र्थेऽभावेन साध्यस्य चासत्त्वादिति भावः। बाधाभावरूपयोग्यताया-
हेतुविशेषणत्वे तु 'प्रमापकत्वं' प्रमोपधायकत्वं, प्रमास्वरूपयोग्यत्वं
वा, आद्येऽजनितशाब्दबोधके शब्दे व्यभिचारः, अन्त्ये निराकाङ्क्षा-
देरपि स्वरूपयोग्यत्वेनाकाङ्क्षादिमत्त्वविशेषणं हेतौ व्यर्थं योग्यताव-
त्त्वस्यैव सम्यक्त्वात् यदि च साकाङ्क्षशब्दत्वेन स्वरूपयोग्यता तदा
आकाङ्क्षावत्त्वमेव सम्यक् योग्यतादिविशेषणं व्यर्थं इत्यादीनि दूष-
णान्यवसेयानि ।

केचित्तु 'ज्ञापकत्वमात्रेण' ज्ञापकत्वसम्बन्धेन, साध्यत्व इति शेषः, 'अर्थेति', 'अर्थः' उद्देश्यः संसर्गानुमितिरिति यावत्, अस्यासिद्धेरित्यर्थः, अभावप्रतियोगितावच्छेदकेन हि सम्बन्धेन साध्यं साधयत्यनुमानं ज्ञापकत्वञ्च नाभावप्रतियोगितावच्छेदकं वृत्त्यनियामकत्वादिति भावः। ननु वृत्तिनियामकसम्बन्ध एव साध्यतावच्छेदकसम्बन्धस्त्वत आह, 'प्रमापकत्व इति धर्म्मिपरो निर्द्देशः, प्रमा विशिष्टज्ञानं तज्जनके सम्बन्धे वृत्तिनियामकसम्बन्धे इति यावत्, साध्यतावच्छेदके इति शेषः, 'तेनैव' पदेनैव, 'व्यभिचारादिति पदे वृत्तिनियामकसम्बन्धेन पदार्थसंसर्गासत्त्वात् इत्याशयः।

मिश्रानुयायिनस्तु, ननु 'स्मारितार्थसंसर्गवन्तीत्यत्र स्मारितपदार्थसंसर्गज्ञानजनकत्वमात्रं साध्यं एकपदार्थेऽपरपदार्थसंसर्गो वेति तदपरपदार्थज्ञानं तज्जनकत्वं वा आद्ये आह, 'ज्ञापकत्वेति

ज्ञानावच्छेदकतया च संसर्गसिद्धिः ज्ञानज्ञानस्य तद्विषयविषयकत्वनियमात् ।

ज्ञापकत्वबाधकानुमानमात्रेणेत्यर्थः, 'अर्थेति एकपदार्थेऽपरपदार्थसंसर्गसिद्धेरित्यर्थः, अवसर्गकञ्च तज्ज्ञानमिति भावः । अन्ये त्वाहुः, 'अज्ञापकत्व इति एकपदार्थेऽपरपदार्थसंसर्गवति यत्तज्ज्ञानं तज्जनकत्व इत्यर्थः, साध्य इति शेषः, 'तेनैव' अनाप्तोक्तेनैवेत्याहुः[1] । तदसत्, एवं संसर्गस्यैव साध्यत्वात् ज्ञापकत्वस्य च सामर्थ्यतया साध्यतावच्छेदकमनन्तत्वात् ।

ननु भवदुक्तानुमानाज्ज्ञापकत्वेन गृहीतं संसर्गज्ञानं सिद्ध्यतु संसर्गस्तु कथं सिद्ध्येत्तस्य ज्ञापकत्वेनागृहीतत्वादित्यत आह, 'ज्ञानावच्छेदकतयेति परामर्शज्ञानांशे संसर्गस्य विशेषणतावच्छेदकतया वह्निज्ञानानुमितौ वह्निवद्वत्[2] तज्ज्ञानमित्यर्थः । अनुमितेः संसर्गावगाहने प्रमाणान्तरमाह, 'ज्ञानज्ञानस्येति, 'तद्विषयेति ज्ञानविषययावद्विषयकत्वादित्यर्थः, यावदित्यकरणे यत्किञ्चिद्विषयविषयकत्वसिद्धावपि संसर्गविषयकत्वासिद्धेः । ननु नायं नियमः ज्ञानमितिप्रत्यये शाब्दज्ञाने आत्मा ज्ञानवान् इत्यनुमित्यादौ च व्यभिचारात् । न च विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञानयावद्विषयविषयकत्वमिति नियम इति वाच्यम् । घटः ज्ञान इति ज्ञानस्य घटज्ञानमित्यादिशब्दतो जाते

---

(1) अन्वयप्रयोजकरूपवत्त्वं योग्यतेति भावः ।

(2) वह्नित्ववदर्थेति क०, ग० ।

संसर्गे च सम्बन्धिन एव विशेषकत्वात् ।

व्यभिचारात् । न च तज्ज्ञानविषयीभूतयावद्विषयविशिष्टतया तज्ज्ञानावगाहिज्ञानस्य तज्ज्ञानयावद्विषयविषयकत्वमिति नियम इति वाच्यम् । उक्तसंसर्गज्ञानानुमितेः संसर्गज्ञानविषयीभूतयावद्विषयविशिष्टतया संसर्गज्ञानावगाहित्वस्यैवाप्रसिद्धेः तत्रैव विवादात् । न च तज्ज्ञानयावद्विषयोपस्थितेरव्यवहितोत्तरवर्त्ति यत्तज्ज्ञानविषयकं ज्ञानं तत्तज्ज्ञानयावद्विषयविषयकमिति नियमः अनुव्यवसायादौ तथा दर्शनात् उक्तानुमित्यादौ च ज्ञानविषयस्य नोपस्थितत्वं अनुव्यवसायादौ च व्यवसायादित एव तद्विषयस्योपस्थितत्वं प्रकृते च पदार्थसंसर्गज्ञानानुमितिजनकीभूतपरामर्शेनैव पदार्थसंसर्गज्ञानयावद्विषयाणामुपस्थितत्वमिति वाच्यम् । तथाप्ययं घट इत्यादिज्ञानाव्यवहितोत्तरज्ञानवानित्यनुमित्यादौ[1] व्यभिचारादिति । नैवं, बाधकाभावे सति तज्ज्ञानविषयकं यज्ज्ञानं तत्तज्ज्ञानयावद्विषयविषयकमिति नियमात् उक्तस्थले कारणाभावादेरेव बाधकस्य सत्त्वान्न व्यभिचारः । नन्वेवमपि सम्बन्धिनः पदार्थस्य भानं कथं स्यादित्यत आह, 'संसर्गे चेति व्यापकविशेषणविशेषणीभूतसंसर्गांशे चेत्यर्थः, 'सम्बन्धिनः' पदार्थस्य, 'विशेषकत्वादिति विशेष्यतेऽनेनेति व्युत्पत्त्या परामर्शे विशेषणत्वादित्यर्थः । ननु तथापि गोत्वाश्वाजत्वादिरूपेण गवाश्वाजनादिसंसर्गसिद्धिः कथं स्यात् स्मारितपदार्थत्वादिरूपेणैव व्यापकताग्रहात् प्रवर्त्तकस्य तज्ज्ञानं[2] अत आह,

(१) ज्ञानाव्यवहितोत्तरेत्यस्य अनुमित्यादावित्यनेन सह सम्बन्धः ।

(२) तथा ज्ञानमिति ख०, ग०।

पक्षधर्मताबलात् व्यापकत्वेनागृहीतस्यापि संसर्गविशेषस्य सिद्धिः। अथैवं भ्रान्तिज्ञानमपि भ्रमः स्यात्। न चेष्टापत्तिः, ईश्वरस्यापि भ्रान्तत्वापत्तेः। इदं रजतमिति भ्रमादिव शुक्तौ रजतज्ञानवानयमिति भ्रमस्य ज्ञानात् भ्रान्तिज्ञप्रवृत्त्यापत्तेश्च।

'पक्षधर्मतेति, 'व्यापकत्वेनेति ताद्रूप्येणेत्यादिः, 'संसर्गविशेषस्येति गोत्वाभ्याजनत्वादिविशिष्टोपस्थितसंसर्गस्येत्यर्थः। भ्रमविषयकं ज्ञानं भ्रम इत्यभिप्रायेणाशङ्कते, 'अथैवमिति, 'एवं' ज्ञानज्ञानस्येत्यादिविषये, 'भ्रान्तीति भ्रमस्य ज्ञानमित्यर्थः, 'भ्रमः स्यादिति उक्तव्याप्तिबलाद्भ्रमविषययावद्विषयकत्वेन तस्यापि भ्रमविषयीभूतासद्वैशिष्ट्यविषयकत्वादिति भावः। भ्रमस्येव तज्ज्ञानस्यापि भ्रमत्वे न कश्चिद्दोष इत्याशयवतः संशयं निराकरोति, 'न चेति, 'ईश्वरस्येति, तस्य सर्वज्ञत्वेन सर्वभ्रमविषयकज्ञानवत्त्वादिति भावः। ननु बाधकाभावे सतीति विशेषणादेव नेश्वरज्ञानस्य भ्रमत्वं तस्य सद्भाव-विषयकत्वेनैव धर्मिग्राहकप्रमाणेन सिद्धेरित्यस्वरसादाह, 'इदं रजतमिति, 'शुक्ताविति, 'प्रवृत्त्यापत्तेरित्यनेनान्वितं, 'ज्ञानात्' भ्रमानुव्यवसायात्, 'भ्रान्तिज्ञेति भ्रान्तिज्ञपुरुषस्येत्यर्थः। भ्रमविषययावद्विषयकत्वेनोभयोरप्यविशेषादिति भावः। एतदप्यापाततः, रजतज्ञानवानयमितिज्ञानेन रजतत्वविशिष्टेदंविषयकज्ञानवानयमिति ज्ञानं विवक्षितं, इदंविशेष्यकरजतत्वप्रकारकज्ञानवानिति ज्ञानं वा, आद्ये प्रवृत्त्याविष्टापत्तिरेव तस्यापि शुक्तौ रजतत्वप्रकारकत्वेन भ्रमत्वापि

तस्य प्रवृत्त्यनङ्गीकारात्, अन्यथा तत्र भ्रमविषयत्वाविशेषेऽपि इष्ट-
तावच्छेदक-प्रवृत्तिविषययोर्वैशिष्ट्यावगाहित्वेन तस्मात् प्रवृत्त्यापादन-
मसङ्गतं। न चेष्टतावच्छेदक-प्रवृत्तिविषययोरपवैशिष्ट्यस्यापि यावद्-
ज्ञानत्वेन तदवगाहित्वमस्त्येवेति वाच्यम्। तथापि प्रवृत्तिविषये
इष्टतावच्छेदकाप्रकारकत्वात्[1] तस्मात् प्रवृत्त्यापादनासम्भवात् तादृ-
शज्ञानस्यैव प्रवर्त्तकत्वात्। अथ इष्टतावच्छेदक-प्रवृत्तिविषयवैशि-
ष्ट्यावगाहित्वेन प्रवर्त्तकत्वमित्यभिमानेन प्रवृत्त्यापादनं, किन्तु अन्यथा-
ख्यातिस्वीकारे भ्रमानुव्यवसायेऽपवैशिष्ट्यमवश्यं विषयः तच्च संसर्गमर्या-
दयैव भविष्यति अन्यरूपेणासतो भानानङ्गीकारात् तथाच प्रवृत्ति-
विषये इष्टतावच्छेदकप्रकारकत्वमस्त्येवेति चेत्। न। तादृशख्यात्यन-
ङ्गीकर्तृमतेऽपि तादृशभ्रमानुव्यवसायात् प्रवृत्तेर्दुर्वारत्वात् वैशिष्ट्य-
विषयकत्वप्रयोजकव्यवसायरूपप्रत्यासत्तेः सम्भवात् तन्मतेऽप्यभ्रमा-
नुव्यवसायस्य वैशिष्ट्यविषयकत्वात् प्रवृत्तिविषये इष्टतावच्छेदकवि-
शिष्टबुद्धिव्यवसायादिरूपसामग्रीसत्त्वेन प्रवृत्तिविषये इष्टतावच्छेदक-
प्रकारकत्वाच्च। न च शुक्तौ रजतत्वाभाववतीति बाधबुद्धेरुत्तरं भ्रमा-
नुव्यवसायात् प्रवृत्तिरापद्यते अस्मन्मते तत्र प्रतिबन्धकसत्त्वेनानु-
व्यवसाये शुक्तौ न रजतत्वं प्रकारः तन्मते ज्ञानज्ञानस्येति नियम-
सत्त्वेनावश्यं रजतत्ववैशिष्ट्यं भासते[2] तच्च संसर्गमर्यादया सामान्यप्रका-
रेण सम्भवतीति तत्र प्रवृत्तिविषये रजतत्वप्रकारत्वादिति वाच्यम्।
तन्मतेऽपि बाधकाभावे सतीति विशेषणसत्त्वात् रजतत्ववैशि-

---

(1) इष्टतावच्छेदकप्रकारकत्वाभावादिति ख०, ग०।
(2) रजतत्ववैशिष्ट्यविषयकत्वमिति ख०, ग०।

यत्तु भ्रमविषयविषयकत्वेन न भ्रमत्वं[१] भ्रमविषयाणां[२] सिद्ध्यसिद्धिपराहतत्वात् इति, तच्च वक्ष्यामः ।

ख्याविषयकत्वात् बाधबुद्धिरूपबाधकसद्भावात्, अतएव शुक्तिविशेष्यक-रजतत्वप्रकारकज्ञानवानयमिति शाब्दादिज्ञानात् प्रवृत्तिरापाद्यते तत्रास्मन्मते शुक्तौ रजतत्ववैशिष्ट्योपस्थापकपदाभावात् शुक्तौ न रजतत्ववैशिष्ट्यं विषयः तन्मते च व्याप्तिबलेनावश्यं तस्य विषयत्वादित्यपि परास्तं, तत्रापि कारणाभावरूपबाधकसद्भावादिति सङ्क्षेपः ।

'अथैवमिति पूर्वपक्षे भ्रमद्विषयकत्वमेव भ्रमत्वमिति स्वीकुर्वतो वैशेषिकैकदेशिनः सिद्धान्तमुपन्यस्य दूषयति,[३] 'यत्त्वित्यादिना, अन्यथा 'अथैवमिति पूर्वपक्षिणं प्रति यत्त्वित्यादिनाक्षेपे 'तच्च वक्ष्याम' इत्यस्यानुगुणतापत्तेः 'अथैवमिति पूर्वपक्षिणाऽग्रे सिद्धान्तानभिधानात् तदुपरि दोषाभिधानं तस्यैव सिद्धान्तकरणेनित्यादिव्यवसेयम्[४] । 'भ्रमविषयविषयकत्वेन' भ्रमविषयथावद्विषयकत्वेन, 'न भ्रमत्वं', आपादयितुं शक्यमिति शेषः, 'सिद्ध्यसिद्धीति भ्रमविषयाणां यावतां सत्त्वासत्त्वाभ्यामित्यर्थः, 'पराहतत्वादिति आपादनस्य व्याहतत्वादित्यर्थः, भ्रमविषयाणां यावतां सत्त्वे तद्विषयकत्वेन तथ्यं .

---

(१) भ्रमविषयविषयकत्वेनाभ्रमत्वमिति क० ।

२) भ्रमविषयस्येति ख० ।

(३) सिद्धान्त्येत दूषयतीति क० ।

(४) अन्यथेत्यादिरवसेयमित्यन्तः पाठः ख०-ग०चिह्नितपुस्तकद्वये नास्ति ।

नैवं, असद्विषयकत्वेन न भ्रमत्वं[१] भ्रमविषयाणां

भ्रमत्वमापादनीयम् सन्मात्रविषयकत्व-भ्रमत्वयोर्विरोधात्, असत्त्वे तथापि असत आपादकतावच्छेदककोटिप्रविष्टत्वेन आपादकतावच्छेदकप्रकारकापादकज्ञानाभावादापादनासम्भवात् असतः संसर्गमर्यादयैव भानाङ्गीकारादिति भावः। यद्वा असत्त्वे तदा तद्विषयकत्वमप्यसदेव तथाच तेन कथमापादनीयं असति व्याप्यभावेनापादकत्वस्यानुमापकत्वस्य वा असम्भवादिति भावः। 'तच' व्याघातरूपायां समाधानयुक्तौ,[२] 'तद्धाम इति दूषणमित्यादिः, 'नैवमित्यादिना असद्विषयकत्वस्य भ्रमरूपतानिराकरणावसरेऽनुपदमेवेत्यर्थः, एतत्समाधानं तदा सम्भवति यद्यसद्विषयकत्वं भ्रमत्वं भवति अन्यथा सन्मात्रविषयकत्व-व्यधिकरणप्रकारकत्वरूपप्रमात्व-भ्रमत्वयोः[३] विरोधाभावेनैतत्समाधानासम्भवात् तस्यैव दूषणीयत्वादिति भावः। असद्विषयकत्वेनेति, धान्येन धनवानित्यादाविवाभेदे तृतीया, 'भ्रमत्वं' भ्रमपदप्रवृत्तिनिमित्तं, तथाच भ्रमपदप्रवृत्तिनिमित्तं नासद्विषयकत्वरूपमिति समुदितार्थः।

केचित्तु 'भ्रमत्वं' भ्रमपदशक्यत्वं, तृतीयार्थोऽवच्छिन्नत्वं, तथाच भ्रमपदशक्यत्वं नासद्विषयकत्वावच्छिन्नमिति समुदितार्थ इत्याहुः।

'भ्रमविषयाणामिति, शुक्ति-रजतत्व-तद्वैशिष्ट्यानां सर्वेषां पार-

---

(१) असद्विषयकत्वेनाभ्रमत्वमिति ग० ।

(२) 'तच' व्याघातरूपायां समाधानयुक्तावित्ययं पाठः ख०-ग० चिह्नित-पुस्तकद्वये नास्ति ।

(३) सन्मात्रविषयकत्व-भ्रमत्वयोरिति ख०, ग० ।

सत्त्वात् किन्तु व्यधिकरणप्रकारकत्वेन । न च भ्रमस्य ज्ञाने व्यधिकरणं प्रकारः, रजतत्वप्रकारकत्वस्य भ्रमेऽपि सत्त्वात् अन्यथा भ्रान्त्युच्छेदः(1) प्रमाणाभा-

---

माणिकत्वादित्यर्थः । नन्वेवं सद्विषयकत्वेऽपि रजतत्वभ्रमस्य यथा भ्रमत्वं तथा रजतत्वभ्रमविषयकज्ञानस्यापि भ्रमत्वमस्त्वित्यत आह, 'किन्त्विति, 'व्यधिकरणेति विशेष्यताव्यधिकरणेत्यर्थः. अत्रापि तृतीया पूर्ववत् । ननु व्यधिकरणप्रकारकत्वे भ्रमत्व एव भ्रमस्य ज्ञानं कथं न भ्रम इति तटस्थाशङ्कायामाह, 'न चेति. 'व्यधिकरणं प्रकार इति । न च प्रतियोगिवाचकपदस्य(2) अनुयोगिवाचकपद-समानलिङ्गकत्वनियमात् व्यधिकरणमित्यत्र नपुंसकलिङ्गकत्व-मनुपपन्नं प्रकार इत्यस्य पुंलिङ्गकत्वादिति वाच्यम् । अत्रापि व्यधिकरणमित्येवानुयोगि व्यधिकरणमुद्दिश्य प्रकारभेदविधाना-दतः सामान्यतो नपुंसकलिङ्गनिर्देशोचितं प्रकारशब्दस्य च अज-हल्लिङ्गकत्वान्न नपुंसकलिङ्गत्वमिति भावः । 'रजतत्वप्रकारकत्वस्येति भ्रमस्य ज्ञाने प्रकारीभूतस्य रजतत्वप्रकारकत्वस्येत्यर्थः, शुक्तिविशेष्यक-त्वस्य चेत्यपि बोध्यं, 'अन्यथा' रजतत्वप्रकारकत्वस्य भ्रमेऽसत्त्वे, 'भ्रान्तीति रजतत्वाभाववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वाश्रय-ज्ञानोच्छेद इत्यर्थः, 'प्रमाणाभावादिति, 'प्रमाणं' प्रमा. तस्यां रज-

---

(1) भ्रमोच्छेद इति क० ।

(2) प्रतियोगित्वमनुयोगित्वञ्चान्वयबोधस्य अन्वय्यभेदः स च प्रकारस्येति भावः ।

त्वात्। ननु प्रतारकवाक्ये व्यभिचारः विशेषदर्शनेन तत्र संसर्गज्ञानाभावात्। न च संसर्गमप्रतीत्य वाक्य-

---

त्वाभाववद्विशेष्यकत्वावच्छिन्नरजतत्वप्रकारकत्वाभावादित्यर्थः, भ्रम-प्रमातिरिक्तं च विशिष्टज्ञानमप्रसिद्धमिति भावः(१)।

केचित्तु 'अन्यथा' भ्रमविषयकज्ञानमात्रे शुक्त्यादौ रजतत्वादेर्व्यधिकरणस्य प्रकारत्वे, 'भ्रान्तौ' इति रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकज्ञानोच्छेद इत्यर्थः, 'प्रमा' इति, तथा सति भ्रमग्राहकस्य सर्वस्यैव ज्ञानस्य शुक्त्यादौ रजतत्वादिवैशिष्ट्यावगाहित्वेन शुक्त्यादौ तदभाववत्त्वावगाहित्वाभावेन रजतत्वाभाववति शुक्त्यादौ रजतत्वप्रकारकत्वरूपभ्रान्तित्वावगाहनासम्भवादिति भाव इत्याहुः।

अन्ये तु 'अन्यथा' असद्वैशिष्ट्यविषयकत्वस्य भ्रमत्वरूपत्वे, 'भ्रान्त्युच्छेदः' भ्रमभावस्यैवोच्छेदः, 'प्रमा' इति, ज्ञानमात्रस्येत्यादिव्याप्तिबलात् भ्रान्तिग्राहकस्य सर्वस्यैवासद्वैशिष्ट्यविषयकतया भ्रमत्वेन विषयाबाधकत्वादिति भाव इत्याहुः। तदसत्, शुक्तौ रजतत्वस्यासद्वैशिष्ट्यविषयकत्वेऽपि भ्रमांशे भ्रमत्वेऽपि च प्रमात्वानपायादिति सङ्क्षेपः।

'ननु प्रतारके'ति वस्तुगत्या घटवति भूतले परप्रतारणेच्छया प्रयुक्ते घटाभाववद्भूतलमिति विप्रलम्भकवाक्ये इत्यर्थः, तेन 'भ्रान्तप्रकारकवाक्ये च व्यभिचार' इत्यग्रिमग्रन्थेन न पौनरुक्त्यमिति ध्येयम्, 'विशेषे'ति प्रतारकस्य वक्तुर्घटवद्भूतलमिति वस्तुनिश्चयदर्शनेनेत्यर्थः, 'संसर्गे'ति घटाभाव-भूतलयोः संसर्गज्ञानाभावादित्यर्थः।

---

(१) विशिष्टेत्यनेन निर्विकल्पकज्ञानव्यावृत्तिः तथा च भ्रम-प्रमातिरिक्तस्य निर्विकल्पकज्ञानस्य प्रसिद्धत्वेऽपि न क्षतिः।

रचना न सम्भवतीत्याचार्य्ये तस्य संसर्गज्ञानं सम्भवतीति[१] वाच्यं। तावत्पदज्ञानादेव शुकस्येव वाक्यरच-

---

न च बाधाभावरूपयोग्यताविशेषितहेतोस्तत्राभावात् कथं व्यभिचार इति वाच्यम्। 'योग्यताविरहाच्चे'त्यनेनास्य दोषस्याग्रे स्वयमेव वक्ष्यमाणत्वात्।

केचित्तु अन्वयप्रयोजकरूपवत्त्वं योग्यता हेतौ प्रविष्टेति भ्रमेणाशङ्कते, 'नन्वि'ति, तथाच 'प्रतारकवाक्ये' इत्यस्य करकाकरणकाले सेक इति ज्ञानेन परस्य करकाकरणकाले सेकबोधो भवत्विति प्रतारणेच्छया प्रयुक्ते परस्मा इत्युक्तीति वाक्ये इत्यर्थः. अग्रे च बाधाभावरूपयोग्यता हेतौ प्रविष्टेत्यभिप्रायेण 'योग्यताविरहाच्चे'ति समाधास्यत इत्याहुः।

'संसर्ग' एकपदार्थेऽपरपदार्थसंसर्गः, 'वाक्यरचना' वाक्योद्देश्यकप्रवृत्तिः, 'आचार्य्ये'ति, तस्याप्रतिबध्यत्वादिति भावः। यद्यपि आचार्य्यज्ञानसत्त्वेऽपि प्रमापूर्वकत्वपर्य्यन्तसाध्यविरहाद्व्यभिचारस्तदवस्थ एव, तथापि स्फुटत्वात् तदुपेक्ष्य दूषणान्तरमाह, 'तावत्पदे'ति सुखादिरूपेष्टसाधनतया आनुपूर्वीज्ञानादेवेत्यर्थः, वाक्यार्थज्ञानं विनापीति शेषः। ननु पद्याद्यतिरिक्तस्य वाक्यानुकूलकृतौ वाक्यार्थज्ञानरूपेष्टसाधनताज्ञानमेव हेतुरिति स्वविषयकज्ञानेच्छाद्वारा प्रतारणास्थलेऽपि वाक्यार्थज्ञानमवश्यमपेक्षि-

---

(१) तस्य संसर्गस्य ज्ञानमस्तीतीति क०।

भोपपत्तेः। अन्यथापि तस्यैव तन्मत्वादिति चेत्, न, एतद्वाक्यमेतस्य पदार्थसंसर्गं बोधयिष्यतीत्याशयेन वाक्यप्रयोगात् तस्यापि संसर्गज्ञानात् योग्यताविरहाच्च। अतएव विसम्वादिवाक्ये शुकवदुच्चरिते न

नमित्यत आह, 'अन्यथापीति' पक्षि-पशुभिन्नस्य मूर्ख-बालकादेर्वक्यानुकूलकृतावपीत्यर्थः, 'तस्यैव' सुखादिरूपेष्टसाधनत्वेनानुपूर्वीज्ञानस्यैव । 'आशयेनेति' इच्छयेत्यर्थः। अन्यथाज्ञातार्थस्यान्यथाबोधयिषायाः[१] प्रतारणत्वादिति भावः। 'तस्यापि' प्रतारकस्यापि, 'संसर्गज्ञानादिति पदार्थानां[२] परस्परसंसर्गज्ञानादित्यर्थः, संसर्गबोधनेच्छां प्रति संसर्गज्ञानज्ञानद्वारा संसर्गज्ञानस्यापेक्षितत्वात् संसर्गज्ञानं विना प्रतारणाया असम्भवादिति भावः। न च विशेषदर्शनसत्त्वात् कथं संसर्गज्ञानमिति वाच्यं। आहार्यसंसर्गज्ञानस्य यथाकथञ्चित् संसर्गज्ञानस्य[३] च तत्रापि सम्भवात् । न च तथापि संसर्गज्ञानजन्यत्वं नास्त्येवेति व्यभिचार इति वाच्यं। संसर्गज्ञानपूर्वकत्वमात्रस्य साध्यत्वादित्यभिप्रायात् । ननु तथापि प्रमापर्य्यवसायिसाध्यविरहाद्व्यभिचार एवेत्यस्वरसादाह, 'योग्यतेति, बाधविरह एव योग्यता हेतौ प्रविष्टेति भावः। 'अतएव' हेतौ बाधाभावरूपयोग्यताविशेषणादेव, 'शुकवदुच्चरित इति एकपदार्थे-

---

(१) एकप्रकारेण ज्ञातार्थस्य प्रकारान्तरेण ज्ञापनेच्छाया इत्यर्थः ।

(२) प्रकृतपदार्थानामिति क० ।

(३) लौकिकाप्रामाण्याश्रयस्येत्यर्थः ।

व्यभिचारः। शब्दात् संसर्गप्रत्ययस्तु योग्यताभ्रमात्। अत्र संसर्गज्ञानं विना शुकस्यान्धस्य वा सम्वादि-

ऽपरपदार्थसंसर्गज्ञानवदन्येनोच्चरित इत्यर्थः। यद्यपि तादृशयोग्यताविशेषणानुपादाने प्रतारकवाक्यमादाय व्यभिचारशङ्किनि तत्तात्पर्य्यक-विषयादिवाक्यमात्र एव व्यभिचारो भवतीति शुकवदुच्चरितत्वस्य व्यर्थतानुधावनं व्यर्थं, तथापि तादृशवाक्ये एकपदार्थेऽपर-पदार्थज्ञानमात्रपूर्वकत्वसाध्येऽपि व्यभिचारः सम्भवतीति तादृश-विशेषणानुधावनम्। न च तथापि शुकोच्चरिते इत्येव सम्यक्, अन्धुकवदिति व्यर्थमेवेति वाच्यम्। शुकोच्चरिते तात्पर्य्यगर्भहेत्वभावेन व्यभिचारासम्भवात् पुंवचसि तु एकपदार्थेऽपरपदार्थसंसर्गज्ञाना-भावेऽपि इदं वाक्यं भेक-वह्नि-करतल-संसर्गाणां ज्ञानं जनयत्विति सामान्यतस्तात्पर्य्यसम्भवादिति भावः। ननु यदि तत्र न योग्यता तर्हि कदाचित् कथं तत्र संसर्गप्रत्ययः हेत्वभावादित्यत आह, 'शब्दा'दिति, प्रयोजकत्वे पञ्चमी; 'योग्यताभ्रमा'दिति, हेतु-भ्रमादनुमितिरिति भावः। संसर्गज्ञानं विनेति अपरपदार्थे एकपदार्थसंसर्गज्ञानं[१] विनेत्यर्थः, उच्चरिते इति शेषः। शुकवाक्ये तात्पर्य्यघटितहेत्वभावाद्व्यभिचारो न सम्भवतीत्यत आह, 'अन्धस्य वेति, तथापि अपरपदार्थे एकपदार्थसंसर्गज्ञानाभावेऽपि इदं वाक्यं भूतल-घट-संसर्गाणां ज्ञानं जनयत्विति सामान्यतस्तात्पर्य्यं सम्भवतीति बोध्यम्। 'भ्रान्तेति वस्तुगत्या घटाभाववति भूतले घटवद्भूतलमिति भ्रान्तेन प्रतारणेच्छया प्रयुक्ते घटा-

(१) एकपदार्थेऽपरपदार्थसंसर्गज्ञानमिति ख०।

वाक्ये भ्रान्तप्रतारकवाक्ये च व्यभिचारः कथं वा तत्र संसर्गप्रमा वक्तृज्ञानानुमानासम्भवादिति(१) चेत्। न। यदि तत्र संसर्गप्रमा तदा वेदतुल्यतेत्युक्तं।

भावबद्भूतलमिति वाक्ये इत्यर्थः, योग्यतावत्त्वलाभाय 'भ्रान्तेति, 'व्यभिचार इति प्रकृतैकपदार्थसंसर्गवत्प्रकृतापरपदार्थज्ञानपूर्वकत्वाभावादिति भावः। न च भ्रान्तप्रतारकवाक्ये कथं व्यभिचारः अन्यथा ज्ञातार्थस्यान्यथा बुबोधयिषात्मिकायाः(२) प्रतारणायाः संसर्गज्ञानजन्यत्वनियमेन प्रतारणान्यथानुपपत्त्या एकपदार्थसंसर्गवत् परपदार्थज्ञानस्य तादृशस्यापि विषयाबाधात् प्रमारूपस्यावश्यकत्वात् सामान्यतस्तादृशपदार्थज्ञानपूर्वकत्वस्यैव साध्यत्वादिति वाच्यम्। साध्ये स्मारकज्ञानस्य प्रमात्वेन विवक्षितत्वात् काकतालीयसम्वादित्वादाहार्य्यज्ञानस्य प्रमाणान्तरफलत्वात्। यद्वा(३) 'भ्रान्तप्रतारकवाक्ये इत्यस्य भ्रान्तप्रतारकस्यैव वाक्यं इति व्युत्पत्त्या करणापाटवजन्यवाक्य इत्यर्थादिति मन्तव्यं। 'तत्र' तेषु स्थलेषु, 'संसर्गप्रमा' संसर्गज्ञानं, प्रमात्वपर्य्यन्तानुधावनस्य व्यर्थत्वात्, 'वक्तृज्ञानेति, बाधादिति भावः। 'वेदतुल्यतेति वेदे यथा ईश्वरीयसंसर्गप्रमापूर्वकत्वमादाय साध्यसत्त्वं तथा प्रकृतेऽपीत्यर्थः, यदि न संसर्गप्रमा तदा एतद्वाक्यजन्यप्रतीत्यप्रसिद्ध्या तात्पर्य्यघटितहेत्वभावादेव न

---

(१) सूतवक्तृज्ञानानुमानासम्भवादितीति क०।

(२) अन्यार्थबुबोधयिषात्मिकाया इति ख०।

(३) साध्य इत्यादिः यद्वेत्यन्तः पाठः ख-ग-चिह्नितपुस्तकद्वये नास्ति।

आकाङ्क्षा-योग्यतासत्तिश्च ज्ञातोपयुज्यते, अन्यथा शाब्दभ्रमानुपपत्तेरिति। उच्यते। अर्थज्ञानं प्रवर्त्तकं

व्यभिचार इति भावः। ‘उक्तमिति प्रत्यक्षखण्डे उत्पत्तिवादे इत्यर्थः। ननु आकाङ्क्षादिज्ञानं विनापि शब्दश्रवणानन्तरमनुभवसिद्धः पदार्थसंसर्गबोधः स वैशेषिकमते कथं स्यात् हेतुविशेषणीभूताकाङ्क्षादिज्ञानेनानुमानासम्भवात् अतः शाब्दोऽवश्यं मानान्तरमङ्गीकार्य्यं इत्यत आह ‘आकाङ्क्षेति, भवन्मतेऽपि शाब्दबोधे इति शेषः। ‘अन्यथेति यदि ताः स्वरूपसत्यः शाब्दधीकारणानीत्यर्थः[1] ‘शाब्देति शाब्दबोधस्याकाङ्क्षादिभ्रमेणानुपपत्तेरित्यर्थः, स्वरूपसदाकाङ्क्षादेरभावादिति भावः। यथाश्रुतन्तु न सङ्गच्छते योग्यतायाः स्वरूपसदुपयोगित्वे शाब्दभ्रमानुपपत्तावपि आकाङ्क्षासत्त्योः स्वरूपसदुपयोगित्वे तद्विरहात् वह्निना सिञ्चतीत्यादौ शाब्दभ्रमस्थलेऽपि स्वरूपसतोस्तयोः सत्त्वादिति ध्येयम्। तस्मादनेनैव प्रकारेण सर्वत्र शब्दात् संसर्गबोधो भविष्यति किं शब्दस्य प्रमाणान्तरत्वेनेति वैशेषिकाणां पूर्वपक्षः तत्र गूढाभिसन्धिः समाधानमाह, ‘अर्थज्ञानमिति इदन्त्वावच्छिन्ने तादात्म्यसम्बन्धेन रजतप्रकारकं ज्ञानमित्यर्थः, ‘प्रवर्त्तकं’ इदं रजतं न वेत्यादिसंशयाभावप्रयोजकं, तादृशसंशयप्रतिबन्धकमिति यावत्, यथाश्रुतन्तु न सङ्गच्छते रजतादिनिष्टेष्टसाधनतादिज्ञानस्य उपादानप्रत्यक्षविधया इदं रजतमित्यादिप्रत्यक्षस्य च प्रवृत्तिहेतुत्वेनेदं

---

(१) शाब्दधीकारणानीति शेष इति क०।

न तु तज्ज्ञानज्ञानं गौरवात् व्यभिचाराच्च, अतो 'रजतज्ञानवानयमिति ज्ञानं न प्रवर्त्तकं किन्त्विदं रजतमिति ज्ञानं, इदमपि ज्ञानं रजतविषयकमिति

रजतमित्यादिवाक्यजन्यशाब्दबोधस्य क्वापि प्रवृत्त्यनुपधायकत्वात् । यद्वा 'प्रवर्त्तकं' तादात्म्यसम्बन्धेन रजतादिप्रकारकप्रवृत्तिस्वरूपयोग्यमित्यर्थः, तथाच प्राचां मते तद्विशेष्यक-तत्संसर्गक-तत्प्रकारक-प्रवृत्तित्वावच्छिन्नं प्रति तादृशज्ञानत्वेन शाब्दबोधादिसाधारणेन सामान्यतः कार्य्य-कारणभावान्तराभ्युपगमाच्छाब्दबोधोऽपि तादृश-प्रवृत्तिस्वरूपयोग्य इति नासङ्गतिः, एवमग्रेऽपि । 'न तु तज्ज्ञान-ज्ञानमिति न तु तादृशज्ञानज्ञानमित्यर्थः, 'व्यभिचाराच्चेति तादृशज्ञानज्ञानसत्त्वेऽप्युक्तयोग्यतोत्पादाच्चेत्यर्थः, यद्वाकस्मात् इदं रजत-मित्याद्यभेदप्रत्यक्षाज्जायमानायां प्रवृत्तौ व्यभिचाराच्चेत्यर्थः । सामा-न्यत उक्तमर्थं(१) प्रकृते योजयति, 'रजतज्ञानेति रजतपदार्थसंसर्ग-तदिदम्पदार्थज्ञानवानित्यानुमानिकं ज्ञानमित्यर्थः, ज्ञानवानयमि-त्यभिधानन्तु आकाङ्क्षादिमद्वाक्यप्रयोक्तृत्वलिङ्गकपुरुषपक्षकानुमाना-भिप्रायेण, प्रकृते तु तादृशज्ञानपूर्वकमिदमिति बोध्यम्, 'इदं रजतमिति इदं रजतमित्याकारकं ज्ञानमित्यर्थः, अर्थज्ञानं प्रवर्त्त-कमित्यत्रार्थज्ञानपदेन रजतविषयकं ज्ञानमुक्तमिति भ्रमेणाशङ्कते, 'इदमपीति, संसर्गविशेषणतया रजतपदार्थत्वरूपेण रजतस्यापि

---

(१) सामान्यत उक्तेति ख०, ग० ।

चेत्, सत्यं, न तु रजतत्वप्रकारकं प्रवर्त्तकञ्च तथा, अन्यथा भ्रान्तस्येव भ्रान्तिज्ञस्यापि प्रवृत्तिप्रसङ्गः

भावादिति भावः । भ्रमन्निराकरोति, 'सत्यमिति, 'न तु रजतत्वप्रकारकमिति न तु रजतत्वात्मकतादात्म्यसम्बन्धेन इदन्त्वावच्छिन्ने रजतप्रकारकमित्यर्थः, यथाश्रुते 'किञ्चेत्यादिना वक्ष्यमाणेन पौनरुक्त्यापत्तेः, तथाच इदं रजतमित्यादिवाक्यश्रवणानन्तरमिदं रजतं न वेति संशयाभावस्यानुभवसिद्धतया तत्प्रतिबन्धकीभूतज्ञानस्यावश्यकं तच्चोक्तानुमानाच्च निर्वहतीति तन्निर्वाहाय शब्दस्य मानान्तरत्वं । यद्वा इदं रजतमित्यादिवाक्यश्रवणानन्तरं तादात्म्यसम्बन्धेन रजतप्रकारकप्रवृत्तिस्वरूपयोग्यं ज्ञानं सर्वसिद्धं तच्चोक्तानुमानान्न निर्वहतीति तदर्थं शब्दस्य मानान्तरत्वमिति भावः ।

केचित्तु 'न तु रजतत्वप्रकारकमिति न त्विदन्त्वावच्छिन्ने समवायसम्बन्धेन रजतत्वप्रकारकमित्यर्थ इत्याहुः, तदसत्, तथा सति न्यायनयेऽपि इदं रजतमिति वाक्यात् तादृशशाब्दबोधासम्भवादसामञ्जस्यापत्तेरिति[1] ध्येयं ।

ननु ज्ञानं यच्च यत्र यद्यत्प्रकारकं ज्ञानज्ञानमपि तत्र तत्प्रकारकमिति[2] नियमादुक्तानुमानमपीदन्त्वावच्छिन्ने तादात्म्यसम्बन्धेन रजतप्रकारकमित्यत आह, 'अन्यथेति तादृशनियम-इत्यर्थः, 'भ्रान्तस्येव' इदं रजतमिति भ्रमस्येव, 'भ्रान्तिज्ञस्य' तादृशभ्रमविषयकज्ञानमात्रस्य, 'प्रवृत्तिप्रसङ्गः' निरुक्तसंशयप्रतिबन्ध-

---

(१) असङ्गतत्वापत्तेरितीति ख०, ग० ।

(२) तत्र तत्संसर्गक-तत्प्रकारकमितीति क० ।

तदुभयसङ्करापत्तिश्च[१] । एतेन लक्षणाद्यनुरोधात्तात्पर्य्यग्रहो वाक्यार्थधीहेतुः तात्पर्य्यञ्च पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वं, तथाच तद्ग्राहकानुमानादेव तात्पर्य्यज्ञानावच्छेदकतया संसर्गसिद्धिरित्यपास्तं[२] ।

प्रसङ्गः निरुक्तसंशयप्रतिबन्धकरूपफलोपहितत्वप्रसङ्ग इति यावत्. यद्वा- कल्पे 'प्रवृत्तिप्रसङ्गः' निरुक्तप्रवृत्तिस्वरूपयोग्यत्वप्रसङ्गः, 'तदुभयेति भ्रमविषयकेश्वरज्ञान-भ्रमयोरभेदापत्तिरित्यर्थः, उभयोरेव यथार्थ-रजतप्रकारकज्ञानत्वादिति भावः । 'एतेन' इदन्त्वावच्छिन्ने तादात्म्य-सम्बन्धेन रजतप्रकारकज्ञानस्यैव इदं रजतं न वेति संशयप्रतिबन्धकत्वेन तादृशज्ञानस्यैव तादात्म्यसम्बन्धेन रजतप्रकारकप्रवृत्तिस्वरूपयोग्यत्वेन वा. 'इति परास्तमित्यग्रेतनेनान्वयः. 'लक्षणादीति लक्षणादिस्थले शाब्दबोधे विनिगमकानुरोधेनेत्यर्थः, 'आदिना नानार्थस्थलपरिग्रहः, तात्पर्य्यग्रहस्याहेतुत्वे यष्टीः प्रवेशयेत्यादौ लाक्षणिकस्थले यष्टिधरस्य लाक्षणिकार्थस्यैवान्वयबोधः न तु शक्यार्थस्येत्यत्र विनिगमकाभावापत्तेः एवं भोजनसमये सैन्धवमानयेत्यादिप्रयुक्ते लवणस्यैवान्वयबोधो न तु अश्वस्येत्यत्रापि विनिगमकाभावापत्तेश्चेति भावः । 'संसर्गप्रतीत्युद्देश्यकत्वमिति[३] एकपदार्थेऽपरपदार्थसंसर्गप्रतीतीच्छयोच्चरितत्वमित्यर्थः, 'तात्पर्य्यज्ञानावच्छेदकतया' तात्पर्य्यघटकज्ञानावच्छेदकतया, 'संसर्ग-

(१) तदुभयसङ्करापत्तिश्चेति क०, ख० ।

(२) इति परास्तमित्यपि पाठान्तरं, ईदृशपाठ एव टीकाकारसम्मत इति ।

(३) 'पदार्थसंसर्गविशेषप्रतीत्युद्देश्यकत्वं' इत्यत्र 'संसर्गप्रतीत्युद्देश्यकत्वं' इति कस्यचिन्मूलपुस्तकस्य पाठमनुसृत्य ईदृशः पाठो धृतो मथुरानाथेनेति सम्भाव्यते ।

किञ्च व्यापकतावच्छेदकप्रकारिकानुमितिरतः(1) स्मा-रितपदार्थसंसर्गज्ञानपूर्व्विकाणीत्यनुमितिः स्यात् न तु

सिद्धिरिति, अतः किं शब्दस्य प्रमाणान्तरत्वेनेति शेषः, अन्यथा संस-र्गसिद्धेरनपायत्वेनाप्रयोजकतापातात्, 'परास्तमिति, इदं रजतं न वेति संशयप्रतिबन्धकज्ञानस्य तादात्म्यसम्बन्धेन रजतप्रकारकप्रवृत्तिस्व-रूपयोग्यज्ञानस्य वा अतोऽसम्भवादिति भावः। ननु तथापि निरुक्तसंशयप्रतिबन्धकत्वं निरुक्तप्रवृत्तिस्वरूपयोग्यत्वं वा न तावदि-दन्त्वावच्छिन्नविशेष्यक-तादात्म्यसंसर्गकरजतप्रकारकज्ञानत्वेन अपि तु इदन्त्वाश्रय-रजतयोरभेदसंसर्गावगाहिज्ञानत्वेन अस्य सामान्य-धर्मत्वेन लघुत्वादत एव इदं-रजतयोरभेदः अथ रजताभेद इत्या-दिज्ञानस्यापि तादृशसंशयप्रतिबन्धकत्वं तादृशप्रवृत्तिस्वरूपयोग्यत्व-ञ्चेति मन्यते तन्मते शब्दस्य प्रमाणान्तरत्वमनर्थकमेव उक्तानुमाना-दपि तादृशज्ञाननिर्वाहादित्यरुचेराह, 'किञ्चेति, 'व्यापकतावच्छे-दकेति व्यापकतावच्छेदकत्वेन गृहीतधर्मप्रकारिकैवेत्यर्थः, 'स्मारित-पदार्थेति एतद्रजतपदस्मारितार्थसंसर्गवदेतदिदम्पदस्मारितार्थज्ञान-पूर्विकाणीत्यर्थः, 'न तु रजतज्ञानेति न तु रजताभेदवदिदंज्ञाने-त्यर्थः, तथाच येनेदन्त्वाश्रय-रजतयोरभेदसंसर्गावगाहिज्ञानत्वेनेदं रजतं न वेति संशयप्रतिबन्धकत्वं तादात्म्यसम्बन्धेन रजतप्रकारक-प्रवृत्तिस्वरूपयोग्यत्वं वा अभ्युपगम्यते तेनापि रजतांशे निरवच्छि-न्नरजतत्वप्रकारितानिरूपिता अभेदसंसर्गांशे चाभेदत्वातिरिक्त-

---

(1) तत इति ख०।

रजतज्ञानपूर्वकत्वादीति तस्मात् प्रवर्त्तकं ज्ञानं शब्दादेव। अतएव प्रवृत्त्यर्थमनुवादकता शब्दस्येत्यपास्तम्(१)।

प्रकारित्वानिरूपिता या इदं रजताभेदवदिति धीविषयिता तस्यावच्छेदककोटौ प्रवेशनीया, अन्यथा प्रमेयवत् पदार्थवत्प्रमेयसंसर्गवत् पदार्थसंसर्गवत् रजतीयप्रमेयवत् रजतीयजातिमदित्यादिज्ञानस्यापि संशये प्रतिबन्धकत्वापत्तेः प्रकृतानुमानाच्च तत्र इदं रजतत्वरूपेण रजतस्याभेदत्वेन च अभेदस्याभानात् पदार्थत्वेनैव रजतस्य संसर्गत्वेनैव चाभेदस्य भानादिति भावः । 'प्रवर्त्तकं ज्ञानमिति इदं रजतमिति वाक्यश्रवणानन्तरमनुभवसिद्धस्येदं रजतं न वेत्यादिसंशयाभावस्य प्रयोजकं ज्ञानमित्यर्थः, यद्वा तादृशवाक्यश्रवणानन्तरमनुभवसिद्धं तादात्म्यसम्बन्धेन रजतप्रकारकप्रवृत्तिस्वरूपयोग्यं ज्ञानमित्यर्थः, 'शब्दादेवेति, उक्तानुमानव्यवच्छेदमात्रे तात्पर्यं नोक्तानुमानादित्यर्थः, अतः शब्दो मानान्तरमिति शेषः। अन्मीमांसकमतं निराकरोति, 'अत एवेति अत एवोक्तानुमाने स्मारितपदार्थत्वस्यैव प्रकारः न तु रजतत्वादिकं अत एवेत्यर्थः, 'इति परास्तमित्यनेनान्वयः, 'प्रवृत्त्यर्थं' इदं रजतमित्यादिवाक्यश्रवणानन्तरमिदं रजतं न वेत्यादिसंशयाभावसम्पत्त्यर्थं तदानीं तादृशसंशयप्रतिबन्धार्थमिति यावत्, यद्वा तादृशवाक्यश्रवणानन्तरं तादात्म्यसम्बन्धेन रजतप्रकारकप्रवृत्तिस्वरूपयोग्यज्ञानार्थमित्यर्थः, उक्तरूपानुमानात्तदसम्भवादिति भावः। 'अनुवादकता शब्दस्येति उक्तरूपानुमानानन्तरं शाब्दानुभवजनकता शब्दस्येत्यर्थः, सर्वत्रोक्तानुमितिसामग्रीसत्त्वेनोक्तरूपानुमितेः प्रागुत्पाद-

(१) अत्रापि 'परास्तमिति पाठान्तरं।

शाब्दानुमित्योर्भिन्नप्रकारकत्वात् एकविषयत्वाभावेन

दिति भावः। तथाच शब्दो न प्रमाणमिति शेषः। प्रमाकरणं हि प्रमाणं प्रमा च अगृहीत[illegible]नुभवः गृहीतग्राह्यगृहीतरानुभव-इति यावत्, घटो द्रव्यमित्यादिज्ञानोत्तरं जायमानस्य घटो द्रव्य-मित्यादिज्ञानस्य अप्रमात्ववारणाय मात्रपदं(१). स्वसमानाधिकरण-स्वाव्यवहितपूर्ववर्ति निश्चय[illegible] विषयकेतरानुभव इति फलितार्थः, शाब्दबोधस्य न तथा तयोरनुमितिरूपतादृशनिश्चयविषयाविष-यकत्वात्, [illegible]प्रत्यक्षानुमित्योः प्रमा[illegible]वारणाय निश्चयत्वनो-पादानं, [illegible] [illegible]सामान्यपदोपाद-नमिति भावः। [illegible] [illegible]गृहीत[illegible]ग्राह्यनुभवत्वान-भ्युपगमेन प्रमाणत्वं [illegible] लौकिकशब्दस्यैव तथात्वादप्रमाणत्वं वैदिकस्तु [illegible] [illegible] [illegible]।

'[illegible]वेत्यस्यार्थं विवृणोति, '[illegible]' [illegible]ति शाब्दबोधे रजत-त्वादेः प्रकारत्वादनुमितौ च [illegible] प्रकारत्वादित्यर्थः,

'एकविषयत्वाभावेनेति' शाब्द[illegible] [illegible]यमानविषयत्व-

(१) [illegible] गृहीतेतर[illegible] न [illegible]मात्रग्राहित्व-मिति [illegible]।

(२) ननु स्वसमानाधिकरण[illegible] [illegible]विषयविषयकानुभव: प्रमा [illegible] [illegible] [illegible] यथाभिमतं स्यात्, अतनु [illegible] [illegible] [illegible], [illegible] प्रतियोगित्वं [illegible] [illegible], तथाच स्वसमानाधिकरण-स्वाव्यवहित[illegible]निश्चय[illegible] [illegible]विषयको यो यः स्वसमानाधिकरण-स्वाव्यवहितपूर्व[illegible] [illegible] [illegible]विषयाविषयको यो य इति यावत्, [illegible]भिन्नानुभवः प्रमा इति फलि-तार्थः स्वपदद्वयं [illegible]प्रतियोग्यनुभवपरमिति।

अननुवादकत्वात् तस्यैव प्रमाणत्वात् । नन्वेते पदार्था-

त्वाभावेनेत्यर्थः, 'अननुवादकत्वा'दिति गृहीतमात्रग्राहीतरत्वादित्य-र्थः, 'तस्यैव' तस्यापि शब्दस्यापीति यावत्, 'प्रमाणत्वा'दिति गृहीत-मात्रग्राहीतरानुभवकरणत्वादित्यर्थः, यद्यपि सुगममप्रामाण्यत्वादुक्तं । वस्तुतस्तु सर्वत्र शाब्दबोधपर्यन्तमनुमितिसामग्रीसत्त्वे भानाभा-वेन तत्र प्रथमं नैतादृशानुमितिसामग्री तत्रैव गृहीतमात्रग्राही-तरानुभवकरणत्वसम्भवः । किञ्च स्वप्रमाणाधिकरण स्वाव्यवहितपूर्व-वर्त्तिनिश्चयाविषयविषयकेतरानुभवत्वं न प्रमात्वं तथा सति घटः सत्तावानित्यनुमितेः परामर्शविषयमात्रविषयकत्वेनाप्रमा-त्वापत्तेः,[१] परन्तु अगृहीतग्राहि तद्विशेष्यक-तत्प्रकारकानुभवत्वं तच्च तत्प्रमात्वं, अगृहीतग्राहित्वञ्च गृहीतग्राहीतरत्वं [illegible] प्रमाणाधिकर-ण-स्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयाविषयकेतरत्वमिति यावत्, तथाच स्वप्रमाणाधिकरण-स्वाव्यवहितपूर्ववर्त्ति-स्वसमा-नाकारनिश्चयविषयाविषयकेतरतद्विशेष्यक-तत्प्रकारकानुभवत्वं तच्च तत्प्रमात्वं तादृशानुभवकरणत्वञ्च तस्य तत्प्रमाणत्वमिति फलितं,

(१) परामर्शविषयमात्रविषयकत्वेन [illegible] अप्रमात्वापत्तेरिति परामर्शविषय-मात्रविषयकत्वेनेत्यर्थः । न च [illegible] बुद्धिस्थ [illegible] परामर्शोत्तरं [illegible] समानाकारा [illegible] अनुमितेः परामर्शविषयमात्रविषयक-त्वेन प्रमात्व [illegible] प्रसिद्ध [illegible] इति वाच्यं । पर्व-तीयवह्नेः प्रागननुभवात् तादृशपरामर्श [illegible] त्वेन सद्व्यक्तिमीयपक्षा-दिविषयकत्वेन [illegible] तादृश [illegible] विषयपर्वतीयवह्निविषयक-त्वेनाप्रमात्वासम्भवात् ।

तात्पर्यविषयीभूतसंसर्गवत्त्वः आकाङ्क्षादिमत्पदस्मा-

समानाकारत्वञ्च यस्मिन् यादृशी तद्विशेष्यकत्वावच्छिन्नतत्प्रकारिता तादृशतद्विशेष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वं, इत्यञ्चोक्तानुमानस्य शाब्दबोधसमानाकारत्वमेव नास्ति शाब्दबोधे तावदेकपदार्थे परपदार्थः प्रकार उक्तानुमाने च तत्संसर्ग इति भेदादिति भूतः शाब्दबोधस्याप्रमात्वं । एतेन तात्पर्यज्ञानं यदि शाब्दधीहेतुस्तदा शब्दमानस्यैव गृहीतमात्रयाथार्थ्यानुभवसामग्रीजनकत्वादप्रमाणत्वं तात्पर्यस्य तद्विशेष्यक-तत्प्रकारकप्रतीतीच्छयोच्चरितत्वरूपतया तज्ज्ञान एव शाब्दबोधविषयीभूतस्य सर्वस्यैव प्रथमं भानादित्यपि निरस्तं । यथोक्ततात्पर्यज्ञानस्य शाब्दधीसमानाकारत्वाभावादिति ध्येयम् । ननु मा भूदुक्तानुमानादिदन्त्वावच्छिन्ने रजतत्वादिप्रकारेण रजतादिसंसर्गज्ञानं तथापि विशिष्य पदार्थपक्षकादीदृशानुमानाद्भविष्यतीत्याशयेनाशङ्कते, 'नन्विति, 'एते पदार्था इति इदन्त्वाश्रयरजतादय इत्यर्थः, 'तात्पर्येति तात्पर्यविषयीभूतो यः परस्परसंसर्गस्तद्वन्त इत्यर्थः, अत्र इदन्त्वाश्रयरजतादयस्तात्पर्यविषयसंसर्गवन्त इति साध्ये इदं रजतं न वेत्यादिसंशयनिवर्त्तकज्ञानस्य न निर्वाहः इदं रजतसंसर्गवदित्याकारकनिश्चयस्यैव तादृशसंशयनिवर्त्तकत्वादतो यत्र यस्य संसर्गबोधो वस्तुतः शब्दाज्जायते तं पक्षयित्वा तात्पर्यविषयीभूततत्संसर्गः साधनीयः इति भावात् 'मिथः-सत्त्वे तथाच इदं रजतमित्यादौ इदं रजतसंसर्गवदित्यादिकमेव साध्यं, रजतमानयेत्यादौ च कर्मत्वं रजतसंसर्गवदानयनं रजतकर्म-

[illegible]विषयीभूतान्वयसंसर्गबोधाद्विशेषेण [illegible]
तात्पर्यं यथोऽपि [illegible] लनुमितिः, [illegible]
न्वय-पदयोरनुकूलसंसर्गे तात्पर्यं तदा [illegible] पदोपस्थाप्य-
संसर्गाश्रये सतो [illegible] विषयसंसर्गस्यापि सिद्धिर्न स्यादि-
ति 'तात्पर्यविषयेति संसर्गविशेषणं'। न च तत्सिद्धौ [illegible]
उद्देश्यतानुकूलसंसर्गज्ञानस्य सत्त्वादधिकन्तु प्रविष्टमिति व्यापा-
दिति वाच्यम्। तर्हि तदानीं तद्विषयकबुद्धेरनुभवसिद्धत्वे अनु-
मानादृष्टत्वात्तदनुरोधेनैव प्रकृतस्य प्रमाणान्तरत्वापत्तेः। एवं सर्वत्र
बोध्यं, तात्पर्यविषयत्वञ्च एतत्पुरुषीयैतत्कालीना या एतदनुभव-
पदजन्यसंसर्गप्रतीतीच्छा तद्विषयत्वं, तेन न संसर्गमात्रस्यैव पुरुषा-
न्तरीय-कालान्तरीय-वाक्यान्तरजन्यप्रतीतीच्छाविषयत्वादर्थान्तर-
तादवस्थ्यं। आकाङ्क्षानिरूपकत्वमपि संसर्गविशेषणं देयं, इतरथा
यदा [illegible]योरनुकूलत्वे समानकालीनत्वे च संसर्गे तात्पर्यं
तदा [illegible] समानकालीनत्वसंसर्गस्यापि सिद्धिः स्यात्।
आकाङ्क्षानिरूपकत्वञ्च एतत्पदद्वयाकाङ्क्षानिरूपकत्वं वाच्यम्,(१)
अन्यथा तस्यापि कुत्रचिदाकाङ्क्षानिरूपकत्वात्। न च वैशेषिकैः
शाब्दत्वजातेरनभ्युपगमादाकाङ्क्षानिरूपकत्वं दुर्वचमिति वाच्यम्।
तैरपि शाब्दत्वजातिरभ्युपेयत एव परन्तु सा जातिरनुमिति-
वृत्तिरनुमितित्वव्याप्यैवाभ्युपगमात्। अस्तु वा तत्संसर्गविषय-
संसर्गत्वेनाकाङ्क्षानिरूपकत्वमभ्युपेयमिति न काप्यनुपपत्तिः। एवं
[illegible]यादौ इदंपदस्य-[illegible]संसर्गानुमाने तु तात्पर्ये

(१) बोधकमिति ख०, ग० ।

विषयत्वं संसर्गविशेषणमनुपादेयं इदं-रजतयोरभेदसंसर्गे समान-
कालीनत्वसंसर्गे च तात्पर्य्यदशायां समानकालीनत्वसंसर्गसिद्धिवा-
रणायावश्यं आकाङ्क्षानिरूपकत्वेन संसर्गो विशेषणीयः, तथाच
तत एवाभेदसंसर्गमात्रे तात्पर्य्यदशायामपि तात्पर्य्याविषयसंसर्गान्त-
रसिद्धिवारणात् संसर्गान्तरस्य तत्राकाङ्क्षानिरूपकत्वविरहात्, एवं
रजतमानयेत्यादावपि कर्मत्वपक्षक-रजतसंसर्गसाध्यकानुमाने तात्प-
र्यविषयत्वं संसर्गविशेषणमनुपादेयम् रजत-कर्मत्वयोराधाराधेयभावे
समानकालीनत्वे च संसर्गे तात्पर्य्यदशायां कर्मत्वे रजतस्य संस-
र्गसिद्धिवारणायावश्यमाकाङ्क्षानिरूपकत्वेन संसर्गो विशेषणीयः,
तथाच रजत-कर्मत्वयोराधाराधेयभावसम्बन्धमात्रे तात्पर्यदशा-
यामपि तत एव तात्पर्याविषयसमानकालीनत्वादिसंसर्गसिद्धेर्वा-
रणादिति बोध्यम्। 'आकाङ्क्षादीति रजतपदाकाङ्क्षादिमत्पद-
स्मारितत्वादित्यर्थः, आदिना योग्यतापरिग्रहः, अत्र स्मारितत्वमात्रं
घट-पटयोरपीति रजतपदयोग्यतावत्पदस्मारितत्वमुक्तं, रजतपद-
योग्यतावत्त्वं रजतपदार्थाबाधितार्थकत्वं। न च रजतपदयोग्यता-
वत्पदस्मारितत्वं रजतमानयेत्यत्रामपदोपस्थापिते कर्मत्वे वर्त्तते तत्रेदं
रजतमित्यत्र यदिदम्पद-रजतपदे तदुभयनिष्ठाकाङ्क्षानिरूपकतदु-
भयतात्पर्यविषयीभूतरजतसंसर्गो नास्तीति व्यभिचार इति वाच्यम्।
एतद्रजतपदार्थाबाधितार्थकैतदिदम्पदस्मारितत्वस्य हेतुत्वात् यद्र-
जतपदार्थाबाधितार्थकयत्पदस्मारितं भवति तत्तत्पदद्वयतात्पर्य-
विषयीभूततत्पदद्वयनिष्ठाकाङ्क्षानिरूपकरजतसंसर्गवद्भवति रजतेने-
त्यादिवाक्यस्थटापदादिस्मारितरजतनिष्ठकरणत्वादिवदिति सामान्य-

मुखी व्याप्तिः। न च तथापि रजतपदार्थत्वं रजतपदजन्यस्मृति-विशेष्यत्वं तच्च लक्षणादिना घटादावपीति घटादिलाक्षणिकरजत-पदघटितरजतमानयेत्यादिवाक्यस्थामपदोपस्थापिते घटनिष्ठकर्मत्वे व्यभिचार इति वाच्यम्। रजतासक्तिमत्त्वेन रजतपदविशेषणात्, रजतासक्तिश्च रजतान्यविशिष्यकस्मृत्यनुपधायकत्वं। न च तथापि रजतमानयेत्यत्रामपदेन कर्मत्वत्वरूपेण स्मारिते घटनिष्ठकर्मत्वे व्यभि-चार इति वाच्यम्। रजतपदार्थाबाधितार्थकत्वपदेन रजतपदार्थ-बाधितार्थोपस्थापकभिन्नत्वस्य विवक्षितत्वात् घटनिष्ठकर्मत्वस्य रजत-पदार्थे बाधितत्वात्। एवञ्च यद्रजतान्यविशेष्यकस्मृत्यनुपधायकयद्र-जतपदजन्यस्मृतिविशेष्यबाधितार्थोपस्थापकभिन्नयत्पदस्मारितं भवति तत्तत्पदद्वयतात्पर्यविषयीभूततत्पदद्वयनिष्ठाकाङ्क्षानिरूपकरजतसंस-र्गवद्भवतीति सामान्यतो व्याप्तिः फलिता। न च तथापि शुक्तौ रजतेऽप्रत्यायके रजतमानयेत्यत्रामपदोपस्थापिते रजतनिष्ठकर्मत्वे व्यभिचारः तत्र तात्पर्यगर्भसाध्याप्रसिद्धेः तात्पर्यवत्त्वेन हेतुविशेषणेऽपि रजत-कर्मत्वयोस्तादात्म्यसंसर्गतात्पर्यके रजतमानयेत्यत्रामपदोपस्था-पिते रजतनिष्ठकर्मत्वे व्यभिचारः तात्पर्यविषयीभूतरजतसंसर्गस्य रजततादात्म्यस्य रजतकर्मत्वेऽभावादिति वाच्यम्। इदं रजतमान-येत्यादौ इदङ्कर्मत्वादिपक्षक-रजतसंसर्गसाध्यकानुमाने तात्पर्यविष-यत्वस्य संसर्गविशेषणत्वाभावेन व्यभिचारविरहात्, यत्र तु तात्पर्य-घटितं साध्यमुपादीयते तत्र योग्यताघटकाबाधितत्वस्य तत्तत्पद-द्वयतात्पर्यविषयीभूतसंसर्गेण विवक्षणीयत्वात्। आकाङ्क्षाविशेषणो-पादानञ्च रजतं कर्मत्वमित्यत्र रजतपदार्थाबाधितार्थोपस्थापककर्मा-

-कपदोपस्थापिते रजतनिष्ठकर्मत्वे रजतपद-कर्मत्वपदोभयनिष्ठाका-ङ्क्षानिरूपकरजतसंसर्गवत्त्वाभावेन व्यभिचारवारणाय, कर्मत्वपदस्य रजतपदाकाङ्क्षावत्त्वविरहात्। यद्यपि कर्मत्वपदेऽपि तादात्म्यसम्बन्धेन रजतपदाकाङ्क्षावत्त्वमस्त्येव तथापि तत्तत्पदद्वयनिष्ठाकाङ्क्षानिरूपक-सम्बन्धेनाबाधितत्वं योग्यताघटकं वाच्यमेतदभिप्रायेणैव साकाङ्क्षपद-त्वमिति भावः। इत्यनन्तरमाह, 'योग्यतेति एतद्रजतपदयोग्यताव-च्छिन्नत्वे सति रजतसंसर्गपरैतदन्यपदस्मारितत्वादित्यर्थः, यद्यद्र-जतपदयोग्यतावच्छिन्नत्वे सति रजतसंसर्गपरयत्पदस्मारितं भवति तत्तत्पदद्वयतात्पर्यविषयीभूतसंसर्गवद्भवति रजतमेत्यादिवाक्यघटा-पदादिस्मारितरजतनिष्ठकर्मत्वादिवदिति सामान्यमुखी व्याप्तिः अतोऽन्वयदृष्टान्तासिद्धिः, अत्र रजतमानयेत्यत्रत्यपदेन कर्मत्वस्य-रूपेण स्मारिते घटनिष्ठकर्मत्वे व्यभिचारवारणाय रजतपदयोग्य-तावच्छिन्नत्वं विशेषणं, रजतपदयोग्यता च रजतपदजन्यस्मृतिविशेष्याबा-धितत्वं, तथापि वक्त्रा यत्र रजतसंसर्गप्रतीतीच्छया रजतमानयेत्या-दिवाक्यं प्रयुक्तं श्रोत्रा च भ्रान्त्या रजतपदेन घटः स्मारितः अम्-पदेन च घटनिष्ठकर्मत्वं स्मारितं तत्र घटनिष्ठकर्मत्वे व्यभिचार-इति रजतपदावच्छिन्नत्वं विशेषणं, तदर्थस्तु रजतपदजन्यरजतसं-सर्गविशेष्यकस्मृतिसमानकालीनस्मृतिगोचरत्वं, तत्पदोपादानाच्च रजतमानयेत्यादिवाक्यस्थरजतपदेन रजत-घटोभयविशेष्यकसमूहा-लम्बनस्मृतिर्जनिता तत्र घटनिष्ठकर्मत्वे न व्यभिचारः, स्मृतित्वाव-च्छिन्नेन च रजतपदं विशेषणीयं अतः कर्मत्वरजत-घटविशेष्यक-स्मृतित्वमादाय तद्दोषतादवस्थ्यं तात्पर्यकेण घटादिसंसर्गता-

रितत्वात् योग्यतासत्तिमत्त्वे सति संसर्गपरपदस्मारितत्वाद्वा, अनाप्तोक्ते योग्यताविरहात् न व्यभिचारः, तत्र बाधकसत्त्वात्, तज्जन्यज्ञानस्य भ्रमत्वात्

तात्पर्य्येण वा रजतपदोत्तरामादिपदेन स्मारिते रजतकर्मत्व-करणत्वादौ व्यभिचारवारणाय रजतसंसर्गपरत्वप्रवेशः[१]। यद्यप्येवमपि रजत-कर्मत्वयोः तादात्म्यसंसर्ग एव तात्पर्य्यदशायामाधाराधेयभावेन रजताबाधिते रजतकरणत्वादौ व्यभिचारस्तथापि तात्पर्य्यविषयसंसर्गाबाधितार्थकत्वविवक्षणान्न व्यभिचार एतल्लाभाय तदुपादानमिति[२] ध्येयं। ननु करकाभिप्रायेण प्रयुक्ते पयसा सिञ्चतीति वाक्ये व्यभिचार इत्यत आह, 'अनाप्तोक्ते' इति, योग्यताविरह एव कुत इत्यत आह, 'तत्रेति, 'बाधकसम्भवात्'[३] बाधकसत्त्वात्। नन्वन्वयप्रयोजकरूपवत्त्वमेव योग्यता सा च तत्राप्यस्त्येवेत्यत आह, 'तज्जन्येति, तथाचान्वयप्रयोजकरूपवत्त्वस्य योग्यतात्वे तज्जन्यज्ञानस्य भ्रमत्वं न स्यात् योग्यताभ्रमस्य तत्प्रयोजकस्याभावादतो बाधविरह एव योग्यतेति भावः। नन्वेवं द्रवीभूतजलाभिप्रायेण प्रयुक्तं पयसा सिञ्चतीति वाक्यमपि प्रमाणं न स्यादयोग्यत्वात् न टीकाकारवा-

---

(१) रजतसंसर्गपरेतीति ख०, ग०।

(२) तात्पर्य्यविषयसंसर्गाबाधितत्वलाभाय तदुपादानमितीति ख०, ग०।

(३) टीकाकृता ईदृशपाठधारणेन 'बाधकसत्त्वात्' इत्यत्र कुत्रचित्पुस्तके 'बाधकसम्भवात्' इति पाठो वर्त्तत इत्यनुमीयते।

एकाकारवाक्यस्यापि बाधकसत्त्वासत्त्वाभ्यां योग्यायोग्यत्वात्। अथ प्रतिपत्तुर्जिज्ञासां प्रति योग्यता सा च श्रोतरि तदुत्पाद्यसंसर्गावगमप्रागभावरूपाकाङ्क्षा बाधकप्रमाविरहो योग्यता अव्यवहितसंसर्गप्रतियोगिज्ञानमासत्तिः ताश्च स्वरूपसत्यो हेतवो न तु ज्ञाताः गौरवात् तद्बोधं विनाऽन्वयानुभवे विलम्बाभावात् संसर्गनिरूप्यत्वेन प्रथमं दुरवधारणत्वाच्चेति न तानि लिङ्गविशेषणानीति चेत्, न, योग्यतादि-

---

कस्य योग्यत्वमयोग्यत्वञ्च समानत्वेनेत्यत आह, 'एकाकारवाक्येति, 'बाधकेति विषयबाधसत्त्वासत्त्वाभ्यामित्यर्थः। 'अथेति, यद्यपि योग्यतादिज्ञानस्य कारणत्वं व्यवस्थापितमेव तथापि संसर्गघटितत्वेन दुर्ग्रहत्वाच्च तासां ज्ञातानां शाब्दबोधोपयोगित्वमिति दूषणोद्धाराय पुनराशङ्कितं। 'प्रतिपत्तुः' श्रोतुः, 'जिज्ञासां प्रति योग्यतेति, अजिज्ञासोरपि वाक्यार्थबोधाद्योग्यतानुधावनं। योग्यतामेव विवृणोति, 'तदुत्पाद्येति प्रकृतवाक्योत्पाद्येत्यर्थः, 'बाधकेति एकपदार्थेऽपरपदार्थसंसर्गाभावनिश्चयाभाव इत्यर्थः, 'अव्यवहितेति एकसंसर्गप्रतियोगिज्ञानाव्यवहितापरसंसर्गप्रतियोग्युपस्थितिरित्यर्थः, 'हेतवः' अस्मन्नये शाब्दबोधे हेतवः, 'न तानि लिङ्गविशेषणानीति,[1] तासां

---

(१) न ता लिङ्गविशेषणानीति ख०, इत्येव पाठः खचिह्नितमूलपुस्तके वर्त्तते।

शून्यत्वेऽपि तदभिमानेन संसर्गप्रत्ययादन्यथा शाब्दाभासोच्छेदप्रसङ्गः । राजा पुत्रमाकाङ्क्षति पुरुषं वेति संशये विपर्य्यये च वाक्यार्थधीप्रतिबन्धाच्च, योग्यता-

---

लिङ्गविशेषणत्वे तासामज्ञानदशायामपि वाक्यार्थबोधो जायते स न स्यादिति तदनुरोधेन शब्दस्यातिरिक्तप्रमाणत्वापत्तेरिति भावः । नन्विदमेवासिद्धमित्यत आह, 'अन्यथेति, तदभिमानेन संसर्गप्रत्यय-इत्यर्थः, 'शाब्दाभासेति निराकाङ्क्षानासन्नायोग्यवाक्यात् शाब्दाभासो न स्यादित्यर्थः, तथाच उक्तरूपा आकाङ्क्षादयः किन्तु तात्पर्य्यविशेष आकाङ्क्षा, पदाव्यवधानमासत्तिः,[१] तदभावप्रमाविरहः यत्र यस्य येन सम्बन्धेनान्वयः तत्र तेन संसर्गेण तद्वत्त्वं वा[२] योग्यता, हेतुनिविष्टमपीदृशेव आकाङ्क्षादिकं, तज्ज्ञानञ्च न्याय-मतेऽपि शाब्दधीहेतुरिति भावः । आकाङ्क्षानिश्चयस्य हेतुत्वे युक्त्यन्तरमाह, 'राजा पुत्रमिति राजा पुत्रविशेष्यकतात्पर्य्यप्रकारः पुरुषविशेष्यकतात्पर्य्यप्रकारो वेत्यर्थः, 'विपर्य्यय इति राजा पुरुषमाकाङ्क्षतीति व्यतिरेकनिश्चय इत्यर्थः, 'वाक्यार्थधीति अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यतामिति वाक्यात् पुरुषे राजान्वयधी-प्रतिबन्धादित्यर्थः । तथाच यत्संशय-व्यतिरेकनिश्चयौ यदुत्पत्ति-प्रतिबन्धकौ तन्निश्चयस्तद्धेतुरिति नियमबलेन आकाङ्क्षानिश्चयः

---

(१) पदाव्यवधानमात्रमासत्तिरिति क० ।

(२) तदभावप्रमाविरहः यत्र यस्य येन सम्बन्धेनान्वयधीः तत्र तस्य तत्संसर्गवत्त्वं तेन संसर्गेण तद्वत्त्वं वेति क० ।

यात् संशयसाधारणं ज्ञानमात्रं हेतुः, स्व-परसाधारण-प्रमाविरहः क्वचित् निश्चीयतेऽपि यथेह घटो नास्ती-त्यत्र स्वयोग्यानुपलब्ध्या घटाभावनिश्चयेनान्यस्यापि घटप्रमाविरहो निश्चीयते। क्वचिद्बाधकप्रमाभाव-

---

कारणमिति भावः। अव्यवधानसंशये शाब्दबोधाभावात् तन्निर्णयो-ऽपि हेतुरिति बोध्यम्[१]। ननु परप्रमाया अयोग्यत्वेन लिङ्ग-विशेषणीभूतस्व-परसाधारणतदभावप्रमाविरहरूपयोग्यतायाः सर्वत्र निश्चेतुमशक्यतया कथमनुमितिरित्यत आह, 'योग्यतायाश्चेति, 'हेतुः' अनुमितिहेतुः, भवन्मते यथा शाब्दबोध इति भावः। ननु संशयसाधारणमित्ययुक्तं तन्निश्चयस्य कस्यचिदप्यसम्भवेन[२] सर्वत्र तत्संशयस्यैव हेतुत्वादित्यत आह, 'स्व-परेति, 'बाधकप्रमा-विरहः' तदभावप्रमाविरहः, 'अन्यस्यापीति, घटाभाववत्त्वेन हेतु-नेति शेषः। ननु तथापि तदभावप्रमाविरहरूपाया योग्यतायाः संशयसाधारणं ज्ञानमनुमितिहेतुरित्ययुक्तं तदभावप्रमाविरहसंश-यदशायां तत्संसर्गानुमितेरसम्भवात्तदभावप्रमाविरहसंशयसामग्री-दशायां तत्तदभावोभयकोट्युपस्थिति-विशेषादर्शनादिमत्त्वेन तद-भावसंशयसामग्र्या आवश्यकत्वात्तदभावप्रमाविरहसंशयस्य तदभाव-संशयात्मकत्वात्तदभावज्ञानस्य प्रतिबन्धकस्य सत्त्वादित्यत आह,

---

(१) 'अव्यवधानेत्यादिः बोध्यमित्यन्तः पाठः क-खचिह्नितपुस्तकद्वये नास्ति।

(२) क्वचिदप्यसम्भवेनेति क०।

निश्चयसंशयेऽप्यन्वयबोधः बाधसंशयस्यादूषकत्वात्(१) ।

'क्वचिदि'ति, 'प्रमे'ति तदभावप्रमेत्यर्थः, 'अन्वयबोधः' तत्संसर्गानुमितिः, 'बाधे'ति तदभावसंशयस्येत्यर्थः, तदभावनिश्चयस्यैव प्रतिबन्धकत्वादिति भावः । यद्यपि लिङ्गतावच्छेदकप्रकारकपक्षधर्मतानिश्चयस्यानुमितिहेतुतया योग्यतायाः संशयसाधारणं ज्ञानमनुमितिहेतुरित्ययुक्तं, तथाप्येतद्दोषस्य 'वयन्त्वि'त्यादिना ग्रन्थकृतैव वक्ष्यमाणत्वान्नासङ्गतिः ।

केचित्तु लिङ्गतावच्छेदकप्रकारेण पक्षधर्मतानिश्चयो नानुमितिहेतुः पर्वतवह्निरयमालोको धूमो वा उभयथापि वह्निव्याप्य इत्यत्र वह्निव्याप्यवानयमिति परामर्शस्थले(२) च व्यभिचारात् । किन्तु व्याप्तिप्रकारकपक्षधर्मतानिश्चयः स च प्रकृते लिङ्गतावच्छेदकयोग्यतायाः सन्देहेऽप्यस्त्येव । न चावच्छेदकसन्देहाद्व्याप्तिसन्देहो भवतीति वाच्यं । उक्तस्थल एव व्यभिचारादिति(३) भावः । इत्याहुः । तदसत् । अनेतदभिप्रायकत्वे 'वयन्त्वि'त्यादिना वक्ष्यमाणसमाधानासङ्गतेः अनया युक्त्या लिङ्गविशेषणीभूतयोग्यताया अनिश्चयेऽपि अनुमितिसम्भवात् ।

---

(१) बाधकसंशयस्यादूषकत्वादिति क० ।

(२) व्याप्तिश्चात्र साध्याभाववदवृत्तित्वरूपा, व्यापकसामानाधिकरण्यरूपव्याप्तित्वे लिङ्गतावच्छेदकसामानाधिकरण्यस्यावश्यकत्वात् अन्यथा धूमव्यापकवह्निसमानाधिकरणत्वावगमात् पर्वत इति ज्ञानादप्यनुमित्यापत्तेः ।

(३) व्यभिचार इतीति ख० ।

किञ्च तथापि योग्यतादिकं प्रामाण्ये प्रयोजकं आप्तो-क्तत्वस्य तथात्वे गौरवात् अनाप्तोक्तेऽपि संवादेन

नव्यास्तु नन्वस्तु आकाङ्क्षादेर्ज्ञानमेव न्यायनये शाब्दबोधहेतुः न तु योग्यताया ज्ञानं शाब्दबोधे कारणं सम्भवति,[१] परप्रमाया-अयोग्यत्वेन स्व-परसाधारणबाधकप्रमाविरहरूपायास्तस्याः सर्वत्र निश्चेतुमशक्यत्वादित्यत आह, 'योग्यतायाश्चेति, 'हेतुः' न्यायनये शाब्दबोधे हेतुः, 'स्व-परेति पूर्ववत् । ननु तथापि संशयसाधारण-मित्ययुक्तं संशयसाधारणं हि ज्ञानं तदा शाब्दधीहेतुः सम्भवति यदि कश्चित्संशयः कारणं भवति, न चैवं, एकपदार्थेऽपरपदार्था-भावप्रमाविरहरूपबाधकप्रमाविरहसंशयस्य[२] उभयरूपेण ग्राह्याभाव-ज्ञानतया विशिष्टबुद्धिमात्रविरोधित्वादित्यत आह, 'कश्चिदपीति, 'अन्वयबोधः' न्यायनये शाब्दबोधः, 'बाधेति ग्राह्याभावेत्यर्थः, इति सङ्गमयन्ति ।

प्रकारान्तरेणापि योग्यतादिज्ञानस्य हेतुत्वं व्यवस्थापयति, 'किञ्चेत्यादिना 'तासां ज्ञानं हेतुरित्यन्तेन, 'तथापि' नैयायिक-स्यापि,[३] 'प्रामाण्ये प्रयोजकं' शाब्दप्रमायाः प्रयोजकं, 'आप्तोक्तत्व-स्येति भ्रम-प्रमाद-विप्रलिप्सा-करणापाटवात्मकदोषचतुष्टयाभाव-वदुक्तत्वस्येत्यर्थः, 'तथात्वे' शाब्दप्रमाप्रयोजकत्वे, 'अनाप्तोक्तेऽपीति भ्रान्तप्रतारकवाक्ये करणापाटवजन्ये चेत्यर्थः, 'संवादेन' विषया-

---

(१) योग्यतायाश्च ज्ञानं कथं तन्नये शाब्दबोधहेतुरिति ख०, ग० ।

(२) एकपदार्थेऽपरपदार्थाभावप्रमाविरहसंशयस्येति ख० ।

(३) नैयायिकस्य नयेऽपीति ख०, ग० ।

प्रामाण्याच । एवञ्च ज्ञायमानकरणे प्रामाण्यप्रयोजकतया ज्ञानमावश्यकमिति तासां ज्ञानं हेतुः, तच

बाधेन । न च तत्र ईश्वर एवाप्त इति वाच्यं । तथाप्याप्तोक्तत्वाभावात्, एतद्वाक्यस्य ईश्वरकण्ठ-ताल्वाद्यभिघातजन्यत्वाभावादिति भावः । इदमुपलक्षणं विसम्वादिशुकवाक्येऽतिप्रसक्तेश्चेत्यपि बोध्यं । 'एवञ्च' शाब्दप्रमाप्रयोजकत्वे च, 'ज्ञायमानकरणे' इति सप्तम्यर्थोऽभिन्नत्वं, अन्वयश्चास्य 'प्रयोजके'त्यनेन, 'प्रामाण्यप्रयोजकतया'(१) शाब्दप्रमाप्रयोजकतया, तथाच ज्ञायमानकरणशब्दनिष्ठत्वे सति शाब्दप्रमाप्रयोजकतयेत्यर्थः, 'ज्ञानमावश्यकमिति शाब्दबोधकारणीभूतं ज्ञानं योग्यतादौ विषयतासम्बन्धेनावश्यकमित्यर्थः, ज्ञाननिष्ठशाब्दज्ञानकारणतायां विषयतासम्बन्धेनावच्छेदकत्वमावश्यकमिति तु फलितोऽर्थः । यत् ज्ञायमानकरणनिष्ठत्वे सति यज्जातीयप्रमाप्रयोजकं तत् ज्ञाननिष्ठतज्जातीयज्ञानकारणतायां विषयतासम्बन्धेनावच्छेदकं यथा प्रमानुमितिप्रयोजकं व्याप्तिविशिष्टपक्षधर्मत्वमिति सामान्यमुखी व्याप्तिरिति भावः ।

केचित्तु 'ज्ञानमावश्यकमिति विषयतासम्बन्धेन शाब्दधीकारणज्ञानवत्त्वमावश्यकमित्यर्थः, यत् ज्ञायमानकरणनिष्ठत्वे सति यज्जातीयप्रमाप्रयोजकं तत् विषयतासम्बन्धेन तज्जातीयज्ञानकारणज्ञानवत् यथा प्रमानुमितिप्रयोजकं व्याप्तिविशिष्टपक्षधर्मत्वमिति सामान्यतो व्याप्तिरिति भावः । इत्याहुः । तदसत् । भगवज्ज्ञानमादाय शाब्द-

---

(१) प्रामाण्यप्रयोजकरूपवत्तया इति क्वचित्पुस्तकस्य पाठः ।

समभिव्याहारविशेषादिनेति। मैवं। यत्र विमर्शः अत्र

बुद्धिसद्रूपयोग्यं कालान्तरीयपदार्थस्मरणं दैवाद्योग्यतादिविषयकमादाय च सिद्धसाधनापत्तेः।

अथ भूयोऽवयवेन्द्रियसन्निकर्षे चक्षुरादिनिष्ठे पित्ताद्यभावे च प्रत्यक्षप्रमाप्रयोजकत्वमादाय व्यभिचारवारणाय सत्यन्तं, भूयोऽवयवेन्द्रियसन्निकर्षादिषु न ज्ञायमानकरणनिष्ठः, चक्षुरादेर्ज्ञायमानकरणत्वविरहात्। ज्ञायमानकरणत्वञ्च ज्ञानावच्छिन्नतज्जातीयप्रमाकरणतात्वं, अन्यथा चक्षुरादेरपि चक्षुरादिलिङ्गकानुमितिं प्रति ज्ञायमानकरणतया तद्दोषतादवस्थ्यात् ज्ञायमानकरणधूमादिनिष्ठरूपादौ प्रमानुमितिमादाय व्यभिचारवारणाय तज्जातीयप्रमाप्रयोजकमिति, तज्जातीयप्रमाप्रयोजकत्वञ्च तज्जातीयप्रमात्वावच्छिन्नप्रयोजकत्वं, तेनात्मलिङ्गकानुमितिमादायात्म-मनःसंयोगबाधाभावादौ न व्यभिचारः। व्याप्तिविशिष्टपक्षधर्मतावच्छिन्नत्वेन प्रमानुमितित्वावच्छिन्नं प्रति हेतुतेति मतेनेदमनुमानमिति न दृष्टान्तासङ्गतिः। न चैवमाकाङ्क्षासत्त्योः स्वरूपासिद्धिः आवश्यकयोग्यतया अन्यथासिद्धतया शाब्दप्रमात्वावच्छिन्नं प्रत्यप्रयोजकत्वादिति वाच्यं। आकाङ्क्षासत्तिविशिष्टयोग्यतात्वेन शाब्दप्रमात्वावच्छिन्नं प्रति प्रयोजकत्वमिति मतमाश्रित्य तदभिधानात्[१]। प्रयोजकत्वञ्च कारण-कारणतावच्छेदकसाधारणं, तच्च कारणतावच्छेदकत्वाद्यन्यथासिद्धि-

(१) प्रयोजकत्वाभिमतमतेनैतदभिधानादिति ख०, ग०।

इत्यश्रुत्वैव तथाः वाक्ये मत्यिपश्चरतीति शृणोति तथा-

चतुष्टयराहित्ये सति नियतपूर्ववर्त्तित्वं,[१] अन्यथा प्रयोजकत्वं यदि कारणतावच्छेदकत्वं तदा पूर्वपक्षिणये योग्यतादावसिद्धिः तेन योग्यतादेः शाब्दप्रमायां स्वरूपसज्ज्ञानत्वस्यैवाभ्युपगमात् । यदि च जनकत्वं तदाश्रये स्वरूपासिद्धिर्वैशेषिकैर्योग्यतादेः स्वरूपसज्जनक-त्वानभ्युपगमात् । अथ सल्लिङ्गकपरामर्शे व्यभिचारः तस्य प्रमानुमिति-त्वावच्छिन्नं प्रति हेतुत्वात् विषयतासम्बन्धेन ज्ञायमानलिङ्गनिष्ठत्वाच्च । न च विषयतातिरिक्तसम्बन्धेनैव ज्ञायमानकरणवृत्तित्वं विवक्षितमिति वाच्यं । तथापि आत्मलिङ्गकप्रमानुमितिकारणीभूतसल्लिङ्गकपरामर्शे व्यभिचारादिति चेत् । न । व्याप्तिविशिष्टपक्षधर्मतावल्लिङ्गत्वेन प्रमानुमितित्वावच्छिन्नं प्रति हेतुतावादिनये सल्लिङ्गकपरामर्शत्वेन प्रमानुमितित्वावच्छिन्नं प्रति हेतुत्वे मानाभावात् ज्ञानान्यत्वे सति चेत्यपि वा विशेषणीयं । न च प्रमानुमितित्वादेः कार्यतावच्छेद-कत्वाभावादसिद्धिरिति वाच्यं । अस्य प्राचीनमतानुयायित्वादिति । क्वचित्तु 'प्रामाण्यप्रयोजकरूपवत्त्वे'ति पाठः, तत्र ज्ञायमानकरणे

---

(१) न चात्र कारणतावच्छेदकव्यापकान्यथासिद्धसामान्याभावनिवेशेनैव सामञ्जस्ये चतुष्टयपदं व्यर्थमिति वाच्यं । अन्यथासिद्धत्वस्याननुगतत्वा-भावात् तत्तदन्यथासिद्ध्यभावकूटनिवेशस्यावश्यकतया कूटलाघवार्थमेव तदुपादानात् । एतेन तादृशान्यथासिद्धगर्भितत्वमात्रकथनेनैव सामञ्जस्ये नियतपूर्ववर्त्तित्वरूपविशेष्यदलं व्यर्थमिति पूर्वपक्षोऽपि निरस्तः, अनियतपूर्ववर्त्तिगतान्यथासिद्ध्यभावघटितकूटनिवेशे कूट-स्य गुरुशरीरतया महागौरवापत्तेरिति विभावनीयं ।

आकाङ्क्षादिकमस्ति। न च नदी-कच्छयोः संसर्ग इति, व्यभिचारात्। अत एव न तन्मात्रं प्रयोजकं[1] प्रामाण्ये। अथ

शब्दे 'प्रामाण्यप्रयोजकरूपवत्तया ज्ञानं' शाब्दप्रमाप्रयोजकयोग्यतादिमत्त्वप्रकारेण ज्ञानं, 'आवश्यकं' अवश्यं कारणमिति तासां ज्ञानं हेतुरित्यर्थः, तत्प्रकारकज्ञानस्य हेतुत्वे तज्ज्ञानस्य सुतरां हेतुत्वादिति भावः। तत्प्रकारकज्ञानस्यैवावश्यं हेतुत्वमस्तु यज्ज्ञानावच्छिन्नयज्जातीयप्रमाकरणतावत् तज्जातीयज्ञानकारणीभूतस्य तज्जातीयप्रमाप्रयोजकरूपवत्त्वप्रकारकज्ञानस्य नियमः यथा लिङ्गं ज्ञानावच्छिन्नानुमितिप्रमाकरणतावद्भवति अनुमितिकारणीभूतं यदनुमितिप्रयोजकव्याप्तिविशिष्टपक्षधर्मतावत्त्वप्रकारकं ज्ञानं तद्विषयोऽपि भवतीति व्याप्तिरिति भावः। ननु उपायाभावात्तासां ज्ञानं कथं स्यादित्यत आह, 'तच्चेति, 'समभिव्याहारविशेषः' आकाङ्क्षाग्राहकः, 'आदि'शब्दादासत्ति-योग्यताग्राहकशोधाप्तोपदेशपरिग्रहः। 'यद्येति, आकाङ्क्षासद्भावार्थं 'अश्रुतैरित्युक्तं, तच्छ्रवणे 'नद्यामित्यनेन जनितान्वयबोधत्वादाकाङ्क्षा न स्यादिति भावः। वस्तुतस्तु तच्छ्रवणेऽपि यत्र कारणान्तरविरहान्न तेन समम् अन्वयबोधो जातस्तत्रापि व्यभिचारो बोध्यः, आकाङ्क्षादिमत्पदस्मारितत्वोपपत्तये[2] 'शृणोतीत्युक्तं, 'नदी-कच्छयोः संसर्ग इति तात्पर्यविषय इति शेषः, अन्यथा वस्तुगत्या नदी-कच्छयोः संसर्गसत्त्वादलग्नकतापत्तेः, 'व्यभिचारादिति कच्छे

(१) तन्मात्रं न प्रयोजकमिति ख०।

(२) स्मारितत्वोपपत्तय इति ख०, ग०।

यावत्समभिव्याहृतेत्यपि लिङ्गविशेषणं कतिपयव्यभि-
चारित्वात्तु संसर्गप्रत्यययोर्लिङ्गाभिमानादिति चेत्। न।
तत्सन्देहेऽपि वाक्यार्थावगमात्। तत्र संसर्गभ्रान्तिरिति

तात्पर्यविषयनदीसंसर्गाभावाद्व्यभिचार इत्यर्थः। न च तयोः संसर्गे वक्तृतात्पर्याभावेऽपि ईश्वरीयतात्पर्यसत्त्वात् कथं व्यभिचार इति वाच्यं। अनेन वाक्येन प्रतीतेरजननादीश्वरतात्पर्यस्याप्यभावात्। यद्यप्येवं तात्पर्यविषयसंसर्गेण योग्यतावत्त्वस्य हेतौ प्रवेशाद्व्यभिचारोऽपि न सम्भवति। तथापि तात्पर्याघटितहेतुपक्षे इदं दूषणं द्रष्टव्यं। वस्तुतस्तु एतदस्वरसेनैव 'तथन्त्विति वक्ष्यतीति बोध्यं। नन्वेवमाकाङ्क्षादिसत्त्वेऽपि तव मते प्रामाण्यप्रयोजकता न स्यात् तत्सत्त्वेऽपि यथोक्तस्थले प्रमानुत्पादादित्यत आह, 'अत एवेति आकाङ्क्षादिसत्त्वेऽपि प्रमानुत्पादादेवेत्यर्थः, 'तन्मात्रं' योग्यतादिमात्रं, किन्तु तात्पर्यमपीति भावः। व्यभिचारोद्धाराय प्रकृते, 'अथेत्यादि, 'यावदिति श्रूयमाणयावत्समभिव्याहृतपदकेत्यर्थः, श्रूयमाणानि यावत्समभिव्याहृतपदानि यस्येति बहुव्रीहिः, 'लिङ्गेति श्रूयमाणयावत्समभिव्याहृतपदकत्वभ्रमादित्यर्थः, 'तत्सन्देहेपीति श्रूयमाणयावत्समभिव्याहृतपदकत्वसन्देहेऽपीत्यर्थः, तथा च न तस्य लिङ्गविशेषणत्वं लिङ्गविशेषणस्य निश्चितस्यैवानुमापकत्वादिति भावः। इदं समाधिसौकर्यादुक्तं। वस्तुतो यत्र समभिव्याहृतयावत्पदश्रवणेऽपि कारणान्तरविरहान्न नदी-जलयोरन्वयबोधः तत्र कल्पे एतमपि व्यभिचारस्तदवस्थ एवेत्यवधेयं। गूढाभिसन्धिराह, 'तत्रेति, यावत्पद-

चेत्। न। अन्यकारणाभावेन[1] पदमेव भ्रान्तिजनकं तथाचादुष्टं सत्तदेवाभ्रान्तिं जनयत् केन वार्यताम्। असंसर्गाग्रहस्तथेति चेत्। न। संसर्गे बाधकाभावात्। अथाप्तोक्तत्वं लिङ्गविशेषणं तदेव वा लिङ्गं। न च नदी-कच्छयोः संसर्गे आप्तोक्तत्वं, आप्तोक्तत्वञ्च प्रामाण्ये

विद्यमानं च, 'अन्येति, विशेषणसन्देहे लिङ्गाभावादिति भावः। 'पदमेवेति, ज्ञातमित्यर्थेनेति शेषः, 'अदुष्टमिति दोषाभावसहकृतमित्यर्थः, 'तदेव' पदमेव, तथाच भ्रमं प्रति लाघवेन शब्दज्ञानत्वेनैव पदज्ञानस्य कारणत्वकल्पनादिति भावः। आशयमुद्घाटयति, 'असंसर्गेति, 'संसर्गे इति संसर्गांशे इत्यर्थः। न च कारणबाध एव बाधक इति वाच्यं। तस्य कारणत्वे मानाभावादिति भावः। व्यभिचारोद्धाराय पुनराशङ्कते, 'अथेति, 'आप्तोक्तत्वं' आप्तोक्तपदस्मारितत्वं, आप्तोक्तत्वञ्च प्रकृतवाक्यार्थगोचरयथार्थज्ञानवदनुच्चार्यमाणत्वं, तच्च लौकिकस्थले प्रकृतवाक्यजन्यप्रतीत्यप्रसिद्ध्या प्रकृतवाक्यार्थाप्रसिद्धेः, तदप्रसिद्धौ च भगवत्तात्पर्यमादाय तात्पर्यगर्भसाध्यस्यापि सत्त्वादिति भावः। एवं तर्हि योग्यतादिविशेषणं व्यर्थमत आह, 'तदेव वेति आप्तोक्तपदस्मारितत्वमेवेत्यर्थः, 'नदी-कच्छयोः संसर्गे' नदी-कच्छयोः संसर्गरूपप्रकृतवाक्यार्थांशे, 'आप्तोक्तत्वं' श्रूयमाणयावत्समभिव्याहृतपदकत्वे सति यथार्थज्ञानवदुक्तत्वं, कच्छपदे इति शेषः। तथाप्तोक्तत्वस्य स्वरूपसत एव शाब्दप्रमाजनकत्वात्तद्ज्ञानद्वारा-

---

(१) अन्यकारणाभावे इति ख०।

तत्त्वमिति तद्वत्तया ज्ञायमानस्य हेतुत्वेन तत्र ज्ञान-मावश्यकं व्याप्तिमत्तया ज्ञातस्येव लिङ्गस्य, तदवगमश्च लोके भ्रमाद्यमूलकतया महाजनपरिग्रहेण वेदे स्मृतौ चेति चेत्। न। यत्र कुत्रचिदाप्तत्वमनाप्तस्यापि सर्व-

---

षामपि मम वाक्यादनुभवसिद्धो बोधः स भवन्मते कथं लिङ्ग-विशेषणस्यानिश्चितत्वादित्यत आह, 'आप्तोक्तत्वस्येति, 'प्रमाणे' शब्दस्य शाब्दप्रमाजनकत्वे, 'इति' अतो हेतोः, 'तद्वत्तयेति आप्तोक्तत्व-वत्तया ज्ञायमानस्य पदस्य शाब्दबोधहेतुत्वेन तत्राप्तोक्तत्वज्ञानं शाब्दबोधात्पूर्वमावश्यकमित्यर्थः, 'व्याप्तिमत्तयेति यथा व्याप्तिम-त्तया ज्ञायमानस्य लिङ्गस्यानुमितिहेतुत्वेन व्याप्तिज्ञानमनुमितेः पूर्वमावश्यकमित्यर्थः,। न च आप्तोक्तत्वस्य प्रामाण्यप्रयोजकत्वं पूर्वं निराकृतमिति वाच्यं। भ्रमादिशून्यत्वघटिताप्तोक्तत्वस्यैव गौरवादिना प्रामाण्यप्रयोजकतानिराकरणादिति भावः। सम्यादिशुकादिवाक्येऽपि तादृशयथार्थज्ञानवता परमेश्वरादिनाऽनुमन्यमानत्वसत्त्वेनाप्तोक्तत्व-सत्त्वान्न व्यभिचारः। नन्वाप्तोक्तत्वज्ञानं कथं स्यादित्यत आह, 'तदवगमश्चेति, 'लोके' लौकिकवाक्ये, 'भ्रमादीति, 'आदिना प्रमाद-विप्रलिप्सा-करणापाटवपरिग्रहः, 'महाजनेति विशिष्टव्यव-ह्रियमाणार्थबोधकत्वेनेत्यर्थः। आप्तत्वं विकल्प्य आप्तोक्तत्वस्य लिङ्गविशेषणत्वं दूषयति, 'यत्र कुत्रचिदिति, 'आप्तत्वं' यथार्थज्ञान-वत्त्वं, 'अनाप्तस्यापि' प्रकृतवाक्यार्थगोचरयथार्थज्ञानशून्यस्यापि, तथा-

आप्तत्वमप्रमितं, भ्रान्तेः पुरुषधर्मत्वात् प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वाप्तत्वं प्रथमं दुर्ग्रहं, भ्रमाद्यमूलकत्वस्य प्रवृत्तिसंवादादेश्च तद्ग्राहकस्याज्ञानात् प्रवृत्तिश्च

वाक्यावर्त्तकतया आप्तोक्तत्वे लिङ्गविशेषणेऽप्युक्तव्यभिचारवारकत्वस्य इति भावः। 'सर्वत्रेति, सकलवाक्यार्थगोचरयथार्थज्ञानवत्त्वमित्यर्थः, 'अप्रमितं' असिद्धं, असिद्धौ हेतुमाह, 'भ्रान्तेरिति, सकलवाक्यार्थगोचरज्ञानस्य यथार्थत्वे भ्रमोच्छेदात् भ्रान्तेः पुरुषधर्मत्वानुपपत्तेरिति भावः। 'प्रथमं' वाक्यार्थज्ञानात्पूर्वं, 'दुर्ग्रहं' दुर्निश्चेयं, निश्चेतुमशक्यञ्च न लिङ्गविशेषणत्वं लिङ्गविशेषणनिश्चयाभावेनानुमित्यसम्भवापत्तेरिति भावः। दुर्निश्चयत्वमेव उपपादयति, 'प्रवृत्तिसंवादेति सत्यादिप्रवृत्तिप्रयोजकत्वेत्यर्थः, 'आदिपदात् सत्यादीच्छाप्रयोजकत्वपरिग्रहः, 'तद्ग्राहकस्येति आप्तत्वानुमापकलिङ्गविशेषणस्येत्यर्थः, अयं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यमूलकैतद्वाक्यप्रयोक्तृत्वात् सत्यादिप्रवृत्तिप्रयोजकैतद्वाक्यप्रयोक्तृत्वात् इत्यादिक्रमेण यत्तद्भ्यां सामान्यतोव्याप्त्या आप्तत्वस्यानुमेयत्वादिति भावः। 'अज्ञानादिति प्रकृतवाक्ये अज्ञानादित्यर्थः, प्रवृत्तिसंवादस्य वाक्यार्थबोधाधीनप्रवृत्त्युत्पत्त्युत्तरकालमेव ग्राह्यत्वेन वाक्यार्थज्ञानात्पूर्वं तदज्ञानात् तदज्ञाने च तेनैव हेतुना भ्रमाद्यमूलकत्वस्यानुमेयतया भ्रमाद्यमूलकत्वस्यापि ज्ञानासम्भवादिति भावः। नन्वेवन्तथापि कथं शाब्दबोधः आप्तोक्तत्वादिव्याप्तिवशादाप्तोक्तत्वनिश्चयस्य तथापि शाब्दबोधे हेतुत्वादित्यत आह, 'प्रवृत्तिश्चेति शब्दस्य प्रवृत्तिश्चेत्यर्थः,

सन्देहादपि । किञ्च प्रकृतसंसर्गे अयमभ्रान्तो यथार्थ-ज्ञानवानिति संसर्गमप्रतीत्य ज्ञातुमशक्यं वाक्यार्थस्या-पूर्वत्वात् । वयन्तु ब्रूमः बाधकप्रमाणाभावो योग्यता

प्रवृत्तिश्च फलजननं शाब्दबोधजनकत्वमिति यावत्, 'सन्देहादपि' आप्तोक्तत्वसन्देहादपि, ज्ञानावच्छिन्नेत्यादिव्याप्तौ निश्चयत्वस्य गौरवेण व्याप्यकोटावप्रवेशात्तज्ज्ञानित्वेनाप्तोक्तत्वज्ञानसामान्यस्यैव शाब्दधीहेतुत्वात् तत्र च लिङ्गविशेषणतया तन्निश्चयस्यावश्यकत्वादिति भावः ।

केचित्तु ननु यदि प्रवृत्तेरुत्तरकालमेव प्रवृत्तिसम्वादग्रहः तदा सम्वादिप्रवृत्तिजनकत्वहेतुना प्रामाण्यनिश्चयेऽन्योन्याश्रयः प्रामाण्य-निश्चयानन्तरमेव प्रवृत्तेरुत्पादसम्भवादित्यत आह, 'प्रवृत्तिश्चेति, 'सन्देहादपि' प्रामाण्यसन्देहादपि, निष्कम्पप्रवृत्तावेव प्रामाण्यनिश्च-यस्य प्रयोजकत्वादिति भावः । इति व्याचक्षुः(१) ।

हेतुज्ञानाभावेन दुर्निश्चयत्वमुक्त्वा साध्याप्रसिद्ध्या दुर्निश्चयत्वमाह, 'किञ्चेति, 'प्रकृतेति प्रकृतस्य कमल-रजतयोः संसर्ग इत्यर्थः, 'यथार्थेति रजतसंसर्गवति कमले रजतसंसर्गविषयकज्ञानवानयमित्यर्थः, 'संसर्ग-मप्रतीत्येति कमल-रजतयोः संसर्गमप्रतीत्य पूर्वमित्यर्थः, 'वाक्यार्थस्य' कमले रजतसंसर्गवत्त्वस्याप्तत्वघटकस्य, 'अपूर्वत्वात्' कमल-रजतयोः संसर्गप्रतीतेश्च पूर्वमज्ञातत्वात् । न चैवमाप्तोक्तत्वसन्देह एव तत्र न स्यात् कोटितावच्छेदकरूपेण कोट्युपस्थितिविरहादिति वाच्यं । सम

---

(१) इत्याहुरिति ख०, ग० ।

सा च न लिङ्गविशेषणं बाधकप्रमाणमात्रविरहस्य सर्व्वत्र निश्चेतुमशक्यत्वात्, तत्संशयेऽपि शाब्दादन्वयबोधाच्च[1],

---

लाघवात् योग्यताया एव शाब्दप्रमाप्रयोजकत्वेनाशोकावस्यातथात्वात् तज्ज्ञानस्य शाब्दधीहेतुत्वाभावेन सन्देहाभावेऽपि क्षतिविरहादिति भावः। ननु नदी-कच्छयोस्तात्पर्य्यगर्भहेतुविरहादेव न व्यभिचार- इत्यस्वरसादाह, 'क्वचिदि'ति, 'बाधके'ति एकपदार्थेऽपरपदार्थाभाव- निश्चयसामान्याभाव इत्यर्थः, 'अशक्यत्वादि'ति तत्प्रमाया अयोग्य- त्वादिति हृदय[2]। तन्निश्चयाभावे च लिङ्गतावच्छेदकप्रकारक- लिङ्गनिश्चयाभावादनुमितिर्न स्यादिति भावः। 'तत्संशयेऽपी'ति योग्यतायाः संशयेऽपीत्यर्थः, तस्या लिङ्गविशेषणत्वे तु तन्न स्यात् लिङ्गतावच्छेदकप्रकारकलिङ्गनिश्चयस्यानुमितिहेतुत्वादिति भावः। न च साध्यसन्देहातिरिक्तसंशयान्यलिङ्गतावच्छेदकप्रकारकलिङ्गज्ञा- नत्वेनानुमितिहेतुत्वं तच्च योग्यतायाः संशयदशायामपि सम्भवत्येव उक्तरूपेण योग्यतासन्देहस्य साध्यसन्देहपर्य्यवसन्नत्वादिति वाच्यं। गौरवात् साध्यव्याप्यसाध्याभावसंशयादनुमित्यापत्तेश्च। न च साध्य- हेतुभेदेनानुमितिकार्य्य-कारणभावभेदादत्र योग्यतांशे संशयसा- धारणं ज्ञानमेव हेतुर्निश्चयाभावाप्रकारकत्वविशेषणे गौरवाद्वैयर्थ्या- च्चेति वाच्यं। शब्दश्रवणानन्तरवदन्यत्रापि एतत्साध्यव्याप्येतद्धेतुम- त्त्वसंशयादनुमित्यापत्तेः। इदमुपलक्षणं यथोक्तहेतौ व्यभिचारश्चा-

---

(१) शाब्दान्वयबोधाच्चेति क०।

(२) इति ध्येयमिति ख०, ग०।

शब्दप्रामाण्ये तु योग्यतायाः संशय-निश्चयसाधारणं ज्ञानमात्रं[1] प्रयोजकमिति शब्दः प्रमाणमिति ।

सन्दिग्धायामपि वाक्यादनुभवसिद्धो बोधः कथमनुमानात्स्यादतः शब्दो मानान्तरमित्यपि बोध्यं । ननु भवन्मतेऽपि योग्यतासंशयदशायां कथं वाक्यार्थबोधः तन्निश्चयस्य शाब्दहेतुत्वादित्यत आह, 'शब्द-प्रामाण्ये' त्विति शब्दे प्रमाजनकत्वे त्वित्यर्थः[2] ।

अत्रातिनव्यवैशेषिकाः[3] लिङ्गतावच्छेदकप्रकारकलिङ्गनिश्चयो नानुमितिहेतुः पर्वतो वह्निव्याप्यधूमो वा उभयथापि वह्नि-व्याप्य इत्यत्र वह्निव्याप्यवानयमित्यादिपरामर्शस्थले च व्यभिचारात् किन्तु व्याप्यत्वप्रकारकलिङ्गनिश्चय एवानुमितिहेतुः स च प्रकृते लिङ्गतावच्छेदकयोग्यतायाः संशयेऽपि सम्भवत्येव । किञ्च योग्यतायाः संशयदशायामुक्तहेतौ व्यभिचारज्ञानदशायाञ्च व्यभिचारिणोऽव्यभि-चारिणो वा एतद्धेतोरपक्षधर्मतो वा केवलस्य ज्ञानादेवानुमितिः स्यात् किं शब्दस्य प्रमाणान्तरत्वेन । ननु पद-पदार्थपक्षकानुमानात् संसर्ग-सिद्धावपि घटमानयेत्यादिशब्दश्रवणानन्तरं घटकर्मकानयनानुकूल-कृतिमानित्यादि विशेषण-विशेष्यभावेन प्रतीतेरनुभवसिद्धत्वात् अप-अतः अनुमाने पदार्थसंसर्गस्यैव विशेषणतया भानादतः शब्दोऽवश्यं मानमङ्गीकार्यं । न चानुमानानन्तरं मनसा तादृशप्रतीतिसम्भव-

---

(1) संशयसाधारणं ज्ञानमिति ख० ।

(2) शाब्दप्रमाजनकत्वे त्वित्यर्थ इति क० ।

(3) अत्रातिनववैशेषिका इति ख०, ग० ।

इति वाच्यं। तथा कल्पने गौरवात् मानाभावात् शब्दश्रवणानन्तरं प्रथमत एव तदाकारज्ञानस्यानुभवसिद्धत्वाच्चेति चेत्, कर्मत्वादिकं पक्षयित्वा वस्तुगत्या कर्मत्वादौ घटादेर्यादृशः संसर्गः प्रतीयते तत्संसर्गेण घटादिकं साध्यं, एवमानयनादिकं पक्षीकृत्य कर्मत्वादिकं साध्यं समूहालम्बनपरामर्शादिविषये विशेषणमित्यादिन्यायेनार्थसमाजगता तादृशानुमितिरिति न कोऽपि दोषः। न चैवं घटः कर्मत्वमानयनकृतिरित्यादिनिराकाङ्क्षस्थलेऽपि घटकर्मकानयनानुकूलकृतिमानित्यादिबोधापत्तिः अनुमितौ आकाङ्क्षायाः कारणत्वाभावादिति वाच्यं। व्याप्त्यादिज्ञानसत्त्वे तथानुमित्यात्मकशाब्दबोधस्य नैयायिकेनापि दुर्वारत्वात्। अथ न पचतीत्यादौ कथमभावे क्रियादेरन्वयबोधः तादात्म्येनाधाराधेयभावेन च सम्बन्धेन बाधात्तेन सम्बन्धेनानुमानासम्भवात्। न च प्रतियोग्यनुयोगिभावसम्बन्धेनानुमानं नैयायिकमतेऽपि तेनैव सम्बन्धेनान्वयबोधादिति वाच्यं। तस्य व्याप्त्यनिरूपकत्वात् तादात्म्यातिरिक्तवृत्तिनियामकसम्बन्धस्यैव व्याप्तिनिरूपकत्वात्। एवं घटमानयेत्यादौ कृत्यादावानयनादेः कथमन्वयबोधः अनुकूलत्वादेर्वृत्त्यनियामकत्वादिति चेत्; न। वृत्त्यनियामकसम्बन्धस्यापि व्याप्तिनिरूपकत्वात्। न च तथापि व्याप्त्याद्यज्ञानदशायामपि वाक्यादनुभवसिद्धो बोधः स कथं स्यात् कारणाभावेनानुमित्यसम्भवादिति वाच्यं। तादृशानुभवस्यैवासिद्धेः व्याप्त्यादिज्ञानानन्तरमेव वाक्यार्थबोधस्वीकारात्। न चानन्तव्याप्त्यादिज्ञानकल्पने गौरवाल्लाघवेन शब्दस्यैव प्रमाणान्तरत्वं कल्प्यते इति वाच्यं। वाक्यार्थानुभवपूर्वं सर्ववादिसिद्धायाः पदार्थोपस्थितेरेव नियमतो

व्याप्त्यादिविषयकसंस्कारादतिरिक्तकल्पनाभावेन गौरवाभावात् । वस्तुतस्तु साध्य-साधनभेदेन बहुविधान्वय-व्यतिरेकव्याप्तिबुद्धीनां परस्परव्यभिचारेण विशेषत एव कार्य्य-कारणभावो न तु सामान्यतः एवञ्च शाब्दबोधस्थलाभिषिक्तायामनुमितौ आकाङ्क्षादिज्ञानमेव हेतुः न तु व्याप्तिपक्षधर्मतादिज्ञानमतो व्याप्त्यादिज्ञानविरहेऽपि न क्षतिरिति प्राहुः, तदसत् शब्दश्रवणानन्तरं जायमाने वाक्यार्थबोधे शाब्दत्वजातिविशेषस्यानुभवात् शृणोमि श्रुतमेवेदं पुराणादिभ्य इत्याद्यनुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् । न चैवमर्थापयामीत्यनुव्यवसायबलादर्थापत्तेरप्याधिक्यापत्तिरिति वाच्यं । तादृशानुव्यवसायस्य दुरापत्तेः । वस्तुतस्तादृशानुव्यवसायस्यैवाभावात् । न च तादृशानुव्यवसायसिद्धः शाब्दत्वजातिविशेषः(१) अनुमितित्वव्याप्य एवास्त्विति वाच्यं । वाक्यश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितित्वे मानाभावात् प्रत्यक्षभिन्नज्ञानत्वस्याप्रयोजकत्वात् । न चानुमितिभासत्वमेव मानं तथा च तदानीमसिद्धेः अनुमितित्वस्यानुभवोऽत्यन्तस्वरसायापत्तेश्च । अस्यानुमितिभिन्नत्वे एव किं मानं । न चानुमितित्वे प्रमाणाभाव एव मानमिति वाच्यं । अनुमितिभिन्नत्वे प्रमाणाभाव एवानुमितित्वे मानमित्यस्यापि सुवचत्वादिति चेत्, सत्यम्, तथापि अतो वाभिमतसिद्धिः नानुमिनोमि शाब्दयामि श्रुतमेवेदमिति प्रतीतेः सर्वानुभवसिद्धाया एव मानत्वात् ।

केचित्तु शब्दश्रवणानन्तरं जायमानस्य वाक्यार्थबोधस्यानुमितिरूपत्वे साध्यनिश्चयदशायां सिषाधयिषाभावेन न स्यात् पक्ष-

(१) तादृशानुभवसिद्धशाब्दत्वनामजातिविशेष इति ख०, ग० ।

त्वाविरहादित्यतिरिच्यते ग्रन्थः। न च सिषाधयिषाविरहकाला-न्यसामग्रीविरहोऽपि पक्षतायां प्रवेशनीयः(१) इति वाच्यं। तथा सति सिषाधयिषा-शाब्दसामग्रीविरहविशिष्टसिद्ध्यभावत्वेन पक्षतायाः अनुमितिहेतुत्वे गौरवापत्तेः। न च विशिष्टान्तं न कारणतावच्छेदके प्रविष्टं अपि तु अभावविशेषपरिचायकं कारणत्वन्तु तदभावव्यक्तित्वेनेति न गौरवमिति वाच्यं। अभावस्य तद्व्यक्तित्वेन कारणत्वे तदन्तरकार्य्य-कारणभावविलोपप्रसङ्ग इति(२) वक्ष्यमाणु प्रतिपादितत्वादित्याहुः। तदसत्। अनुमितावपि पक्षताया हेतुत्वे मानाभावादिति कृतं पल्लवितेन।

(१) तथाच शाब्दसामग्रीदशायां साध्यनिश्चयसत्त्वे शाब्दसामग्रीविरह-विशिष्टसाध्यनिश्चयाभावसत्त्वान्न पक्षताहानिः।

(२) तथाच बाधनिश्चयाभावस्य सत्प्रतिपक्षनिश्चयाभावस्य अवच्छेदकधर्म्म-दर्शनाभावस्य च तादृशतादृशाभावत्वेन पृथक् पृथक् कारणत्वं सर्व्वानु-भवसिद्धं, यदि तत्तद्व्यक्तित्वेनाभावकारणत्वं स्वीक्रियते तदा बाधनिश्चय-सत्प्रतिपक्षनिश्चयावच्छेदकधर्म्मदर्शनेतरन्यतमत्वावच्छिन्नाभावस्य तद्व्यक्तित्वेन कारणत्वसम्भवात् तादृशकारणत्वं विलीयेत, विलीयेत च समानविषये शाब्दत्वावच्छिन्नं प्रति प्रत्यक्षसामग्र्यभावस्य अनुमिति-सामग्र्यभावस्य च पृथक् कारणत्वं, तथापि तादृशसामग्रीद्वयान्यतर-त्वावच्छिन्नाभावस्य तद्व्यक्तित्वेन कारणत्वसम्भवात्। तत्तद्व्यक्तित्वेना-भावकारणत्वं यदि न स्वीक्रियते तदा तादृशान्यतमत्वावच्छिन्नाभावस्य तादृशान्यतमत्वावच्छिन्नाभावत्वेनैव कारणत्वमवश्यमङ्गीकार्य्यं तथाच तादृशान्यतमत्वस्य गुरुशरीरतया तदपेक्षया प्रत्येकरूपावच्छिन्नाभावस्य प्रत्येकरूपावच्छिन्नाभावत्वेन कारणत्वे लाघवात् न तादृशकारणत्व-विलयप्रसङ्ग इति भावः।

जरन्मीमांसकास्तु लोके वक्तृज्ञानानुमानात्तदुप-

नन्वु घटमानयेत्यादौ सर्वत्र लौकिकवाक्ये शाब्दबोधात् पूर्वमयं वक्ता आधेयतादिसंसर्गककर्मत्वादिविषयकघटादिविशिष्टज्ञानवान् आधेयतादिसंसर्गेण कर्मत्वादिसाकाङ्क्षं यद्घटादि तस्य यज्ज्ञानं तज्जन्यं भ्रमाद्यजन्यञ्च यद्वाक्यं तत्प्रयोक्तृत्वात् योऽयत्संसर्गक-यत्साकाङ्क्ष-यज्ज्ञानजन्य-भ्रमाद्यजन्यवाक्यस्य प्रयोक्ता स तत्संसर्गक-तद्विषयक-तद्विशिष्टज्ञानवान् घटेनेतिवाक्यप्रयोक्ता आधेयतासंसर्गक-करणत्व-विषयकघटविशिष्टज्ञानवान् अहमित्येवमनुमानस्य कर्मत्वादिकमाधेयतादिसंसर्गेण घटादिमत् तेन संसर्गेण स्वविषयकघटादिविशिष्टज्ञानवद्वक्तृपदाश्रितत्वात् घटादिकरणत्वादिवदित्यनुमानस्य वा सामग्रीसम्भवेन तादृशानुमित्यनन्तरमेव शाब्दबोध इति लौकिकशब्दोऽनुवादक एव न तु प्रमाणं अगृहीतग्राह्यनुभवकरणत्वस्यैव प्रामाण्यपदार्थत्वाद्वेदे तु वक्तुरभावेनैव तादृशानुमानासम्भवात् प्रमाणत्वमिति प्राचीनमीमांसकमतनिराकरणमुपन्यस्यति, 'जरदिति, एतन्मते सर्वत्र लौकिकवाक्ये शाब्दबोधात्प्रागनुमितिसामग्रीसम्भवादनुमित्यनन्तरमेव शाब्दबोध इति लौकिकशब्दोऽनुवादकः, स्वप्रमाणप्राभाकरमते तु लौकिकस्थले शाब्दबोधनिर्वाहकमेव वक्तृज्ञानानुमानमिति लौकिकः शब्दोऽनुवादक इति ततो भेदः। 'लोके' लौकिकवाक्ये, 'वक्तृज्ञाने'ति अस्य वक्तृज्ञानकारणेत्यर्थः। नन्वु वक्तृज्ञानानुमानात्कर्मत्व-घटाद्योस्तत्संसर्गस्य च सिद्धावपि कर्मत्वादौ घटादिमत्त्वं न सिद्धमित्यत आह, 'तदुपजीवी'ति वक्तृज्ञा-

जीविसंसर्गानुमानाद्वा वाक्यार्थसिद्धौ शब्दस्यानुवाद-
कत्वं वेदे तु तदभावात् स्वातन्त्र्येण प्रामाण्यमिति(१)

नानुमानोपजीवीत्यर्थः, 'संसर्गानुमानादिति कर्मत्वादिरूपाधेयता-
दिसंसर्गेण घटादिमत् तेन संसर्गेण स्वविषयकघटादिविशिष्टज्ञान-
वत्कपदत्वादित्याद्यनुमानादित्यर्थः। न च भ्रमात्मकघटवि-
शिष्टज्ञानमादाय व्यभिचार इति वाच्यं। परैर्भ्रमानभ्युपगमादिति
भावः। एतच्च वक्तृज्ञानानुमानोपजीवित्वन्तु कर्मत्वविषयकघटवि-
शिष्टज्ञानस्य हेतुघटकत्वेन तत्सिद्धिद्वारा बोध्यं। 'वाक्यार्थसिद्धौ'
सर्वत्र शाब्दबोधात्प्रागुक्तवाक्यार्थसिद्धौ, 'शब्दस्य' लौकिकशब्दमा-
त्रस्य, 'अनुवादकत्वं' गृहीतग्राह्यनुभवमात्रजनकत्वं स्वसमानाधिकरण-
स्वाव्यवहितपूर्ववर्त्ति-स्वसमानाकारनिश्चयविषयविषयक-तद्विशेष्यक-
तत्प्रकारकानुभवमात्रजनकत्वमिति यावत्, स्वपदमनुभवपरं, न तु
प्रमाणत्वमिति शेषः, अगृहीतग्राह्यनुभवकरणत्वस्यैव प्रामाण्यपदार्थत्वात्।
अगृहीतग्राह्यनुभवकरणत्वञ्च गृहीतग्राहीतरानुभवमात्रकरणत्वं, तच्च
स्वसमानाधिकरण-स्वाव्यवहितपूर्ववर्त्ति-स्वसमानाकारनिश्चयविषय-
विषयकेतर-तद्विशेष्यक-तत्प्रकारकानुभवकरणत्वं, स्वसमानाकारत्वञ्च
यस्मिन् धर्मिणि तद्विशेष्यकत्वावच्छिन्न-तत्प्रकारिता तादृशतद्विशे-
ष्यकत्वावच्छिन्नतत्प्रकारिताशालित्वमिति भावः। 'तदभावादिति
वक्तुरभावेन वक्तृज्ञानाद्यनुमानाभावादित्यर्थः, 'स्वातन्त्र्येण' वक्तृज्ञा-
नाद्यनुमानं विनापि शाब्दबोधजनकत्वेन, 'वेद इति वेदस्थले

---

(१) प्रमाणत्वमितीति ख०।

वर्त्तते। तन्न। वेदे कृप्तसामग्रीतो लोकेऽपि संसर्ग-
प्रत्ययादन्यथानुवादकतापि न स्यात् लिङ्गस्य पूर्व्वत्वे-
ऽपि(१) व्याप्तिस्मृतिविलम्बेन तद्विलम्बात्। अनाप्तोक्तौ
व्यभिचारात् वेदतुल्यापि सामग्री न निश्चायिकेति

कृप्तशाब्दसामग्रीत इत्यर्थः, 'संसर्गप्रत्ययादिति वक्तृज्ञानाद्यनुमानात्
प्राक् शाब्दसंसर्गबोधादित्यर्थः, 'अन्यथेति वैदिकस्थले कृप्तशाब्दसा-
मग्र्या लौकिकस्थले विरहे इत्यर्थः, 'अनुवादकतापीति प्रतीत-
शाब्दधीजनकत्वमपीत्यर्थः, सामग्र्या अभावादिति भावः। ननु
वक्तृज्ञानाद्यनुमानात् प्रागेव संसर्गप्रत्ययो भवतीत्युक्तमयुक्तं सर्वत्र शाब्द-
सामग्रीदशायां हेतुज्ञानसत्त्वेनानुमितिसामग्र्याः सत्त्वादनुमितेरेव
प्रथममुत्पादात् शाब्दसामग्र्यपेक्षया अनुमितिसामग्र्या बलवत्त्वादि-
त्यत आह, 'लिङ्गस्येति, 'पूर्व्वत्वेऽपि'(२) हेतुतावच्छेदकरूपेण ज्ञात-
त्वेऽपि, 'तद्विलम्बात्' अनुमितिविलम्बात्, लौकिकवाक्ये क्वचिदनु-
वादकत्वन्तु इष्टमेवेति भावः। 'अनाप्तोक्ताविति, 'अनाप्तोक्तौ' लौकि-
कवाक्ये इत्यर्थः, 'व्यभिचारात्' व्यभिचारदर्शनात् भ्रमजनकत्वदर्श-
नादिति यावत्, 'वेदतुल्येति लौकिकवाक्यस्थले वेदतुल्यसाम-
ग्रीमात्रं न निश्चायकं किन्तु आप्तोक्तत्वनिश्चयोऽपीत्यर्थः। क्वचिल्लौ-
किकवाक्ये भ्रमजनकत्वदर्शनात् लौकिकवाक्यत्वरूपसाधारणधर्मेण
सर्वत्र लौकिकवाक्ये भ्रमजनकत्वसंशयसम्भवात्तथैव प्रतिबन्धा-

(१) पूर्व्वत्वेऽपीति क०। (२) पूर्व्वत्वेऽपीति ख०।

चेत्। न। चक्षुरादेस्तथात्वेन तज्ज्ञानायामपि प्रमाकरणत्वात्। ज्ञायमानं करणं सन्देहे न निश्चायकं लिङ्गवदिति चेत्। न। संशयो हि[1] न वाक्ये तस्य निश्चयात्[2] न तज्जन्यज्ञानप्रामाण्ये तस्य तदुत्तरकाली-

---

तादाप्तोक्तत्वनिश्चये च न तत्संशयः आप्तोक्तत्वस्य तत्पदार्थस्वतत्पदार्थज्ञानवदुक्तत्वं, तथा च तन्निश्चयादेव वाक्यार्थनिश्चयः शब्दस्यानुवादकत्वमिति भावः। 'तथात्वेन' क्वचिद्भ्रमजनकत्वेन, 'तज्ज्ञानायामपि' चक्षुरादिरूपसाधारणधर्मदर्शनेन भ्रमजनकत्वशङ्कायामपि, तथा च भ्रमजनकत्वसंशयो न प्रमायामिति प्रतिबन्धकः व्यभिचारादिति भावः। प्रमाणविशेषफलं प्रति संशयः प्रतिबन्धक इत्याशङ्कते, 'ज्ञायमानमिति' चक्षुरादिस्तु न ज्ञायमानकरणमित्यर्थः, 'लिङ्गवदिति' तद्यथा व्याप्ति-पक्षधर्मतासंशयदशायामनुमितिजनकमित्यर्थः, तथा च लौकिकवाक्येन संशयदशायां कथं निश्चयो जननीयः। एतद्व्याप्तिबलेन संशयस्य प्रतिबन्धकत्वादिति भावः। ननु व्याप्तिबलेन मन्यते कस्य संशयः प्रतिबन्धक उच्यते, किमानुपूर्वीसन्देहः, तद्वाक्यजन्यज्ञानप्रामाण्यसन्देहः, आप्तोक्तत्वसन्देहो वेति क्रमेण दूषयति, 'संशयो हीति', 'न वाक्ये' आनुपूर्व्यां, 'तस्य' आनुपूर्वीविशेषस्य, 'तस्य' तज्जन्यज्ञानप्रामाण्यसन्देहस्य, 'तदुत्तरेति' तज्जन्यज्ञानोत्तरकालीनत्वादित्यर्थः, तथा च तस्य कथं प्रतिबन्धकतेति भावः[3]।

---

(१) सन्देहो हीति क०। (२) तस्य निश्चयसत्त्वादिति क०।
(३) तथा च तस्य कथं संशयः प्रतिबन्धक इति भाव इति ख०, ग०।

न्त्वात्, नाप्तोक्तत्वे तन्निश्चयस्यानङ्गत्वात्[1]। ननु लोके आप्तोक्तत्वसन्देहे वाक्यार्थधीर्नेति तन्निश्चयो हेतुः तथा च वाक्यार्थगोचरयथार्थज्ञानजन्यत्वग्राहकात्[2] तदुपजीविनोऽनुमानात् वाक्यार्थधीरिति चेत् । न । वेदे

'तन्निश्चयस्यानङ्गत्वा'दिति, प्रमाणाभावादिति भावः । तथाच आप्तोक्तत्वनिश्चयो यदि हेतुः स्यात्तदैव तन्निश्चयविघटनद्वारा तत्संशयः प्रतिबन्धकः स्यान्नत्वेवमिति[3] तत्संशयोऽपि न प्रतिबन्धकः । न च अप्रामाण्यसंशय एव प्रतिबन्धकोऽवश्य इति वाच्यं । तस्य विरोध्यविषयकतया लिङ्गेऽप्यप्रतिबन्धकत्वेन व्यभिचारादिति भावः । 'लोके' लौकिकवाक्यस्थले, 'आप्तोक्तत्वस्य' तत्पदार्थवत्तत्पदार्थज्ञानजन्यत्वस्य, सन्देहे व्यतिरेकनिश्चये च, 'तन्निश्चये' इति, तत्संशयो यद्व्यतिरेकनिश्चयस्य च प्रतिबन्धकः तन्निश्चयत्वावच्छिन्नस्य हेतुरिति नियमादिति भावः । 'वाक्यार्थगोचरे'ति तत्पदार्थवत्तत्पदार्थज्ञानजन्यत्वरूपाप्तोक्तत्वस्य ग्राहकादित्यर्थः, 'तदुपजीविन' इति बहुव्रीहिः[4] तदुपजीव्यात् तत्पदार्थे तत्पदार्थानुमानादित्यर्थः, 'वाक्यार्थधीरिति' वचनं शब्दबोधात्पूर्वं वाक्यार्थधीरित्यर्थः, तथाचानु-

(१) तन्निश्चयस्याकिञ्चित्करत्वादिति क० ।

(२) वाक्यार्थगोचरयथार्थज्ञानवज्जन्यत्वग्राहकादिति क० ।

(३) न चैवमितीति ख०, ग० ।

(४) तदुपजीवि यस्य इति बहुव्रीहिरित्यर्थः ।

तद्रहितस्यापि सामर्थ्यावधारणात् तदनिश्चयेऽपि वेदानुकारेण पठ्यमानमन्वादिवाक्येऽपौरुषेयत्वाभिमानिनोऽगौडमीमांसकस्यार्थनिश्चयात्। न चासौ भ्रान्तिः, बाधकाभावात् पौरुषेयत्वनिश्चयदशायामपि तस्य तथात्वात्।

याद्वकः शब्द इति भावः। आप्तोक्तत्वनिश्चयः किं शाब्दप्रमामात्रे[1] सहकारी, किं वा लौकिकवाक्यादौ, लौकिकत्वेन ज्ञाते वाक्ये वा,[2] आद्य इत्याह, 'वेद इति, 'तद्रहितस्यापि' विषयतया आप्तोक्तत्वज्ञानरहितस्यापि, 'सामर्थ्येति शाब्दबोधजनकत्वानुभवादित्यर्थः, तदनिश्चयेऽपीत्यादिः, न द्वितीय इत्याह, 'तदनिश्चयेऽपीति आप्तोक्तत्वानिश्चयेऽपीत्यर्थः, 'अपौरुषेयत्वेति पुरुषाप्रणीतत्वेत्यर्थः, 'गौडेति, दाक्षिणात्यादीनां वेदाभिज्ञतया तत्र वेदत्वभ्रमासम्भवादपौरुषेयत्वभ्रमोऽपि सम्भवतीति गौडेत्युक्तं। 'न चासौ भ्रान्तिरिति, तथाच लौकिकवाक्येन प्रमायाञ्जनयितव्यायां आप्तोक्तत्वनिश्चयः सहकारीति भावः। भ्रमत्वाभावे हेतुमाह, 'बाधकाभावादिति विषयाबाधादिति भावः। भ्रमत्वाभावे हेत्वन्तरमाह, 'पौरुषेयत्वेति, 'तस्य' मन्वादिवाक्यजन्यशाब्दबोधस्य, 'तथात्वात्' अपौरुषेयत्वाभिमानदशोत्पन्नमन्वादिवाक्यजन्यज्ञानसमानाकारसमानविषयकत्वात्, तथा सति प्रतीत्योर्वैलक्षण्यमनुभूयेतेति भावः। यद्वा 'तथात्वात्' तथात्वापत्तेः

---

(१) शब्दमात्र इति ख० ग०। (२) लौकिकवाक्य इति क०।

न चासंसर्गाग्रहमात्रं तत्, अर्थस्य तथाभावेऽपि असंसर्गाग्रहत्वे संसर्गोच्छेदापत्तेः । न चाप्तोक्तत्वनिश्चयरूपकारणबाधात् संसर्गज्ञानबाधः, व्यभिचारेण हेतुतायामेव बाधात् लौकिकत्वेन ज्ञाते[1] तदङ्गमिति

भ्रमत्वापत्तेरिति यावत्, विषयतत्तैलक्षण्याभावादिति भावः । 'न चासंसर्गेति, न चैवं ततः संवादिनी प्रवृत्तिर्न स्यात्तस्याः विशिष्टज्ञानसाध्यत्वादिति वाच्यं । गुरुनये असंसर्गाग्रहस्यैव संवादिप्रवृत्तावपि हेतुत्वात् । 'अर्थस्य' विषयस्य, 'तथाभावेऽपि' अबाधितत्वेऽपि, यद्वा 'अर्थस्य' वाक्यार्थसंसर्गपक्षस्य, तथात्वेऽपि अनुभवसिद्धत्वेऽपि, 'संसर्गोच्छेद इति[2], मानाभावादिति भावः । 'हेतुतायामेवेति, संसर्गज्ञानस्यानुभवसिद्धत्वादिति भावः । तृतीयमाशङ्कते, 'लौकिकत्वेनेति लौकिकत्वेन ज्ञाते लौकिक इत्यर्थः, अन्यथा लौकिकत्वेन ज्ञानस्य वेदस्यानुवादकतापत्तेः । 'अङ्गं' सहकारि, मन्वादिवाक्येन्तु अपौरुषेयत्वाभिमानदशायां न लौकिकत्वेन ज्ञानमिति नोक्तव्यभिचार इति भावः । 'मानाभावादिति । न च यत्संशयेत्यादिव्याप्तिरेव[3] मानमिति वाच्यं । तस्याः व्याप्तिरव्यभिचारसंशयप्रतिबध्ये व्याप्तिज्ञाने व्यभि-

(१) तल्लौकिकत्वेन ज्ञाने इति क० ।

(२) 'संसर्गोच्छेदापत्तेरित्यत्र 'संसर्गोच्छेदः' इति कस्यचिन्मूलपुस्तकस्य पाठः इदृशटीकाकारलेखेनानुमीयते इति ।

(३) यत्संशये यद्व्यतिरेकनिश्चये च यदनुत्पत्तिस्तन्निश्चयस्तत्र कारणमिति व्याप्तिवचनेनेत्यर्थः ।

चेत्। न। मानाभावात् वाक्यार्थस्यापूर्वत्वेन लिङ्गाभावेन तद्ग्रहासम्भवात्। ननु अनाप्तोक्तत्वशङ्काव्युदासोऽङ्गं स च वेदेऽपौरुषेयत्वनिश्चयात् लोके चा-

---

चारात। ग्राह्याभावावगाहित्वेन व्यतिरेकनिश्चयविरोधिनि यत्संशय-इत्यस्य [illegible] योग्यतातिरिक्तनिश्चयस्यापि ग्राह्याभावावगाहितया शाब्दबुद्धि[illegible] योग्यतायां व्यभिचाराभावादप्रयोजकत्वाच्चेति भावः। 'वाक्यार्थस्ये'ति, 'वाक्यार्थस्य', 'अपूर्वत्वेन' अन्वयबोधात्प्रागज्ञातत्वेन(1), तद्ग्राहि[illegible] लिङ्गस्य [illegible] कस्यचिदभावेनेत्यर्थः। यद्वा 'वाक्यार्थस्यापूर्वत्वेन' [illegible], 'लिङ्गाभावेने'ति [illegible] ज्ञानाभावेनेत्यर्थः, चकारपूरणात्(2) परकीय[illegible] च [illegible] इति भावः।

केचित्तु 'लिङ्गाभावेने'ति, 'लिङ्गं' कारणं, [illegible](3) तदभावादित्यर्थः। [illegible] 'अपूर्वत्वेने'त्याहुः।

आप्तोक्त[illegible]ऽपि प्रयोजकत्वात्तदपेक्षेत्याह(4) 'नन्वि'ति, 'अनाप्तोक्तत्वेन' पुरुषप्रणीतत्वेत्यर्थः, '[illegible]' आप्तोक्तत्वा-

---

(1) अन्वयबोधात् प्रागज्ञातत्वेनेति ख०, ग०।

(2) अन्वयबोधात् प्राक् चकारपूरणात् ज्ञानाभावेन चेत्यर्थ इति क०।

(3) तच्च [illegible] इति क०।

(4) आप्तोक्तत्वेत्यादिः नास्तीत्यन्तः पा०, ख०, ग०-चिह्नितपुस्तकद्वये नास्ति।

सोक्तत्वावधारणादिति चेत्। न। तस्याशक्यत्वात्। यदि चापौरुषेयत्वनिश्चये सत्येव वेदादर्थप्रत्ययः[1] तदा दोषवत्पुरुषाप्रणीतत्वे सत्याकाङ्क्षादिमत्पदस्मारितत्वेन वेदे पदार्थसंसर्गसिद्धिरस्त्विति वेदोऽप्यनुवादकः स्यात्। तदुक्तं, "व्यस्तपुंदूषणाशङ्कैः स्मारितत्वात्

वधारणस्य, 'अशक्यत्वा'दिति अन्वयबोधात् प्रागित्यादिः, वाक्यार्थस्यापूर्वत्वेनाप्तोक्तत्वग्रहस्याप्यसिद्धेः तथा चानाप्तोक्तत्वशङ्काव्युदासो न स्यादिति भावः। इदमुपलक्षणं तच्छङ्काव्युदासस्याङ्गत्वेऽपि तत्र कारणाभावविरहात् तच्छङ्काविरहस्य चानुवादकत्वमसम्भवाच्चेत्यपि द्रष्टव्यं। दूषणान्तरमाह, 'यदि चेति, 'तदेति, एते पदार्थास्तात्पर्यविषयमिथःसंसर्गवन्त इति साध्यादि, 'दोषव'दिति, अयोग्यवाक्ये व्यभिचारवारणाय सत्यन्तं पदविशेषणं। न च तत्र योग्यताविरहान्न व्यभिचार इति वाच्यं। आदिपदेन योग्यताया अपरिग्रहात्। न चैवं विसम्वादिप्रकृतवाक्ये व्यभिचार इति वाच्यं। आदिपदेन तात्पर्यपरिग्रहात्। आकाङ्क्षादेर्निरुक्तिः पूर्ववद्बोध्या। 'पदार्थसंसर्गसिद्धिरिति, शाब्दबोधात्प्रागित्यादिः। 'तदुक्तमिति आचार्यचरणैरपीति शेषः[2]। 'व्यस्तेति, 'व्यस्ता' विगता, 'पुंदूषणाशङ्का' पुंदूषणाशङ्का येषां पदानां एतादृशैः पदैः स्मारितत्वात्, 'अमी'

(१) वेदादर्थनिश्चय इति ख०।

(२) उदयनाचार्यैरित्यर्थः।

पदैरमी । अन्विता इति[१] निर्णीते वेदस्यापि न तत्कृतः" ॥ न चैवं शब्दस्य प्रमाणत्वमपि, अनुमानादेव वाक्यार्थप्रमोत्पत्तेरिति ।

प्राभाकरास्तु व्यभिचारिशब्दव्यावृत्तमव्यभिचार्य-

पदार्थाः, 'अन्विताः' परस्परसंसर्गवन्तः, 'इति निर्णीते' इत्यनुमानेन वेदस्थलेऽपि शाब्दबोधात् प्रागर्थे निर्णीते, 'वेदस्यापि', 'न तत्' अनुवादकत्वं, न कुत इत्यन्वयः । दूषणान्तरमाह, 'न चेति न वेत्यर्थः, 'एवं' सर्वत्र शाब्दबोधात्प्राक्पदार्थसंसर्गानुमानस्यावश्यकत्वे, 'प्रमाणत्वमपि' वाक्यार्थबोधजनकत्वमपि, सिद्ध्यतीति शेषः[२] । 'अनुमानादेवेति, शाब्दमात्रस्थल एवानुमानादेवाभिमतवाक्यार्थप्रमोत्पत्तेः, शब्दस्य संसर्गप्रमाजनकत्वकल्पनायां प्रयोजनाभावादिति भावः[३] ।

कपिञ्जलानालभेतेत्यादौ कपिञ्जलपदार्थविशेष्यकत्रित्वप्रकारकप्रतीतिपर्यवसानेऽपि सामान्यतस्तात्पर्यग्रहोऽपेक्षित इति कपिञ्जलपदार्थत्वेन त्रित्वस्याज्ञानात् पदोत्थानुवादकः लौकिकस्थले च विशिष्य तात्पर्यज्ञानस्यापेक्षिततया गृहीतव्याप्तिकशब्दानुमानकारणतया लौकिकशब्दोऽनुवादक इति मतमनतावयन्ति, 'प्राभाकरास्त्वित्यादिना.[४] 'व्यभिचारिशब्दात्' प्रमितिस्वरूपायोग्यशब्दाद्व्यावृत्तमित्यर्थः, यद्वा विम-

(१) प्रतीति क० ।

(२) अस्तीति शेष इति क० ।

(३) प्रयोजनाभावादित्यर्थ इति ख०, ग० ।

(४) कपिञ्जलेत्यादिः प्राभाकरास्त्वित्यादिरित्यन्तः पाठः ख०-ग०चिह्नित-पुस्तकद्वये नास्ति ।

नुगतप्रमाप्रयोजकमुपेयं यदभावादनाप्तोक्तवाक्याद- प्रमा अन्यथा कार्य्यवैचित्र्यं(1) न स्यात्, तच्च ज्ञात-

---

त्वादिप्रवृत्तिहेतुज्ञानजनकव्यावृत्तमित्यर्थः, न त्वप्रमाजनकव्यावृत्त- मित्यर्थः. तैरप्रमानभ्युपगमात्, 'अव्यभिचारीति निखिलप्रमाजन- कताव्यवृत्तीत्यर्थः, किञ्चिदिति शेषः, 'अप्रमा' प्रमाविरहः, 'कार्यवै- चित्र्यमिति क्वचित्प्रमा क्वचित्तदभाव इत्येवं रूपमित्यर्थः, । न चैवं शाब्दप्रमात्वावच्छिन्नं प्रति किञ्चित्कारणाभ्युपगमे तन्मते प्रमाया- गुणाजन्यत्वापत्तिः(2) प्रमात्वघटितधर्मावच्छिन्नकार्यताप्रतियोगिकका- रणताश्रयस्यैव गुणत्वात् तथाच तस्यापसिद्धान्त इति वाच्यं। शाब्द- ज्ञानत्वमेव हि तस्य कार्यतावच्छेदकं न तु शाब्दप्रमात्वं गौरवात् व्यावृत्त्यभावाच्चेति(3) न तस्य गुणत्वमिति भावः। परिशेषमौकर्य्यार्थं तत्स्वरूपमभिधाय तज्ज्ञानकारणत्वं साधयति.(4) 'तच्चेति तच्छब्द-

---

(1) शब्दात् कार्य्यवैचित्र्यमिति क०।

(2) तथाच यैरप्रमा स्वीक्रियते तेषां मते कार्य्यवैचित्र्यस्य कारणवैचित्र्य- प्रयोज्यत्वात् प्रमाभ्रमयोर्वैचित्र्यार्थं प्रमात्वावच्छिन्नं प्रति गुणत्वेन अप्रमात्वावच्छिन्नं प्रति दोषत्वेन कारणत्वमवश्यमुपेयं, किन्तु यैरप्रमा न स्वीक्रियते तेषां मते प्रमा-भ्रमयोर्वैचित्र्यासम्भवात् प्रमात्वावच्छिन्नं प्रति गुणत्वेन कारणत्वं निष्प्रयोजनकमिति गुणाजन्यत्वापादनं सम्भव- दुक्तिकमिति भावः।

(3) प्रमात्वं अप्रमाव्यावर्त्तकं यन्मते अप्रमा नास्ति तन्मते प्रमात्वमव्यावर्त्त- कमिति तात्पर्यं।

(4) परिशेषेत्यादिः साधयतीत्यन्तः पाठः ख०-ग०-चिह्नितपुस्तकद्वये नास्ति।

वृत्तिप्रमाप्रयोजकमित्यर्थः, 'ज्ञानमुपयुज्यत' इति शाब्दबोधं प्रती-
त्यादिः, ज्ञानवृत्तिशाब्दबोधकारणतायां विषयतयाऽवच्छेदकमि-
त्यर्थः, प्रमेयमात्रस्यैव स्वलिङ्गकानुमितौ ज्ञानोपयोगित्वेन सिद्धसा-
धनवारणाय शाब्दज्ञानेति। शाब्दज्ञानस्य स्वाविषयकत्वेन विशेष-
णीयत्वेन पदादिजन्यपदार्थोपस्थितिनिष्ठायाः स्वविषयकशाब्दज्ञा-
नकारणताया विषयतासम्बन्धेनावच्छेदकत्वमादाय न सिद्धसाधनं।
शाब्दबोधजनकीभूतज्ञानविषयत्वं नार्थः भगवज्ज्ञानमादाय नैया-
यिकमते सिद्धसाधनात् तन्मतेऽपि तच्छाब्दबुद्धिं प्रति स्वरूपयोग्यस्य
कालान्तरीयपदज्ञानस्य दैवात् तात्पर्यविषयत्वेन सिद्धसाधनाच्चेति
मन्तव्यं। 'ज्ञायमानकरण' इति, अत्र सप्तम्यर्थः निष्ठत्वं, अन्वयश्चास्य
वैलक्षण्येन, तथाच ज्ञायमानकरणनिष्ठत्वे सति ज्ञानोपयोगिव्यभि-
चारिवैलक्षण्यवदित्यर्थः, 'ज्ञानोपयोगीत्यत्र ज्ञानपदं'(१) शाब्दबो-
धपरं, अन्यथा व्याप्तौ व्यभिचारात्। भाष्ये विशिष्य शाब्दबोध-
प्रवेशात् यज्ज्ञायमानकरणनिष्ठत्वे सति यज्ज्ञानोपयोगिव्यभिचा-
रिवैलक्षण्यं भवति तज्ज्ञानवृत्तिस्वाविषयकतज्ज्ञानकारणतायाः(२)
विषयतया अवच्छेदकं भवतीति सामान्यतो व्याप्तिलाभाय सामा-
न्यतो ज्ञानेत्युक्तं, चक्षुरादिनिष्ठ पित्ताद्यभावे भूयोऽवयवेन्द्रियस-
न्निकर्षे च प्रत्यक्षमादाय व्यभिचारवारणाय सत्यन्तं। ज्ञायमान-
करणत्वञ्च ज्ञानावच्छिन्नतत्प्रमाकरणतावत्त्वं, अन्यथा चक्षुरादेरपि
ज्ञायमानत्वेन करणत्वेन च तद्वृत्तिभूयोऽवयवेन्द्रियसन्निकर्षादौ

(१) द्वितीयज्ञानपदमिति क०।

(२) तज्ज्ञानवृत्तितज्ज्ञानकारणताया इति ख०, ग०।

मुपयुज्यते ज्ञायमानकरणे ज्ञानोपयोगिव्यभिचारिवै-

व्यभिचारतादवस्थ्यात् चक्षुरादेरप्यनुमितिं प्रति ज्ञानावच्छिन्न-तत्करणतावत्त्वेन तद्दोषतादवस्थ्यमिति तत्प्रमेति, ज्ञायमानकरण-धूमादिनिष्ठरूपादौ व्यभिचारवारणाय तज्ज्ञानोपयोगीति, उप-योगित्वं कारण-कारणतावच्छेदकसाधारणं, अतो न दृष्टान्तासङ्गतिः । साध्याभावनिश्चयाभाव-तद्व्याप्यवत्पक्षनिश्चयाभावादिषु(१) व्यभिचारः तस्यापि ज्ञायमानकरणलिङ्गनिष्ठत्वात् तदनुमितिजनकत्वाच्च, एव-मात्मलिङ्गकानुमितौ कारणीभूतपरामर्शात्ममनःसंयोगानुमितिप्रा-गभावादौ च व्यभिचार इति तद्वारणाय 'व्यभिचारिवैलक्षण्य'मिति व्यभिचारिव्यावृत्तत्वेत्यर्थः, तदर्थश्च प्रमेतरज्ञानजनकावृत्तित्वं, प्रमा-त्वमनुभवत्वमात्रं, तथा च स्मृतिजनकावृत्तित्वं पर्यवसितोऽर्थः, यथा-श्रुते तन्मते भ्रमाप्रसिद्ध्या अप्रसिद्ध्यापत्तेः(२) । एवञ्च साध्याभावनिश्च-याभावादौ आत्मलिङ्गकपरामर्शादौ तादृशानुमितिप्रागभावादौ पक्षतादौ च न क्वापि व्यभिचारः तेषां स्मृतिजनकावृत्तित्वात् । आत्मा तु न ज्ञायमानकरणनिष्ठ इति न तत्र व्यभिचारः । न च तत्र सूर्यक्रियायां कालत्वेनाधिकरणत्वेन वा सूर्यलिङ्गकानुमिति-हेतुभूतायां व्यभिचारः, तदितरोपयोगिताया एव हेतूकरणात् ।

केचित्तु 'व्यभिचारिवैलक्षण्यं' भ्रमाजनकत्वं, भ्रमत्वं प्रमेतर-ज्ञानत्वं प्रमात्वमप्यनुभवत्वमात्रमेव, तथा च स्मृत्यजनकत्वं पर्यवसि-

---

(१) साध्याभावनिश्चयाभाव-साध्याभावव्याप्यवत्पक्षनिश्चयाभावादिष्विति
(२) प्रमेतरज्ञानाप्रसिद्ध्यापत्तेरित्यर्थः । ख०, ग० ।

तोऽर्थः, शक्तिश्च न पदार्थस्मृतिजनिका किन्तु तथा ज्ञायमानैवेति न दृष्टान्तासङ्गतिः। अजनकत्वञ्च जनकतावच्छेदकशून्यत्वं नातः स्वत्वत्यनुपधायिकायामात्मलिङ्गकानुमितिजनकीभूतपरामर्शात्मम-नःसंयोगादिव्यक्तौ व्यभिचारः, जनकता च ज्ञायमानलिङ्गत्वाव-च्छिन्नजनकताव्यावृत्ता उद्बोधकीयजनकताव्यावृत्ता च ग्राह्या तेन वस्तुभावस्यैव ज्ञायमानलिङ्गविधया प्रमेयसामान्यात्मककूटलिङ्गका-नुमितिस्थानाभिषिक्तभाव्यस्मृतिजनकत्वेऽपि नाप्रसिद्धिः। न वा व्याप्ति-यथार्थतात्पर्यकत्वयोरपि कुत्रचिदुद्बोधकविधया स्मृतिजनक-त्वेऽपि दृष्टान्तासिद्धि-स्वरूपासिद्धी। पक्षता च परनये नानु-मितिजनिकेति[१] न तत्र व्यभिचारः। न वात्मलिङ्गकप्रमानुमिति-प्रागभावे व्यभिचार इति वाच्यम्। प्रागभावस्य तैरनभ्युपगमात् तज्ज्ञानानधिकरणत्वेन वा ज्ञायमानकरणस्य विशेषणीयत्वादि-त्याहुः।

अन्ये तु 'ज्ञायमानकरण इत्यत्र सप्तम्यर्थो जन्यत्वं, अन्वयश्चास्य ज्ञाने, तथाच ज्ञायमानकरणजन्यज्ञानोपयोगिव्यभिचारिवैलक्षण्य-त्वादित्यर्थः, यज्ज्ञायमानकरणजन्ययज्ज्ञानोपयोगिव्यभिचारित्वल-क्षणं भवति तज्ज्ञानवृत्तिस्वादिविषयकतज्ज्ञानकरणतायां विषयतया अवच्छेदकं भवतीति सामान्यमुखी व्याप्तिः, भूयोऽवयवेन्द्रियसन्निकर्षे चक्षुरादिनिष्ठपित्ताद्यभावे च प्रत्यक्षमादाय व्यभिचारवारणाय ज्ञायमानकरणजन्येति यज्ज्ञानविशेषणं, तदर्थञ्च ज्ञायमानत्वघटि-

---

(१) परैरनुमितिधारास्वीकारात् न तेषां मते पक्षताया हेतुत्वमिति तात्पर्य्यं।

[illegible]

तद्धर्मावच्छिन्नप्रकारकप्रमेति, अन्यथा चक्षुरादेरपि ज्ञापकत्वात्
कारणताया व्यभिचारस्य तदवस्थत्वात्,(१) उपयोगित्वस्य कारण-
तावच्छेदकधारणं, तेन न धूमाभासादिः। अनुमिति-
कारणतावच्छेदकधारणं, तेन न धूमाभासादिः । अनुमिति-
कारणताया आत्ममनःसंयोगादौ बाधाभावादौ च व्यभिचारवारणाय
व्यभिचारीति, व्यभिचारित्वैकवचनत्वं अनवच्छेदकतावच्छेदका-
वच्छिन्नत्वं, अन्यत् प्रमेतरज्ञानत्वं, नातस्तथैऽप्रसिद्धिः, प्रमाण-
मपि अनुभवत्वमात्रमेव, तथा च अनुमितिजनकतावच्छेदकावच्छिन्नानां
पर्यवसितोऽर्थः, स्वत्वघटितपर्याप्तिकाया आत्ममनःसंयोगादिष्वपी व्यभि-
चारवारणायावच्छेदकानुसरणं, अन्यत्सर्वं पूर्ववत् । प्राप्यमाणच
नूनं तु नाप्येव तेनानुमितिकारणविभागभावे न व्यभिचार इत्याशयः ।
तदुभयमप्यत्र तद्धर्मावच्छिन्नविशेष्यक-तद्धर्मावच्छिन्नप्रकारकत्वाभावः,
क्वापि कदापि न जाता तद्धर्मावच्छिन्नविशेष्यक-तद्धर्मावच्छिन्ना-
भावाभिन्नत्वाभावादौ व्यभिचारप्रसङ्गादिति सङ्क्षेपः ।

'प्रमेति, प्रमापदं शाब्दज्ञानपरं, तेन व्याप्त्यादौ न व्यभिचारः ।
प्रत्यक्षजनकेऽनुमिति तज्ज्ञानव्यभिचारविषयकतज्ज्ञानकारणतायां
विषयतया अवच्छेदकं भवतीति सामान्यमुखी व्याप्तिः हेतुतावच्छेदक-
धीविषयत्वं कारण-कारणतावच्छेदकधारणं, अतो न धूमाभा-
सादिः । न चानुमितिमादायात्ममनःसंयोगे बाधाभावादौ व्यभि-
चार इति वाच्यम् । प्रत्यक्षज्ञानस्यानुभवमात्रवृत्तिधर्मावच्छिन्न-

(१) तद्योगितावच्छेदकमात्रादिति क०, ग० ।

अन्यथा शब्दाभासोच्छेदप्रसङ्गः। न चाप्तोक्तत्वं तथा, संवादात् प्रमाणे शुकोदीरिते भ्रान्तप्रतारकसंवादि-

---

कार्यतानिरूपितोपयोगित्ववद्वृत्तीति विशेषणीयत्वात्। न च तथापि भूयोऽवयवेन्द्रियसन्निकर्षे व्यभिचार इति वाच्यम्। ज्ञायमानत्वघटितधर्मावच्छिन्नकरणताकत्वस्य ज्ञानवृत्तीति विशेषणीयत्वात्। न च तथापि परामर्शे व्यभिचार इति वाच्यम्। ज्ञानान्यत्वे सतीत्यनेन हेतोर्विशेषणीयत्वात् पक्षता-प्रागभावादिश्च नैतन्मतेऽनुमितिहेतुरिति न तत्र व्यभिचारः। अथानुकूलतर्कमाह, 'अन्यथेति यदि स्वरूपसदेव तात्पर्यं हेतुः न तु तन्निश्चय इत्यर्थः, 'शब्दाभासोच्छेदेति तात्पर्यसन्देहदशायां स्वतात्पर्यकशब्दात् शाब्दानुत्पत्त्युच्छेदप्रसङ्ग इत्यर्थः,[1] वस्तुगत्या तात्पर्यस्य तत्र सत्त्वेन तदर्थान्वयबोधसम्भवादित्यर्थः।

परे तु 'अन्यथेति भ्रमस्थल इति शेषः। शब्दाभासेति घटोऽस्तीति वाक्ये घटाभावतात्पर्यभ्रमे घटाभावबोधः[2] न स्यादित्यर्थः, इत्याहुः।

तात्पर्यं परिशेषयितुं प्रयोजकान्तरं निरस्यति, 'न चेत्यादिना, 'आप्तोक्तत्वं' प्रकृतवाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वं, 'तथा' प्रमाप्रयोजकं, 'संवादात्' संवादिप्रवृत्तिजनकत्वात्, अबाधितविषयकत्वाद्वा,[3]

---

(१) इत्यर्थ इत्यनन्तरं "यद्वा अन्यपरादन्यपरत्वभ्रमे यत्र तात्पर्यं तदर्थबोधानुत्पत्त्युच्छेदप्रसङ्गः" इत्यधिकः पाठः क-चिह्नितपुस्तके वर्तत इति।

(२) घटाभावभ्रम इति ख०, ग०।

(३) अबाधितविषयकबोधजनकत्वादिति क०।

वाक्ये वेदे च तदभावादाप्तोक्तत्वानुमाने व्यभिचारि-
त्वाद्व्याप्तलिङ्गाभावाच्च । भावे वा तद्वत एव शब्दस्य
प्रत्यायकत्वात्[१] ।

'भ्रान्तेति', भ्रान्तप्रतारकस्य भ्रमरूपविशेषादर्शनेन वाक्यार्थगोचर-यथार्थज्ञानवत्त्वरूपाप्तत्वस्यासम्भवादिति भावः। 'वेद' इति मूर्खपठ्य-मानवेद इत्यर्थः। ननु भवन्मते वर्णानां नित्यैकतया शुकादिवाक्येऽपि शिक्षकमादायाप्तोक्तत्वमस्ति। न च तथापि द्वैवशब्दपक्षे अपूर्वा-नुपूर्व्वीकशुकादिमात्रोक्तवाक्येऽव्याप्तिरिति वाच्यम्। भवन्मतेऽपि तस्याप्रमाणत्वात् व्यवहारस्यासंसर्गाग्रहात् अन्यथा वक्ष्यमाणयथार्थ-तात्पर्य्यहेतुतापक्षेऽपि तथाप्रतीकारात्। एवं भ्रान्तप्रतारकवाक्येऽपि प्रकृतवाक्यार्थाभिज्ञोक्ततादृशवाक्यादभिन्नत्वादाप्तोक्तत्वमस्ति भ्रान्त-प्रतारकमात्रोक्तापूर्वानुपूर्व्वीकवाक्यन्तु नान्वयबोधं जनयति[२] व्यवहा-रस्तु असंसर्गाग्रहात् मूर्खपठ्यमानवेदोऽपि कदाचित् पण्डितपठ्यमानः वर्णानां नित्यैकत्वाभ्युपगमात्, अन्यथा वक्ष्यमाणतात्पर्यहेतुतापक्षेऽपि तथाप्रतीकारात् इत्यस्वरसादाह,[३] 'आप्तोक्तत्वानुमान' इति। ननु दोषाजन्यानुपूर्वीकत्वे सति अर्थज्ञानजन्यत्वमेव[४] लिङ्गं स्यादित्यत-आह, 'भावे वेति', 'तद्वत एव' तल्लिङ्गवत एव, 'प्रत्यायकत्वादिति'

---

(१) प्रमापकत्वादिति क० ।

(२) नान्वयधीजनकमिति ख०, ग० ।

(३) इत्यस्वरसादाहेति ख०, ग० ।

(४) दोषाप्रभवत्वे सत्यर्थधीजन्यत्वमेवेति ख०, ग०

एतेनाप्तोक्तत्वं हेतुत्वं न भ्रम-प्रमाद-विप्रलिप्सा-करणा-पाटवानां परस्परं व्यभिचारात् निखिलव्याप्यक-

---

प्रत्यायकत्वप्रसङ्गादित्यर्थः। न चेष्टापत्तिः, अस्मादिशुकादिवाक्ये लौकिकवाक्ये च तदभावात् वर्णानां नित्यतया शब्दमात्रे तदभावाच्चेति भावः। इदमुपलक्षणं वस्तुतस्तु आप्तोक्तत्वस्य प्रकृतवाक्यार्थगोचर-यथार्थज्ञानवदुक्तत्वरूपस्य शाब्दधीजनकत्वे नानावाक्यार्थगोचर-यथार्थज्ञानजन्यपरोक्तत्वैकमात्रतात्पर्यकनानार्थकस्य तात्पर्यविषयेऽपि शाब्दबोधजनकत्वापत्तेः तादृशयथार्थज्ञानजन्यानुपूर्वीकत्वस्याप्तोक्तत्व-रूपत्वे वेद-लौकिकवाक्ययोरव्याप्तेश्च वेदानुपूर्व्या नित्यत्वादित्येव दूषणं सारं[१]।

केचित्तु भ्रमजनकदोषाभावः प्रमायां हेतुः भ्रमजनकदोषश्च भ्रमप्रमादादिः परस्परं व्यभिचारात् किन्त्वाप्तोक्तत्वाभाव इति तदभाव आप्तोक्तत्वं शाब्दप्रमाहेतुरित्याप्तोक्तत्वस्य हेतुत्वे युक्तिमा-ख्यान्तदुपन्यस्य दूषयति, 'एतेनेति, 'भ्रमेति, 'भ्रमः' उच्चारणी-यवाक्यार्थगोचरो वक्तुर्भ्रम इत्यर्थः, 'प्रमादेति, 'प्रमादः' अनवधानता, सा च वाक्यार्थज्ञानस्वरूपयोग्यस्य वक्तुरुच्चारणीयवाक्यार्थनिश्चय-व्यतिरेकः, एवमेव शुकादिवाक्यार्थनिश्चयव्यतिरेको वाक्तः, 'विप्रलिप्सेति, 'विप्रलिप्सा' प्रतारणा, सा च एकरूपेणावगतान्य-रूपेण बुबोधयिषा, 'करणापाटवेति, इच्छाविषयीभूतवर्णानु-कूलकरणसंयोगानुत्पादकत्वेन-तदननुकूलकरणसंयोगः करणापा-

---

(१) सम्यगिति ग०।

त्वात् । किञ्च [illegible] प्रमाहेतुत्वे [illegible]
वाप्तोक्तत्वं प्रमाहेतुरित्यपास्तं । आप्तोक्तत्वस्य प्रमा-
[illegible] ग्रहीतुमशक्यत्वात् ।

एतेन व्यभिचारशङ्काविरहो[१] हेतुः सा च लोके भ्रमादिमूलकत्वाप्तोक्तत्वानुमानादुच्छिद्यते,[२] वेदे चापौरुषेयत्वनिश्चयेनेति निरस्तं । अभिमतवाक्यार्थ-

---

त्वं, 'करणं' कण्ठादि, 'अव्यापकत्वादिति प्रत्येकमव्यापि शब्दाभावदर्शनादित्यर्थः, 'अप्रमाहेतुत्वमिति, इत्तीति शेषः ।

बाधितार्थकत्वशङ्काविरहः शाब्दबोधे हेतुः, सा च लौकिकवाक्ये आप्तोक्तत्वनिश्चयादुच्छिद्यते वेदे चापौरुषेयत्वनिश्चयादतो बाधितार्थकत्वशङ्काविरोधित्वेनाप्तोक्तत्वनिश्चयो हेतुः । न चैवं वेदे व्यभिचारः, तत्र बाधितार्थकत्वशङ्काविरोधिनोऽपौरुषेयत्वनिश्चयस्यैव सत्त्वादित्यपि मतं निराकरोति, 'एतेनेति आप्तोक्तत्वस्य प्रयमसङ्कीर्णत्वादेवेत्यर्थः । 'व्यभिचारः' बाधितार्थकत्वं, 'भ्रमादिमूलेति वक्तृभ्रमादिप्रयुक्तमूलेत्यर्थः, 'उच्छिद्यते' नोत्पद्यते, 'निश्चयेनेति, तथाच बाधितार्थकत्वशङ्काविरोधित्वेनाप्तोक्तत्वनिश्चयो हेतुरिति भावः ।

केचित्तु बाधितार्थकत्वशङ्काविरहः शाब्दप्रमाहेतुरिति केचित्-

---

(१) व्यभिचारशङ्काविरहोऽपीति क० ।

(२) विच्छिद्यत इति ख० ।

स्यापूर्व्वत्वेन साध्याप्रसिद्धेः वेदे सदोषपुरुषाप्रणीत-पदस्मारितत्वेन संसर्गसिद्धेरनुवादकतापत्तेश्च। नापि दोषाभावः भ्रान्तप्रतारकवाक्यजन्यज्ञाने प्रत्यक्षेणागृहीतसंवादे तदभावात्। दोषाभावस्य हेतुत्वात् तत्र वाक्यं मूकमेव व्यवहारस्तु प्रत्यक्षादिति चेत्। न।

वदन्ति तन्मतं निराकरोति,(१) 'अतएवेति, इति यथाश्रुतग्रन्थं सङ्गमयन्ति। तदसत्, बाधितार्थकतच्छङ्काविरहस्य शब्दाभाससाधारणतया व्यभिचारित्वात् तत्त्वाभावेन तद्रूपस्य प्रकृतानुपयोगित्वात्।

अभिमतेति प्रकृतेत्यर्थः, 'अपूर्व्वत्वेन' अन्वयबोधात्पूर्वमप्रतीतत्वेन, 'साध्यस्य' आप्तोक्तत्वरूपसाध्यस्य। नन्वेवं वक्तृज्ञानतात्पर्य्यमपि प्रथमं दुर्ग्रहमतस्तस्यापि प्रकृतवाक्यार्थयाथार्थ्यघटितत्वात् इत्यस्वरसात्, 'वेद इति, 'सदोषेति एते पदार्थाः मिथः संसर्गवन्तः सदोषपुरुषाप्रणीतपदस्मारितत्वादित्यादिक्रमेणेत्यर्थः, व्यभिचारशङ्कोच्छेदार्थं अपौरुषेयत्वनिश्चयस्यावश्यकत्वेन सदोषपुरुषाप्रणीतत्वघटके विलम्बाभावादिति भावः। अत्र पदं सतात्पर्य्यकत्वेन विशेषणीयं तेन विषमादिशुकोदीरितपदार्थेषु न व्यभिचार इति ध्येयं। 'दोषाभाव इति, शाब्दप्रमाप्रयोजक इति शेषः। 'दोषाः' भ्रम-प्रमाद-विप्रलिप्सा-करणापाटवरूपाः। 'तदभावादिति प्रतारणारूपदोषसत्त्वात् दोषाभावासत्त्वादित्यर्थः। प्रकृते, 'दोषाभावस्येति, 'हेतुत्वात्' शाब्दप्रमायां हेतुत्वात्, 'मूकमेव' प्रमित्यजनकमेव, 'व्यवहारः'

---

(१) दूषयतीति ख०, ग०।

अनुभवापलापापातात्[1] तद्धेतुत्वे विवादात् वेदेऽप्यनुवादकतापत्तेश्च । किञ्च दोषाभावस्य प्रमाहेतुत्वेऽप्रमायां दोषः कारणं तस्य च प्रत्येकं हेतुत्वे[2] व्यभिचारः मिलितस्य तत्त्वे[3] एकस्मादप्रमा न स्यात् प्रमा-

---

प्रवृत्त्यादिः, 'प्रत्यक्षादिति, असंसर्गाग्रहादेवेति शेषः, तेन सर्वत्र प्रत्यक्षासत्त्वेऽपि न व्यवहारानुपपत्तिः । 'अनुभवेति, तद्वाक्यश्रवणानन्तरं इदं शाब्दयामीत्यनुव्यवसायादिति भावः । ननु दुष्टकारणबाधादनुव्यवसायस्य तथाप्रमात्वं कल्प्यते इत्यत आह, 'तद्धेतुत्व-इति दोषाभावस्य शाब्दप्रमाहेतुत्व इत्यर्थः । ननु अविद्यमानार्थप्रतिपिपादयिषारूपप्रतारणा दोषः भ्रान्तप्रतारकवाक्ये च सा नास्त्येवेत्यत आह, 'वेदेऽपीति, दोषाभावज्ञाने सति सदोषपुरुषाप्रणीतपदस्मारितत्वेन लिङ्गेन प्रथमं संसर्गसिद्धेः सम्भवादिति भावः । ननु हेतुज्ञानसत्त्वेऽपि सर्वत्र प्रथमं व्याप्त्यादिज्ञानस्यावश्यकत्वे मानाभावात् वेदस्य नानुवादकतेत्यस्वरसादाह, 'किञ्चेति, 'अप्रमायामिति, कारणं वक्तव्यमिति शेषः, अन्यथा अप्रमाप्रयोजकाभावात् प्रमेति सिद्धान्तस्य व्याकोपापत्तेरिति भावः । अप्रमा च तन्मते असंसर्गाग्रहविशिष्टमगृहीतभेदं ज्ञानद्वयं, 'तस्य चेति भ्रमादेर्दोषस्येत्यर्थः, 'तत्त्वे' तद्धेतुत्वे । ननु दोषत्वेन कारणताऽस्त्वित्यत आह,

---

(१) अनुभवापलापादिति ख० ।

(२) तस्य च हेतुत्वे प्रत्येकं व्यभिचार इति ख० ।

(३) मिलितस्य हेतुत्व इति क० ।

दीनां प्रत्येकं दोषत्वेऽननुगमः मिलितस्य तु तत्त्वे(१) एकस्माद्भ्रमानुत्पत्तिप्रसङ्गः। तस्मात् लाघवात् यथार्थ-धीत्वमेवाप्तत्वं शाब्दप्रमाप्रयोजकं तत्र यथार्थवाक्यार्थ-

'भ्रमादीनामिति भ्रमत्वादीनामित्यर्थः, 'दोषत्वे' दोषरूपत्वे, 'अन-नुगम इति पूर्ववद्व्यभिचार इत्यर्थः, 'मिलितस्य' मिलनस्य, चतुष्टयरूपापेक्षाबुद्धिविशेषविषयत्वस्येति यावत्, 'तत्त्व इति तत्पदेन दोषत्वपरामर्शः तथाच दोषत्वस्य इत्यर्थः, यदि च भ्रमाभावत्वा-द्विना भ्रमाद्यभावकूटमेव प्रमाकारणं प्रमाकरणतावच्छेदकावच्छि-न्नप्रतियोगिताकाभावत्वेन अनुगमीकृतानां भ्रमादीनां अप्रमा-कारणत्वं भ्रान्तप्रतारकवाक्ये चोक्तप्रतारणाविरहात् व्यभिचारः तथापि वक्ष्यमाणतात्पर्यापेक्षया भ्रमाद्यभावचतुष्टयस्य कारणत्वे गौरवं विप्रलम्भादिशून्यकवाक्येऽतिप्रसङ्गश्चेत्यभिप्रायेणोपसंहरति, 'तस्मा-ल्लाघवादिति, 'लाघवादित्युपलक्षणं विप्रलम्भादिशून्यकवाक्यव्यावृत्तत्वा-च्चेत्यपि बोध्यं। 'यथार्थवाक्यार्थेति यद्विशेष्यक-यत्प्रकारिका शाब्द-प्रमा फलीभूता तद्विशेष्यक-तत्प्रकारकयथार्थप्रतीतिप्रयोजकत्वमि-त्यर्थः। न च तन्मते यथार्थत्वविशेषणं व्यर्थं अव्यावर्त्तकत्वादिति वाच्यं। सिद्धान्ते 'गौरवादित्यनन्तरं अस्यापि दोषस्योद्धरणीयत्वात्। ननु शाब्दप्रतीतिप्रयोजकत्वं न तादृशप्रतीतिजनकज्ञानत्वं वर्णमा-त्रस्यैव तेषां नित्यतया शब्दमात्रे तदसम्भवात्। अथ तादृ-

(१) तथात्वे इति क०।

प्रतीतिप्रयोजनकत्वं लोक-वेदसाधारणं तदभावाद-
प्रमा स एव दोषः, न हि जात्यैव कश्चिद्दोषः, तद्वि-

शप्रतीतीच्छाजन्यानुपूर्वीकत्वं आनुपूर्वी च तन्मये शब्दसमवेत-
पदार्थान्तरं सा च वर्णानां नित्यत्वेऽप्यनित्यैवेति नाममात्र इति चेत् ।
न । लौकिकवाक्यसङ्गेऽपि वेदासङ्गात् वेदानुपूर्व्यास्तन्मये नित्य-
त्वात् । नापि तादृशप्रतीतिजनकत्वं, तज्जनकत्वं हि स्वरूपयोग्यत्वं(१)
फलोपधायकत्वं वा, नाद्यः लक्षणादिना सर्वस्यैव सर्वत्र स्वरूप-
योग्यतया अव्यावर्त्तकत्वात् एकतात्पर्यकलौकिकवाक्यस्यापि अन्य-
विषयकप्रतीतिस्वरूपयोग्यतया 'अतएवान्यघटाभिप्रायेणेत्याद्यग्रिम-
ग्रन्थासङ्गतेश्च । न द्वितीयः प्रथमन्दूषकत्वात् एकस्यैव शब्दस्य
पुरुषभेदेन कालभेदेन च नानार्थप्रत्यायकत्वादव्यवस्थितेः, 'अत-
एवान्यघटाभिप्रायेणेत्याद्यग्रिमग्रन्थासङ्गतेश्च तेन ग्रन्थेन वक्तुरिच्छा-
विरहादेव तत्तद्वर्णितघटानन्वयबोधप्रतिपादनादिति । मैवं । तादृ-
शप्रतीतीच्छोच्चरितत्वस्य तदर्थत्वात्, उच्चरितत्वञ्च ज्ञापितत्वं न तु
जन्यत्वं, तेन वर्णानां नित्यत्वेऽपि न क्षतिः न वा ईश्वरानभ्युपगमे-
ऽपि मीमांसकेऽव्याप्तिः, इदञ्च तन्मये वेदेऽप्यस्ति यथार्थप्रतीती-
च्छया अध्यापकेनैव ज्ञापितत्वात् मूर्खपठ्यमानवेदस्य पण्डितपठ्यमा-
नवेदादभिन्न एव वेदस्य नित्यत्वात् नित्यानुमेयवेदे च तदर्थज्ञाप-
कत्वेन ज्ञानमेव पृथक्सामग्री वक्ष्यत इति तत्रैव तस्य व्यभिचारो
न दोषाय । न च तथापि तात्पर्यभ्रमेण तात्पर्याविषयेऽपि विषया-

(१) तत्स्वरूपयोग्यत्वमिति ख०, ग० ।

घातकत्वाच्च भ्रमादीनां दोषत्वं। अतएव भ्रान्तप्रता-

[illegible]मात् शाब्दप्रमाजनकेऽव्याप्तिरिति वाच्यं। परनये तात्पर्यभ्रमेण शाब्दबुद्ध्यनभ्युपगमात् स्वरूपसतो यथार्थतात्पर्य्यस्य लाघवात् तद्विशिष्टज्ञानस्य च शाब्दधीहेतुत्वात् भ्रमस्य च तन्मये विशिष्टज्ञानत्वाभावादिति भावः। 'शुकादिवाक्यञ्च प्रमाणमित्याद्यग्रिमग्रन्थन्तु तत्रैवोपपादयिष्यामः। ननु तदेव प्रमाप्रयोजकं यदभावात्प्रमित्यभाव इति कुतोऽस्य शाब्दप्रयोजकत्वमित्यत आह, 'तदभावादिति, 'अप्रमा' प्रमित्यभावः,[१] भ्रमस्य तैरनङ्गीकारात्[२]। ननु दोषादेवाप्रमेति नियमात्कथं ततः सा स्यादित्यत आह, 'स एव दोष' इति, 'स एव' यथार्थतात्पर्यज्ञानाभाव एव, 'दोषः' शाब्दप्रमायां दोषः। ननु तदभावस्य कथं दोषत्वं दोषत्वस्य जातिरूपत्वादित्यत आह, 'न हीति, 'दोषः' दोषव्यवहारविषयः, तथाच दोषपदशक्यतावच्छेदकं न जातिरित्यर्थः, ज्ञानत्वादिना साङ्कर्य्यादिति भावः[३]। नन्वेवं तदभावस्य दोषत्वे कथं भ्रमादिषु दोषव्यवहार इत्यत आह, 'तद्विघातकत्वाच्चेति शाब्दप्रमाकारणीभूतस्य यथार्थतात्पर्यस्य विघातकत्वाच्चेत्यर्थः, 'तद्विघातकत्वं' तद्विरोधित्वं, 'भ्रमादीनां' भ्रमप्रमाद-विप्रलिप्सा-करणापाटवानां, 'दोषत्वं' दोषव्यवहारविषयत्वं।

---

(१) प्रमाया अभाव इति ख०, ग०।

(२) तन्नयेऽनङ्गीकारादिति क०।

(३) ज्ञानत्वशून्ये पित्तादिदोषे दोषत्वं वर्त्तते दोषत्वशून्ये दोषानात्मकज्ञाने ज्ञानत्वं वर्त्तते दोषात्मकज्ञाने ज्ञानत्वं दोषत्वञ्च वर्त्तत इति साङ्कर्य्यं।

रकवाक्यं शुकादिवाक्यञ्च प्रमाणं संवादात् । अत एवान्यघटाभिप्रायेण[1] गेहे घटोऽस्तीत्युक्ते यत्र घटान्तरं दृष्ट्वा तमानयति तत्रान्यपरत्वाच्छब्दो न प्रमाणं व्यवहारस्तु प्रत्यक्षादेव यष्टीः प्रवेशयेति च मुख्यार्थबोधे

यद्यपि स्वप्रतीतविपरीतप्रतिपिपादयिषायाः प्रतारणाया न यथार्थतात्पर्यविरोधित्वं भ्रान्तप्रतारकस्थले तत्सत्त्वेऽपि यथार्थतात्पर्यसत्त्वात्, तथापि अविद्यमानार्थप्रतिपिपादयिषारूपप्रतारणैव दोष इत्यभिप्रायेणेवेदमुक्तं। 'अतएव' यथार्थतात्पर्यस्य शाब्दप्रमाप्रयोजकत्वादेव, एवमग्रेऽपि, 'भ्रान्तप्रतारकेति, तत्रापि प्रतारणानुरोधेन अक्तवाक्यार्थगोचरयथार्थप्रतीतीच्छायाः सत्त्वादिति भावः। 'शुकादिवाक्यञ्चेति, यद्यपि तत्रयं ईश्वराभ्युपगमात् शुकादिवाक्ये न यथोक्ततात्पर्यसम्भवः[2] तथापि शुकादिवाक्यपदं शिक्षकोक्तवाक्यसमानाकारशुकादिवाक्यपरं, तत्र तत्समये तर्गाना नित्यंकतथा शिक्षकपुरुषमादाय यथोक्ततात्पर्यसम्भवात् । ईश्वरासम्मतापूर्वार्थकशुकादिमात्रोक्तवाक्यन्तु न प्रमाणं व्यवहारस्तु संसर्गाग्रहादिति भावः। 'अन्यघटाभिप्रायेण' नीलघटाभिप्रायेण, 'घटान्तरं' पीतघटं, 'अन्यपरत्वात्' अन्यमात्रतात्पर्यकत्वात् नीलघटतात्पर्यकत्वादिति यावत्,[3] 'न प्रमाणं' न पीतघटे प्रमाणं, न पीतघटविषयकप्रमितिजनक-

(१) अन्यगृहवर्त्तिघटाभिप्रायेणेति ख० ।

(२) न यथोक्तवाक्यार्थस्य सम्भव इति क० ।

(३) पीतघटातात्पर्यकत्वादिति यावदिति ख०, ग० ।

न प्रमाणं यत्परः शब्दः स शब्दार्थ इति न्यायात्। तच्च तात्पर्य्यं ज्ञातमुपयुज्यते ज्ञायमानकरणे ज्ञानोप-

---

मिति यावत्, 'व्यवहारस्त्विति पीतघटविषयकव्यवहारस्त्वित्यर्थः। यद्यपि यथा शुकादिवाक्येऽपि शिक्षकवाक्यमादाय यथार्थतात्पर्य-सम्भवः वर्णानां नित्यैकरूपत्वाभ्युपगमात् तथा नीलघटमात्राभि-प्रायप्रयुक्ते गेहे घटोऽस्तीतिवाक्येऽपि पीतघटाभिप्रायकपुरुषान्तरो-प्रयुक्तगेहेघटोऽस्तीतिवाक्यमादाय पीतघटतात्पर्यकत्वसम्भवात् कुतो न पीतघटे प्रमाणं, तथापि घटान्तरपदं न पीतघटपरं अपि तु यद्यद्घटप्रतीतीच्छया गेहे घटोऽस्तीतिवाक्यं कदापि केनापि नोच्चरितं तादृशघटत्वावच्छिन्नविशेष्यपरमित्यदोष इति ध्येयं। 'यत्रैः प्रवे-श्येति चेति, अतएवेत्यनुषज्यते, 'मुख्यार्थबाधे' कर्मत्वविशेष्यकयोग्य-प्रकारकबोधे, 'न प्रमाण' न प्रमितिजनकं, 'यत्परः' यदर्थतात्प-र्यकः,(१) 'स शब्दार्थः' शब्दजन्यप्रमितिविषयः, तात्पर्यभ्रमेण च न शाब्दप्रमेति भावः। पूर्वं सामान्यतः शाब्दप्रमाप्रयोजकत्वेन पक्ष-यित्वा ज्ञातोपयोगित्वं साधितमिदानीं विशिष्य तात्पर्यत्वेन पक्ष-यित्वा ज्ञातोपयोगित्वं साधयति, 'तच्चेति, अतो न पौनरुक्त्यं, 'ज्ञातमुपयुज्यत इति ज्ञाननिष्ठस्वविषयकशाब्दबोधकारणतायाः विषयतासम्बन्धेनावच्छेदकमित्यर्थः, यथाश्रुते उक्तक्रमेणासङ्गतेः 'ज्ञा-यमानकरणे इति, आधेयत्वं सप्तम्यर्थः, अन्वयश्चास्य 'वैलक्षण्ये, 'ज्ञा-नोपयोगीत्यत्र ज्ञानपदं शाब्दबोधपरं, तथाच ज्ञायमानकरणवृत्तित्वे

---

(१) यत्र यदर्थतात्पर्य्यक इति क०।

योगिव्यभिचारिवैलक्षण्याद्व्याप्तिवच्छक्तिवच्च,(१) अन्यथा अन्यपरादन्यान्वयबोधो न स्यात् इति शब्दाभासोच्छेद-

सति शाब्दबोधोपयोगिव्यभिचारिवैलक्षण्यादित्यर्थः, यज्ज्ञायमानकरणवृत्तित्वे सति यज्ज्ञानोपयोगिव्यभिचारिवैलक्षण्यं भवति तज्ज्ञानवृत्तित्वाविषयकतज्ज्ञानकारणताया विषयतया अवच्छेदकं भवतीति सामान्यतो व्याप्तिः,(२) तेन न 'व्याप्तिवदिति दृष्टान्तासङ्गतिः,(३) अवयवव्याख्यान्तु पूर्ववद्बोध्या(४) । तत्रानुकूलतर्कमाह, 'अन्यथेति यदि स्वरूपसदेव यथार्थतात्पर्यं हेतुः न तु तन्निश्चय इत्यर्थः, 'अन्यपरात्' अन्यपरत्वमात्रेणानिश्चितात् एकपरत्वेन सन्दिग्धात् अन्यपरत्वेन निश्चितादिति यावत्, उभयतात्पर्यकशब्दादिति शेषः, 'अन्यान्वयबोधो न स्यात्' अन्यमात्रस्यैवान्वयबोधो न स्यात्, यत्र तात्पर्यसन्देहः तत्राप्यन्वयबोधः स्यादिति यावत्, स्वरूपसतोऽयथार्थतात्पर्यस्याविशिष्टत्वादिति भावः । 'शब्दाभासोच्छेदप्रसङ्गः' तात्पर्यसन्देहदशायां शाब्दबोधाजनकशब्दोच्छेदप्रसङ्गः । ननु यथार्थतात्पर्यनिश्चयस्य शाब्दधीहेतुत्वे तात्पर्यभ्रमात् शाब्दबोधो न स्यात् भ्रमस्य तन्मते(५) विशिष्टज्ञानत्वाभावेन निश्चयत्वाभावादित्यत आह, 'तद्-

(१) शब्दशक्तिवदिति ख० ।

(२) सामान्यमुखी व्याप्तिरिति ख०, ग० ।

(३) तेन व्याप्तिवदिति दृष्टान्तासङ्गतिरिति ख०, ग० ।

(४) पूर्ववदवसेयेति ख०, ग० ।

(५) भवन्मत इति ख०, ग० ।

प्रसङ्गः, तद्भ्रमाच्च शाब्दभ्रमः। अतएव यष्टीः प्रवेशयेत्यत्र लक्षणा नानार्थे विनिगमना च तयोस्तात्पर्य्यग्रहमूलकत्वात्। यदि च यत्र वास्तवं तात्पर्य्यं तं शब्दो बोधयति तदा लक्षणायां मुख्यार्थान्वयानुपपत्त्यु-

भ्रमाच्चेति तात्पर्यभ्रमाच्चेत्यर्थः, तात्पर्यभ्रमस्य उपस्थिततात्पर्यासंसर्गाग्रहः,[1] 'शाब्दभ्रमः' शब्दोपस्थितपदार्थानां असंसर्गाग्रहो न तु शाब्दानुभवइत्यर्थः, तथाच इष्टापत्तिरिति भावः। 'अतएवेति तात्पर्यनिश्चयस्य हेतुत्वादेवेत्यर्थः, 'यष्टीः प्रवेशयेत्यत्रेति शक्य-लक्ष्योभयतात्पर्यके यष्टीः प्रवेशयेत्यत्रेत्यर्थः, 'लक्षणा' कदाचिल्लक्ष्यार्थस्यैवान्वयबोधः, अन्यथा स्वरूपसतोऽप्यर्थतात्पर्यस्याविशिष्टत्वात् तत्र सर्वदैवोभयोरन्वयबोधः[2] स्यादिति भावः। पूर्वं स्वरूपसतोऽयथार्थतात्पर्यस्य हेतुत्वे उपोद्बलकमुक्तं इदानीं तज्ज्ञानस्येति न पौनरुक्त्यं, 'नानार्थे' नानार्थतात्पर्यके, 'विनिगमना' कदाचित्किञ्चिदर्थमादायैवान्वयबोधः, 'तयोः' लक्षणा-नानार्थविनिगमनयोः, 'तात्पर्यग्रहेति तदर्थमात्रे तात्पर्यग्रहेत्यर्थः। तात्पर्यज्ञानस्य हेतुत्वे साधकान्तरमाह, 'यदि चेति, 'वास्तवमिति न तु तात्पर्यनिश्चयोऽपेक्षित इत्यर्थः,[3] 'लक्षणायां' लाक्षणिकार्थान्वयबोधे, 'मुख्यार्थान्वयानुपपत्तौति मुख्यार्थान्वयानुपपत्तिज्ञानस्येत्यर्थः, मुख्यार्थान्वयानुपपत्तिज्ञानेन मुख्यार्थे

(१) शाब्द उपस्थिततात्पर्य्यासंसर्गाग्रह इति ख०, ग०।

(२) सर्व्वदैवान्वयबोध इति क०।

(३) न तु तात्पर्य्यनिश्चय इत्यर्थ इति क०।

प्रयोगो न स्यात्। अतएव पचतीत्युक्तेऽन्योक्तेन स्वयं भूतेन वा कलायपदेनोपस्थिते कलायं पचतीत्यन्वयबोधो न भवति तात्पर्य्यानिश्चयात्। न च तात्पर्य्यग्राहकस्य प्रकरणादेः प्राथम्यादावश्यकत्वाच्च शब्दसहकारिता न तु तात्पर्य्यग्रहस्येति वाच्यं। तेषामननु-

तात्पर्याभावपक्षे अतात्पर्यकत्वानुमानेनैकविशेषबाधकसहकृतेन लक्ष्यार्थे तात्पर्यग्रह इति क्रमेण[१] लक्ष्यार्थतात्पर्य्यग्रहद्वारा तस्य तत्रोपयोगित्वादिति भावः। 'अतएव' तात्पर्यनिश्चयस्य हेतुत्वादेव, 'उपस्थिते' इति कलाये उपस्थिते, पचतीत्यर्थः, 'तात्पर्यानिश्चयादिति, यदा तु तात्पर्यनिश्चयोऽस्ति तदा तु भवत्येवेति भावः। न चैवमावश्यकत्वात् यथार्थतात्पर्यनिश्चयस्यैव हेतुतास्तु किं स्वरूपसतोयथार्थतात्पर्यस्य हेतुत्वेन तन्मतेऽन्यथाख्यात्यभावेन तात्पर्यशून्ये तात्पर्यनिश्चयासम्भवादेवातिप्रसङ्गविरहादिति वाच्यं। विशिष्टस्य यथार्थतात्पर्यविषयकनिश्चयस्य हेतुताग्राहकप्रमाणाभावमति बाधके विशेषणीभूतस्य यथार्थतात्पर्यस्यापि हेतुतागत्यात् उभयोरेव हेतुता अनुमितौ परामृश्यमाणलिङ्गवदिति तेषामाशयात्। 'प्रकरणादेरिति, ज्ञानस्येति शेषः, आदिपदाल्लक्षणाविशेषादिपरिग्रहः, प्रकरणं भोजन-गमनादि, 'प्राथम्यात्' तात्पर्यग्रहापेक्षया प्राथमिकत्वात्, 'आवश्यकत्वात्' शाब्दबोधं प्रति अवश्यक्लृप्तनियतपूर्ववर्त्तिताकत्वात्, प्रकरणादिज्ञानं विना तात्पर्यग्रहासम्भवादिति भावः। 'अननुगतत्वे-

(१) लक्ष्यार्थ इत्यादिः क्रमेणेत्यन्तः पाठः ख०पुस्तके नास्ति।

गतत्वेन परस्परव्यभिचारादहेतुत्वात् तात्पर्य्यग्राहकता त्वननुगतानामपि व्याप्यत्वात् धूमादीनामिव। तच्च तात्पर्य्यं वेदे न्यायगम्यं, यच्च न्यायात् तात्पर्य्यमवधार्य्यते स एव वेदार्थः, लोके च न केवलं न्यायानु-

नेति, तज्ज्ञानस्येति शेषः। नन्वेवन्तात्पर्य्यग्राहकत्वेन प्रकरणादीनां कथं स्यात् अननुगतत्वादित्यत आह, 'तात्पर्य्येति, 'व्याप्यत्वादिति, व्याप्यत्वाननुगमेऽपि न दोषः तत्तल्लिङ्गकानुमितिं प्रति तत्तल्लिङ्गकपरामर्शानाङ्कारणतायाः सर्वसम्मतत्वात्, तदेवाह, 'धूमादीति धूमालोकानामननुगतानां व्याप्यतया यथा वह्निग्राहकत्वमित्यर्थः। एतावता प्रबन्धेन लौकिकोऽनुवादको वैदिकः प्रमाणमिति व्यवस्थापयितुमाह,(१) 'तच्च तात्पर्य्यमिति, 'वेदे' वेदजन्यशाब्दबोधे, 'न्यायगम्यमिति, न्यायगम्यं सत्कारणमित्यर्थः, न्यायगम्यत्वं साक्षात्परम्परया न्यायप्रयोज्यज्ञानविषयत्वं तेन वेदे आप्तवाक्यादिना तात्पर्य्यग्रहेऽपि न क्षतिः। न्यायः अनादिमीमांसकपरम्परासिद्धा युक्तिः, सा च लाघव-गौरव तर्क लब्धार्थपरपदसमभिव्याहार इत्येवमादिरूपेति भावः। अत्र हेतुमाह 'यत्रेति, साक्षात्परम्परया वेति शेषः, 'स एव', 'वेदार्थः' वेदजन्यशाब्दबोधविषयः, यत इति शेषः, तथाच वेदजन्यशाब्दबोधम्प्रति न्यायप्रयोज्यतात्पर्य्यग्रहो हेतुः यत्र न्यायाभावस्तत्र पदार्थोपस्थितेतरसंसर्गाग्रहमात्रमिति भावः। अत्र 'वेदपदं वेदसमानार्थकस्मृत्यादेरप्युपलक्षकमिति ध्येयं। 'लोके चेति,

(१) व्याप्यत्वेत्यादिः आहेत्यन्तः पाठः ख०ग० चिह्नितपुस्तकद्वये नास्ति।

सारि तात्पर्य्यं इति न न्यायगम्यं किन्तु पुमभिप्राय-नियन्त्रितं, न्यायाविषयेऽपि पुरुषेच्छाविषये प्रतीति-जनकत्वात् पुंवचसां। वक्ता च परकीयवाक्यार्थज्ञानो-त्पादनेच्छया वाक्यमुच्चारयति[1] सा चेच्छा यदि वक्तु-

लौकिकवाक्यस्थले चेत्यर्थः, 'न्यायानुसारि' न्यायविषयप्रतिपादकं, 'न न्यायगम्यमिति न साक्षात्परम्परया न्यायप्रयोज्यज्ञानगोचरं सदेव शाब्दधीप्रयोजकमित्यर्थः, 'पुमभिप्रायनियन्त्रितमिति न्याय-तद्-तिरिक्तगम्यसाधारणवक्तृतात्पर्यमात्राधीनमित्यर्थः, तच्च शाब्दज्ञान-मिति शेषः। अत्र हेतुमाह, 'न्यायाविषयेऽपीति, अपिशब्दात् न्यायविषयसमुच्चयः, निर्द्धारणे सप्तमी, 'पुरुषेच्छाविषय इति वक्त्रि-च्छाविषयस्यैव प्रतीतिजनकत्वादित्यर्थः, 'पुंवचसां' लौकिकवचसां। ननु वक्तुस्तत्पदार्थविशिष्टज्ञानं कुतोऽनुमेयं तात्पर्य्यानुरोधेन वक्तु-स्तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकज्ञानसत्त्वेऽपि तत्पदार्थविशिष्ट-ज्ञानाभावेन बाधितत्वादित्यतो यथार्थतात्पर्य्यानुरोधेनैव वक्तुस्तत्प-दार्थविशिष्टज्ञानस्याबाधितत्वमुपपादयति, 'वक्तेत्यादिना 'निर्वहती-त्यन्तेन, 'वाक्यार्थज्ञानेति तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकयथार्थ-प्रतीतीच्छयेत्यर्थः, परकीयत्वादृशज्ञानरूपं यदिष्टं तत्साधनताज्ञाना-धीनत्वात् वाक्यानुकूलकण्ठाद्यभिघातजनककृतेरिति भावः। 'सा च'

(१) वाक्यं रचयतीति ख०।

यथार्थवाक्यार्थज्ञानपूर्व्विका भवति तदैव परं तदुच्चा-रणस्य पुमभिप्रेतयथार्थवाक्यार्थज्ञानपरत्वं यथार्थ-ज्ञानेच्छाव्याप्यं निर्व्वहतीति वक्तुर्यथार्थवाक्यार्थज्ञान-

---

परकीयतादृशज्ञानगोचरा च, 'यथार्थवाक्यार्थज्ञानपूर्व्विकेति पूर्व्व-कालवर्त्ति-तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकज्ञानजन्या भवतीत्यर्थः, तस्याः पूर्व्वकाले यदि वक्तुस्तादृशज्ञानमस्तीति समुदायार्थः, 'तदुच्चा-रणस्य' तद्वाक्यस्य, 'पुमभिप्रेतयथार्थवाक्यार्थज्ञानपरत्वं' तत्पदार्थविशे-ष्यक-तत्पदार्थप्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वरूपं यथार्थतात्पर्यं, 'यथार्थज्ञानेच्छाव्याप्यमिति परकीयतत्पदार्थविशेष्यक-तत्पदार्थप्रका-रकयथार्थप्रतीतिविषयकेच्छाव्याप्यमित्यर्थः, व्याप्यता च तद्घटित-त्वात् निर्व्वहतीति वक्तुस्तादृशेच्छापूर्व्वकाले वक्तुः तादृशज्ञानविरहे व्यापकीभूतायास्तादृशेच्छाया एवासम्भवेन व्याप्यीभूतस्य यथार्थ-तात्पर्यस्य सुतरामसम्भवात् व्यापकाभावे व्याप्याभावस्यावश्यकत्वात्। न च व्यापकीभूता वक्तुः परकीयतादृशप्रतीतीच्छैव सा कथं तादृशज्ञानं विनानुपपन्नेति वाच्यम्। वक्तुः परकीयतादृशप्रती-तीच्छा हि घटमिति वाक्यं घटवत्कर्म्मत्वविशेष्यकत्वावच्छिन्नघट-प्रकारताशालिज्ञानजनकत्वित्याकारा यथार्थत्वस्य तद्घटितत्वात् तादृगिच्छायां तादृशज्ञानं कारणं तत्र च विशेषणीभूतघटवत्कर्म्मत्वा-दिकं विषय इति कर्म्मत्वादिविशेष्यक-घटादिप्रकारकज्ञानं विना सानुपपन्नेत्यभिप्रायः। 'इतीति, अबाधितामिति शेषः, अबाधितां वक्तृयथार्थवाक्यार्थज्ञानवत्तामित्यन्वयः। ननु यथार्थवाक्यार्थतात्पर्य-

वक्तारमविज्ञाय यथार्थप्रतीतिपरत्वं ज्ञातुं न शक्यत इति प्रथममाप्तवाक्याद्वक्तृज्ञानानुमानपूर्व्वकमर्थतथात्वमनुसन्धाय यथार्थतात्पर्य्यनिश्चयः । अनुमानञ्चेदं वाक्यं

कत्वं तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वं तत्तत्पदार्थवत्तत्पदार्थ-विशेष्यकत्वावच्छिन्नतत्पदार्थ-प्रकारताशालि-प्रतीतीच्छयोच्चरितत्वमिति यावत्, तच्च शाब्दबोधात्पूर्वं निर्हेतुकमशक्यं तत्पूर्वं तत्पदार्थे तत्पदार्थवत्ताज्ञानाभावात् तत्पदार्थवत्तत्पदार्थस्य च विशेषणतावच्छेदकत्वात् विशेषणतावच्छेदकप्रकारकज्ञानस्य च विशिष्टवैशिष्ट्यज्ञाने हेतुत्वात् । न च तत्पदार्थः तत्पदार्थवान् तत्पदार्थविशिष्टज्ञानविषयत्वादित्यनुमानेन वक्तृतत्पदार्थविशिष्टज्ञान-विषयत्वं हेतूकृत्य तत्पदार्थवत्त्वमनुमेयं ततो यथार्थवाक्यार्थतात्पर्य-निर्णय इति वाच्यं । वक्तुः तत्पदार्थविशिष्टज्ञानस्यैव आगमज्ञानात् प्रामाण्यतो व्याप्तिस्थले पक्षधर्मताबललभ्यसाध्यप्रसिद्धेरनभ्युपगमेऽपि विशेषतो हेतुज्ञानस्यावश्यकत्वात् इत्यत आह, 'वक्तुरिति, 'यथार्थ-ज्ञानवत्तामिति तत्पदार्थविशिष्टज्ञानमित्यर्थः, 'यथार्थप्रतीतिपरत्वं' यथार्थप्रतीतिपरताघटकं तत्पदार्थवत्तत्पदार्थवत्त्वं, 'ज्ञातुं न शक्यते' तद्घटितहेतुना ज्ञातुं न शक्यते, 'प्रथमं' शाब्दबोधात्पूर्वं, 'अन्वय-यांश' यथार्थतात्पर्यनिर्णय इत्यनेन, 'आप्तवाक्यादिति आप्तवाक्यत्वा-दिनेत्यर्थः, आदिपदात् वक्ष्यमाणद्वितीयहेतुपरिग्रहः, 'वक्तृज्ञानेति वक्तृतत्पदार्थविशिष्टज्ञानेत्यर्थः, 'अर्थतथात्वं' तत्पदार्थे तत्पदार्थवत्त्वं, 'अनुसन्धाय' अनुमाय । वक्तृतत्पदार्थविशिष्टज्ञानानुमानप्रकार-

भ्रमादि-विशिष्टज्ञानयोरन्यतरजन्यं वाक्यत्वादिति ।

मात्र, 'अनुमानञ्चेति वक्तुस्तत्पदार्थविशिष्टज्ञानानुमानञ्चेत्यर्थः, 'इदं वाक्यमिति घटमित्यर्थः, 'भ्रमादीति घटादिभ्रमादि-विशिष्ट-ज्ञानयोरन्यतरजन्यमित्यर्थः, 'वाक्यत्वात्' आप्तवाक्यत्वात् घटादि-ज्ञानजन्यवाक्यत्वादिति यावत्, घटमित्यादिवाक्ये शुकोक्तघट-मित्यादिवाक्ये च व्यभिचावारणाय जन्यान्तं, यद्यज्ज्ञानजन्यं वाक्यं भवति तत्तद्भ्रमादि-तद्विशिष्टज्ञानयोरन्यतरजन्यं भवतीति यत्ताभ्यां सामान्यतोव्याप्तिः । अतएव घटादिविशिष्टज्ञानस्याप्रसिद्धा साध्य-प्रसिद्धिविरहात्कथमनुमितिः तस्य प्रसिद्धिसत्त्वे च व्यर्थमिदमनुमानं कर्मत्वे घटत्वसाधनविशिष्टज्ञानविषयत्वरूपतत्स्यमाणस्यानुमित्युपमे-यास्यापेक्षणीयत्वादिति निरस्तं । यत्तद्भ्यां सामान्यतोव्याप्तिलाभे पक्ष-धर्मताबलसम्भवसाध्यतावच्छेदकविशिष्टसाध्यप्रसिद्धिरभङ्गमिति प्राचां सिद्धान्तात् विशिष्टपक्षीयहेतुप्रसिद्धियापेक्षिता तेन तत्र यत्ताभ्यां सामान्यतोव्याप्त्यभ्युपगमेऽपि नैतदनुमानवैयर्थ्यमिति भावः । इदञ्च 'मन्वित्यादिना आशङ्क्य ग्रन्थकार एव स्वयमनुपदं वक्ष्यति । अत्र रूपमानयेत्यादौ रूपपदोत्तराम्पदे सामान्यव्याप्तौ व्यभिचारवारणाय साध्ये भ्रमादिपदोपादानं, भ्रमश्च तदभाववत्साकाङ्क्षं तज्ज्ञानं आकाङ्क्षा च तत्रये पदार्थान्तरं मानस्तत्त्वयं भ्रमाप्रसिद्धिः । आदिपदात् भ्रम-विशिष्टज्ञानभिन्नतज्ज्ञानपरिग्रहः, तेन केवल-घटादिज्ञानजन्ये घटादिपदे न व्यभिचारः । विशिष्टज्ञानञ्च तत्रये तद्वत्साकाङ्क्षं तज्ज्ञानं तैर्विशिष्टबुद्धौ वैशिष्ट्यभानानभ्युपगमात् । न

ततो भ्रमादिनिरासे सति परिशेषाद्वाक्यार्थज्ञानानुमानं, अयं वक्ता स्वप्रयुक्तवाक्यार्थयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्यप्रयोक्तृत्वात् अहमिव, न त्वाप्तत्वात् सा-

---

चैवं सामान्यतो घटज्ञानजन्यमित्येव साध्यमस्तु किमन्यतरत्वेन साध्यतयेति वाच्यं। घटविशिष्टज्ञानत्वेन घटविशिष्टज्ञानसिद्धेरपेक्षितत्वात् तद्रूपेण वक्ष्यमाणानुमाने हेतुत्वात् सामान्यतो घटज्ञानजन्यत्वस्य साध्यत्वे सिद्धसाधनप्रसङ्गाच्च हेतुसिद्ध्यर्थं तद्विषयस्यावश्यकत्वात्। न चैवं घटज्ञानजन्यत्वादित्येव हेतुरस्तु किं वाक्यत्वोपादानेनेति वाच्यं। धूमप्रागभाववद्भिन्नधर्मिकत्वेनावैयर्थ्यादिति[१] भावः। नन्वेतदनुमानात् घटादिविशिष्टज्ञानस्य सिद्धत्वेऽपि घटादिविशिष्टज्ञानविषयत्वं कर्मत्वादौ न सिद्धं तस्यैव वक्ष्यमाणानुमाने हेतुत्वादित्यरुचेराह, 'तत इति, चकारः पूरणीयः, तदनन्तरं चेत्यर्थः, 'भ्रमादिनिरासे सति' वक्तुः भ्रमाद्यभावनिश्चये सति, आद्यादिपदात् भ्रमविशिष्टज्ञानेतरतज्ज्ञानपरिग्रहः, 'वाक्यार्थज्ञानानुमानमिति कर्मत्वादिविषयकघटादिविशिष्टज्ञानानुमानमित्यर्थः,[२] परिशेषात् तदनुमानप्रकारमेव दर्शयति, 'अयमिति, 'स्वप्रयुक्तेति कर्मत्वविषयकघटविशिष्टज्ञानवानित्यर्थः, कर्मत्वविषयकघटविशिष्टज्ञानञ्च कर्मत्वसाकाङ्क्षकर्मत्वविषयकघटज्ञानं, 'भ्रमाद्यजन्येति घटभ्रमाद्य-

---

(१) तथाच यथा धूमप्रागभावत्वस्य सामानाधिकरण्याधूमत्वघटितत्वेऽपि न व्यर्थविशेषणघटितत्वं तथा अत्रापि न व्यर्थविशेषणघटितत्वमिति भावः। (२) कर्मत्वादिविशिष्टज्ञानानुमानमित्यर्थ इति ख०।

ध्यादिविशेषात्[१]। तत एते पदार्था यथोचितसंसर्गवन्तः

न्यकर्मत्वाविषयकघटविशिष्टज्ञानाजन्यघटभ्रमादिविशिष्टज्ञानान्यतरजन्यवाक्यप्रयोक्तृत्वादित्यर्थः, घटभ्रमादिजन्यवाक्यप्रयोक्तरि व्यभिचारवारणाय प्रथममजन्यान्तं, भ्रमस्य निरुक्त एव, आदिपदार्थोऽपि पूर्ववत्, घटेनेतिवाक्यप्रयोक्तरि व्यभिचारवारणाय द्वितीयमजन्यान्तं, पटमित्यादिवाक्यप्रयोक्तरि शुकादौ च व्यभिचारवारणाय जन्यान्तं, अतएव च पूर्वानुमानस्यानुपयोगः[२] यो यद्भ्रमाद्यजन्य-यद्विषयकयद्विशिष्टज्ञानाजन्ययद्भ्रमादि-यद्विशिष्टज्ञानान्यतरजन्यवाक्यप्रयोक्ता स तद्विषयकतद्विशिष्टज्ञानवानिति[३] व्याप्तौ सामान्यतोव्याप्तित्वेन साध्याप्रसिद्धावपि न क्षतिरिति भावः। 'आप्ताभिप्रायादिति, आप्तत्वस्य प्रकृतवाक्यार्थयथार्थज्ञानवत्त्वरूपत्वात् तस्य च कर्मत्वविषयकघटविशिष्टज्ञानवत्त्वरूपत्वादिति भावः। अनेन कर्मत्वे घटविशिष्टज्ञानविषयत्वरूपहेतुसिद्धौ तेन हेतुना कर्मत्वे घटवत्त्वानुमानमाह, 'तत इति, कर्मत्वादिकं आधाराधेयभावसम्बन्धेन घटादिमत् तेन सम्बन्धेन घटादिविशिष्टज्ञानविषयत्वादित्यर्थः, तेन सम्बन्धेन घटादिविशिष्टज्ञानस्य तेन सम्बन्धेन [illegible] घटादिज्ञानं, भ्रमस्थले च ज्ञानद्वयत्वात् न तद्विषयत्वमिति भावः। ननु

(१) साध्याभेददोषप्रसङ्गादिति ख०।

(२) अनुपयोगादिति ख०, ग०।

(३) यो भ्रमाद्यजन्ययद्विषयकयद्विशिष्टज्ञानान्यतरजन्यवाक्यप्रयोक्ता स तद्विषयकविशिष्टज्ञानवानितीति ख०।

यथार्थज्ञानविषयत्वात् आप्तोक्तपदस्मारितत्वाद्वा मद्-
वाक्यपदार्थवदिति । ननु वक्तृज्ञानविशेषोऽनुमेयः ज्ञाने
चार्थ एव विशेषः न त्वर्थाधीनोऽन्यः अर्थेनैव विशेषः
इत्यौपचारिकी तृतीया तथा च वाक्यार्थज्ञानविशेषो-

पूर्वानुमानात् कर्मत्वादिविषयकघटादिविशिष्टज्ञानसिद्धावपि कर्म-
त्वादौ घटादिविशिष्टज्ञानविषयत्वं न सिद्धमनुमितौ समानसंवित्-
संवेद्यत्वाभावादित्यस्वरसादाह, 'आप्तोक्तेति स्वविषयकघटादिविशि-
ष्टज्ञानवदुक्तपदस्मारितत्वादित्यर्थः, स्वविषयकघटादिविशिष्टज्ञानस्य
स्वमाकाङ्क्षं स्वविषयकघटादिविशिष्टज्ञानं, 'मद्वाक्येति घटादिकारण-
त्ववदित्यर्थः । ननु घटादिविशिष्टज्ञानस्यैव प्रत्यक्षप्रसिद्ध्या साध्य-
प्रसिद्धिरिति कथं व्याप्तिग्रहः तत्प्रसिद्ध्यभ्युपगमे च व्यर्थं तदनुमान-
मित्यत आह, 'नन्विति, 'ज्ञानविशेषोऽनुमेय इति इदं वाक्यं भ्रमादि-
विशिष्टज्ञानयोरन्यतरजन्यमित्यनेन वक्तृविशिष्टज्ञानविशेषोऽनुमेय
इत्यर्थः, 'अर्थ एव' विषय एव, 'अर्थाधीनः' अर्थजन्यः, 'अन्यः'
आकाराख्यो वैयाकरणाभ्युपगतपदार्थविशेषः । ननु यद्यर्थ एव विशेषः
तदा "अर्थेनैव विशेषो हि निराकारतया धियाम्" इत्यत्र[1] कथं
तृतीया अन्यत्वस्य तृतीयार्थत्वात् तस्य चाभेदेऽसम्भवादित्यत आह,
'अर्थेनैवेति, 'औपचारिकीति धान्येन धनवानित्यादाविवाभेदोप-
चारिकीत्यर्थः, चैत्रेण पच्यते इत्यादौ लाघवात् कर्तावेव तृतीयायाः

---

(१) इत्युदयनाचार्यकारिकायामित्यर्थः ।

शक्तिकल्पनात् अन्यत्वार्थकत्वेऽपि लाक्षणिकत्वस्याविशेषादिति भावः। यद्यपि विशेषपदस्य भावव्युत्पन्नतया इतरभेदज्ञानार्थकत्वात् अन्यत्वमेव तृतीयार्थः सम्भवतीति तथापि करणसाधनं विशेषपदमभिप्रेत्य अभेदे तृतीयाया औपचारिकत्वाभिधानं(१)।

अत्र प्राञ्चः तृतीयाया अपि अभेदे शक्तिरेव न तु लक्षणा एवं अन्यत्वादावपि। व्यत्ययानुशासितातिरिक्तार्थे सुब्विभक्तौ न लक्षणेति नियमेन प्रामाणिकगौरवस्याकिञ्चित्करत्वात्। न चैवं चतुर्विंशतिगुणा इत्यादौ बहुवचनादेरपेक्षाबुद्धिविशेषविषयत्वरूपबहुत्वलक्षणाव्याकोपः रथेन गम्यते घटं जानातीत्यादौ व्यापारविषयतायास्तृतीया-द्वितीययोर्लक्षणाव्याकोपश्चेति वाच्यम्। तत्रापि नानार्थतया तेषां शक्तिस्वीकारात्, एवं लघौ गुरौ वा यत्र तादृशार्थे सुब्विभक्तेः प्रसिद्धप्रयोगो वर्त्तते तत्र सर्वत्रैव तस्याः शक्तिः। न चैतादृशनियम एवासिद्ध इत्यस्तु किं गुरोः प्रकृततावच्छेदकत्वस्वीकारेणेति वाच्यम्। तथा सति गत्यर्थधातुयोगे कर्मणि चतुर्थी विधायकाद्यनुशासनरूपस्य षष्ठ्यर्थे सप्तमीविधायकाद्यनुशासनरूपस्य सप्तम्यर्थे षष्ठीविधायकाद्यनुशासनरूपस्य च व्यत्ययानुशासनस्य वैयर्थ्यापत्तेः अनुशासनं विनापि गङ्गायां घोष इत्यादाविव लक्षणया चतुर्थ्यादिना कर्मत्वादिप्रत्ययोपपत्त्या व्यत्ययानुशासितातिरिक्तार्थे सुब्विभक्तेर्न लक्षणेति नियमप्रतिपादनस्यैव व्यत्ययानुशासनफलत्वात्। न च कर्मत्वादावपि चतुर्थ्यादेः शक्तिप्रतिपादनमेव व्यत्ययानुशासनफलमन्यथा शेषाः कर्मकरणेत्यादिना कर्मत्वादौ द्विती-

(१) अभेदौपचारिकत्वाभिधानमिति ख०, ग०।

धात्वनुशासनस्य तिङादौ द्वितीयादिपदानुशासनस्यापि च वैयर्थ्यापत्तेः(१) तत्रापि च लक्षणयैव कर्मत्वादेः तिङादेश्च प्रत्ययोपपत्तेरिति वाच्यम्। अभेदादेर्गुरुत्वेऽपि व्युत्पत्त्यनुशासनवैयर्थ्यभिया अनायत्या तत्र तृतीयादेः शक्तिस्वीकारः व्युत्पत्त्यनुशासितार्थे कर्मत्वादौ च चतुर्थ्यादेर्न शक्तिः प्रकृतार्थापेक्षया गुरुत्वात् स्वारसिकप्रयोगाभावाच्च किन्तु लक्षणैवेत्यभ्युपगमात् तथाच तादृशनियमानभ्युपगमे किमनुशासनेनेत्याहुः। तदसत्। व्युत्पत्त्यनुशासनवैयर्थ्यभिया अभेदादिषु तृतीयादेः शक्तिकल्पनामपेक्ष्यैतद्भिया व्युत्पत्त्यनुशासितार्थे कर्मत्वादौ चतुर्थ्यादेः शक्तिकल्पनाया एव न्याय्यत्वात् बहुषु गुरुधर्माणां शक्यतावच्छेदकत्वकल्पनामपेक्ष्य कियत्सु गुरुधर्मेषु शक्यतावच्छेदकत्वकल्पनाया न्याय्यत्वात् तथाच शक्तिप्रतिपादनमेव व्युत्पत्त्यनुशासनफलं।

यद्वा व्युत्पत्त्यनुशासनबलात् व्युत्पत्त्यनुशासितातिरिक्तविभक्त्यर्थे सुप्विभक्तेर्न लक्षणेत्येव कल्प्यते तथाचाभेदादौ तृतीयादेर्लक्षणायां बाधकाभावः। अन्यथा गुरुधर्मस्य शक्यतावच्छेदकत्वप्रसङ्गात्। एवञ्च व्युत्पत्त्यनुशासितार्थे कर्मत्वादावपि चतुर्थ्यादेर्लक्षणैव। वस्तुतस्तु व्युत्पत्त्यनुशासितातिरिक्ते विभक्त्यर्थे सुप्विभक्तेर्लक्षणास्ति किन्तु यद्विभक्त्यर्थे यद्विभक्तेर्व्युत्पत्त्यनुशासनं तद्विभक्त्यर्थे तद्विभक्त्यतिरिक्तसुप्विभक्तेर्लक्षणा नास्तीत्येव व्युत्पत्त्यनुशासनबलात् कल्प्यते। अत एव गमनार्थकधातुयोगे चतुर्थ्येव लक्षणया साध्वी नान्येत्येव सारं।

(१) वैयर्थ्यापत्तेरिति क०।

ऽनुमेयः तस्य चाप्रसिद्धा न व्याप्तिग्रहः। अतएवास्मिन् वाक्यार्थे अयमभ्रान्त आप्तो वेति ज्ञातुमशक्यमिति शब्द एव तमर्थं बोधयेदिति चेत्, न, तात्पर्य्यावधार-

---

केचित्तु गुणिनि शुक्लादिपदानुशासनजन्यनिरूढलक्षणाप्रतिपादकमेव व्याख्यानुशासनफलं प्रादुर्भूतलक्षणया प्रयोगे वादिनो न नियमः सैव निरूढलक्षणा ऐच्छिकलक्षणया प्रयोगे वादिनोऽशक्त्यप्रतिपत्तेः[1] इत्याहुः।

'तथा चेति, 'वाक्यार्थज्ञानविशेषः' घटादिविशिष्टज्ञानं, 'तस्य चाप्रसिद्धेति, साध्यप्रसिद्धिविरहादिति शेषः, तत्सिद्ध्यभ्युपगमे च व्यर्थं तदनुमानमिति भावः। 'अतएव' साध्यप्रसिद्धिविरहादेव, 'अस्मिन् वाक्यार्थे इति, 'अयं' घटादिभ्रमाभाववानित्यर्थः, 'आप्तः' कर्मत्वादिविषयकघटादिविशिष्टज्ञानवान्, 'ज्ञातुमशक्यमिति अनुमातुमशक्यमित्यर्थः। घटादिभ्रमस्य कर्मत्वविषयकघटविशिष्टज्ञानस्य सिद्धतया साध्यप्रसिद्धिविरहात् तत्प्रसिद्ध्यभ्युपगमे च[2] तदनुमानवैफल्यमिति[3] भावः। वस्तुतो हेत्वसिद्धिमाह, 'अत एवेतीति बोध्यं। यद्यपि हेतावाप्तत्वमपि भ्रमादिशून्यत्वमेव तथापि रूपभेदेन पृथगुक्तम्[4]। 'तमर्थमिति कर्मत्वादौ घटादिमत्त्वमित्यर्थः, 'बोधयेदिति, न तु एते पदार्था यथोचितसंसर्गवन्त-

---

(१) वादिनोऽशक्तेः प्रतिपत्तेरिति ख०, ग०।

(२) सिद्ध्युपगमे चेति ख०, ग०।

(३) तदनुमानवैफल्यादितीति क०, ग०।

(४) वस्तुत इत्यादिः पृथगुक्तमित्यन्तः पाठः ख० गौ० चिह्नितपुस्तकद्वये नास्ति।

स्वार्थं तथाप्यशाब्दा एव संसर्गविशेषप्रतीतेरवश्या-
भ्युपेयत्वात्(१) अन्यथा च तात्पर्य्यनिरूपणं । अतएव

इत्यनुमानमुक्तप्रमाणान्तरा हेतुसिद्ध्यसम्भवादिति भावः । गूढाभि-
सन्धिः समाधत्ते, 'तात्पर्य्येति, 'संसर्गविशेषप्रतीतेरिति आधाराधेय-
भावादिरूपसंसर्गककर्मत्वादिविशेष्यकघटादिप्रकारकप्रतीतेरित्य-
र्थः, अप्रसिद्धाया अपीति शेषः, 'अवश्याभ्युपेयत्वादिति प्रथममिदं
वाक्यं घटादिभ्रमादि-विशिष्टज्ञानयोरन्यतरजन्यं घटज्ञानजन्यवा-
क्यत्वादिति यत्तद्भ्यां सामान्यतोव्याप्त्यानुमानं ततोऽयं वक्ता कर्मत्व-
विशेष्यकघटप्रकारकज्ञानवान् घटभ्रमाद्यजन्यकर्मत्वाविषयकघटवि-
शिष्टज्ञानाजन्य-घटभ्रमादि-विशिष्टज्ञानयोरन्यतरजन्य-वाक्यप्रयोक्तृ-
त्वादिति यत्तद्भ्यां सामान्यतोव्याप्त्याऽनुमानमिति क्रमेणानुमेयतया
अवश्याभ्युपेयत्वादित्यर्थः, 'अन्यथा' तादृशप्रतीतेरनुमानानभ्युपगमे,
च तात्पर्य्यनिरूपणमिति, तात्पर्य्यस्य तादृशप्रतीतिघटितत्वात्-
तज्ज्ञानं विना तज्ज्ञानासम्भवादिति भावः । तथाच अप्रसिद्धा
तादृशप्रतीतेरनुमानानुरोधेन यत्तद्भ्यां सामान्यतो व्याप्तिग्रहे
यत्तद्भ्यां साध्याकार-हेत्वन्तरयोर्व्याप्तिज्ञानात् हेतुतावच्छेदकरूपेण
प्रकृतपक्षीयहेतोः पक्षधर्मताज्ञानादप्रसिद्धमपि प्रकृतपक्षीयसाध्यं
पक्षधर्मताबलात् सिद्ध्यतीत्यभ्युपेयं तच्च ममापि तुल्यमिति गूढाभि-
सन्धिः । 'अतएव' यत्तद्भ्यां सामान्यतोव्याप्त्या अप्रसिद्धस्याप्यनुमेय-

---

(१) अभ्युपेयत्वादिति कस्यचिन्मूलपुस्तकस्य पाठः, परन्तु टीकाकारस्वरसेन
स पाठो न समीचीनः ।

आप्तोक्तत्वप्रमाद्यजन्यत्वनिरूपणमपि सुकरं। शाब्दन्तु संसर्गज्ञानं प्रथमं न भवति ज्ञानान्तरन्तु भवत्येव। न चैवं शब्दो न प्रमाणं तदर्थस्य प्रागेव सिद्धेरिति

त्वादेव, 'आप्तोक्तत्वेति कर्मत्वादिविषयकघटादिविशिष्टज्ञानवदुक्तत्वेत्यर्थः, 'प्रमाद्यजन्यत्वेति घटादिभ्रमाद्यजन्यत्वेत्यर्थः, यत्तद्भ्यां सामान्यतोव्याप्त्या अप्रसिद्धघटादिभ्रमजन्यत्वस्यासिद्धत्वेऽपि[१] तदभाववत्त्वस्य कर्मत्वविषयकघटविशिष्टज्ञानस्यासिद्धत्वेऽपि तत्त्वस्यानुमानसम्भवादिति भावः। ननु तथापि तात्पर्य्यग्रहात् पूर्वमेकपदार्थेऽपरपदार्थसंसर्गप्रतीतिः कथं स्यादित्यत आह, 'शाब्दन्त्विति, 'संसर्गज्ञानं' एकपदार्थेऽपरपदार्थसंसर्गज्ञानं. 'प्रथमं' तात्पर्यग्रहात् पूर्वं, 'ज्ञानान्तरन्त्विति आनुमानिकज्ञानन्त्वित्यर्थः, तात्पर्यनिश्चयस्य शाब्दानुभवं प्रत्येव हेतुत्वादिति भावः। 'न चैवमिति, 'एवं' तात्पर्यनिश्चयात्पूर्वं नियमतस्तत्पदार्थे तत्पदार्थसंसर्गज्ञानाभ्युपगमे, 'न प्रमाणं' न विशिष्टानुभवजनकं, 'तदर्थस्य' तज्जन्यविशिष्टानुभवविषयस्यैकपदार्थेऽपरपदार्थसंसर्गस्य, 'सिद्धेः' अनुमानात्सिद्धेः, तथाच प्रयोजनाभावात् शब्दस्य न विशिष्टानुभवजनकत्वमिति भावः। गूढाभिसन्धिराह, 'तथापीति, तात्पर्यघटकतया तदनुमानादेव तत्तत्पदार्थानामन्वयसंसर्गाणाञ्च सिद्धेरिति भावः। यदि च तत्तत्पदार्थानामन्वयसंसर्गानामनुमानात्सिद्धावपि घटत्वतया कर्मत्वं शाब्दयामि घटत्वतया कर्मत्वं प्रत्यक्षमीत्याद्यनुव्यवसायानुपपत्त्या

[१] घटादिभ्रमस्यासिद्धत्वेऽपीति का०।

साध्यम् । तथापि तुल्यत्वात् । ननु तथापि कथमर्थविशेषसिद्धिः विशेषेण व्याप्यग्रहादिति चेत् । न । यथा यो यत्र प्रवर्त्तते स तज्ज्ञानानीति सामान्यतो-व्याप्तिज्ञाने पाकादौ प्रवृत्तिदर्शनात् पाकविषयक-कार्य्यताज्ञानानुमानं, यथा च चेष्टाविशेषदर्शनात् दशसंख्याभिप्रायमात्रज्ञाने घटे तच्चेष्टादर्शनात्[१] घटे

शब्दस्य विशिष्टानुभवजनकत्वस्वीकार इत्युच्यते, तदा ममापि तुल्यमिति गूढाभिसन्धिः । तत्पदार्थे तत्पदार्थवत्त्वानुमाने शङ्कते, 'नन्विति, 'अर्थविशेषेति प्रकृतसंसर्गेण यत्पदार्थातिरिक्ते यत्पदार्थवत्त्वप्रत्यक्षे नास्ति प्रकृतसंसर्गेण तत्पदार्थे तत्पदार्थवत्त्वसिद्धिरित्यर्थः,[२] 'विशेषेणेति, दृष्टान्ताभावेन विशेषेण व्याप्तिग्रहादित्यर्थः । 'यथेति, पाकविषयकप्रवृत्तिसत्त्वस्यान्यत्राग्रहदशायामिति शेषः,[३] 'पाकादाविति पाकादिविषयकप्रवृत्तिमत्त्वस्य पुरुषे दर्शनादित्यर्थः, 'पाकविषयकेति अथ पाकविषयककार्य्यताज्ञानवान् पाकविषयकप्रवृत्तिमत्त्वादिति क्रमेण पाकविषयककार्यताज्ञानानुमानमित्यर्थः, 'चेष्टाविशेषदर्शनादिति अङ्गुलीनां चेष्टाविशेषदर्शनादित्यर्थः, 'दशसंख्याभिप्रायमात्रेति सामान्यतो दशसङ्ख्याभिप्रायमात्रज्ञानसम्भवेऽपीत्यर्थः, 'मात्रपदात् घटविषयकदशसङ्ख्याभिप्रायज्ञानव्यवच्छेदः, यो घटविषयकचेष्टाविशेषवान् स घटविषयकदशसङ्ख्याभिप्रायवानिति विशेषतो व्याप्तिग्रहाभावादिति भावः । 'घटे तच्चेष्टादर्शनादिति

---

(१) तच्चेष्टाविशेषदर्शनादिति क० । (२) इति भावः इति ख० ।

(३) अग्रहदशायामित्यर्थ इति ख० ।

वत्, तत एते पदार्थाः परस्परसंसर्गवन्तः[1] साकाङ्क्षत्वे सत्येकज्ञानविषयत्वात् सत्यरजतज्ञानविषयवत्,[2] एवं

हेतुसिद्धेरनन्तरमित्यर्थः, 'एते पदार्था' इति कर्मत्वादय इत्यर्थः, 'परस्परसंसर्गवन्तः' आधाराधेयभावसम्बन्धेन घटादिमन्तः, 'साकाङ्क्षत्वे सतीति अनुयोगितया आधाराधेयभावादिसम्बन्धावच्छिन्न-घटाद्याकाङ्क्षानिरूपकत्वे सतीत्यर्थः, 'एकज्ञानेति घटादिविषयकैकज्ञानविषयत्वादित्यर्थः। योऽनुयोगितया यत्सम्बन्धावच्छिन्नयदाकाङ्क्षानिरूपकत्वं सति तद्विषयकज्ञानविषयः स तत्सम्बन्धेन तद्वानिति सामान्यतो व्याप्तिः, शुक्ति-रजतत्वे इत्यादिसमूहालम्बनविषये शुक्त्यादौ व्यभिचारवारणाय सत्यन्तं। यद्यप्येवमपि तत्र व्यभिचारतादवस्थ्यं इदं रजतमित्यादिभ्रमस्थानाभिषिक्तरजतत्वादिप्रत्येकमात्रविषयकज्ञानद्वयनिष्ठशुक्ति-रजतत्वोभयनिरूपिताकाङ्क्षानिरूपकत्वात् शुक्तेः, तथापि स्वनिरूपितघटाद्याकाङ्क्षावद्घटादिविषयकज्ञानं तद्विषयत्वं सम्प्रदायेन विवक्षितं, सामान्यमुखी च व्याप्तिः भ्रमस्थानाभिषिक्तशुक्ति-रजतत्वप्रत्येकमात्रविषयकज्ञानद्वयस्य शुक्ति-रजतत्वोभयनिरूपिताकाङ्क्षावत्त्वेऽपि शुक्ति-रजतत्वोभयविषयकसमूहालम्बनस्य तादृशाकाङ्क्षावत्त्वविरहान्न व्यभिचारः, शुक्ति-रजतत्वोभयविषयकसमूहालम्बनस्य शुक्ति-रजतत्वोभयनिरूपिताकाङ्क्षावत्त्वाभ्युपगमे तादृशज्ञानस्यैव तन्मते विशिष्टज्ञानत्वेनान्यथाख्यात्यापत्तेरिति भावः। 'सत्यरजतज्ञानेति रजतत्वविशिष्टज्ञानविषयरजतत्वाश्रयवदित्यर्थः, 'एवमिति वक्तृपञ्चक-वाक्यपञ्चकान्यतमान्यतरेण वक्तुः कर्मत्वादि-

---

(१) मिथः संसर्गवन्त इति क०। (२) सत्यरजतज्ञानविषयवदितीति क०।

वक्तुर्यथार्थवाक्यार्थज्ञानेऽनुमिते प्रकरणादिना वक्त्रभिप्रेतयथार्थप्रतीतिपरत्वज्ञानं ततो वेदतुल्यतया शब्दादर्थप्रत्यय इत्यनुवादकः शब्दः वक्तृज्ञानावच्छेदकतया संसर्गज्ञानानुमानात् तदुपजीविसंसर्गानुमानाद्वा वाक्यार्थस्य प्रागेव सिद्धेः। यत्तु संसर्गाग्रहो भ्रमः[१]

विषयकघटादिविशिष्टज्ञानेऽनुमिते इत्यर्थः, तदनुमितेन हेतुना कर्मत्वादौ घटादिमत्त्वे अनुमिते इति शेषः, 'प्रकरणादिनेति, आदिपदाद्वक्तुश्चेष्टाविशेषादिपरिग्रहः, प्रकरणञ्च भोजन-गमनादि, 'वक्त्रभिप्रेतयथार्थप्रतीतिपरत्वज्ञानं' प्रकृतवाक्यार्थप्रतीतिपरत्वज्ञानं कर्मत्वादिविशेष्यक-घटादिप्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वज्ञानमिति यावत्, 'वेदतुल्यतयेति वेदस्थले शाब्दानुभवसामग्रीविशिष्टतयेत्यर्थः, 'शब्दात्' लौकिकशब्दात्, 'अनुवादकः शब्द इति अनुवादको लौकिकः शब्द इत्यर्थः, अनुवादकत्वञ्च स्वसमानाधिकरण-स्वाव्यवहितपूर्ववर्त्ति-स्वसमानाकारनिश्चयविषयविषयक-तद्विशेष्यक-तत्प्रकारकानुभवमात्रजनकत्वं, स्वपदमनुभवपरं, अनुवादकत्वमेवोपपादयति, 'वक्तृज्ञानेति वक्तृज्ञानविशेषणतयेत्यर्थः, 'संसर्गज्ञानानुमानात्' कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमानात्। ननु कर्मत्वादिविषयकघटादिविशिष्टज्ञानानुमानात् कर्मत्व-घटाद्योस्तत्संसर्गस्य च सिद्धावपि कर्मत्वादौ घटादिमत्त्वं न सिद्धमित्यत आह, 'तदुपजीवीति, 'संसर्गानुमानादिति कर्मत्वादौ घटादिमत्त्वानुमानादित्यर्थः, सर्वत्रैवेति शेषः, 'वाक्यार्थस्य' स्वार्थस्य, विशिष्टेति

(१) यत्तु संसर्गाग्रहो भ्रम इति ख०।

तदभावश्च संसर्गग्रह एवेति भ्रमाभावेऽनुमीयमाने संसर्गज्ञानमेवानुमितं इत्याप्तत्वानुमानान्तर्गतमेव वक्तृज्ञानानुमानं न तु वक्तृज्ञानानुमाने तल्लिङ्गं[1] इति।

दयात् वेदे तु तात्पर्य्यस्य न्यायगम्यत्वेन वेदत्वेनाबाधितार्थकत्वनिश्चयेन च तद्विशेष्यक-तत्प्रकारकप्रतीतित्वरूपेण निर्णयदशायां यथार्थत्वसन्देहाद्यनवकाशादिति लौकिकशब्द एवानुवादकः यथार्थत्वग्रहार्थं तत्पदार्थे तत्पदार्थवत्त्वग्रहस्यावश्यकत्वात् यथार्थत्वघटकतया तत्पदार्थे तत्पदार्थवत्त्वस्य तात्पर्य्यग्रहेण विषयीकृतत्वाच्चेति प्राभाकराभिमान इति प्राहुः।

'संसर्गाग्रहो भ्रम इति पाठः विशिष्टज्ञानाभावो भ्रम इत्यर्थः, 'तदभावश्च' भ्रमाभावश्च, 'संसर्गग्रह एव' विशिष्टज्ञानमेव। यद्यपि समवायस्यातीन्द्रियतया न विशिष्टज्ञानस्य संसर्गगोचरत्वं तथापि यत्र संयोगादिः संसर्गस्तदभिप्रायेणेदं[2]। 'भ्रमाभावे' घटादिभ्रमाभावे, 'संसर्गज्ञानमेवेति घटादिविशिष्टज्ञानमेवेत्यर्थः, 'आप्तत्वानुमानेति घटादिभ्रमाभावानुमानरूपमेवेत्यर्थः, 'वक्तृज्ञानेति वक्तुर्घटादिविशिष्टज्ञानानुमानमित्यर्थः, 'वक्तृज्ञानानुमाने' वक्तुः कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमाने, 'तत्' वक्तुर्घटादिभ्रमाभावानुमानं, 'लिङ्गं' प्रयोजकम्, तथाच अयस्य वक्ता स्वप्रयुक्त-

---

(१) न तु तल्लिङ्गमिति ख०।

(२) यद्यपीत्यादिः तदभिप्रायेणेदमित्यन्तः पाठः ख०, ग० पुस्तकद्वये नास्ति।

तत्र, भ्रमो हि ज्ञानद्वयं अगृहीतभेदं तदभावश्च गृहीत-

त्यादितृतीयानुमानं इदं वाक्यमित्यादि प्रथमानुमानञ्च[1] नाङ्गी-
करणीयं, वक्तुर्घटादिभ्रमाभावानुमानादेव घटादिविशिष्टज्ञानसिद्धौ
तद्विषयत्वेन हेतुना कर्मत्वादौ घटादिमत्त्वसिद्धेः सम्भवादिति
भावः । क्वचित्तु 'असंसर्गाग्रहोऽभ्रमः' इति पाठः, तत्र च 'असंसर्गा-
ग्रहः' संसर्गग्रहाभावाभावः, 'अभ्रम इत्यकारप्रश्लेषाद्भ्रमाभाव-
इत्यर्थः, 'तदभावश्च' संसर्गग्रहाभावाभावश्च, 'संसर्गग्रह एवेति,
अभावाभावस्य प्रतियोगिरूपत्वादिति भावः । अन्यत्सर्वं पूर्ववत् ।
घटादिभ्रमाभावानुमानात् घटादिविशिष्टज्ञानसिद्धावपि कर्मत्वादौ
तद्विषयत्वं न सिद्धं तस्यैव वक्ष्यमाणानुमाने हेतुत्वादिति तृतीया-
नुमानमावश्यकं तदावश्यकत्वे च तद्धेतुसिद्ध्यर्थं प्रथमानुमानमाव-
श्यकमिति समाधाने सत्यपि स्फुटतरं समाधानान्तरमाह, 'भ्रमो
हीति, 'अगृहीतभेदमिति स्वरूपतो विषयतश्च भेदग्रहाभावविशि-
ष्टमित्यर्थः, वैशिष्ट्यञ्च एककालावच्छेदेनैकात्मवृत्तित्वं,[2] 'गृहीत-
भेदज्ञानमिति गृहीतो विषययोर्ज्ञानयोर्भेदो येनेति व्युत्पत्त्या स्वरूपतो
विषयतश्च[3] भेदज्ञानमित्यर्थः[4] ज्ञानद्वयाभावस्येति शेषः, विशिष्टा-
भावस्य विशेषणाभाव-विशेष्याभावोभयरूपत्वादिति[5] भावः । तथा-

---

(१) तृतीयानुमानं प्रथमानुमानञ्चेति ख०, ग० ।

(२) वैशिष्ट्यञ्च एककालावच्छिन्नैकात्मवृत्तित्वमिति ख० ।

(३) विशेषतश्चेति क०, ग० ।

(४) भेदग्रहविशिष्टमित्यर्थ इति क० ।

(५) विशेषणाभाव-विशेष्याभावान्यतररूपत्वादिति क० ।

भेदज्ञानं, न हि ज्ञानाभावे सुषुप्तौ भ्रमव्यवहारः, ततो भ्रमाभावनिश्चयानन्तरं वक्तृज्ञानानुमानं । किञ्च

चैतादृशभ्रमाभावानुमितावपि न विशिष्टज्ञानसिद्धिरिति भावः । संसर्गाग्रहस्य(१) भ्रमत्वं खण्डयति, 'न हीति, 'ज्ञानाभावे' विशिष्टज्ञानाभावे, 'सुषुप्तौ', असंसर्गाग्रहदशायाञ्चेति शेषः । उपसंहरति, 'तत इति तस्मादित्यर्थः, 'भ्रमाभावेति घटादिभ्रमाभावेत्यर्थः, 'वक्तृज्ञानेति वक्तुः कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमानमित्यर्थः, आवश्यकमिति शेषः । 'आप्तोक्तत्वानुमानमेवेति वह्निकरणकत्वादिभ्रमाभाववदुक्तत्वानुमानमेवेत्यर्थः, 'वक्तृज्ञानेति वक्तुर्वह्निकरणकत्वादिविशिष्टज्ञानानुमानमित्यर्थः, 'तर्हीति, तर्हि वह्निकरणकत्वादिभ्रमाभाववदुक्तत्वस्य अनुमापकं यल्लिङ्गं तदेव वह्निकरणकत्वादिशाब्दप्रमाकरणमस्तु किं यथार्थतात्पर्यहेतुत्वेन भवन्मते वह्निकरणकत्वादिभ्रमाभावस्य वह्निकरणकत्वादिविशिष्टज्ञानरूपतया तद्वदुक्तत्वानुमापकलिङ्गस्यापि व्यभिचारिशब्दव्यावृत्तत्वात् मम तु वह्निकरणकत्वादिभ्रमाभावस्य वह्निकरणकत्वादिविशिष्टज्ञानरूपतया तद्वदुक्तत्वानुमापकलिङ्गस्य शुकाद्युदीरितवह्निना सिञ्चतीत्यादिवाक्येऽपि सत्त्वान्न व्यभिचारिशब्दव्यावृत्तत्वमतो न शाब्दप्रमाजनकत्वमित्यर्थः । न च भवन्मतेऽपि कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमापकलिङ्गकोटिप्रविष्टघटादिभ्रमाद्यन्यनिरुक्तत्वाक्रान्तत्वमेव शाब्दप्रमाजनकमस्तु तस्य व्यभिचारिशब्दव्यावृत्तत्वादिति

---

(१) संसर्गाग्रहाभावस्येति ग० ।

यथाप्तोक्तत्वानुमानमेव वक्तृज्ञानानुमानं, तर्हि यादृशं लिङ्गं तादृशमेव गमकमस्त्विति।

अत्रोच्यते। यथार्थवाक्यार्थधीपरत्वं न ज्ञातं प्रमो-

तुल्योऽयमनुयोग इति भ्रान्तम्। गौरवेण तस्याहेतुत्वादिति भावः।

केचित्तु तुल्यत्वित्यादिन्यायेन इष्टापत्तिमाह, 'किञ्चेति, 'आप्तोक्तत्वानुमानं' अभ्रमत्वानुमानं घटादिभ्रमाभावानुमानमिति यावत्, 'वक्तृज्ञानेति वक्तुर्घटादिविशिष्टज्ञानानुमानमित्यर्थः, 'तर्हीति, तर्हि यादृशं घटादिभ्रमाभावानुमानं वक्तुः कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमाने 'लिङ्गं' प्रयोजकं, 'तादृशमेव' तदेव, 'गमकमस्तु' कर्मत्वादौ घटादिमत्त्वानुमाने प्रयोजकमस्तु, तृतीयानुमानं प्रथमानुमानञ्च नाङ्गीकरिष्याम इत्यर्थः, इति प्राहुः।

अन्ये तु 'आप्तोक्तत्वानुमानेत्यादि केचिन्मतवत्, 'यादृशं लिङ्गमित्यादेस्तु यादृशं घटादिभ्रमाभावानुमाने लिङ्गं तादृशमेव वक्तुः कर्मत्वादिविषयक-घटादिविशिष्टज्ञानानुमापकमस्त्वित्यर्थः, तथाच यदि भ्रमाभावमनुमाय वक्तुः तादृशज्ञानमनुमीयते तदेव भ्रमाभावानुमानेनैव घटादिविशिष्टज्ञानसिद्धेर्वक्तुः तादृशज्ञानानुमानवैयर्थ्यमाशङ्कनीयं भ्रमाभावानुमापकेन वक्तुस्तादृशज्ञानानुमाने तु नैतस्याः शङ्कायाः अवकाश इति भावः। इति प्राहुः।

इति प्रभाकरपूर्व्वपक्षः।

स्यादेवं गौरवात् वाक्यार्थनिरूप्यत्वेन प्रथमं ज्ञातु-

इत्यर्थः, 'गौरवादिति' यथार्थतात्पर्य्यस्य तद्विशेष्यक-तत्प्रकारक-यथार्थप्रतीतीच्छयोश्चरितत्वरूपतया यथार्थत्वप्रवेशेन गौरवादित्यर्थः, भवन्मते यथार्थत्वस्याव्यावर्त्तकतया व्यर्थत्वाच्चेत्यपि द्रष्टव्यं. किन्तु लाघवाद्व्यर्थविशेषणताविरहाच्च तद्विशेष्यक-तत्प्रकारकप्रतीतीच्छयोश्चरितत्वरूपतात्पर्य्यनिश्चय एव शाब्दधीजनकः भवन्मते अन्यथाख्यात्यभावेन वह्निना सिञ्चतीत्यादौ तद्विशेष्यक-तत्प्रकारकप्रतीतेरप्रसिद्धत्वादेवातिप्रसङ्गविरहात्। न च लौकिकस्थले तात्पर्य्यघटकप्रतीतौ यथार्थत्वसंशये शाब्दबोधानुदयात् यथार्थत्वांशनिवेशनमावश्यकमिति वाच्यम्। तस्यैवासिद्धेः। तात्पर्य्ययाथार्थ्यसंशयस्य योग्यतासंशयपर्य्यवसिततया अननुगुणत्वात्(१)। न च तथापि तव नये शाब्दप्रमात्वावच्छिन्नं प्रति यथार्थतात्पर्य्यनिश्चयो हेतुरावश्यकः अन्यथा तात्पर्य्यनिश्चयमात्रस्य तदवच्छिन्नं प्रति हेतुत्वे वह्निना सिञ्चतीत्यादावपि शाब्दप्रमोत्पत्त्यापत्तेः भ्रमरूपतद्विशेष्यक-तत्प्रकारकप्रतीतेः तत्रापि प्रसिद्धत्वादिति वाच्यम्। मम वह्निना सिञ्चतीत्यादौ शाब्दानुभवानुरोधेन शाब्दानुभवसामान्यं प्रति निरुक्ततात्पर्य्यनिश्चयस्य हेतुत्वावश्यकत्वे शाब्दप्रमात्वावच्छिन्नं प्रति लाघवात् संशयनिश्चयसाधारणतत्पदार्थतत्पदार्थसत्त्वरूपयोग्यताप्रमाया एव हेतुत्वाद्यथार्थतात्पर्य्यनिश्चयस्य तदपेक्षया गुरुत्वादिति भावः। ननु निरुक्त-

---

(१) तात्पर्य्ययाथार्थ्यसंशयस्येत्यादिः अननुगुणत्वादित्यन्तः पाठः ख० ग० पुस्तकद्वये नास्ति।

प्रथमज्ञातत्वात्, तस्यापूर्व्वत्वात् । यच्च लोके भ्रमादि-
निरासानन्तरं वक्तृज्ञानावच्छेदकतया तदग्रे स्वातन्त्र्येण
वा पुमभिप्रेतवाक्यार्थज्ञाने तत्प्रतीतिपरत्वं प्रकरणा-
दिना ज्ञायत इत्युक्तं, तन्न, वाक्यार्थमज्ञात्वा अयमभ्र-
भ्रान्त इति ज्ञातुं पुरुषत्वादशक्तुर्भ्रम-प्रमादसम्भवेन प्रथमं

यथार्थप्रतीतीच्छयोच्चरितत्वं न यथार्थतात्पर्य्यमपि तु तत्पदार्थे-
वत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वं तद्वाच्यम्, तथाच तद्विशेष्यक-
तत्प्रकारकप्रतीतीच्छयोच्चरितत्वापेक्षया लाघवमेव न वा वैयर्थ्यमि-
त्यरुचेराह, 'वाक्यार्थे'ति तत्पदार्थे तत्पदार्थवत्त्वनिश्चयाधीननिश्चा-
यकत्वेनेत्यर्थः, 'प्रथमं' शाब्दानुभवात् पूर्वं, 'ज्ञातुं' निश्चेतुं, 'तस्या-
पूर्वत्वा'दिति तत्पदार्थे तत्पदार्थवत्त्वस्य शाब्दबोधात् पूर्वमनिश्चितत्वा-
दित्यर्थः । ननु पूर्वोक्तक्रमेण शाब्दबोधात् पूर्वं तत्पदार्थे तत्पदार्थ-
वत्त्वं निश्चित्य तन्निश्चयः[1] स्यादित्यत आह, 'यच्चे'ति, 'पुमभिप्रेते'ति
तत्पदार्थे तत्पदार्थवत्त्वनिश्चये इत्यर्थः, 'तत्प्रतीतिपरत्वं' यथार्थ-
प्रतीतिपरत्वं, 'वाक्यार्थं' घटादिकं, 'अत्र' घटादौ, 'ज्ञातुमि'ति
'अशक्यत्वा'दित्यनेनान्वयः । ननु शाब्दधीपूर्वं घटादेर्ज्ञानमस्त्येव
कथमन्यथा तत्रापि तात्पर्य्यधीरित्यत आह, 'पुरुषत्वा'दिति, 'भ्रम-
प्रमादसम्भवेने'ति, पुंवाक्यत्वस्य व्यभिचारित्वादिति भावः[2] । ननु
मा भूत् पुंवाक्यत्वेन भ्रमाद्यजन्यत्वग्रहस्तथापि संवादिप्रवृत्तिप्रयो-

---

(१) निश्चय इति ख०, ग० । (२) व्यभिचारित्वादिति शेष इति क० ।

भ्रमाद्यजन्यत्वस्य ग्रहीतुमशक्यत्वात् प्रवृत्तिसंवादादे-
र्ज्ञानोत्तरकालीनत्वात् भ्रमादिजन्यविलक्षणत्वेन च
शब्दस्याज्ञानात् ज्ञाने वा यादृशो लिङ्गत्वं तस्यैव प्रत्या-
यकत्वं अव्यभिचारात् वेदेऽपि वाक्यार्थमविज्ञाय
तद्यथार्थप्रतीतिपरत्वं न्यायेनापि ज्ञातुमशक्यं वि-
षयनिरूप्यत्वात् प्रतीतेः लोके तात्पर्य्यनिरूपणार्थ-

जकवाक्यत्वेन लिङ्गेन तद्ग्रहः स्यादित्यत आह, 'प्रवृत्तिसंवादादे-
रिति संवादिप्रवृत्त्यादेरित्यर्थः, 'ज्ञानोत्तरेति शाब्दज्ञानोत्तरेत्यर्थः,
तथाच शाब्दधीपूर्वं तत्प्रयोजकत्वग्रहो नास्तीति भावः। ननु
प्रमाणशाब्दभ्रमादिजन्यशब्दयोस्तत्त्वं किञ्चिद्वैलक्षण्यमस्ति तेनैव भ्र-
माद्यजन्यत्वमनुमेयमित्यत आह, 'भ्रमादीति, 'यादृशः' वैलक्षण्यस्य,
'तस्यैवेत्येवकारादयथार्थतात्पर्य्यव्यवच्छेदः, 'प्रत्यायकत्वं' शाब्दधीजन-
कत्वं, तथाच शब्दस्य नानुवादकत्वमिति भावः। इदमापाततः
तादृशवैलक्षण्यस्य शाब्दधीजनकत्वे नानार्थस्थले तात्पर्य्याविषयेऽपि
योग्यार्थे प्रामाण्यापत्तेः। वस्तुतस्तु तादृशवैलक्षण्ये मानाभावः, इत्येव
तत्त्वं।(१) विशेषतो यथार्थतात्पर्य्यनिश्चयस्य वेदस्थले व्यभिचारम-
प्याह, 'वेदेऽपीति, 'वाक्यार्थं' तत्पदार्थं तत्पदार्थवत्त्वं, 'अविज्ञाय'
विशेषतोऽनिश्चित्य, 'तद्यथार्थेति प्रकृतवाक्यार्थयथार्थेत्यर्थः, 'ज्ञातुं'
विशेषतो निश्चेतुं, 'विषयनिरूप्यत्वादिति तत्पदार्थं तत्पदार्थवत्त्व-
निश्चयाधीनत्वादित्यर्थः, 'प्रतीतेरिति तत्पदार्थवत्त्वरूपेण तत्पदार्थ-

---

(१) इत्येव तत्त्वमित्यनन्तरं वेदे कृतकारणत्वाल्लोकेऽपि कारणत्वमित्यन्ये-
त्यधिकः पाठः क॰ पुस्तके वर्त्तते।

मशाब्दवाक्यार्थप्रतीतेः प्रथमं त्वयापि स्वीकारात्। अन्यथा वक्तृज्ञानानुमानं[1] न स्यात्। न च लौकिकमानान्तरात्तदवगमः, वेदार्थस्य तदविषयत्वात् वेदस्य प्रथमं मूकत्वात्, न च न्यायसिद्धे वेदार्थे मानान्तरात्तात्पर्य्यग्रहः, वेदस्यानुवादकतापत्तेः शब्दस्याप्रमाण-

प्रकारिकायाः प्रतीतेरित्यर्थः। नन्विदमेवासिद्धमित्यत आह, 'लौक-इति, 'तात्पर्य्येति यथार्थतात्पर्य्येत्यर्थः, 'वाक्यार्थप्रतीतेः' तत्पदार्थे तत्पदार्थवत्त्वप्रतीतेः, 'त्वयापि स्वीकारादिति, तथाच तादृश-प्रतीतिप्रतीतेर्विषयनिरूप्यत्वाभावे भवता तदभ्युपगमो कथं स्या-दिति भावः। तादृशप्रतीतिप्रतीतेर्विषयनिरूप्यत्वे युक्त्यन्तरमाह, 'अन्यथेति तादृशप्रतीतिप्रतीतेर्विषयनिरूप्यत्वाभावे इत्यर्थः, 'वक्तृ-ज्ञानानुमानमिति, अपिः शेषः, 'न स्यादिति सार्थकं न स्यादि-त्यर्थः, तत्पदार्थे तत्पदार्थवत्त्वप्रतीत्युपपादनायैव तदभ्युपगमादिति भावः। 'मानान्तरात्' अनुमानादितः, 'तदवगम इति विशिष्य तत्तत्पदार्थे तत्पदार्थवत्त्वावगम इत्यर्थः, 'तदविषयत्वादिति वेद-जन्यशाब्दधीपूर्वं प्रमाणान्तराविषयत्वादित्यर्थः. 'मूकत्वादिति शा-ब्दबोधाजनकत्वादित्यर्थः, यथार्थतात्पर्य्यज्ञानरूपकारणाभावादिति भावः। ननु वेदार्थस्य वेदजन्यशाब्दधीपूर्व्वं प्रमाणान्तराविषयत्वमे-वासिद्धमित्यस्वरसेनाह, 'न चेति न चेत्यर्थः, 'तात्पर्य्यग्रहः' लौकिक-क्रमेण वेदजन्यशाब्दधीपूर्व्वं निरुक्तयथार्थतात्पर्य्यग्रहः, 'अप्रमाणत्वा-

(१) अनुमानापेक्षेति क०, ख०।

त्वापत्तेश्च। अज्ञाते वाक्यार्थे तर्क-संशययोरप्यभावात्। अयं पदार्थोऽपरपदार्थसंसृष्टो न वेति संशये तर्के वा एककोटौ संसर्ग उपस्थित इति चेत्, न, अनिश्चिते

पत्तेरिति स्वार्थानुभवाजनकत्वापत्तेरित्यर्थः। लोक-वेदयोरुभयत्रैव प्रमाणान्तरात्तद्वाक्यार्थबोधावश्यकत्वे शब्दस्य स्वार्थानुभवजनकत्वाभ्युपगमे प्रयोजनाभावात् प्रवृत्त्यादेस्तत एवोपपत्तेरिति भावः। ननु तर्क-संशयान्यतरोपस्थिते वेदार्थे तात्पर्यनिरूपणमस्तु तथाच वेदस्य नानुवादकता तर्क-संशयेतरज्ञानजन्यत्वाघटितयथार्थज्ञानजनकत्वस्यैवानुवादकतापदार्थत्वाभ्युपगमात्। न च तथापि यथार्थतात्पर्यप्रमादायानुवादकत्वं दुर्वारमिति वाच्यम्। तात्पर्यग्रहस्यापि यत्किञ्चिदंशे तर्क-संशयाकारत्वाभ्युपगमादित्यत आह, 'अज्ञात इति अनिश्चिते वेदार्थे इत्यर्थः, अयं पुरुषो यद्येतत्पदार्थवदेतत्पदार्थज्ञानवान् स्यादेतद्वेदप्रयोक्ता न स्यादिति तर्कस्य अयमेतत्पदार्थवदेतत्पदार्थज्ञानवान् वेति संशयस्य च वेदार्थनिश्चयाधीनत्वादिति भावः। ननु तथापि यत्र संशयादौ न वाक्यार्थोपस्थितिः कारणं तत्संशयाद्युपस्थितोऽस्तु वेदार्थ इत्यभिप्रायवानाशङ्कते, 'अयमिति, तर्के वेति अयं पदार्थो यद्येतत्पदार्थसंसृष्टो न स्यादेतत्पदसमभिव्याहृतवैदिकपदार्थो न स्यादिति तर्क इत्यर्थः, आपादकस्यापि तर्के उपनीतभाने बाधकाभावादिति भावः। 'अनिश्चिते इति तत्पदार्थवत्त्वेन तत्पदार्थेऽनिश्चिते इत्यर्थः, 'तात्पर्यानिश्चयात्' तात्पर्यनिश्चयासम्भवात्, विशिष्टवैशिष्ट्यज्ञाने विशेषणतावच्छेदकप्रकारक-

तात्पर्य्यानिश्चयात् तयोरगृहीतासंसर्गविषयत्वेनासदर्थविषयकत्वेन वा वाक्यार्थाविषयत्वाच्च । अन्यथा लोकेऽपि ताभ्यामेवोपस्थितिरिति किं वक्तृज्ञानानु-

निश्चयस्य हेतुत्वादिति भावः । यद्यपि तर्को निश्चयविशेष एव,(1) तथापि तत्पदार्थे तत्पदार्थवत्त्वनिश्चयो न स इति हृदयं । ननु विशेष्ये विशेषणमितिन्यायेन तात्पर्य्यग्रहः स्यादित्यत आह, 'तयोरिति तर्क-संशययोरित्यर्थः, 'अगृहीतासंसर्गविषयत्वेनेति अगृहीतासंसर्गविषयकज्ञानद्वयरूपत्वेनेत्यर्थः, इदञ्च तन्मते, 'असदर्थविषयकेति असद्वैशिष्ट्यविषयकत्वेन वेत्यर्थः, इदञ्चासद्वैशिष्ट्यविषयकज्ञानं भ्रम इति टीकाकारमते, 'वाक्यार्थेति प्रकृतसंसर्गेण तत्पदार्थे तत्पदार्थाविषयकत्वादित्यर्थः । न च यत्कोटिधर्मिणि वर्त्तते तदंशे संशयस्य विशिष्टज्ञानत्वं प्रकृतसंसर्गविषयकत्वञ्च वर्त्तत एवेति वाच्यम् । ज्ञानप्रत्यासत्तिमनङ्गीकुर्वतस्तस्य मते धर्मिणस्तत्कोटेश्च तदानीमसन्निकृष्टतया तत्कोटेरपि विशिष्टज्ञानत्वाभावादिति भावः । मीमांसकमते कोटिद्वयोपस्थितिर्धर्मिज्ञानमसंसर्गाग्रहकालीनमित्येव संशयः तत्प्रकारकं ज्ञानमेव च तन्निश्चयः तथाच विद्यमानकोटिप्रकारकं ज्ञानमपि न जायते संशयजनकदोषेण प्रतिबन्धादित्यभिमानः(2) । 'उपस्थितिः' प्रकृतसंसर्गेण तत्पदार्थे तत्पदार्थवत्त्वस्योपस्थितिः, 'किमिति, तथाच वेदवल्लोकस्यापि नानुवाद-

(1) मानसप्रत्यक्षविशेष एवेत्यर्थः, तर्कत्वस्य मानसत्वव्याप्यजातित्वात् ।

(2) मीमांसकेत्यादिः इत्यभिमान इत्यन्तः पाठः ख०, ग० पुस्तकद्वये नास्ति ।

मानेन। वस्तुतस्तु यदि यथार्थतात्पर्य्यकत्वं ज्ञातं शाब्दप्रमोत्पादकं तदा लोक-वेदयोस्तादृशपदस्मारितत्वेन पदार्थसंसर्गानुमितिसम्भवात् न शब्दः प्रमाणं स्यात्।

कतेति भावः। ननु विशेषतो यथार्थतात्पर्य्यनिश्चयस्य लौकिकवाक्यजन्यशाब्दबुद्धिं प्रत्येव हेतुत्वादेतत्स्थले तद्व्यभिचारो न दोषाय वेदे नित्यवत्कपिञ्जलपदार्थपरमिदमित्यादिक्रमेण सामान्यतः कपिञ्जलपदार्थत्वादिप्रकारेण तन्निश्चयस्यैव हेतुत्वात् तस्य च विशिष्य तत्पदार्थे तत्पदार्थवत्त्वनिश्चयं विनापि सामान्यतस्तत्पदार्थे तत्पदार्थवत्त्वनिश्चयादेव सम्भवात्। न च सामान्यतस्तत्पदार्थे तत्पदार्थवत्त्वनिश्चय एव प्रथमं कथं स्यादिति वाच्यम्। अनुमानादितोऽपि तत्सम्भवात् अनुमानादिना प्रथमं सामान्यतस्तन्निश्चयाभ्युपगमेऽप्यनुवादकत्वाप्रसक्तेरित्यस्वरसादाह, 'वस्तुतस्त्विति, 'लोक-वेदयोरिति, शब्दात् पदार्थोपस्थित्यनन्तरमिति शेषः, 'तादृशपदेति, कर्मत्वादिकं घटादिमत् स्वविशेष्यक-घटादिप्रकारकयथार्थप्रतीतीच्छयोच्चरितपदस्मारितत्वात् घटादिपदार्थवत्, स्वप्रतीतीच्छयोच्चरितपदस्मारितत्वाद्वा घटनिष्ठकरणत्ववदिति क्रमेणेति शेषः, 'पदार्थसंसर्गेति शाब्दबोधान्यूनानतिरिक्तविषयकपदार्थसंसर्गानुमितिसम्भवादित्यर्थः। भवन्मते सिद्धेरनुमितिप्रतिबन्धकत्वाभावात्तात्पर्य्यघटकतया पूर्वं पदार्थसंसर्गसिद्धावपि नानुमित्यनुपपत्तिरिति भावः। 'न शब्दः प्रमाणं स्यादिति अनुमित्यतिरिक्तानुभवकरणं न स्यादित्यर्थः, तथाच जितं वैशेषिकैरिति भावः। ननु व्याप्तिस्मृत्यादेरनावश्यकतया

अपिच पुंवाक्यस्य दोष-विशिष्टज्ञानान्यतरजन्यत्वेऽनुमिते परिशेषाद्दोषाजन्यत्वनिश्चयदशायां वेदतुल्या सामग्री पुंवाक्येऽपि वृत्तेति तत एवार्थनिश्चयात् वेदस्यापि प्रामाण्यं, अनुमितानुमानस्य व्याप्तिस्मृ-

---

सर्वत्रानुमानासम्भवाच्छब्दस्य प्रमाणान्तरत्वमित्यस्वरसात् यन्मते यथार्थतात्पर्यनिश्चयस्य न हेतुत्वमपि तु प्राथमिकत्वादावश्यकत्वाच्च दोषाजन्यत्वे सति दोष-विशिष्टज्ञानान्यतरजन्यत्वनिश्चय एव हेतुस्तन्मतेन समाधत्ते, 'अपि' चेति, 'पुंवाक्यस्य' लौकिकवाक्यस्य. 'दोषः' भ्रमादिः, 'परिशेषात्' भ्रमाभाववद्वक्तृत्वे सति प्रमादाद्यभाववद्वक्तृत्वादिना, 'वेदतुल्या सामग्रीति तात्पर्यग्रहापेक्षया प्राथमिकत्वात् तात्पर्यग्रहार्थमावश्यकत्वाच्च वेदसाधारणशाब्दानुभवसामान्यं प्रति हेतुत्वेन कॢप्तदोषाजन्यत्वे सति दोष-विशिष्टज्ञानान्यतरजन्यत्वनिश्चयरूपा सामग्रीत्यर्थः, विसंवादिशुकवाक्यवारणाय विशेष्यदलं, 'पुंवाक्ये' लौकिकवाक्ये, 'तत एव' तादृशान्यतरजन्यत्वनिश्चयादेव, यथार्थतात्पर्यग्रहपूर्वमिति शेषः,(१) 'अर्थनिश्चयात्' लौकिकवाक्यार्थनिश्चयात्। ननु तादृशान्यतरजन्यत्वनिश्चयस्य प्राथमिकत्वे आवश्यकत्वेऽपि गौरवान्न तस्य शाब्दधीहेतुत्वं किन्तु यथार्थतात्पर्यनिश्चय एव हेतुरिति यथार्थतात्पर्यनिश्चयपूर्वं न तस्माच्छाब्दबोधसम्भव इत्यत आह, 'अनुमितानुमानस्येति परम्परया दोषाजन्यत्वानुमानाधीनस्य यथार्थतात्पर्यनिश्चयानुमानस्येत्यर्थः, 'व्याप्तिस्मृत्यादीति व्याप्तिस्मृत्यादेरनावश्यक-

---

(१) यथार्थतात्पर्यनिश्चयात् पूर्वमिति शेष इति ग०।

त्यादिविलम्बितत्वात्। एतेनाबाधितार्थपरत्वं लोके

त्वात् सर्वत्र शाब्दबोधपूर्वममभवितादित्यर्थः, तथाच यथार्थतात्पर्य-निश्चयस्य लघुत्वेऽपि व्यभिचाराञ्च हेतुत्वमिति भावः। इदमप्यापाततः व्यभिचारास्फूर्त्तिदशायां लाघवात् यथार्थतात्पर्यनिश्चयस्य हेतुत्वसिद्धौ सर्वत्र व्याप्तिसत्त्वादेरप्यावश्यकत्वकल्पनाद्यत्र तूभयवादिसिद्धौ व्याप्तिसत्त्वाद्यभावस्तत्र शाब्दबोधाभावस्यैवाभ्युपगमात् अनुभवस्य विवादग्रस्तत्वादिति। वस्तुतस्तु तत्पदार्थवत्त्वत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपयथार्थतात्पर्यनिश्चयस्य लाघवाच्छाब्दबुद्धिहेतुत्वे लोकवद्वेदस्याप्यनुवादकत्वापत्तिः तत्रापि तात्पर्यघटकतया तत्पदार्थे तत्पदार्थवत्त्वस्य शाब्दबोधात् प्रागेव सिद्धेः। अथ वेदप्रामाण्यान्यथानुपपत्त्या वेदस्थले शिवत्वकपिञ्जलपदार्थपरमिदमित्यादिक्रमेण सामान्यतस्तन्निश्चयो हेतुः तथाच तात्पर्यघटकतया तत्पदार्थवत्त्वत्पदार्थज्ञानस्य वेदजन्यज्ञानसमानाकारकत्वाभावादिदस्य नानुवादकत्वं लोके च घटवत्कर्मत्वपरमिदमित्यादिक्रमेण विशेषतस्तन्निश्चय एव हेतुः अन्यथा घटवदन्यपदार्थपरमिति सामान्यतोनिश्चयसत्त्वेऽपि घटवत्कर्मत्वप्रतीतिपरञ्च नेति विशेषतः संशयादिसम्भवात्तादृशसामान्यतोनिश्चयसत्त्वे तादृशविशेषसंशयादिसत्त्वेऽपि शाब्दबोधप्रसङ्ग इत्यनायत्या लौकिकः शब्दोऽनुवादकइति चेत्। न। कार्य्य-कारणभावद्वयापत्तेः। किञ्च वेदस्थलेऽपि शिवत्वकपिञ्जलपदार्थपरमिदमित्यादिक्रमेण सामान्यतो यथार्थतात्पर्यनिश्चयसत्त्वे विशेषतो रक्तच्छागत्वादिरूपेण रक्तच्छागपरञ्च वा रक्तच्छागपरञ्चेति संशय-व्यतिरेकनिश्चययोः सत्त्वेऽपि

वेदे च प्रमापकं लोके वाक्यार्थो बाधितोऽपि दृष्ट इति श्रोतुः प्रमाणावतारं विना न बाधाभावनिश्चयः स-

---

शाब्दबोधप्रसङ्गाद्विशेषतो निरुक्तयथार्थतात्पर्य्यनिश्चय एव शाब्दधी-हेतुर्वाच्यः भिन्नप्रकारकतया सामान्यतो यथार्थतात्पर्य्यनिश्चयस्य विशेषतस्तादृशसंशयादिविरोधित्वे मानाभावादन्यथा लोकस्थलेऽपि सामान्यतो यथार्थतात्पर्य्यनिश्चयस्यैव हेतुत्वस्य सुवचत्वादतो वेद-प्रामाण्यान्यथानुपपत्त्या लोक-वेदसाधारणकार्य्य-कारणभावैक्यलाघ-वात्[1] तत्प्रकारक-तद्विशेष्यकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यस्य शरीरगुरुत्वेऽपि तन्निश्चय एव हेतुरिति लौकिकशब्दोऽपि नानु-वादक इत्येव नैयायिकसिद्धान्तनिगर्वः । 'एतेनेति 'निरस्तमित्यये-तनेनान्वय, 'अबाधितार्थेति तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्व-मित्यर्थः । नन्वेवं भवन्मतेऽपि लोक-वेदयोः शाब्दबोधसामग्रीभेद-इत्यत आह, 'लोक इति घटमानयेत्यादिलौकिकवाक्य इत्यर्थः, 'वाक्यार्थः' प्रकृतवाक्यघटकीभूतानानापदार्थः 'बाधितोऽपि' वक्त्र-भिप्रायविषयत्वाभाववत्त्वेनापि कर्मत्वाद्यतिरिक्तोऽपीति यावत्, एतदम्-पदेन लक्षणादिना कदाचित् करणत्वादिरूपार्थस्यापि बोधना-देतद्वाक्यजन्यशाब्दधीविषयत्वरूपैतद्वाक्यपदार्थत्वस्य कारणत्वादावपि सत्त्वादिति भावः । 'प्रमाणावतारं विना' विशिष्याबाधितार्थकत्वे प्रमाणावतारं विना घटवत्कर्मत्वप्रतीतिजनकमिदमिति विशेषतो-ऽबाधितार्थकत्वनिश्चयं विनेति यावत्, घटवदेतत्पदार्थप्रतीति-

---

(1) लोक-वेदसाधारण्याकारणभावैक्ये लाघवादिति क० ।

नुवादकतापत्तेश्च। तस्मात् भ्रमाद्यजन्यत्वं आप्तोक्तत्वं अबाधितार्थकत्वं यथार्थतात्पर्य्यकत्वं निरस्तव्यभिचार-शङ्कत्वं अन्यद्वा व्यभिचारिव्यावृत्तं यत्प्रमोत्पादकं तत् स्वरूपसत् न ज्ञातं। अन्यथा तादृशस्य वाक्यार्था-

---

विशेषतोऽबाधितार्थकत्वनिश्चयस्यैव हेतुत्वेन वक्तव्यत्वादिति भावः। उपसंहरति, 'तस्मादिति, 'भ्रमाद्यजन्यत्वमिति। यद्यपि चेत्यादिना भ्रमाद्यजन्यत्वज्ञानस्य हेतुत्वमभ्युपगतं तथाप्येकदेशिमतेन तदभिधानान्न दोषः। 'आप्तोक्तत्वमिति' तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकयथार्थप्रतीतिमदुक्तत्वरूपं तत्पदार्थवत्तत्पदार्थप्रतीतिमदुक्तत्वरूपं वा आप्तोक्तत्वमित्यर्थः, 'अबाधितेति तत्पदार्थवत्तत्पदार्थप्रतीति-जनकत्वमित्यर्थः, 'यथार्थेति तद्विशेष्यक-तत्प्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वरूपं तत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपं वा यथार्थतात्पर्य्यकत्वमित्यर्थः, 'निरस्तेति निरस्ता व्यभिचारशङ्का प्रमित्यजनकत्वशङ्का यतस्तत्त्वमिति व्युत्पत्त्या प्रमाजनकत्वमित्यर्थः, तद्विशेष्यक-तत्प्रकारकयथार्थप्रतीतिजनकत्वमिति यावत्, 'अन्यद्वा' दोषाभावादिकं वा, 'यत्प्रमोत्पादकमिति, यत्प्रमोत्पादकतया पराभिमतमित्यर्थः, 'स्वरूपसदिति गगनादिवदव्यवहितपूर्ववर्त्ति-मात्रमित्यर्थः, शाब्दप्रमोत्पादकमिति शेषः। 'अन्यथेति आप्तोक्तत्वादिज्ञानस्य शाब्दप्रमोत्पादकत्वे इत्यर्थः, 'तादृशस्येति आप्तोक्तादिपदस्येत्यर्थः, स्मारितत्वसम्बन्धेनेति शेषः, 'वाक्यार्थेति तत्पदार्थ

व्यभिचारितया तादृशपदस्मारितत्वात् लिङ्गादेव संसर्गसिद्धिः स्यादिति जितं वैशेषिकैः । अथ व्यवहारानुमितव्यवहर्त्तृकार्य्यान्वितज्ञाने[१] उपस्थितत्वेन पदानां हेतुत्वग्रहादन्विताभिधायकत्वं[२] गृहीतं न तु लिङ्गज्ञानस्य तदानीं शब्दस्य लिङ्गत्वेनानुपस्थितेरिति

तत्पदार्थवत्त्वव्याप्यतयेत्यर्थः, 'तादृशपदेति आप्तोक्तादिपदेत्यर्थः, कर्मत्वादिकं घटादिमत् स्वविशेष्यक-घटादिप्रकारकयथार्थज्ञानवदुक्तपदस्मारितत्वात् घटादिमत्स्वज्ञानवदुक्तपदस्मारितत्वाद्वा घटनिष्ठकरणत्वादिवदित्यादिक्रमेणेति भावः । 'संसर्गसिद्धिरिति शाब्दबोधान्यूनानतिरिक्तविषयकपदार्थद्वयसंसर्गज्ञानसम्भवः स्यादित्यर्थः, भवन्मते सिद्धेरनुमितिप्रतिबन्धकत्वाभावादाप्तोक्तत्वादिघटकतया तत्पदार्थवत्त्वस्य पूर्वं निश्चयेऽपि नानुमित्यनुपपत्तिरिति भावः । 'जितमिति, शब्दस्यानुमानान्तर्गतत्वनिर्वाहादिति भावः । वैशेषिकजयमसहमान आशङ्कते 'अथेति, 'व्यवहारेति घटमानयेत्यादिवाक्याधीनप्रयोज्यवृद्धप्रवृत्त्यानुमितेत्यर्थः, 'व्यवहर्त्त्रिति प्रयोज्यवृद्धस्य घटानयनविषयकं कार्य्यमित्याकारककार्य्यविशेष्यकज्ञानेत्यर्थः, 'पदानां' प्रयोजकवृद्धोक्तघटमानयेत्यादिपदानां, 'हेतुत्वेति बालकस्य हेतुत्वग्रहादित्यर्थः, 'अन्वितेति शब्दस्य स्वातन्त्र्येण पदार्थद्वयसंसर्गज्ञानजनकत्वमित्यर्थः, 'लिङ्गज्ञानस्य' लिङ्गतया शब्दज्ञानस्य, लिङ्गत्वं

---

(१) व्यवहारानुमितव्यवहार्य्यकार्य्यान्वितज्ञान इति क० ।

(२) अन्विताभिधायित्वमिति ग० ।

चेत्। न। लिङ्गाभावेनैव[१] शब्दादन्वितज्ञानोपपत्ते-र्नाकाङ्क्षादिमच्छब्दत्वेन कारणता गौरवात्। शब्दस्य लिङ्गत्वं सम्भवदपि बालेन न ज्ञातमिति चेत्, सोऽयं बालस्य दोषो न वस्तुन इत्यादि वक्ष्यते[२]। किञ्चैवं[३] लोकवद्वेदेऽपि अनुवादकता[४] स्यात्। एतेन वाक्यार्थ-तात्पर्य्यग्राहकानुमानात् तात्पर्य्यावच्छेदकतया तदुप-

व्याप्तिविशिष्टपक्षधर्मत्वं। 'नाकाङ्क्षादीति, वाक्येन कारणतामात्रस्य ग्रहात्तोपजीव्यविरोध इति भावः[५]। 'लिङ्गत्वमिति, व्याप्तिपक्षधर्मताभ्यामेति शेषः। 'सोऽयमिति बालकेन तस्य लिङ्गत्वस्याज्ञानेऽपि वस्तुतस्तस्य लिङ्गतया जनकताक्षतिरित्यर्थः। 'किञ्चैवमिति, 'एवं' आप्तोक्तत्वादिज्ञानस्य शाब्दधीहेतुत्वे, 'वेदेऽपीति, आप्तोक्त-त्वादिघटकतया तत्रापि तत्पदार्थे तत्पदार्थवत्त्वस्य प्रथमं सिद्धेरिति भावः। पूर्वोक्तस्यैवायमुपसंहार इति न पौनरुक्त्यं, आप्तोक्तत्वाद्यभि-प्रायेणेदमिति न पौनरुक्त्यमित्यपि कश्चित्, एवन्तु वैशेषिकदूषणं प्राभाकरमत एव स्यादास्ताकमित्याशयेन उद्धृतमपि दूषणं पुन-रुद्धरन्नाह 'एतेनेति,[६] 'वाक्यार्थतात्पर्य्येति प्रकृतवाक्यार्थयथार्थ-तात्पर्य्येत्यर्थः, 'अवच्छेदकतयेति घटकतयेत्यर्थः, 'तदुपजीविन इति

(१) लिङ्गाभावादेवेति क०।　(२) न तु वस्तुन इति वक्ष्यत इति क०।

(३) किञ्चैवमपीति ख०।　(४) अनुवादकतैवेति ख०।

(५) कारणमात्रस्य ग्रहादिति भाव इति ख०, ग०।

(६) एवञ्चेत्यादिः एतेनेतीत्यन्तः पाठः ख०, ग० पुस्तकद्वये नास्ति।

जीविनोऽनुमानात् स्वातन्त्र्येण वाक्यार्थसिद्धेर्न शब्दः प्रमाणमिति[१] वैशेषिकमतमपास्तं । यथार्थतात्पर्य्य-

यथार्थतात्पर्य्यानुमानोपजीविन इत्यर्थः, 'अनुमानादिति कर्मत्वं घटवत् स्वविशेष्यक-घटप्रकारकयथार्थप्रतीतीच्छयोच्चरितपदस्मारि-तत्वात्[२] घटवत्, स्वप्रतीतीच्छयोच्चरितपदस्मारितत्वाद्वा घटत्व-निकरणत्वादिवदित्यादिक्रमेणानुमानादित्यर्थः, शाब्दसामग्र्यपेक्षया अनुमितिसामग्र्या बलवत्त्वात् सिद्धेश्चानुमितिप्रतिबन्धकत्वे मानाभावादिति भावः । 'स्वातन्त्र्येण' तात्पर्य्याघटकतया, 'वाक्यार्थ-सिद्धेरिति सर्वत्र शाब्दबोधात् पूर्वं तत्तत्पदार्थे तत्तत्पदार्थवत्त्व-सिद्धेरित्यर्थः, 'शब्द इति लोक-वेदसाधारणं शब्दमात्रमित्यर्थः, 'न प्रमाणमिति न अननुवादक इत्यर्थः. 'वैशेषिकमतमिति वैशेषिकैक-देशिमतमित्यर्थः, मीमांसकनये लौकिकशब्दस्यैवानुवादकत्वमेतन्नये च शब्दमात्रस्य तथात्वमिति मतभेदः ।

केचित्तु 'न शब्दः प्रमाणमिति न लौकिकः शब्दोऽननुवादक इत्यर्थः, मीमांसकनये वक्तृज्ञानावच्छेदकतया तदुपजीविसंसर्गानु-मानाद्वा सर्वत्र प्रथमं वाक्यार्थसिद्धेर्लौकिकशब्दस्यानुवादकत्वं, एत-न्नये च यथार्थतात्पर्य्यावच्छेदकतया तदुपजीविपदार्थपञ्चकसंसर्गानु-

(१) न शब्दः पृथक् प्रमाणान्तरमिति क० ।

(२) स्वविशेष्यक-घटप्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वादिति पाठे उच्च-रितत्वपदस्य उच्चरितपदस्मारितत्वमर्थः, अन्यथा कर्मत्वरूपार्थे उच्च-रितत्वाभावेन स्वरूपासिद्धिप्रसङ्ग इति ।

शब्दस्य वाक्यार्थबोधाहेतुत्वात्। यत्तु ज्ञायमानकरणे इति,[1] तन्न, यथार्थतात्पर्यकत्वादेः प्रथमं ज्ञातुमशक्यत्वेनानुमानस्य बाधितत्वात् व्याप्त्यसिद्धेश्च। न हि व्याप्तिः शब्दशक्तिश्च[2] कारणं, किन्तु तद्धीः,[3] अतीतेऽनुमितिदर्शनात्। अपभ्रंशादौ शक्तिभ्रमाद-

---

मानाद्वा सर्वत्र प्रथमं वाक्यार्थसिद्धेर्लौकिकशब्दस्यानुवादकत्वमिति मतभेद इत्याहुः।

'वाक्यार्थबोधेति तत्पदार्थे तत्पदार्थवत्त्वज्ञानाभावेन प्रथमं सर्वत्रासम्भवितया शाब्दबोधाहेतुत्वादित्यर्थः। 'बाधितत्वादिति, ज्ञायमानत्वघटितधर्मावच्छिन्नशाब्दबोधकरणताश्रयत्वरूपस्य ज्ञातोपयोगित्वस्य तत्राभावादिति भावः। हेत्वन्तरमाह, 'व्याप्त्यसिद्धेरिति यत्सञ्ज्ञामुक्तसामान्यव्याप्तेरसिद्धेश्चेत्यर्थः, दृष्टान्ताभावादिति भावः। ननु व्याप्ति-शक्त्योरेव व्याप्तिः सिद्धत्वात आह, 'न हीति, 'कारणं' अनुमिति-शाब्दबोधकारणं, तथाच साध्यज्ञानोपयोगित्वच उपयोगित्वस्य कारणतारूपतया साधनस्य तच नास्तीति भावः। व्याप्तेरनुमितिहेतुत्वाभावे युक्तिमाह, 'अतीत इति अतीतेन लिङ्गेनेत्यर्थः, अतीते लिङ्गे तन्निष्ठसंयोगादिरूपव्याप्तेरतीतत्वादिति भावः। शाब्दबोधाहेतुत्वे युक्तिमाह, 'अपभ्रंशादाविति, इदञ्च

---

(१) इत्यादीति क०। (२) शक्तिश्चेति क०।

(३) किन्तु तद्धीः कारणमिति क०।

न्वयबोधाच । न च सैवोपयुज्यत इति साध्यं, प्रथमं तदसम्भवात् । तस्मात् यत् अर्थाव्यभिचारित्वेन ज्ञातं करणं तत्र व्यभिचारिवैलक्षण्यज्ञानमुपयुज्यते अन्यथा

क्षमते, तच्छक्ते अन्वयसंसर्गग्रहात् शाब्दासंसर्गग्रहस्यैव तत्र स्वीकारादिति ध्येयं । 'सैवेति, 'एवकारः 'इतिशब्दादनन्तरं योज्यः, 'सा' गृहीतवाक्यार्थयथार्थप्रतीतिपरता, 'उपयुज्यते' ज्ञाननिष्ठशाब्दबोधकारणताया विषयतया अवच्छेदिका, 'इत्येव साध्यं' इत्येवानुमेयमित्यर्थः, हेतावपि ज्ञानोपयोगित्वं कारणतावच्छेदकसाधारणं साध्यम्, तथाच न साध्य-साधनविकलो दृष्टान्त इति भावः । 'तदसम्भवादिति यथार्थतात्पर्यज्ञानासम्भवादित्यर्थः, तथाच तथाभिधानेऽपि बाध एवेति भावः । अनुमाने उपाधिमप्याह, 'तस्मादिति; 'यदिति यद्व्यभिचारिवैलक्षण्यमित्यर्थः, यत्र प्रमिताविति शेषः, 'अर्थाव्यभिचारित्वेन' अर्थाव्यभिचारित्वज्ञानसहकारेण, व्याप्तिज्ञानसहकारेणेति यावत्, 'तत्र' प्रमितौ, 'व्यभिचारिवैलक्षण्यज्ञानमिति तद्व्यभिचारिवैलक्षण्यस्यैव ज्ञानमित्यर्थः, व्यभिचारिवैलक्षण्यत्वेनाभिधानं स्वरूपकथनं तस्यैव ज्ञानमुपयुज्यते इत्येव प्रकृतं, तथाच ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वमुपाधिः यत्र ज्ञाननिष्ठयज्ज्ञानकरणतायाः(१) विषयतया अवच्छेदकत्वं तत्र तज्ज्ञानविषयतया व्याप्तिज्ञानजन्यतत्प्रमितिजनकतावच्छेदकत्वं यथा

---

(१) यत्र ज्ञायमानकरणताकयज्ज्ञानकरणताया इति क० ।

मिति चेत्। न। अर्थसंशयस्य तद्बाधसंशयस्य वा प्रमाणाप्रतिबन्धकत्वात्[1]। वह्नि-तद्बाधयोः संशयेऽपि प्रत्यक्षानुमानादिना अर्थनिश्चयात् अन्यथा प्रमाणमात्रोच्छेदः, तत्पूर्व्वमर्थ-तद्बाधसंशयात्। विनाप्यर्थ

संशयस्यैव प्रतिबन्धकत्वमसहमान आह, 'अर्थसंशयस्येति वेको अलङ्करणकत्ववान्न वेत्यादिप्रामाण्यसंशयस्येत्यर्थः, 'तद्बाधसंशयस्येत्यादि वेको अलङ्करणकत्वाभाववान्न वेत्यादिप्रामाण्याभावसंशयस्येत्यर्थः. प्रकारभेदाच्च संशययोर्भेदः, 'प्रमाणेति तन्निश्चयाप्रतिबन्धकत्वादित्यर्थः, 'प्रत्यक्षानुमानादिनेति आदिपदाच्छब्दोद्बुद्धसंस्कारपरिग्रहः, 'अर्थनिश्चयादिति वह्निनिश्चयादित्यर्थः, 'अन्यथा' ग्राह्य-तदभावयोः संशयस्यापि निश्चयप्रतिबन्धकत्वे, वह्नि-तद्बाधयोः संशयदशायामिति शेषः, 'प्रमाणमात्रेति प्रमाणमात्रेणैव वह्निनिश्चयानुत्पत्तिप्रसङ्ग इत्यर्थः, 'अर्थ-तद्बाधेति वह्नि-तद्बाधयोः संशयस्य प्रतिबन्धकस्य सत्त्वादित्यर्थः। ननु विपरीतज्ञान-विशिष्टबुद्ध्योः केन रूपेण प्रतिबध्य-प्रतिबन्धकभाव इति चेदत्र साम्प्रदायिकाः अगृहीताप्रामाण्यक-तद्धर्मधर्मितावच्छेदककतदभावनिश्चयत्वेन प्रतिबन्धकता तदंशे दोषविशेषाजन्यग्राह्यान्यतरलौकिकप्रत्यक्षनिश्चयान्याहार्य्यप्रत्यक्षेतरतद्धर्मधर्मितावच्छेदककतद्विशिष्टबुद्धित्वेन प्रतिबध्यता, सन्दिग्धाप्रामाण्यकस्य निश्चिताप्रामाण्यकस्य वा तदभावनिश्चयस्य सत्त्वेऽपि तद्विशिष्ट-

[1] प्रमाणापरिपन्थित्वादिति क०।

बुभुत्सयोदासीनाप्रामाण्यकेति, संशयोत्तरलौकिकप्रत्यक्षस्य संशयोत्तरोपमिति-संशयकालीनपरामर्शाव्यवहितोत्तरकालीनानुमित्योः धारावाहिकसंशयस्य च सम्पादनाय लघुतरं प्रामाण्यमपहाय गुरोरपि निश्चयत्वस्य प्रवेशः। न चैवं संशयोत्तरं विनापि विशेषदर्शनं प्रात्यक्षिकनिश्चयापत्तिरिति वाच्यं। विशेषदर्शनं विना संशयात्मकविशेषणज्ञानादिरूपकोटिद्वयविशिष्टधीसामग्रीसत्त्वेन कोटिद्वयविशिष्टबुद्धेरेवोत्पादान्न निश्चयसम्भवः[१] विशेषदर्शने चैककोटिविशिष्टबुद्धिप्रतिबन्धादर्थवशात्सिद्धो निश्चय इति[२]। न चैवं विशेषदर्शनोत्पत्तिसमय एव प्रात्यक्षिकनिश्चयापत्तिः प्रतिबन्धकाभावस्य कार्य्यसहवर्त्तितया हेतुत्वेन तदानीमप्युभयकोटिविशिष्टबुद्धिसम्भवादिति[३] वाच्यम्। तदानीमेव प्रात्यक्षिकनिश्चयस्याभ्युपगमात् क्षणविलम्बस्य शपथनिर्णेयत्वात्। न च तथापि पर्वतो वह्न्यभाववानित्यादिसंशयोत्तरं वह्निव्याप्यधूमवानित्यादिविशेषदर्शने सति[४] कथं पर्वतो वह्निमानित्याद्यलौकिकप्रत्यक्षमिति वाच्यं। विशेषदर्शनोत्पत्तिदशायां[५]

---

(१) कोटिद्वयविशिष्टबुद्धेरेवोत्पादात् निश्चयासम्भवादिति क०।

(२) अनुभवसिद्धो निश्चय इतीति ख०, ग०।

(३) तथाच विशेषदर्शनोत्पत्तिप्राक्क्षणे विशेषदर्शनरूपप्रतिबन्धकाभावस्य सत्त्वेऽपि तदुत्पत्तिक्षणे तदभावस्यासत्त्वान्न कार्य्यकालवर्त्तिनो विशेषदर्शनाभावरूपकारणस्य सत्त्वं येन कोटिद्वयविशिष्टबुद्धिः सम्भवतीति भावः।

(४) वह्न्यवच्छेदकीभूतधर्म्मादिदर्शने सतीति ख०, ग०।

(५) अवच्छेदकीभूतधर्म्मदर्शनोत्पत्तिदशायामिति ख०, ग०।

वह्न्यभावभ्रमेऽप्रामाण्यज्ञानोदयात् तदानीमप्रामाण्यज्ञानाभावे तु विशेषदर्शनेन(१) वह्न्यभावभ्रमनाश एव(२) चतुर्थक्षणे वह्निप्रत्यक्षाभ्युपगमात् क्षणविलम्बस्याकिञ्चित्करत्वात्। शङ्खो न पीत इति निश्चये सत्यपि पित्तात्मकदोषवशात् शङ्खः पीत इत्यलौकिकभ्रमस्य वंशो नोरग इति निश्चयेऽपि वंशेऽलौकिकोरगत्वभ्रमस्य(३) इयं दिक् न प्राचीति निश्चयेऽपि इयं दिक् प्राचीत्यलौकिकभ्रमस्य(४) चानुभवसिद्धत्वात् प्रतिबध्यतावच्छेदककोटौ दोषविशेषाजन्येति, भ्रमसामान्यजनकदोषवारणाय विशेषपदं, अन्यथा भ्रममात्रस्यैवाप्रतिबध्यत्वापत्तेः। मुखं चन्द्र इत्यादिनाधितार्थकरूपकादौ बाधनिश्चयेऽप्याहार्य्ययोग्यताभ्रमादंशेऽन्वयबोधादेरनुभवसिद्धत्वाच्छाब्दान्येति, वह्निना सिञ्चतीत्यादौ बाधनिश्चयदशायां शाब्दबुद्ध्यभावस्य तत्पदार्थे तत्पदार्थवत्त्वरूपयोग्यताज्ञानविरहात्, आहार्य्ययोग्यताज्ञाने च बाधनिश्चयेऽपि रूपकादिवत्तत्रापि शाब्दबोधस्येष्टत्वात्। बाधनिश्चयेऽप्याहार्य्यलौकिकप्रत्यक्षोदयादाहार्य्यप्रत्यक्षेतरेति. आहार्य्यत्वञ्च स्वसमानाधिकरण-तद्विशिष्टप्रत्यक्षत्व-तद्विशिष्टानुभवत्वप्रकारकेच्छाव्यवहितोत्तरवर्त्तित्वं तद्विशिष्टानुभवो जायतां तद्विशिष्टज्ञानं जायतामित्यादीच्छासत्त्वेऽपि बाधबुद्धिसत्त्वे अनुमिति-स्मृत्याद्यनु-

---

(१) अप्रामाण्यज्ञानाभावे इत्यनन्तरं अवच्छेदकीभूतधर्म्मदर्शनेनेत्ययं पाठः ख०, ग० पुस्तकद्वये भवितुं युक्तः।

(२) वह्न्यभावभ्रमनाशोत्तरमिति ग०।

(३) मण्डूकवसाञ्जनवशादित्यादिः।

(४) दिग्भ्रमजनकदोषवशादित्यादिः।

द्याप्रत्यक्षपदं, निश्चयत्वस्य गुरुतया बाधनिश्चयोत्तरं संशयापादक-तया च तदुपहाय सामान्यतो बुद्धित्वप्रवेशः, अन्धकारे घटाभाव-निश्चयोत्तरमालोकसमवधाने विनाप्यप्रामाण्यज्ञानं घटलौकिक-प्रत्यक्षस्य कुङ्कुमे गन्धाभावनिश्चयोत्तरं विनाप्यप्रामाण्यज्ञानं तैल-संयोगे गन्धलौकिकप्रत्यक्षस्य चाभ्युपगमात् लौकिकप्रत्यक्षनिश्चयं प्रति समानेन्द्रियजन्यविपरीतलौकिकनिश्चयस्यैव प्रतिबन्धकत्वाभ्युप-गमाच्च लौकिकप्रत्यक्षनिश्चयान्येति, आनुमानिकादितदभावनिश्च-यस्य इन्द्रियान्तरजन्यतदभावनिश्चयस्य च तल्लौकिकसंशयविरोधि-त्वात् प्रतियोगिकोटौ निश्चयत्वप्रवेशः । वस्तुतस्तु नच तल्लौकिक-प्रत्यक्षनिर्णयस्यैव कार्यसहभावेन तल्लौकिकसंशयविरोधितया प्रति-योगिकोटौ निर्णयो न प्रवेशनीयः, किन्तु तल्लौकिकप्रत्यक्षान्यत्वमेव वक्तव्यं । न च तल्लौकिकप्रत्यक्षनिर्णयान्यत्वस्य तल्लौकिकप्रत्यक्षान्यत्वस्य वा प्रवेशे चक्षुरादिना तदभावनिश्चयेऽपि चक्षुरादिना अनुभूय-मानतदारोपानुपपत्तिरिति वाच्यं । अगृहीताप्रामाण्यकतदिन्द्रिय-जन्यतदभावलौकिकनिश्चयत्वेन प्रतिबन्धकता दोषविशेषाजन्यान्या-हार्यतदिन्द्रियजन्यतद्विशिष्टप्रत्यक्षत्वेन प्रतिबध्यतेति प्रतिबध्य-प्रति-बन्धकभावान्तराभ्युपगमात् । चक्षुषा मण्डूकवसाञ्जनदोषवशाद्उर-गत्वाभावाभावलौकिकप्रत्यक्षात्मकभ्रमेऽपि त्वचोरगत्वाभावप्रत्यक्षस्य, चक्षुषा दर्पणादौ मुखाद्यभावाभावलौकिकप्रत्यक्षात्मकभ्रमेऽपि त्वचा दर्पणादौ मुखाद्यभावप्रत्यक्षस्य, अन्धकारे त्वचा घटाभावादिलौकिक-प्रत्यक्षनिश्चयेऽपि आलोकसमवधाने विनाप्यप्रामाण्यज्ञानं घट-लौकिकप्रत्यक्षस्य चानुभवात्तदिन्द्रियजन्येति प्रतिबध्य-प्रतिबन्धकता-

वच्छेदकयोर्विशेषणं, तच्च तत्तदिन्द्रियादिजन्यतावच्छेदकचाक्षुषत्वा-
दिपरिचायकं। न चैवं त्वचा घटाभावलौकिकनिश्चयेऽपि चक्षुषा
घटादिविशिष्टलौकिकप्रत्यक्षापत्तिरिति वाच्यम्। इष्टत्वात्, एवं
मानसानुमितिकादितदभावनिश्चयेऽपि तद्विशिष्टलौकिकप्रत्यक्षस्येष्टत्वात्
समानेन्द्रियजन्योपनीतभानात्मकतदभावनिश्चयेऽपि तद्विशिष्टलौकि-
कप्रत्यक्षोदयात् प्रतिबन्धकतावच्छेदके लौकिकेति, प्रतिबध्यतावच्छे-
दके च तत् न निवेशनीयं प्रयोजनाभावात्, उपनीतभानं प्रत्यपि
अधिकमिति न्यायात् समानेन्द्रियजन्यतदभावलौकिकनिश्चयस्यापि
प्रतिबन्धकत्वात्, चक्षुषा शङ्खो न पीतः अयं नीरग इति लौकिक-
प्रत्यक्षनिश्चयेऽपि तत्समानकालोत्पन्नात् तदुत्तरोत्पन्नाद्वा पित्त-
मण्डूकवसाञ्जनाद्यात्मकदोषात् शङ्खः पीतः अयमुरग इति चाक्षुष-
भ्रमस्य स्फटिको न रक्त इति चाक्षुषलौकिकनिश्चयेऽपि तत्समान-
कालोत्पन्नात् तदुत्तरोत्पन्नाद्वा जवाकुसुमसान्निध्यात्मकदोषाद्रक्तः
स्फटिक इति चाक्षुषभ्रमस्य चोदयाद्दोषविशेषाजन्येति, अन्यत्सर्वं
पूर्ववत्। एवमेव तदभावव्याप्यवत्त्वादिनिश्चय-तद्विशिष्टबुद्ध्योरपि प्रति-
बध्य-प्रतिबन्धकभावो बोध्य इत्याहुः। तदसत्। आहार्य्यप्रत्यक्षेतर-
तद्विशिष्टबुद्धित्वस्य प्रतिबध्यतावच्छेदकत्वे तद्विशिष्टप्रत्यक्षं जायता-
मित्यादीच्छाविरहदशायां बाधनिश्चयसत्त्वे आहार्य्यप्रत्यक्षेतरतद्वि-
शिष्टबुद्धेरसम्भवेऽप्याहार्य्यप्रत्यक्षात्मकतद्विशिष्टबुद्धिप्रसक्तेर्दुर्वारत्वात्।
न चाहार्य्यप्रत्यक्षं प्रति तत्तादिच्छानां विशेषतो हेतुत्वात्तदभावादेव
तदानीं नाहार्य्यप्रत्यक्षोदय इति वाच्यं। अनन्तकार्य्य-कारणभाव-
कल्पनापत्तेः। एवं तद्विशिष्टप्रत्यक्षं जायतामित्यादीच्छासत्त्वे बाध-

नुमाने वाधार्थप्रत्यये तत्तद्विशिष्टबुद्धिवारणायानाहार्य्यप्रत्यक्षं प्रति तदिच्छाभावानां विशेषतोऽहेतुतापत्तेश्चेति[१]। न चाहार्य्यप्रत्यक्षे तत्त्वं प्रतिबन्धकतावच्छेदके न निवेशनीयमपि तु तत्तद्विशिष्टप्रत्यक्षं जायतां तत्तद्विशिष्टानुभवो जायतामितीच्छाविरहस्यैवोत्तेजकत्वमुपेयमिति वाच्यं । तद्विशिष्टप्रत्यक्षं जायतामितीच्छासत्त्वे बाधनिश्चयसत्त्वेऽप्यनुमिति-प्रत्यक्षाद्यापत्तेः ।

केचित्तु अगृहीताप्रामाण्यकतदभावनिश्चयत्वेन प्रतिबन्धकताप्रत्यक्ष-शाब्दान्यतद्विशिष्टबुद्धित्वेन प्रतिबध्यतेति स्मृत्यनुमितिसाधारण:[२] एक: प्रतिबध्य-प्रतिबन्धकभाव:, प्रत्यक्षं प्रति तु तद्विशिष्टप्रत्यक्षत्वादिप्रकारकेच्छाविरहविशिष्टागृहीताप्रामाण्यकतदभावनिश्चयत्वेन प्रतिबन्धकता तदंशे दोषविशेषाजन्य-तल्लौकिकप्रत्यक्षनिष्ठयान्य-तद्विशिष्टप्रत्यक्षत्वेन प्रतिबध्यतेति लौकिकालौकिकसंप्रयोगोपनीतभानसाधारण:[३] एक:, अपरश्च तद्विशिष्टप्रत्यक्षत्वादिप्रकारकेच्छाविरहकूटविशिष्टागृहीताप्रामाण्यकतदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेन[४] प्रतिबन्धकता तदंशे दोषविशेषाजन्यतदिन्द्रियजन्यतद्विशिष्टलौकिकप्रत्यक्षत्वेन प्रतिबध्यतेति लौकिकप्रत्यक्षमात्रसाधारण-

---

(१) तदिच्छाभावानां हेतुत्वापत्तेश्चेति ख०, ग०।

(२) स्मृत्यनुमित्युपमितिमात्रसाधारण इति क०।

(३) लौकिकालौकिकसंप्रयोगोपनीतभानोभयसाधारण इति क०, लौकिकालौकिकसंप्रयोगोपनीतभानप्रत्यक्षमात्रसाधारण इति ग०।

(४) अगृहीताप्रामाण्यकतद्विशिष्टप्रत्यक्षत्वादिप्रकारकेच्छाविरहकूट विशिष्टतदिन्द्रियजन्यलौकिकतदभावनिश्चयत्वेनेति ख०, ग०।

इति प्रतिबध्य-प्रतिबन्धकभावचयं, एवमेव तदभावव्याप्यवत्त्वादि-निश्चय-तद्विशिष्टबुद्ध्योरपीति प्राहुः ।

वस्तुतस्तु सम्प्रदायमतमेव रमणीयं तद्विशिष्टप्रत्यक्षत्वादिप्रकारके-च्छाविरहकूटानां परस्परं विशेषण-विशेष्यभावे विनिगमनाभावादनन्त-कार्य्य-कारणभावावश्यकतया[1] तदपेक्षयाव्यवहितोत्तरवर्त्तित्वसम्ब-न्धेन तादृशतादृशेच्छावत्प्रत्यक्षत्वावच्छिन्नं प्रति तादृशतादृशेच्छाना-मनाहार्य्यप्रत्यक्षं प्रति तादृशतादृशेच्छाभावानाञ्च हेतुत्वस्यैव लघी-यस्त्वात्[2] । न च तादृशेच्छाविरहकूटानां विशेषण-विशेष्यभाव-भेदेन प्रतियोगितावच्छेदकभेदेऽपि समनियततया अभावस्यैकत्वा-दानन्त्यकार्य्य-कारणभाव इति[3] वाच्यं । अभावस्य धर्म्मिण एकत्वे-ऽपि प्रतियोगितावच्छेदकभेदेन तत्तत्प्रतियोगितावच्छेदकघटित-धर्म्माणां विनिगमनाविरहेण कारणतावच्छेदकीभूतानां नानात्वात्-

---

(1) न च तत्तदिच्छाविरहकूटत्वेन तत्तदिच्छाविरहकूटस्य कारणतावच्छे-दकत्वसम्भवे विशेषण-विशेष्यभावे विनिगमनाविरहात् कथं कार्य्य-कारणभावानन्त्यमिति वाच्यं । एककारणपर्य्याप्तैवपर्य्याप्तिमिया व्या-सज्यवृत्तिकारणतावच्छेदकत्वानङ्गीकारेण कूटत्वेन तत्तदिच्छाविरह-कूटस्य कारणतावच्छेदकत्वासम्भवात् ।

(2) तादृशतादृशेच्छावत्प्रत्यक्षत्वावच्छिन्नं प्रति तादृशतादृशेच्छाया हेतु-त्वस्यैव लघीयस्त्वमिति भा० ।

(3) तथाच तदिच्छाविरहविशिष्टापरेच्छाविरहविशिष्टतदभावनिश्चयत्वा-वच्छिन्नाभावस्य अपरेच्छाविरहविशिष्टतदिच्छाविरहविशिष्टतदभाव-निश्चयत्वावच्छिन्नाभावसमनियतत्वेन अभिन्नतया न कारणानन्त्यमिति भावः ।

णाकार्य्य-कारणभावस्य दुर्वारत्वात्[1]। न च तद्व्यक्तित्वेन तदभाव-व्यक्तेर्हेतुत्वं न तु प्रतियोगितावच्छेदकानां कारणतावच्छेदकत्वेऽप्यभाव-इति वाच्यं। अभावस्य तद्व्यक्तित्वेन हेतुत्वेऽपसिद्धान्तात् प्रतियो-गितावच्छेदकप्रतियोगिघटितधर्म्मेणैवाभावस्य हेतुत्वनियमादन्यथा अगृहीताप्रामाण्यकाव्यभिचाराकाङ्क्षादिनिश्चयस्य हेतुत्वमपेक्ष्य अ-निश्चिताप्रामाण्यकव्यभिचारज्ञानाकाङ्क्षादिव्यतिरेकज्ञानाभावस्य[2] हेतुतायां गौरवाभिधानस्यासङ्गतत्वापत्तेरिति।

उच्छृङ्खलास्तु तल्लौकिकप्रत्यक्षान्यत्वं प्रतिबध्यतावच्छेदके न निवेशनीयमपि तु लौकिकालौकिकप्रत्यक्षसाधारणविशिष्टबुद्धित्व-मेकमेव[3] प्रतिबध्यतावच्छेदकं वाच्यं। न चैवमुपनीतभानानुमि-त्याद्यात्मकतदभावनिश्चयसत्त्वे इन्द्रियान्तरजन्यलौकिकतदभावनिश्च-यसत्त्वेऽपि च तद्विशिष्टलौकिकप्रत्यक्षं न स्यादिति वाच्यं। अप्रत्य-प्रामाण्यज्ञाने तदानीं तदनुत्पादस्येष्टत्वात्। तथाच साम्प्रदायिक-

(१) तथाच कारणीभूतस्याभावस्य एकत्वेऽपि कारणतावच्छेदकीभूतानां तत्तदिच्छाविरहाणां मध्ये एकस्य कारणतावच्छेदकत्वं अपरस्य कारणतावच्छेदकतावच्छेदकत्वं इत्यत्र विनिगमनाभावेन कारणबहुत्वमिति भावः।

अनिश्चिताप्रामाण्यकव्यभिचारज्ञानाभावस्य अनिश्चिताप्रामाण्यकाकाङ्क्षादिव्यतिरेकज्ञानाभावस्य चैकत्वे, सन्दिग्धाप्रामाण्यकव्यभिचार-निश्चयस्य व्यभिचारसंशयपर्य्यवसन्नतया तादृशनिश्चयदशायां अनु-मितिवारणाय अगृहीताप्रामाण्यकत्वमपहाय अनिश्चिताप्रामाण्यक-त्वविशेषणमुक्तमिति।

(३) लौकिकालौकिकसाधारणज्ञानत्वमेवेति ख०, ग०।

मतानुधावित्वे एकएव प्रतिबध्य-प्रतिबन्धकभावः, इतरथा उत्तेजकत्वपक्षे च प्रतिबध्य-प्रतिबन्धकभावद्वयं लौकिकप्रत्यक्षं प्रति पृथक्-प्रतिबध्य-प्रतिबन्धकभावकल्पनात्, एवं शाब्दान्यत्वमपि प्रतिबध्यतावच्छेदके न निवेशनीयमपि तु लाघवाच्छाब्दधीसाधारणमेव प्रतिबध्यतावच्छेदकमुपेयं मुखं चन्द्र इत्यादिबाधितार्थकरूपकादौ तु मुखादिषु न चन्द्राद्यभेदान्वयबोधः किन्तु चन्द्रपदस्य चन्द्रसदृशादौ लक्षणया तदभेदादिरेव मुखादौ बोध इत्यभ्युपगमात्। न चैवं योग्यताज्ञानस्य शाब्दधीहेतुत्वे मानाभावः वह्निना सिञ्चतीत्यादौ बाधनिश्चयस्य प्रतिबन्धकत्वादेव शाब्दबोधाभावोपपत्तेरिति वाच्यं। तद्धेतुत्वाभावस्येष्टत्वात्, बाधनिश्चयस्य प्रतिबध्यतावच्छेदके शाब्दान्यत्वं प्रवेश्य शाब्दबोधं प्रति योग्यताज्ञानरूपकारणान्तरकल्पनाया अन्याय्यत्वात् प्रक्षालनाद्धीतिन्यायात्[१] इत्याहुः।

उपाध्यायास्तु पर्वतो वह्न्यभाववानित्यादिभ्रमोत्तरं वह्निव्याप्यधूमवान्पर्वत इत्यादिविशेषदर्शने सति विनापि वह्न्यभावभ्रमेऽप्रामाण्यज्ञानं द्वितीयक्षण एव पर्वतो वह्निमानिति प्रत्यक्षस्यानुभवसिद्धत्वात् स्थाणुर्न वेति संशयोत्तरं विशेषदर्शनाद्द्वितीयक्षण एवायं स्थाणुरिति प्रात्यक्षिकनिश्चयो न तु विशेषदर्शनाद्युत्पत्तिसमये इत्यस्याप्यनुभवसिद्धत्वाच्च संशय-निश्चयसाधारणं विशेषदर्शनाद्यभावविशिष्टानिश्चिताप्रामाण्यकतदभावज्ञानत्वमेव प्रतिबन्धकतावच्छेदकं न तु केवलमगृहीताप्रामाण्यकतदभावनिश्चयत्वं। न चैतस्य प्रतिबध्यतावच्छेदकं यदि तदंशे दोषविशेषाजन्य-शाब्दान्य-तल्लौकिकप्रत्यक्षनिश्चयान्या-

(१) प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायादित्यर्थः।

शाब्दप्रत्यक्षेतरतद्विशिष्टबुद्धित्वं तदा संशयोत्तरमपि संशयो न स्यात् संशयोत्तरमुपमितिः स्मृतिश्च न स्यात् बाधनिश्चयोत्तरमप्यनुमितिः स्यात्[1] परामर्शात्मकविशेषदर्शनसत्त्वादिति वाच्यं । तदंशे दोष-विशेषाजन्य-तदलौकिकप्रत्यक्षान्यशाब्दप्रत्यक्षेतरतद्विशिष्टप्रत्यक्षनिश्चयत्वस्य प्रतिबध्यतावच्छेदकत्वात् । न चैवमपि बाधनिश्चयोत्तरमपि संशयापत्तिर्बाधनिश्चयोत्तरं स्मृत्यनुमित्यापत्तिश्चेति[2] वाच्यं । अगृहीताप्रामाण्यकतदभावनिश्चयत्वेन प्रतिबन्धकता तदंशे दोष-विशेषाजन्य-शाब्दान्य-तत्प्रत्यक्षनिश्चयान्यानाहार्यतद्विशिष्टबुद्धित्वेन प्रतिबध्यतेति लौकिकालौकिकसंशय-स्मृत्यनुमित्युपमितिसाधारण-प्रतिबध्य-प्रतिबन्धकभावान्तराभ्युपगमात् । अत्र च विशेषदर्शनादेर्नोत्तेजकत्वं, दोषविशेषजन्यसंशयव्युदासाय दोषविशेषाजन्येति, आहार्यसंशयव्युदासायानाहार्येति, लौकिकप्रत्यक्षं प्रति च विशेषदर्शनाद्यभावविशिष्टानिश्चिताप्रामाण्यक-तदिन्द्रियजन्य-तदभावलौकिकविशिष्टज्ञानत्वेन प्रतिबन्धकता दोषविशेषाजन्यानाहार्य-तदिन्द्रियजन्यतद्विशिष्टलौकिकप्रत्यक्षनिश्चयत्वेन प्रतिबध्यतेति प्रतिबध्य-प्रतिबन्धकभावद्वयमित्याहुः । तदसत् । दोषैकविलम्बाद्दोषतया भ्रम-संशयोत्तरप्रत्यक्षस्थले चलौकापत्तापादेव सर्वोपपत्तौ प्रतिबध्य-प्रतिबन्धकभावद्वयकल्पनस्यान्याय्यत्वात् विशेषदर्शनाद्यभावविशिष्टत्वस्य प्रतिबन्धकतावच्छेदककोटिप्रवेशे गौरवाच्च ।

---

(1) बाधनिश्चयोत्तरमप्यनुमित्यापत्तिश्चेति ख०, ग० ।

(2) स्मृत्युपमित्यापत्तिरिति ख०, स्मृत्यनुमित्युपमित्यापत्तिश्चेति ग० ।

निश्चयस्तु आहार्य्यादिप्रत्यक्षवत् प्रत्यक्षनिश्चयमात्रं प्रत्येव तदभाव-
निश्चयस्तदभावसंशयश्च न विरोधी अतएव पर्वतो वह्न्यभाववानि-
त्यादिभ्रमोत्तरं विशेषदर्शने सति विनाप्यप्रामाण्यज्ञानं तृतीयक्षणे एव
पर्वतो वह्निमानित्यादिप्रत्यक्षनिश्चयो नानुपपन्नः, एवञ्च अगृहीता-
प्रामाण्यकतदभावनिश्चयत्वेन प्रतिबन्धकता तदंशे दोषविशेषाजन्य-
शाब्दान्य-तत्प्रत्यक्षनिश्चयान्याहार्य्यप्रत्यक्षेतरतद्विशिष्टबुद्धित्वेन प्रति-
बध्यतेत्येक एव विपरीतज्ञान-विशिष्टबुद्ध्योः प्रतिबध्य-प्रतिबन्धकभावः।
न चैवं तदभावनिश्चयोत्तरं विनापि विशेषदर्शनं तद्विशिष्टप्रत्यक्षनिश्च-
यापत्तिः तदभावसंशयोत्तरं विशेषदर्शनोत्पत्तिसमय एव तद्विशिष्ट-
प्रत्यक्षनिश्चयापत्तिश्चेति वाच्यं। तल्लौकिकप्रत्यक्षनिश्चयान्यागृहीताप्रा-
माण्यक-तद्विपरीतज्ञानाव्यवहितोत्तरतत्प्रत्यक्षनिश्चयत्वावच्छिन्नं प्रति
तद्विपरीतज्ञानविरोधित्वेन विशेषदर्शनादेर्हेतुत्वात् आनुमानिकादि-
तदभावनिश्चयोत्तरं तदिन्द्रियान्तरजन्यतदभावलौकिकप्रत्यक्षोत्तरञ्च
विनापि विशेषदर्शनादिकं तल्लौकिकनिश्चयोदयात् तल्लौकिकप्रत्यक्ष-
निश्चयान्येति तत्प्रत्यक्षनिश्चयविशेषणं। न चैवं समानेन्द्रियजन्य-
तदभावलौकिकप्रत्यक्षोत्तरमपि विना विशेषदर्शनं तल्लौकिकप्रत्यक्ष-
निश्चयापत्तिरिति वाच्यं। तदिन्द्रियजन्यतद्विपरीतलौकिकप्रत्यक्षा-
व्यवहितोत्तरतदिन्द्रियजन्यतल्लौकिकप्रत्यक्षनिश्चयत्वावच्छिन्नं प्रत्यपि
तद्विपरीतज्ञानविरोधित्वेन विशेषदर्शनादेर्हेतुत्वकल्पनात्, अव्यवहि-
तोत्तरत्वञ्च[१] उभयत्रैवोत्पत्तिक्षणसाधारणं तेन विपरीतनिश्चय-

(१) स्वोत्पत्तिक्षणसाधारणं स्वाव्यवहितोत्तरत्वञ्च स्वध्वंसाधिकरणसमय-
ध्वंसानधिकरणत्वे सति स्वप्रागभावानधिकरणत्वमिति।

तद्विशिष्टप्रत्यक्षनिश्चययोर्न युगपदुत्पत्तिरित्याहुः। तदत्यन्तमसत्, विशेषदर्शनं विना भ्रमसंशयोत्तरं विपरीतज्ञानोत्तरतत्प्रत्यक्षनिश्चयानुत्पादेऽपि तत्प्रत्यक्षनिश्चयसामान्योत्पत्त्यापत्तेः(१) तद्विपरीतज्ञानं विना केवलविशेषादर्शनादिदशायामपि तद्विपरीतज्ञानोत्तरतत्प्रत्यक्षनिश्चयापत्तेश्च। अथ तद्विपरीतज्ञानानुत्तरतत्प्रत्यक्षनिश्चयत्वावच्छिन्नं प्रति तदभावज्ञानत्वेन प्रतिबन्धकत्वं वाच्यमतो नाद्यो दोषः, तद्विपरीतज्ञानोत्तरतत्प्रत्यक्षनिश्चयत्वावच्छिन्नं प्रति तद्विपरीतज्ञानत्वेनापि हेतुत्वाभ्युपगमान्न द्वितीयोऽपीति चेत्, कार्य्य-कारणभावबाहुल्या-दुपाध्यायमतापेक्षयापि महद्गौरवं। अथ तद्विपरीतज्ञानानुत्तर-तत्प्रत्यक्षनिश्चयत्वावच्छिन्नं प्रति तदभावज्ञानत्वेन प्रतिबन्धकत्वादेव नाद्यो दोषः, न वा द्वितीयो दोषः विशेषदर्शनस्य हि तद्विपरीत-ज्ञानोत्तरतत्प्रत्यक्षनिश्चयत्वं न कार्य्यतावच्छेदकमपि तु तद्विपरीत-ज्ञानविरोधिप्रत्यक्षत्वं मत्वर्थस्याव्यवहितोत्तरत्वं तच्च केवलविशेष-दर्शनदशायां जायत एवेति। न च तद्विपरीतज्ञानानुत्तरप्रत्यक्ष-निश्चयत्वावच्छिन्नं प्रति तदभावज्ञानत्वेन प्रतिबन्धकत्वे सति तद-भावनिश्चये विशेषदर्शनादिकं विनापि विपरीतज्ञानोत्तरप्रत्यक्षा-पत्तिरिति वाच्यं। विपरीतज्ञानविरोधितत्प्रत्यक्षातिरिक्तस्य विप-रीतज्ञानोत्तरप्रत्यक्षस्यालीकतया विशेषदर्शनात्मकविपरीतज्ञान-विरोधिनोऽभावादेव तत्र तदनुत्पादादिति चेत्, एवमभिधाने कार्य्य-कारणभावबाहुल्याभावेऽपि अव्यवहितोत्तरत्वादिप्रवेशेन उपा-

(१) सामान्यसामग्रीसत्त्वादिति पाठः।

वाक्यरचना सम्भवत्यत एतस्यायमर्थो न वा, एतत्सदर्थकं

व्याप्यापेक्षया कार्य्यतावच्छेदकगौरवस्य दुर्व्वारत्वात्[१]। किञ्च व्याप्यदर्शन-व्यावर्त्तकधर्मादिदर्शनसाधारणस्य तद्विपरीतज्ञानविरोधितावच्छेदकस्यैकस्याभावात्तद्विपरीतज्ञानविरोधित्वमप्यननुगतं। अपि च कुङ्कुमादौ गन्धाद्यभावलौकिकभ्रमोत्तरं तेजआदिसंयोगे विनापि व्याप्यदर्शनादिरूपतद्विपरीतज्ञानविरोधिनं गन्धादिलौकिकप्रत्यक्षनिश्चयोदयाद्व्यभिचारः। न च तत्र तेजआदिसंयोग एव विपरीतज्ञानविरोध्यस्तीति वाच्यं। तस्य तद्विरोधित्वे मानाभावात्। तत्राप्रामाण्यज्ञानानभ्युपगमे स्वर्णेकापलापादेवोपपत्तिरिति चेत्, किमेतावत्कुसृष्ट्या वह्न्यभावभ्रमादिस्थलेऽपि तथा वक्तुं शक्यत्वादिति सङ्क्षेपः।

ननु न वयमुक्तसंशयस्य प्रतिबन्धकत्वं ब्रूमः किन्तूक्तसामग्री नार्थनिश्चायिका संशयसामग्रीत्वादित्यत्र परिहारान्तरमाह, 'विनापीति, वस्तुतस्तु भवतु साध्यसंशयः प्रतिबन्धकस्तथापि न क्षतिरित्यभ्युपगमवादेन समाधानान्तरमाह, 'विनापीति, 'अर्थं' जलकरणकत्ववत्सेकादिकं, 'वाक्यरचना सम्भवति' आकाङ्क्षादिमद्वाक्यप्रयोगो भवति, जलकरणकत्ववत्सेकाद्यप्रतिपादकमप्याकाङ्क्षादिमद्वाक्यमस्तीति यावत्, एतेनाकाङ्क्षादिमद्वाक्यत्वं तादृशवाक्यजन्यज्ञानत्वञ्च साधारणधर्म इति दर्शितं, जलेन सिञ्चतीत्यादिवाक्यप्रयोगविषयोऽपि च सेकादिकमस्तीति शेषः, तेन प्रतिपाद्यत्वकोटिकसंशये सेकत्वादिरूपसाधारणधर्मलाभः, 'अत इति, आकाङ्क्षादिमद्वाक्यत्वरूपसमानधर्मदर्श-

---

(१) व्याप्येत्यादिः दुर्व्वारत्वादित्यन्तः पाठः क॰पुस्तके नास्ति।

न वा, एतज्जन्यज्ञानं सद्विषयकं न वेति संशयस्यार्था-

त्मादिति शेषः, 'अयमिति, 'एतस्य' वाक्यस्य, 'अर्थः' प्रतिपाद्यः, 'अयं न वा' जलकरणकत्ववत्सेकादिर्न वेत्यर्थः, तादात्म्यसम्बन्धेन जलकरणकत्ववत्सेकादिकोटिरिति भावः ।

केचित्तु 'अयं' जलकरणकत्ववत्सेकादिः, 'एतस्य' वाक्यस्य, 'अर्थः' प्रतिपाद्यो न वेत्यर्थः, इत्याहुः । तदसत् । एतस्य सेके जलकरणत्वांशे सन्देहरूपत्वेऽपसिद्धान्तात् धर्मितावच्छेदकांशे संशयाकारसंशयानभ्युपगमात् । तदंशे निश्चयाकारत्वे च शाब्दसंशयत्वानुपपत्तेरिति ध्येयं ।

'एतदिति एतद्वाक्यं जलकरणकत्ववत्सेकादिप्रतीतिजनकं न वेत्यर्थः, 'सद्विषयकमिति जलकरणकत्ववत्सेकादिविषयकं न वेत्यर्थः, 'संशयस्येति, शाब्दसंशयपर्य्यवसन्नस्येति शेषः, धर्म्मिणि सेकत्व-सेकविषयकत्वयोर्निश्चयसत्त्वेन प्रतिपाद्यधर्म्मिकसंशय-ज्ञानधर्म्मिक-संशययोरपि सेके जलकरणकत्वसन्देहपर्य्यवसन्नत्वादिति भावः । 'अर्थावगमेति शाब्दबुद्धेरुत्तरकाल एव सम्भवादित्यर्थः, तथा च शाब्दबोधात्पूर्व्वमसम्भवादेवेति(१) फलितार्थः, संशयस्योपनीतभानात्मकतया तदपेक्षया शाब्दसामग्र्या बलवत्त्वादन्यथा सर्व्वत्रोपनीतभानस्यैव सम्भवाच्छाब्दबोधस्यैव दुर्लभत्वापत्तेरिति भावः ।

मिश्रास्तु 'अर्थावगमेति शाब्दबोधपूर्वं सेकादौ जलकरणकत्वा-

(१) शाब्दबोधात् पूर्व्वं संशयसामग्र्यसम्भवादितीति क० ।

वगमोत्तरकालीनत्वाच्च(१)। तस्मादाप्तोक्तत्वं भ्रमाद्य-जन्यत्वं अबाधितार्थकत्वं यथार्थवाक्यार्थप्रतीतिपरत्वं वा ज्ञातं अनुगतमपि न हेतुः प्रथमं ग्रहीतुमशक्य-

---

दनिश्चयाभावेन शाब्दबुद्धेरुत्तरकाल एव सम्भवादित्यर्थः, विशेषणतावच्छेदकप्रकारकनिर्णयं विना विशिष्टवैशिष्ट्यसंशयासम्भवादिति भावः, इत्याहुः। तदसत्। उक्तसंशयानां सेके जलकरणत्वांशे संशयाकारतया विशिष्टवैशिष्ट्यज्ञानानात्मकतया शाब्दबोधं विनापि खण्डशस्तत्पदार्थज्ञानादेव विशेष्ये विशेषणमितिन्यायेन सम्भवात् विशिष्टवैशिष्ट्यज्ञानरूपत्वेऽपि प्रमाणान्तरजन्य-तन्निश्चयसम्भवाच्चेति दिक्।

यथार्थतात्पर्य्यादिज्ञानस्य शाब्दबोधाहेतुत्वे किं शाब्दबोधे कारणमिति(२) प्रतिपादयितुं पुनरुपसंहरति, 'तस्मादिति, 'आप्तोक्तत्वमिति तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकयथार्थज्ञानवदुक्तत्वरूपं तत्पदार्थवत्तत्पदार्थज्ञानवदुक्तत्वरूपं वा आप्तोक्तत्वमित्यर्थः, 'अबाधितार्थकत्वमिति तत्पदार्थवत्तत्पदार्थप्रतीतिजनकत्वमित्यर्थः, 'यथार्थवाक्यार्थेति तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकयथार्थप्रतीतीच्छयोच्चरितत्वरूपं तत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपं वा यथार्थतात्पर्य्यमित्यर्थः, 'प्रथमं' शाब्दबोधात्पूर्व्वं, 'ज्ञातुमशक्यत्वा-

---

(१) अर्थावगमोत्तरकालीनत्वादिति क०।

(२) किं किं शाब्दकारणमितीति ख०।

त्वात्, किन्तु तात्पर्य्यग्राहकत्वेनाभिमतानां न्याय-जन्यज्ञान-प्रकरणादीनामन्यतरत् तात्पर्य्यव्याप्यत्वेना-

दिति[१] शाब्दबोधात्पूर्व्वं विशिष्य तत्पदार्थे तत्पदार्थसंसर्गज्ञाना-भावात् आप्तोक्तत्वादेर्ग्रहीतुमशक्यत्वादित्यर्थः, 'तात्पर्य्यग्राहकत्वे-नेति. एतच्च एकदेशिमतेन, स्वमते तु तत्पदार्थविशेष्यक-तत्पदार्थ-प्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यज्ञानस्यैव हेतुत्वेन वक्ष्यमाण-त्वादिति ध्येयं । 'न्यायजन्यज्ञानेति वेदाभिप्रायेण, 'प्रकरणादीनां' प्रकरणादिज्ञानानां, 'तात्पर्य्यव्याप्यत्वेनेति तात्पर्य्यस्य व्याप्यं विषय-तया यस्येति व्युत्पत्त्या तात्पर्य्यव्याप्यविषयकत्वेनेत्यर्थः, यथाश्रुते न्यायजन्यज्ञानस्य तात्पर्य्यव्याप्यत्वाभावादनन्वयापत्तेः, अत्र तात्पर्य्यं तद्विशेष्यक-तत्प्रकारकप्रतीतीच्छयोच्चरितत्वं न तु तत्पदार्थवत्तत्प-दार्थप्रतीतीच्छयोच्चरितत्वं, वह्निना सिञ्चतीत्यादावभावात् । इद-मापाततः तात्पर्य्यव्याप्यविषयकज्ञानत्वेन कारणत्वे तात्पर्य्यव्याप्ये भोजनादिरूपप्रकरणत्वभ्रमेण विषयाबाधात् शाब्दप्रमानुपपत्तेः प्रमेयत्वादिरूपेण तज्ज्ञानाच्छाब्दबोधापत्तेश्च । न च तात्पर्य्य-व्याप्यत्वप्रकारकज्ञानत्वेन हेतुत्वमिति वाच्यं । सर्व्वत्र तेन रूपेण ज्ञानाभावेन अव्यापकत्वात् । नापि तात्पर्य्यव्याप्यतावच्छेदकप्रकारक-ज्ञानत्वेन हेतुत्वं प्रमेयवदित्यादिज्ञानाद्व्यावृत्तेः संसर्गभेदेन तात्पर्य्य-व्याप्यत्व-तदवच्छेदकत्वयोरप्यननुगतत्वाच्च । वस्तुतस्तु तत्तत्प्रकरणत्वा-

(१) 'ग्रहीतुमशक्यत्वादित्यत्र 'ज्ञातुमशक्यत्वादिति कस्यचिन्मूलपुस्तकस्य पाठमनुसृत्य ईदृशपाठधारणमित्यनुमीयते'।

अनुगतं, तथाकाङ्क्षासत्तिनिश्चयः, तद्विपर्य्यये संशये च शाब्दज्ञानाभावात्। योग्यतायाश्च ज्ञानमात्रं हेतुः तत्संशये विपर्य्यये प्रमायाञ्च वाक्यार्थज्ञानात्, तथा विभक्त्यादिसमभिव्याहारः सम्भूयोच्चारणञ्च शाब्द-

---

दिना तत्तत्प्रकरणादिज्ञानं तत्तच्छाब्दे विशिष्य हेतुरित्येव तत्त्वं[1]। आकाङ्क्षासत्तिनिश्चययोर्हेतुत्वे मानमाह, 'तद्विपर्यय' इति तयोर्व्यतिरेकनिश्चये इत्यर्थः, 'संशये च' तयोः संशये च, तयोश्च यत्संशयेत्यादिव्याप्तिबलात्[2] तयोर्निश्चयस्य हेतुतेति भावः। 'तत्-संशये' योग्यतायाः संशये, 'विपर्यये' तस्या निश्चयात्मकभ्रमे, 'प्रमायां' तस्या निश्चयात्मकप्रमायां, 'विभक्त्यादी'ति कर्मादिवाचक-विभक्त्यादिपदज्ञानमित्यर्थः, तेन पदयोः समभिव्याहाररूपाकाङ्क्षा-ज्ञानतोभेदः, 'आदिपदा'न्नाम-धात्वात्मकपदपरिग्रहः, 'सम्भूये'ति

---

(१) वस्तुतस्तु इदानीं वक्तुरनार्थे न तात्पर्य्यं दिनान्तरे तात्पर्य्यमासीत्, इदं वाक्यं नैतत्तात्पर्य्यकं वाक्यमेतत्तात्पर्य्यकमित्यादितः शाब्दबोधानुदयात् तत्कालीन-तत्तत्पुरुषीय-तत्तद्वाक्यत्वादिप्रकारकतात्पर्य्यज्ञानत्वेन कारणत्वस्यानुगतत्वाभावात् कार्य्यतावच्छेदकस्याप्यननुगमेन तत्तद्व्यक्तित्वेन कार्य्य-कारणभावपर्य्यवसानात् तद्धेतोरिति न्यायेन तत्तत्प्रकरणत्वादिना तत्तत्प्रकरणादिज्ञानमेव तत्तच्छाब्दबोधे विशिष्य हेतुरित्येव तत्त्वं इत्यधिकः पाठः क०-पुस्तके वर्त्तते।

(२) यस्य संशये यस्य व्यतिरेकनिश्चये च यस्यानुत्पादः तन्निश्चयः तत्र कारणमिति व्याप्तिबलादित्यर्थः।

ज्ञानमात्रे कारणानि नानार्थे श्लिष्टे चानेकोपस्थिता-
वपि प्रकरणादिवशादेकमर्थमादायान्वयबोधः। त-

परस्परसहकारेणैकान्वयबुद्धिजनकत्वज्ञानमित्यर्थः, इदञ्च तात्पर्य्यस्य प्रकरणादेर्वा ज्ञानकालेऽपि सम्भूयैकार्थप्रतिपादकानि नैतत्पदानीति ज्ञानकालेऽपि न शाब्दबोध इत्यनुभवमनुसृत्याभिहितं। वस्तुतोऽस्य हेतुत्वे मानाभाव इत्यवधेयं।

केचित्तु सम्भूयैकार्थप्रतिपादनतात्पर्य्यकत्वं एतस्यार्थः तच्च ज्ञात-मुपयुज्यते इति तद्भ्रमादप्यन्वयबोधदर्शनादित्याहुः[1]।

ननु यथार्थतात्पर्य्यग्रहस्य हेतुत्वे कुतो नानार्थादावनेकार्थोप-स्थितावपि प्रायशः एकार्थमादायैवान्वयबोध इत्यत आह, 'नानार्थ' इति यत्रोभयत्रैव प्रकरणसम्भवस्तत्रैकत्र तात्पर्य्यविरहे उभयार्थमा-दायान्वयबोधे इष्टापत्तिरेव शरणमिति ध्येयं[2]। 'श्लिष्टे' चेति श्वेत-गुणविशिष्टोधावति श्वा इतो धावतीत्यर्थद्वयके श्वेतो धावतीत्यादि-वाक्ये इत्यर्थः, 'प्रकरणादिवशादिति एकार्थग्राहकप्रकरणादिमात्र-सत्त्वादित्यर्थः, 'एकमर्थं' एकमेवार्थं। ननु तथापि यथार्थतात्पर्य्य-ग्रहस्य हेतुत्वे यष्टीः प्रवेशयेत्यादिलाक्षणिकस्थले वृत्तिजन्योपस्थि-त्यादेरविशिष्टत्वेऽपि प्रायशोलक्ष्यार्थस्य यष्टिधरस्यैवान्वयधीर्न तु शक्याया यष्टेरिति कुतो नियम इत्यत आह, 'लक्षणा' चेति

(१) केचित्त्वित्यादिः आहुरित्यन्तः पाठः ख०, ग० पुस्तकद्वये नास्ति।

(२) तत्रेत्यादिः ध्येयमित्यन्तः पाठः ख०, ग० पुस्तकद्वये नास्ति।

स्रणा च[१] न तात्पर्य्यानुपपत्त्या किन्त्वन्वयानुपपत्त्यैव प्रकरणाद्भोजनप्रयोजनकत्वेनावगतप्रवेशनस्य यष्ट्य- न्वयानुपपत्तेः। अजहत्स्वार्थायां प्रकरणादेव छत्रि-

मुख्यार्थस्यैवान्वयबोधस्येत्यर्थः, शक्यार्थानन्वयबोधस्येति यावत्, 'न तात्पर्य्येति न मुख्यार्थतात्पर्य्यग्रहाभावेनेत्यर्थः, 'अन्वयेति अन्वयिनि अन्वयितावच्छेदकसम्बन्धेन मुख्यार्थाभावनिश्चयेनैवेत्यर्थः। ननु यष्टीः प्रवेशयेत्यत्र प्रवेशनस्यैव यष्टिपदार्थान्वयितया न तत्र शक्यार्थस्य यष्टे- रभावनिश्चयः यष्टेरपि प्रवेशनसम्भवादित्यत आह, 'प्रकरणादिति, 'अवगतेत्यनेनान्वयः, 'भोजनप्रयोजनकत्वेनेति भोजनानुकूलत्वेने- त्यर्थः, विशेषणे तृतीया, तथा च प्रकरणविशेषात् प्रवेशनत्वरूपेणोप- स्थितस्य भोजनानुकूलप्रवेशनस्येत्यर्थः, अन्वयिन इति शेषः, 'यष्ट्य- न्वयानुपपत्तेरिति प्रवेशनत्वरूपेण प्रवेशने कर्मतासम्बन्धेन यष्टेरभाव- निश्चयादित्यर्थः। इदमुपलक्षणं प्रवेशने यष्टेरन्वयबोधे विलक्षण- प्रकरणं हेतुस्तदभावात् प्रवेशने न यष्टेरन्वयबोध इत्यपि सुवचम्। यद्यपि यष्टीः प्रवेशयेत्यादौ प्रवेशने कर्मतासम्बन्धेन यष्टेरन्वयो न सम्भवत्येव कर्मत्वस्य पदार्थत्वेन प्रकारत्वनियमात् धात्वर्थ-नामार्थ- योर्भेदान्वयबुद्ध्यभावाच्च किन्तु यष्टिकर्मत्वस्य द्वितीयार्थस्यैव प्रवेशने प्रकारतया अन्वयः स्यात्तच्च च कर्मतासम्बन्धेन यष्ट्यभावनिश्चयो न विरोधीत्यसङ्गतमेव तत्, तथापि धात्वर्थ-नामार्थयोरपि च[२]

(१) लक्षणापीति क०।

(२) धात्वर्थयोरपीति क०, धात्वर्थयोरपि नामार्थयोरपि चेति ख०।

तदितरस्य यान्तीत्यनेन गमनकर्तृत्वमवगतं तदन्व-

भेदान्वयबुद्धिरस्त्येव परन्तु तादृशान्वयबोधे विभक्त्यर्थसंसर्गोपस्थितिर्हेतुः तेन चैत्रः पच्यते तण्डुलः पचति घटमानयेत्यादौ कर्तृत्व-कर्मत्वादिसम्बन्धेन चैत्र-तण्डुल-घटादेर्न पाकानयनादावन्वयः, न वा चैत्रोधनं घटीरूपं घटः कर्मत्वमित्यादौ सत्ताधेयत्वादिसम्बन्धेन चैत्र-घटादेर्धन-रूप-कर्मत्वादावन्वयः, चैत्रेण पच्यते तण्डुलं पचति घटमानय चैत्रस्य धनं घटस्य रूपं घटस्य कर्मत्वमित्यादौ कर्तृत्व-कर्मत्व-सत्ताधेयत्वादिसम्बन्धेन चैत्र-तण्डुल-घटादेः पाकानयन-धन-रूप-कर्मत्वादिष्वन्वयबोधस्तु सति तात्पर्यग्रहे प्रकरणविशेषे वा दृश्यत एव। न चैवं पदोपस्थापितस्यार्थस्य प्रकारत्वनियमो व्याहत इति वाच्यम्। कर्तृत्व-कर्मत्वादेः प्रकारतया संसर्गतया च द्विधैव भानाभ्युपगमादुभयोरेव सामग्रीसत्त्वात् तात्पर्य्यविशेषादेर्नियामकत्वाच्च न सर्वत्र तथात्वं, अतएव च नामार्थ-धात्वर्थयोर्भेदान्वयबोधे प्रकारीभूतविभक्त्यर्थोपस्थितिः तन्त्रमिति प्राचीनलिखनमपि सङ्गच्छते(१) अन्यथा तादृशान्वयबोधस्यैवाप्रसिद्धत्वात् तत्र विभक्त्यर्थोपस्थितेस्तन्त्रत्वाभिधानस्यासङ्गतत्वापत्तेरिति साम्प्रदायिकमतानुसारेणेदमभिहितमित्यदोषः, एवं सर्वत्र बोध्यम्। नन्वेवं कृषिणो यान्तीत्यत्र यात्या कृषित्वेन रूपेण कुतो नान्वयधीः तथान्वयानुपपत्तिविरहादित्यत आह, 'अजवदिति, 'प्रकरणादेवेति कृषिविषयकापेक्षाबुद्धिविशेषविषयत्वरूपैकसार्थवाचित्वरूपेणान्वयबो-

---

(१) प्राचीनलिखनं सुष्ठु सङ्गच्छत इति ख०।

थानुपपत्तिस्तच्चिभावे, पचतीत्यस्य कालार्थमित्यन्योक्तेन समं नार्थप्रत्यायकत्वं समभिव्याहाराभावात्, तत्रापि तस्य तात्पर्य्यग्राहकत्वात् सहोच्चरितानां सम्भूयार्थ-

---

धकगमनप्रकरणादित्यर्थः, 'क्वचि-तदितरस्येति सावधारणं, क्वचिदेक-स्यार्थवाचित्वरूपेणेति शेषः, 'अवगतमिति भावसाधनं गमनकर्तृ-त्वावगम इत्यर्थः। अवधारणीयार्थमेव(१) स्फुटयति, 'तदन्वयानुप-पत्तिरिति गमनकर्तृत्वान्वयबोधाभावश्चेत्यर्थः, 'क्वचिभावे' क्वचित्व-रूपेण क्वचिभावे, तथाचैतेषु योग्यतानुपपत्तिरेव लक्षणाबीजं सम्भ-वतीति भावः। 'सम्भूयेति परस्परसहकारेणैकान्वयबुद्धिजनकत्व-ज्ञानाभावादित्यर्थः, न तु यथार्थतात्पर्य्यग्रहाभावादिति भावः। ननु तत्र परस्परसहकारेणैकान्वयबुद्धिजनकत्वज्ञानसत्त्वेऽपि नान्वयबोध-इत्यत आह, 'तत्रापीति, 'तस्य' परस्परसहकारेणैकान्वयबुद्धिजन-कत्वज्ञानस्य, तथाच तत्त्वे तात्पर्य्यग्रहस्यापि सत्त्वाद्भवतामपि तत्र शाब्दबोधोदुर्वार इति भावः। तादृशजनकताज्ञानस्य शाब्दबुद्धि-हेतुत्वे मानमाह, 'सहेति सम्भूयैकान्वयबुद्धिजनकत्वेन ज्ञातानामेव पदानामित्यर्थः, 'सम्भूयेति परस्परसहकारेणैकान्वयबुद्धिजनकताया-व्युत्पत्तिसिद्धत्वादित्यर्थः, व्युत्पत्तिः यत्संशय इत्यादिव्याप्तिः, तात्प-र्य्यस्य प्रकरणदेर्वा ज्ञानकालेऽपि सम्भूयैकान्वयबुद्धिजनकानि नैतत्पदानीति ज्ञाने एवमेतत्पदानि सम्भूयैकान्वयबोधजनकानि न वेति संशये च शाब्दबोधाभावात् यत्संशय इत्यादिनियमबलेन तन्निश्चयस्य हेतुत्वादिति भावः।

---

(१) अवधारणार्थमेवेति ख०, ग०।

प्रत्यायकत्वस्य व्युत्पत्तिसिद्धत्वात् ।

अन्ये तु नानार्थे लक्षणायाञ्च नियतोपस्थित्यर्थं पदार्थे तात्पर्य्यग्रहापेक्षा तेन विना तदभावात् न वाक्यार्थे, तदज्ञानेऽपि प्रकरणादिना[1] सैन्धवपदं

'नानार्थे लक्षणायाञ्चेति गृहीतनानार्थवृत्तिकपद इति समुदायार्थः, तेन गृहीतनानार्थशक्तिकस्य गृहीतनानार्थलक्षणकस्य गृहीतविभिन्नार्थशक्ति-लक्षणकस्य सङ्ग्रहः एकमात्रगृहीतलक्षणकस्य चासङ्ग्रहः तस्यैकमात्रगृहीतशक्तिकतुल्यत्वादिति ध्येयं । 'नियतेति वृत्तिज्ञानस्याविशिष्टत्वेऽपि कस्यचिदेवार्थस्य स्मरणार्थमित्यर्थः, 'पदार्थे' इति तथा गृहीतनानार्थवृत्तिकपदजन्यतत्स्मृतिं प्रति तत्प्रतीतीच्छयोच्चरितत्वग्रहस्य हेतुत्वमित्यर्थः, 'तेन विनेति तादृशपदजन्यपदार्थस्मृतिं प्रति पदार्थतात्पर्य्यग्रहस्य हेतुत्वं विना तत्र नियतोपस्थितेरसम्भवादित्यर्थः[2] । न चैवं तात्पर्य्यग्रहात् पूर्वं तदर्थानुपस्थितौ कथं तात्पर्य्यनिरूपणं तस्यार्थघटितत्वादिति वाच्यम् । वृत्त्या तादृशपदजन्यतदुपस्थितेरसम्भवेऽपि शक्तिवत्प्रकारान्तरेण तदुपस्थितिसम्भवादिति भावः । 'न वाक्यार्थे' इति छेदः, न तु वाक्यार्थबोधे वाक्यार्थतात्पर्य्यग्रहापेक्षेत्यर्थः, न तु तत्पदार्थविशेष्यक-तत्पदार्थप्रकारक-शाब्दबोधे तत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वग्रहो हेतुरिति यावत् । 'तदज्ञानेऽपि' वाक्यार्थतात्पर्य्याज्ञानेऽपि,[3] तत्पदार्थवत्ता

(1) प्रकरणादित इति ख० ।

(2) नियतस्थितेरसम्भवाद्वृत्तिज्ञानस्याविशिष्टत्वादित्यर्थ इति क० ।

(3) वाक्यार्थाज्ञानेऽपीति क० ।

तुरगपरं काकपदं उपघातकपरमिति हि प्रतियन्ति। अन्यथान्वयप्रतियोग्युपस्थितिः तात्पर्य्यग्रहं विनैवेति

तत्पदार्थाज्ञानेऽपीति यावत्, 'तुरगपरं' तुरगप्रतीतीच्छयोच्चरितं, एवमग्रेऽपि, 'इतीति 'इतिशब्दः पञ्चम्यन्तः, इति प्रत्येकं पदार्थद्वय-तात्पर्य्यज्ञानादित्यर्थः, 'हिशब्दो यस्मादित्यर्थे, 'प्रतियन्ति' वाक्यार्थं प्रतियन्ति, तत्पदार्थविशेष्यक-तत्पदार्थप्रकारकशाब्दबोधवन्तो भवन्तीति यावत्। 'अन्यथ' गृहीतनानार्थवृत्तिकपदभिन्नपदे, 'अन्वयेति वृत्त्या पदार्थस्मृतिरित्यर्थः, 'तात्पर्य्यग्रहं विनैवेति, 'एवकारोऽप्यर्थे। यद्वा 'नियतोपस्थित्यर्थं' नियतशाब्दानुभवार्थं, वृत्त्या पदजन्योपस्थितेरविशिष्टत्वेऽपि कस्यचिदेवार्थस्य शाब्दानुभवार्थमिति यावत्, 'पदार्थ इति गृहीतनानार्थवृत्तिकपदजन्यतत्तच्छाब्दानुभवं प्रति तत्तत्प्रतीतीच्छयोच्चरितत्वग्रहस्य हेतुत्वमित्यर्थः, 'तेन विनेति तच्च तद्धेतुत्वेन विना. 'तदभावात्' उक्तस्थले नियतशाब्दानुभवासम्भवादित्यर्थः, वृत्त्या पदजन्योपस्थितेरविशिष्टत्वादिति भावः। 'न वेत्यादि पूर्ववत्, 'तात्पर्य्यग्रहं विनैवेति, शाब्दधीजनिकेति शेषः, 'एवकारोऽप्यर्थे। कश्चित्तु—पदार्थस्मृतिं प्रति तात्पर्य्यधियो हेतुत्वे मानाभावात् गृहीतनानावृत्तिकस्थले नियतोपस्थितेरेवासिद्धत्वात् गृहीतवृत्तिकानां सर्वेषामेवार्थानां तत्र स्मरणस्यानुभवसिद्धत्वात् सर्वेषां शाब्दबोधाभावस्तु शाब्दानुभवं प्रति तात्पर्य्यग्रहस्य तात्पर्य्यग्राहकप्रकरणादिविशेषग्रहस्य वा हेतुतया तदभावात् अन्यथा गृहीतनानार्थवृत्तिकपदजन्यत्वांशमपहाय लाघवाद्वृत्त्या पदजन्यप-

न तदपेक्षा । वस्तुतस्तु इतरपदस्य इतरपदार्थसंस-र्गज्ञानपरत्वं तात्पर्य्यं तच्च वेदे न्यायादवधार्य्यते लोके

दार्थस्मृतिमात्रं प्रत्येव पदार्थतात्पर्य्यग्रहस्य हेतुत्वं कुतो नाभ्युपेयते पदार्थतात्पर्य्यग्रहं विनाप्यन्यत्र वृत्त्या पदार्थस्मरणस्यानुभवसिद्ध-त्वात्तत्परित्यागे प्रकृतेऽपि तुल्यत्वात् एवं यद्वाकल्पोऽपि न युक्तः खण्डशः प्रत्येकपदार्थतात्पर्य्यग्रहस्य हेतुत्वे[1] पचतीत्यादौ सर्वदैव विषयित्वानुकूलत्वादिसकलसंसर्गेणान्वयबोधापत्तेः । न च तत्संसर्ग-कान्वयबोधे तत्संसर्गतात्पर्य्यग्रहोऽपि हेतुरिति नायं दोष इति नाच्यम् । पचन् गच्छतीत्यादौ पचमित्यत्र विषयितासम्बन्धे तात्प-र्य्यग्रहे गच्छतीत्यत्रापि तमादायान्वयबोधापत्तेः तद्विशेष्यक-तत्प्रका-रकप्रतीतिपरत्वसंशये तद्व्यतिरेकनिश्चये वा शाब्दबोधापत्तेश्च । एतेन प्रकरणादीनां शाब्दबोधहेतुत्वं यत्पूर्वमुक्तं तदप्ययुक्तं तथा सति तादृशप्रतीतिपरत्वसंशये तद्व्यतिरेकनिश्चये वा शाब्दबोधापत्तेः प्रकरणादीनामननुगततयाऽनन्तकार्य्य-कारणभावापत्तेश्चेत्यस्वरसा-दाह, 'वस्तुतस्त्विति, 'इतरपदस्येति एकपदस्येत्यर्थः, 'इतरपदार्थेति प्रकृतसंसर्गेणेतरपदार्थविशेष्यिका स्वार्थप्रकारिका या प्रतीतिस्तदिच्छ-योच्चरितत्वमित्यर्थः, 'तात्पर्य्यमिति, शाब्दधीप्रयोजकमिति शेषः, तत्संसर्गेण तद्विशेष्यक-तत्प्रकारकशाब्दबोधं प्रति तत्संसर्गक-तद्विशे-ष्यक-तत्प्रकारकशाब्देच्छयोच्चरितत्वं प्रयोजकमिति तु फलितार्थः ।

---

[1] शाब्दानुभवहेतुत्व इति ख०, ग० ।

न्यायात् प्रकरणादेर्वा । अत एव शाब्दबोधे नानियतहेतुकत्वं तच्चेतरपदार्थसंसर्गज्ञानं वाक्यार्थज्ञानमेवेति सामान्याकारेण तत्परत्वग्रहः(१) हेतुर्न तु विशिष्य, तच्च स्वपरपदार्थयोः संसर्गानुभवजननं विना अनुप-

'अत एव' एतादृशतात्पर्यस्य शाब्दधीप्रयोजकत्वादेव, 'अनियतहेतुकत्वमिति अननुगतहेतुकत्वमित्यर्थः, प्रकरणादेः प्रयोजकत्वे चाननुगतहेतुकत्वापत्तिरिति भावः । ननु प्रकृतशाब्दपरत्वरूपतात्पर्यग्रहस्यैव शाब्दधीहेतुत्वात् कथमेतादृशप्रतीतिपरत्वधीः शाब्दधीहेतुरित्यत आह, 'तच्चेति, 'इतरपदार्थेति प्रकृतसंसर्गेणेतरपदार्थविशेष्यक-स्वार्थप्रकारकज्ञानमित्यर्थः, 'वाक्यार्थज्ञानमेव' प्रकृतशाब्दज्ञानमेव, 'सामान्याकारेणेति घटपदमस्याधेयत्वसंसर्गक-कर्मत्वविशेष्यकघटप्रकारकप्रतीतिपरमित्यादिरूपेणेत्यर्थः,(२) 'तत्परत्वग्रहः' तादृशप्रतीतिपरत्वग्रहः, 'न तु विशिष्येति न तु घटवत्कर्मत्वप्रतीतिपरमित्यादिरूपेण तादृशप्रतीतिपरत्वज्ञानं हेतुरित्यर्थः, अत्र हेतुमाह, 'तच्चेति तद् घटवत्कर्मत्वप्रतीतित्वादिना तादृशप्रतीतिपरत्वज्ञानञ्चेत्यर्थः, स्वाव्यवहितपूर्वमिति शेषः, 'स्वपरेति कर्मत्वादौ घटादिमत्त्वानुभवोत्पत्तिं विनेत्यर्थः । ननु श्रुतपदेभ्य एव तात्पर्य-

(१) तात्पर्यग्रह इति क० ।

(२) घटपदमाधेयत्वसंसर्गेण स्वार्थघटप्रकारक-कर्मत्वविशेष्यकप्रतीतिपरमित्यादिरूपेणेत्यर्थ इति क० ।

यत्नमिति पदानि सम्भूय जनयन्ति, अत एव[1] नानार्थे विनिगमना, तदनुपपत्तिरेव लक्षणाबीजं तदभावादेव पचतिपदे[2] न भूतकलायान्वयबोध इति सिद्धं शब्दस्य प्रमाणान्तरत्वं। तस्य च निराकाङ्क्षादौ संस-

---

र्गात्पूर्वं कर्मत्वादौ घटादिमत्त्वानुभवः स्यादित्यत आह, 'पदानी'ति, 'सम्भूय' तात्पर्यग्रहेण समं मिलित्वैव, तथा चान्योन्याश्रय इति भावः। इदमुपलक्षणं विशिष्य तत्परत्वग्रहस्य हेतुत्वे शब्दमात्रस्यानुवादकतापत्तेश्चेत्यपि बोध्यं। 'अत एवे'ति एतादृशतात्पर्यग्रहस्य शाब्दधीहेतुत्वादेवेत्यर्थः, न तु प्रकरणादिज्ञानस्य हेतुत्वादिति भावः। 'विनिगमने'ति शक्तिजन्योपस्थित्यादेरितरसकलकारणस्याविशिष्टत्वेऽपि कदाचिदेकमर्थमादायैवान्वयबोध इत्यर्थः, 'तदनुपपत्तिरेवे'ति, 'अत एवे'त्यनुषज्यते, 'एवकारोऽप्यर्थे, तात्पर्यानुपपत्तिरपीत्यर्थः, 'लक्षणाबीजमिति यष्टीः प्रवेशयेत्यादौ शक्त्या वाक्यार्थस्मरणस्य[3] शक्यार्थयोग्यतादिज्ञानस्य च सत्त्वेऽपि लक्ष्यार्थस्यैवान्वयबोधस्यैव नियामक इत्यर्थः, तदानीं शक्त्या अन्वयबोधाभावे नियामकमिति तु फलितार्थः, तथा च न तादृशसिद्धान्तव्याघात इति भावः। 'तदभावादि'ति, 'अत एवे'त्यनुषज्यते, 'पचतिपद'इति प्रयुक्त इति शेषः, 'भूते'ति अनोककलायपदात् भूतेत्यर्थः, 'शब्दस्य' लोकवेदसाधारणशब्दस्य, 'प्रमाणान्तरत्वमिति अनुमानादिभिन्नत्वे सत्यगृहीताबाधितार्थानुभवजनकत्वमित्यर्थः,।

---

(१) तत एवेति क०, ख०। (२) पचतीतिपदे इति क०।
(३) शक्यार्थस्मरणस्येति क०।

शाब्दानाजनकत्वात् आकाङ्क्षादिकं सहकारीति ।

अथाभिनववैशेषिकैकदेशिनः लाघवात्तत्पदार्थवत्तत्पदार्थप्रतीतीच्छयोच्चरितत्वरूपतात्पर्य्यस्य घटत्व-कर्मत्वादिना विशेषतो धीरेव लोक-वेदसाधारणशाब्दधीसामान्यहेतुः, वह्निना सिञ्चतीत्यादौ वह्निकरणकत्ववत्सेकप्रतीतेरप्रसिद्धावपि खण्डशः प्रसिद्धा वह्निकरणकत्ववत्सेकप्रतीतिपरमिति भ्रमरूपतज्ज्ञानसम्भवात् न तु तद्विशेष्यक-तत्प्रकारकप्रतीतीच्छयोच्चरितत्वधीः, तत्सम्बन्धावच्छिन्नप्रकारिताप्रवेशे(१) गौरवात्, न वा वेदस्थले त्रित्वत्वकपिञ्जलपदार्थपरमित्यादिक्रमेण सामान्यतस्तन्निश्चयो हेतुः लोके च घटत्व-कर्मत्वपरमित्यादिक्रमेण विशेषतस्तन्निश्चयो हेतुरिति मीमांसकाभिमतकार्य्यकारणभावभेदः कार्य्यकारणभावद्वयकल्पने गौरवात् लोकस्थले विशेषतस्तादृशनिश्चयहेतुत्वसाधकपूर्वोक्तयुक्तिक्रमेण वेदस्थलेऽप्यविशेषाच्च । तथाच लोक-वेदसाधारणं शब्दस्याचमेवानुवादकं । न चैवं वेदस्यानुवादकत्वादप्रामाण्यापत्तिरिति वाच्यं । अगृहीतग्राह्यनुभवजनकत्वरूपप्रामाण्याभावे क्षतिविरहात् तावतापि यथार्थानुभवजनकत्वरूपप्रामाण्यस्यानपायात् । न च शाब्दधीपूर्वं तत्पदार्थे तत्पदार्थवत्त्वज्ञानाभावात्तादृशतात्पर्य्यं दुर्ग्रहमिति वाच्यम् । लाघवात्तादृशतात्पर्य्यधियो हेतुत्वे कॢप्तेऽन्यथा व्यभिचारिणा अव्यभिचारिणा वा पक्षधर्म्मेणापक्षधर्म्मेण वा येन केनापि लिङ्गेन अप्रा-

---

(१) विशेष्यतादिसम्बन्धावच्छिन्नप्रकारितादिप्रवेशे इति पा० ।

न्तरीयोद्बुद्धसंस्कारेण मनसा वा येन केनापि प्रकारान्तरेण च तत्पदार्थे तत्पदार्थवत्त्वज्ञानस्याप्यवश्यं कल्पनीयत्वात्तद्विरहदशायां शाब्दबोधानुभवस्य चासिद्धत्वात् । अन्यथा तवापि सर्वत्र प्रथमं तद्विशेष्यक-तत्प्रकारकप्रतीतेरज्ञानात्कथन्तद्घटिततात्पर्य्यनिर्णय इत्यस्य दुःसमाधेयत्वादिति प्राञ्चः । तदसत् । तत्तत्सम्बन्धावच्छिन्नप्रकारितात्वक्तीनां स्वरूपतः संसर्गविधया प्रवेशेन गौरवाभावात् यथोक्ततात्पर्य्यग्रहस्यैव हेतुत्वे कर्मत्वविशेष्यक-घटप्रकारकप्रतीतीच्छयोच्चरितं न वेत्यादिसंशये तादृशप्रतीतीच्छयोच्चरितं नेत्यादिव्यतिरेकनिश्चये वा घटवत्कर्मत्वमित्यादिशाब्दबोधप्रसङ्गाच्च तात्पर्य्यज्ञानहेतुताया एवाये निराकर्त्तव्यत्वाच्च शुकादितोतात्पर्य्यव्यतिरेकनिश्चयेऽपि शाब्दबोधोदयात् । न चैश्वरं तत्र तात्पर्य्यं फलैकानुमेयतया प्रथमं दुरवधारणात् । अत एवेश्वरविरहनिश्चयेऽपि वेदेऽन्वयबोधः । न च पूर्वाध्यापकतात्पर्य्यं, तत्र मीमांसानधिष्ठितेभ्योऽरीरिते शाब्दबोधापत्तेः । कुतस्तर्हि मीमांसोपयोग इति चेत्, वेदार्थान्वयबोधे धाचादेव. अन्वय-व्यतिरेकाभ्यान्तथैव कल्पनात् । उक्तञ्च मणिकृता न्यायजन्यज्ञानप्रकारणादीनामन्यतममिति समासः(१) ।

नन्वेतादृशतात्पर्य्यनिश्चयस्य शाब्दधीहेतुत्वे किमाकाङ्क्षा-योग्यतासत्तिज्ञानस्य हेतुत्वेनेत्यत आह, 'तस्येति निरुक्ततात्पर्य्यनिश्चयस्येत्यर्थः, 'निराकाङ्क्षादौ' आकाङ्क्षाद्यभाववत्तया निश्चिते, 'संसर्ग-

---

(१) शुकादित इत्यादिः समास इत्यन्तः पाठः ख०-ग० पुस्तकद्वये नास्ति ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शब्दाप्रामाण्यवादः ॥

शाब्दाजनकत्वात्' शाब्दबोधाजनकत्वात्, 'आकाङ्क्षादिकं' आकाङ्क्षादिज्ञानं, 'आदिपदाद्योग्यतासत्तिपरिग्रहः।

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये शब्दाप्रामाण्यवादरहस्यं ॥

अथाकाङ्क्षा ।

अथ केयमाकाङ्क्षा, न तावदविनाभावः, नोर्थ

अथाकाङ्क्षारहस्यं ।

प्रसङ्गादाकाङ्क्षां निरूपयितुं पृच्छति, 'अथ केति' 'आकाङ्क्षादिकं सहकारीति' यदुक्तं तत्र आकाङ्क्षा केत्यर्थः, 'अविनाभाव' इति तत्पदार्थेन विना यो भावः सत्त्वं तदभाव इत्यर्थः, तत्पदार्थे तत्पदार्थाभाववद्वृत्तित्वाभावस्तत्पदार्थे तत्पदार्थाकाङ्क्षेति भावः । अस्ति च अयं घट इत्यादौ इदम्पदार्थे घटपदार्थाभाववद्वृत्तित्वाभावः, वृत्तित्वन्तादात्म्यसम्बन्धेन बोध्यं, अन्यथा चैत्रः पचति रथो गच्छतीत्यादौ चैत्रादिपदार्थस्याख्यातपदार्थसाकाङ्क्षता[1] न स्यात् चैत्रादौ तिप्पदार्थाभाववद्वृत्तित्वाभावाभावात्[2] तत्पदार्थाभावश्च यत्सम्बन्धेन येन रूपेण तत्पदार्थान्वयो भविष्यति तत्सम्बन्धावच्छिन्न-

(१) तिप्पदार्थसाकाङ्क्षतेति ख०, ग० ।

(२) चैत्रादेः कृत्यादिरूपतिप्पदार्थाभाववति भूतलादौ वर्त्तमानत्वादिति भावः । ननु तथापि संयोगादिसम्बन्धेन विशिष्टरूपादिना वा कृत्याद्यभाववति स्वस्मिन् उक्तसम्बन्धेन चैत्रादेर्वृत्तित्वादवश्यमित्यभावोऽपि अन्वयितावच्छेदकसम्बन्धेन तादृशरूपेण च वाच्य इत्याह, तत्पदार्थाभावश्चेति ।

सरोजमित्यादावभावात्। विमलं जलं नद्याः क मह्हिष इत्यत्र[1] जलान्वितनद्या अविनाभावात्[2] कच्छे साकाङ्क्षतापत्तेः। नापि समभिव्याहृतपदस्मा

तद्रूपावच्छिन्नप्रतियोगिताकाबाधः, एवञ्च तत्पदार्थे तत्सम्बन्धे तद्धर्मविशिष्टतत्पदार्थस्यान्वये तत्पदार्थे तत्सम्बन्धावच्छिन्न-तद्धर्मावच्छिन्नप्रतियोगिताकतत्पदार्थाभाववदन्यत्वमाकाङ्क्षेति फलितार्थं आकाङ्क्षाया अर्थधर्मत्वाभिप्रायेणेदन्तेन शब्दानिष्ठत्वेऽपि न क्षतिरिति मन्तव्यं। ननु तत्पदार्थतावच्छेदकावच्छेदेन तत्पदार्थे तत्पदार्थाभाववदन्यत्वं विवक्षितं यत्किञ्चित्तत्पदार्थे तत्पदार्थाभाववदन्यत्वं वा, आद्ये आह, 'नीलमिति, सरोजत्वावच्छेदेन नीलान्यत्ववदन्यत्वाभावादिति भावः। नीलं सरोजमित्यादौ आदिपदात्[3] नीलोघटः पीतो घट इत्यादेः सङ्ग्रहः, द्वितीये आह, 'विमलमिति, 'नद्या इति षष्ठ्यर्थनदीसम्बन्धस्येत्यर्थः, षष्ठ्यर्थसम्बन्धेन नदीजलयोरेव साक्षादन्वय इति सम्प्रदायमते यथाश्रुतमेव साधु। 'अविनाभावात्' कच्छविशेषेऽविनाभावात्, 'साकाङ्क्षतेति नदीपदोत्तरषष्ठीपदार्थसाकाङ्क्षतेत्यर्थः, सम्प्रदायमते षष्ठ्यर्थसम्बन्धेन नदीपदार्थसाकाङ्क्षतेत्यर्थः, इदमुपलक्षणं घटः कर्मत्वमित्यादावतिप्रसङ्गः[4]

---

(१) मह्हिषस्सरतीत्यत्रेति ख०।

(२) अविनाभूतत्वादिति ख०, ग०।

(३) आदिनेति ख०, ग०।

(४) कर्मत्वादौ आधेयतासम्बन्धेन घटादिमत्त्वादिति भावः।

प्रमेयमभिधेयमित्यादावसम्भवाच्च [illegible]
नाभिधेयत्वावच्छिन्नाभावाप्रसिद्धेः, एवं विसम्वादिनि बोधकवाक्ये-
ऽव्याप्तिः,[1] योग्यतायाः पृथक् प्रयोजकत्वानुपपत्तिश्चेत्यपि बोध्यं ।
'समभिव्याहृतेति समभिव्याहृतपदस्मारितपदार्थे जिज्ञासा समभि-
व्याहृतपदस्मारितपदार्थजिज्ञासा इति सप्तमीतत्पुरुषः, 'समभि-
व्याहृतेत्यस्य प्रकृतेत्यर्थः, 'पदार्थेत्यस्य च प्रकृतपदस्मारितेत्यर्थः,
तथाच प्रकृतपदसमभिव्याहृतपदस्मारिते प्रकृतपदस्मारितस्य जिज्ञा-
साकाङ्क्षेत्यर्थः, प्रकृतपदसमभिव्याहृतयत्पदस्मारिते यत्र येन सम्बन्धेन
प्रकृतपदस्मारितस्य यस्यान्वयबोधः तत्पदस्मारिते तत्र तेन सम्बन्धेन
तत्पदस्मारितस्य तस्य शाब्दबोधेच्छा तत्पदे तत्पदाकाङ्क्षेति[2] तु
फलितार्थः, उदासीनपदस्मारितपदार्थजिज्ञासायामतिव्याप्तिवार-
णाय 'समभिव्याहृतेति, तच्च सम्भूयैकार्थप्रतिपादकतात्पर्यकत्वं च

---

(1) वह्निना सिञ्चतीत्ययोग्यवाक्ये इत्यर्थः, अव्याप्तिरिति तथाचोक्तस्थले वह्न्या-
दिकरणकत्वाभाववति सेकादौ तादात्म्येन सेकादेर्जिज्ञासैवेति भावः ।
ननूक्तस्थले सत्यपि तदाकाङ्क्षायामन्वयानुभावकत्वन्तु तस्य साकाङ्क्षत्वभ्र-
मादेवेति चेत् तस्य निराकाङ्क्षत्वव्यवहारः स्यात्, स्यादेवेति चेत्
अन्वयबोधयोग्यतायाः प्रयोजकत्वविलोपप्रसङ्गः सर्वत्रैवायोग्यवाक्ये
निराकाङ्क्षतयैवान्वयाननुभावकत्वस्य सम्भवे योग्यताभावस्य तत्प्रयोज-
कत्वकल्पनागौरवादित्याशयेनाह, योग्यतायाः इति ।

(2) तथाच प्रकृतपदस्मारिते प्रकृतपदस्मारितस्य जिज्ञासाकाङ्क्षेत्यर्थो, यत्-
सम्बन्धेन तत्पदस्मारिते तत्र तत्पदस्मारितस्य तस्यान्वयबोधे तत्सम्ब-
न्धेन तत्पदस्मारितस्य तस्य शाब्दबोधेच्छा तत्पदे तत्पदाकाङ्क्षेति तु
फलितार्थ इति सं०, ग० ।

रितपदार्थजिज्ञासा, अजिज्ञासोरपि वाक्यार्थबोधात् विश्वजिता यजेत द्वारं इत्यत्रापदार्थयोरप्यधिकारिणोऽध्याहृतस्य पिधानस्य चाकाङ्क्षितत्वाच्च, तत्र शब्द-

---

स्यैकानुसन्धानविषयत्वं त्रिमनस्कत्वमित्यादावतिप्रसङ्गात्[1]। न च तत्पदस्मारितेतिव्यर्थं तत्र तस्यान्वये तत्र तस्य शाब्दबोधेच्छा आकाङ्क्षेत्यस्यैव सम्यक्त्वादिति वाच्यं। प्रकारान्तरेणोपस्थिते[2] घटादौ प्रकारान्तरोपस्थितस्य नीलादेः शाब्देच्छायामपि नीलो घट इत्यादिवाक्यात् घटादौ नीलाद्यन्वयबोधापत्तेराकाङ्क्षासत्त्वात्। न च तथाकाङ्क्षासत्त्वेऽपि पदजन्यपदार्थोपस्थितेः कारणान्तरस्य विरहात्-नान्वयबोध इति वाच्यं। एतादृशाकाङ्क्षावादिना[3] पदजन्यपदार्थोपस्थितेः पृथक्कारणत्वानभ्युपगमात्। स्मारितत्वञ्च वृत्त्या स्मारितत्वं बोध्यं तेन कार्य्यत्व-कारणत्वादिसम्बन्धेन घटादिपदस्मारिताकाशादिजिज्ञासा[4] नाकाङ्क्षेति भावः। 'अजिज्ञासोरपी'ति शाब्देच्छाशून्यस्यापीत्यर्थः, मीमांसकमतेन दूषणमाह, 'विश्वजिते'ति, 'अपदार्थयोरपी'ति पदास्मारितयोरपीत्यर्थः, 'अधिकारिण' इति स्वर्गकामस्य कर्त्तुरित्यर्थः, अध्याहृतस्येत्यादिः, 'आकाङ्क्षितत्वाच्च' विध्यर्थ-

---

(१) उदासीनेत्यादिः प्रसङ्गादित्यन्तः पाठः ख० ग० पुस्तकद्वये नास्ति।

(२) उभयत्र प्रकारान्तरेणेत्यस्य चाक्षुषादितः संस्कारवशेनेत्यर्थः।

(३) एतादृशाकाङ्क्षावादिन। इति ख०, ग०।

(४) एकसम्बन्धिज्ञानस्यापरसम्बन्धिस्मारकतया आकाशादिजन्यघटादिपदप्रयोज्यस्मृतिविषयत्वमाकाशादेरिति भावः।

कर्मत्वमपश्येऽपि घटः कर्मत्वमानयनं कृतिरित्यत्र जि-ज्ञासितस्यानयनादेराकाङ्क्षितत्वापत्तेः । अथ जिज्ञा-सायोग्यता[१] सा, जिज्ञासा च विशेषाज्ञाने भवति,

द्वितीयार्थसाकाङ्क्षत्वाच्च, उक्तजिज्ञासाया आकाङ्क्षात्वे तु तन्न स्यात् अध्याहृतस्वर्गकामादेः पदस्मारितत्वाभावेन तज्जिज्ञासाया-आकाङ्क्षात्वाभावादिति भावः । स्वमतेन दूषणमाह, 'तत्रेति स्वर्ग-कामादिशब्दाध्याहारपक्षेऽपीत्यर्थः, 'जिज्ञासितस्येति आधाराधे-यभावसंसर्गक[२]कर्मत्वादिपदस्मारितकर्मत्वादिप्रकारकशाब्देच्छाविष-यस्य आनयनादिपदस्मारितस्यानयनादेरित्यर्थः, 'आकाङ्क्षितत्वा-पत्तेः' आधाराधेयभावसम्बन्धेन[३] कर्मत्वपदस्मारितकर्मत्वसाकाङ्क्षत्वा-पत्तेः । अत्र यत्पदोपस्थापिते यत्पदोपस्थितिप्रयुक्ता यत्पदोपस्था-पितान्वयजिज्ञासा तयोराकाङ्क्षा इति लक्षणे नायन्दोषः । यद्यपि घट इत्युक्ते कर्मत्वञ्च वेति जिज्ञासानुदयस्तथापि जिज्ञासासामान्य-मभिप्रेत्येदं, विशेषजिज्ञासामादाय 'अथ शाब्द-तदितरेत्यादिलक्षणं वक्ष्यति इति ध्येयं[४] । आचार्य्यीयं लक्षणमाह, 'जिज्ञासेति शाब्द-बोधेच्छा योग्यतेत्यर्थः, 'सा' आकाङ्क्षा । ननु योग्यतैव किमित्यत-आह, 'जिज्ञासा चेति, 'च' हेतौ, यस्मादित्यर्थः, 'विशेषाज्ञाने' विशेषाज्ञान एव, शाब्दबोधेऽनुत्पन्न एवेति यावत्, अन्यथा सिद्धे इच्छाविरहादिति भावः । 'भवतीति, अतइति शेषः, घटत्वे घट-

(१) जिज्ञासां प्रति योग्यतेति ख० । (२) निरूपकत्वादिसंसर्गकेति ख०, ग० ।
(३) निरूपकतासम्बन्धेनेति ख०, ग० ।
(४) यद्यपीत्यादिर्ध्येयमित्यन्तः पाठः ख० ग० पुस्तकद्वये नास्ति ।

योग्यता च श्रोतरि तदुच्चारणजन्यसंसर्गावगम-

स्याप्यते तस्यैव तद्योग्यतात्वं । न च शाब्दबोधे उत्पन्ने कदापि शाब्देच्छेति, तदभाव एव योग्यतेति भावः । 'श्रोतरी'ति, घटः कर्मत्वमित्यादावतिव्याप्तिवारणाय 'जन्ये'ति, 'तदुच्चारणं' तद्वाक्यज्ञानं, अतो न मौनिश्लोकाव्याप्तिः । तथाच श्रोतृनिष्ठतद्वाक्यज्ञानजन्यतादृशशाब्दबोधप्रागभावस्तद्वाक्यज्ञानेन तादृशशाब्दबोधे जननीये आकाङ्क्षेत्यर्थः, एकस्य पुरुषस्य तादृशशाब्दबोधप्रागभावस्य सत्त्वेऽपि अन्यपुरुषस्य तादृशशाब्दबोधानुत्पादात् सामानाधिकरण्यप्रत्यासत्त्या आकाङ्क्षाया हेतुत्वलाभाय श्रोतृनिष्ठेति प्रागभावविशेषणं, न तु लक्षणान्तर्गतं, घटः कर्मत्वमित्यादौ घटवत्कर्मत्वमित्यादिभेदान्वयबुद्ध्यभावसम्पत्तये तद्वाक्यज्ञानजन्येति । इत्थञ्च(१) तत्र तद्वाक्यज्ञानजन्यतादृशशाब्दबोधाप्रसिद्ध्या तत्प्रागभावाभावात् तादृशान्वयबोध इत्यभिमानः । तदिति वाक्यज्ञानविशेषणं न तु वाक्यविशेषणं प्रयोजनञ्चास्य पदं स्फुटीभविष्यति, घटः कर्मत्वमित्यादौ तादात्म्यसंसर्गकघटकर्मत्वाद्यन्वयबोधप्रागभावमादाय घटवत्कर्मत्वमित्यादि-

---

(१) ननु घटः कर्मत्वमित्यादौ प्रागभावप्रतियोगिनि ज्ञाने तद्वाक्यज्ञानजन्यत्वविशेषणदानेऽपि न कथं भेदेनान्वयबोधः तद्वाक्यज्ञानस्य पदार्थोपस्थित्यादिरूपसामग्रीसहितत्वात् तादृशप्रागभावाभावस्य च भेदेन तादृशान्वयबोधानुत्पादमात्रनिर्वाह्यत्वादित्याशङ्कां तद्वाक्यज्ञानस्य तादृशान्वयबोधजनकत्वाभावमुखेन निरस्यति, इत्थञ्चेत्यादिना, तथाच तद्वाक्यज्ञानं भेदान्वयबोधं न जनयतीति भावः ।

प्रागभावः, विमलं जलं नद्याः कच्छे महिष इत्यत्र तात्पर्य्यवशात् कदाचित् नद्याः कच्छे संसर्गावगमात्

भेदान्वयबोधे साकाङ्क्षत्ववारणाय तादृशेति,[१] खण्डवाक्यार्थबोधानन्तरं खण्डवाक्यार्थघटितमहावाक्यार्थबोधोत्पादात् मौनीघटइत्यादौ वक्तुः क्रमिकशाब्दबोधद्वयेच्छायां धारावाहिकशाब्दबोधद्वयोत्पादाच्च सामान्याभावत्वमपहाय प्रागभावत्वेनोपादनं। न च ज्ञानस्याव्याप्यवृत्तितया तादृशशाब्दबुद्धिसत्त्वेऽपि तादृशशाब्दबुद्धिसामान्याभावसत्त्वान्न खण्डवाक्यार्थबोधाद्यनन्तरं महावाक्यार्थबोधाद्यनुपपत्तिरिति वाच्यं। तथासति तादृशेच्छां विनापि धारावाहिकशाब्दबोधापत्तेरिति भावः। नन्वेवमपि नदी-जलान्वयबुद्धिमात्रतात्पर्य्यके अत्र विमलं जलं नद्याः कच्छे महिषश्चरतीत्यत्र नदी-जलयोरन्वयबोधानन्तरं नदी-कच्छयोः कथमन्वयबोधः तदाकाङ्क्षा ज्ञानेन नदी-कच्छयोरन्वयबोधे तात्पर्य्यशून्यशायां नदीकच्छयोरप्यन्वयबोधजननात्तद्वाक्यज्ञानजन्यतादृशान्वयबुद्धिप्रागभावसत्त्वात्। न च तात्पर्य्यज्ञानाभावान्न तदानीं तादृशान्वयबोध इति वाच्यं। तदानीमाकाङ्क्षाभावान्नान्वयबोध इति सकलप्राचीनप्रवादविरोधापत्तेरित्यत आह, 'विमलमिति, 'तात्पर्य्यवशात्' तात्पर्य-

[१] महिषश्चरतीत्येवेति क०।

[२] तथाच तादृशप्रागभावस्य साकाङ्क्षत्वघटकत्वे उक्तवाक्यात् भेदान्वयबोध एव साकाङ्क्षत्वमभिमानः, अन्यथा तादृशपदस्योपादानेऽपि उक्तस्थले साकाङ्क्षत्वापत्तिः तद्वाक्यीयतज्ज्ञानजन्यभेदान्वयबोधप्रागभावसत्त्वादिति भावः।

तत्प्रागभावसत्त्वेऽपि श्रोतरि तदुच्चारणेन तात्पर्य्यवशात् जलान्वितनद्याः कच्छे संसर्गावगमोनेति न तत्प्राग-भावः, घटः कर्म्मत्वमानयनमित्यत्रापि तथेति चेत्। न। निराकाङ्क्षे तदुच्चारणजन्यसंसर्गावगमप्रागभावस्य सिद्धासिद्धिपराहतत्वात्। किञ्च यत्रैकाविमलं जलमि-

---

श्रावणवशात्, 'तत्प्रागभावेति तद्वाक्यज्ञानजन्यनदी-कच्छान्वयबोध-प्रागभावसत्त्वेऽपीत्यर्थः, 'तदुच्चारणेनेति तद्वाक्यविषयकयज्ज्ञानव्यक्त्या नदी-जलयोरन्वयबोधोजनितस्तज्ज्ञानव्यक्त्येत्यर्थः, अस्य च 'संसर्गा-वगमोनेत्यनेनान्वयः, 'तात्पर्य्यवशादिति तात्पर्य्यवशात् जलान्वितायाः नद्या इत्यर्थः, 'संसर्गावगमोनेति अन्वयबोधोन जन्यत इत्यर्थः, 'न तत्प्रागभाव इति न तद्वाक्यविषयकतज्ज्ञानव्यक्तिजन्यनदी-कच्छा-न्वयबुद्धिप्रागभाव इत्यर्थः, तथाच तदिति वाक्यज्ञानविशेषणं न तु वाक्यविशेषणमिति भावः। इदमुपलक्षणं तदित्यस्य वाक्यविशेषणत्वे नीलोघट इत्यादौ वक्तुः क्रमिकशाब्दबोधद्वयेच्छां विनापि नीलो-घटः नीलोघट इत्यादिधारावाहिकशाब्दबोधापत्तेः तद्वाक्यस्यैव स्मरणेनान्यदा नीलोघट इति शाब्दबुद्धेर्जननीयत्वान्नीलोघट इति शाब्दबुद्धिदशायामपि तादृशशाब्दबोधप्रागभावसत्त्वादित्यपि बोध्यं। 'तथेति तदुच्चारणजन्यघटवत्कर्मत्वमिति भेदान्वयबुद्धिप्रागभावे-नेत्यर्थः। 'निराकाङ्क्ष इति घटः कर्मत्वमित्यादावित्यर्थः, 'तदुच्चारण-जन्येति तज्ज्ञानजन्येत्यर्थः, 'संसर्गावगमेति घटवत्कर्मत्वमित्यादि-भेदान्वयबुद्धिप्रागभावस्येत्यर्थः, 'सिद्धासिद्धिपराहतत्वादिति तादृश-

त्यश्रुत्वैव तात्पर्य्यभ्रमेण वा नद्याः कच्छान्वयपरत्वमवैति, अपरः समस्तमेव श्रुत्वा नद्या जलान्वयपरत्वमवधारयति, तत्रोभयोरपि तदुच्चारणजन्यसंसर्गावगमात् नद्या इत्युभयसाकाङ्क्षं[1] स्यात् ।

प्रागभावस्य सिद्ध्यसिद्धिभ्यां घटः कर्मत्वमित्यादि वाक्यं घटत्वकर्मत्वमित्यादिभेदान्वयबोधे निराकाङ्क्षमिति व्यवहारविलोपप्रसङ्गादित्यर्थः, स्वज्ञानजन्यतादृशान्वयबुद्धिप्रागभावकालीनत्वाभावस्य भवन्मते तादृशव्यवहारविषयत्वात्, स्वपदं घटः कर्मत्वमित्याद्यानुपूर्वीविशेषविशिष्टवाक्यपरमिति भावः । ननु तादृशप्रागभावकालीनं तदुच्चरितभिन्नत्वमेव तादृशव्यवहारविषय इति नायन्दोष इत्यरुचेराह, 'क्वचिदिति, 'यत्रेति, नदी-जलान्वयबोधतात्पर्य्येण विमलं जलं नद्याः कच्छे महिषश्चरतीति प्रयुक्ते इति शेषः, 'एकः' पुरुषः, 'जलमितीति विमलं जलं इत्येकदेशमश्रुत्वैवेत्यर्थः, 'तात्पर्य्यभ्रमेण वेति तात्पर्य्यस्य भ्रमोदयादिति व्युत्पत्त्या तात्पर्य्यज्ञापकस्य प्रकरणादेर्भ्रमेण वेत्यर्थः, यथाश्रुते नद्याः कच्छान्वयपरत्वावगमस्यैव तात्पर्य्यभ्रमतया तत्रास्य हेतुत्वासङ्गतेः, 'नद्या इति नदी-कच्छान्वयबोधे तात्पर्य्यमवैतीत्यर्थः, 'अपरः' पुरुषः, 'नद्या इति नदी-जलान्वयबोधे तात्पर्य्यमवधारयतीत्यर्थः, 'उभयोरपीति, जले कच्छे चेत्यर्थः, 'संसर्गावगमादिति, नद्या अन्वयबोधादित्यर्थः, 'उभयसाकाङ्क्षमिति, युगपन्नदीजलान्वयबोध-नदीकच्छान्वयबुद्ध्युभयसाकाङ्क्षता-

---

(१) उभयाकाङ्क्षमिति क०, ख० ।

अपि च प्रागभावाभावस्य कारणान्तराभावव्याप-

व्यवहारविषयः स्यादित्यर्थः, मया इति वाक्यमिदानीं नदीकच्छा-न्वयबुद्धिसाकाङ्क्षं नदीजलान्वयबुद्धिसाकाङ्क्षञ्चेति व्यवहारः स्यादिति समुदितार्थः, युगपत् स्वजन्यनदीकच्छान्वयबोधप्रागभावविशिष्टज्ञान-स्वजन्यनदीजलान्वयबुद्धिप्रागभावविशिष्टज्ञानयोरुभयोरेव विषयता-सम्बन्धेन सत्त्वात् विषयतासम्बन्धेन तथाभूतज्ञानस्यैव भवन्मते तादृश-व्यवहारविषयत्वात् सपदद्वयं ज्ञानपरं, वैशिष्ट्यञ्चैककालवृत्तित्वं। न च युगपत् तथा व्यवहारे इष्टापत्तिरिति वाच्यं। यस्मिन्नन्वयबोधे तात्पर्यं नास्ति तत्र निराकाङ्क्षत्वव्यवहारस्यैव सर्वसिद्धत्वात्[1] इति भावः। ननु व्यवहारोपयोग्याकाङ्क्षालक्षणे वक्तृतात्पर्यविषयत्वेना-न्वयबोधो विशेषणीयः। न चैवं यत्र यत्र तात्पर्यभ्रमात् शाब्दबोध-स्तत्रैव निराकाङ्क्षत्वव्यवहारापत्तिरिति वाच्यं। तत्र निराकाङ्क्षत्व-व्यवहारस्य सकलप्राचीनसम्मतत्वादित्यरुचेराह, 'अपि चेति।

केचित्तु 'उभयसाकाङ्क्षं स्यादित्यस्य नदीकच्छान्वयबुद्धिसाकाङ्क्षं नदीजलान्वयबुद्धिसाकाङ्क्षञ्च स्यादिति यथाश्रुत एवार्थः। न चेष्टा-पत्तिरुभयत्राकाङ्क्षाविरहे उभयान्वयबोधस्यैवानुपपत्तेरिति वाच्यं। यस्मिन्नन्वयबोधे तात्पर्यं नास्ति तत्राकाङ्क्षाभ्रमजन्यताया एव सर्व-सिद्धत्वादिति भावः। ननु तदुच्चारणजन्यवक्तृतात्पर्यविषयतादृशा-न्वयबुद्धिप्रागभावस्तदुच्चारणजन्यतादृशान्वयबोधे आकाङ्क्षेति विवच-नीयं, तथाच तात्पर्यांशे भ्रमादेव तत्राकाङ्क्षाभ्रम इत्यरुचेराह,

(१) सर्वसम्मतत्वादिति ख०।

त्वात् तत एव कार्य्याभाव इति किमाकाङ्क्षया। एवञ्च

'अपि चेति, इत्याहुः। तदयत् एतादृशाकाङ्क्षायाः शाब्दधीहेतुत्वे प्रकृते नदीकच्छान्वयबुद्धेरनुपपत्तेः तत्र तात्पर्य्यविरहात्। न चेयं स्वरूपसती न हेतुः किन्तु ज्ञातेति तात्पर्य्यांशे भ्रमात्मकतज्ज्ञानान्नदीकच्छान्वयधीरिति[१] वाच्यं। अस्याः स्वरूपसद्धेतुत्व एव 'अपि चेत्यादिदूषणसङ्गतेरिति दिक्। 'प्रागभावाभावस्येति[२] विमलं जलमित्यादौ नदीजलान्वयबोधोत्तरं नदीकच्छान्वयबोधानुत्पत्तिस्थले तदुच्चारणजन्यनदीकच्छान्वयबुद्धिप्रागभावाभावस्येत्यर्थः, 'कारणान्तराभावेति नीरनिष्ठनदीकच्छान्वयबोधतात्पर्य्यज्ञानात्मककारणान्तराभावव्याप्यतयेत्यर्थः। तादृशतात्पर्य्यभ्रमे जाते नदीजलान्वयबोधानन्तरमपि नदीकच्छान्वयबोधस्य सर्व्वसम्मतत्वादिति भावः। 'कार्य्याभाव इति नदीकच्छान्वयबोधाभाव इत्यर्थः,[३] 'किमाकाङ्क्षयेति किं तदुच्चारणजन्यतादृशान्वयबुद्धिप्रागभावस्वरूपाया आकाङ्क्षायास्तद्रूपेण हेतुतयेत्यर्थः। प्रमाणान्तराभावे प्राचीनमवादान्यथानुपपत्तिमात्रस्य कारणतासाधकत्वादिति भावः[४]।

(१) नदीकच्छान्वयबोधः स्यादिति क०।

(२) ननु नदीजलान्वयबुद्ध्युत्तरं नदीकच्छान्वयबोधापत्तिवारणायाकाङ्क्षाया हेतुत्वं वक्तव्यं तदेव न इत्याशयेनाह, 'प्रागभावेत्यादि।

(३) तथाच तदुच्चारणजन्यतादृशशाब्दधीप्रागभावविरहो न तादृशकार्य्यानुत्पादप्रयोजक इति न तस्य कारणत्वमिति भावः।

(४) कारणत्वासाधकत्वादित्यर्थ इति ख०, ग०।

योग्यतासत्ती अपि न हेतू अयोग्ये अनासन्ने च तदुच्चारणजन्यसंसर्गज्ञानाभावेन तत्प्रागभावाभावात्[१]। न चैवं बाधाभावस्यानुमित्यादावपि हेतुत्वं, प्रागभावा-

---

यथाश्रुतन्तु[२] न युज्यते उत्पन्नपुनरुत्पादस्थले प्रागभावेतरसकलकारणसत्त्वेऽपि प्रागभावविरहेण व्यभिचारात्[३] अन्यथा प्रागभावस्य हेतुतैव न सिद्ध्येदिति ध्येयं। ननु नदीजलान्वयबोधतात्पर्य्यके पश्यो विमलं जलमित्यादौ नदी-जलयोरन्वयबोधानन्तरं नद्यां कच्छान्वयबोधवारणाय योग्याकाङ्क्षा हेतुरपि तु घटः कर्मत्वमित्यादौ घटवत्कर्मत्वमित्यादिशब्दान्वयबोधस्य घटमानयेत्यादौ वक्तुः शाब्दबोधद्वयेच्छां विनापि धारावाहिकशाब्दबोधस्य च वारणाय सा हेतुस्तथैव कारणान्तराभावस्य वक्तुमशक्यत्वादतो दोषान्तरमाह.. 'एतच्चेति,[४] 'न हेतू', स्यातामिति शेषः, 'अयोग्ये अनासन्ने चेति घटः कर्मत्वमित्यादाविवेति शेषः, 'तत्प्रागभावाभावात्' तदुच्चारणजन्यसंसर्गविषयकप्रागभावस्यैवाभावात्, शाब्दबोधाभावोपपत्तेरिति शेषः। ननु अनुमित्यादिस्थले लाघवतो विशिष्टबुद्धिसामान्यं प्रत्येव तदभावनिश्चयाभावस्य हेतुत्वकल्पनाच्छाब्दबोधेऽपि बाधा-

---

(१) तत्प्रागभावाभावसत्त्वादिति क०।

(२) प्रागभावत्वेन प्रागभावकारणतावगाहनमित्यर्थः।

(३) कारणसत्त्वे कार्य्यानुत्पादादित्यर्थः।

(४) उक्ताकाङ्क्षाया हेतुत्वे चेत्यर्थः।

भावेनैव कार्य्याभावात् प्रागभावस्य च कार्य्यमात्र-

भावरूपयोग्यताया हेतुत्वमित्यत आह, 'न चैवमिति, 'एवं' प्रागभावस्य प्रागभावत्व-तत्तत्प्रागभावत्वातिरिक्तरूपेणापि हेतुत्वे, 'हेतुत्वमिति, सम्भवतीति शेषः। 'प्रागभावाभावेनैवेति तत्तत्परामर्शजन्यानुमितिप्रागभावाभावेनैवेत्यर्थः, 'कार्य्याभावात्' कार्य्याभावसम्भवात्, तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभावस्य हेतुत्ववत्तत्परामर्शजन्यानुमितौ तत्तत्परामर्शजन्यानुमितिप्रागभावो हेतुरिति युक्तत्वात्। भवन्मते अनन्त-कार्य्य-कारणभावस्य दोषत्वे उक्ताकाङ्क्षाया अपि शाब्दधीहेतुत्वासिद्धेरिति भावः। ननु उक्ताकाङ्क्षया हेतुत्वेऽपि बाधाभावरूपयोग्यतायाः शाब्दधीहेतुत्वमावश्यकं अन्यथा यत्र प्रथममयोग्यतानिश्चयात्मकवाक्यज्ञानं ततः तात्पर्य्यादिज्ञानात्मकपदार्थोपस्थितिः ततोऽयोग्यतानिश्चयनाशः तत्रान्वयबोधस्यायोग्यतानिश्चयनाशक्षणेऽन्वयबोधापत्तेः तदुच्चारणचतुर्थक्षणे पदार्थोपस्थितिदशायां शाब्दधीजननात्तदुच्चारणजन्यशाब्दधीप्रागभावस्य सत्त्वात्, एवं पदजन्यपदार्थोपस्थितिरूपासत्तेरपि हेतुत्वमावश्यकं इतरथा तादृशासत्त्यव्यवहितपूर्वोत्पन्नतात्पर्य्यादिविषयकोच्चारणक्षणिकतस्तादृशासत्त्युत्पत्तिक्षणे शाब्दबोधापत्तेस्तत एव उच्चारणात् तृतीयक्षणे शाब्दबोधोत्पादेन तदुच्चारणजन्यशाब्दधीप्रागभावस्य सत्त्वात्, एवमनुमित्यादावपि बाधाभावस्य हेतुत्वमावश्यकम् अन्यथा बाधाव्यवहितोत्तरोत्पन्नपरामर्शादिव्यक्तितो द्वितीयक्षणेऽनुमित्यापत्तेः बाधनाशे तत एव

हेतुत्वात्। शब्दे नासाधारण्यं उत्थितोत्थाप्याकाङ्क्षयोः

परामर्शतृतीयक्षणे[१] अनुमित्युत्पत्तेस्तत्परामर्शजन्यानुमितिप्रागभावसत्त्वादित्यवधेयम्, 'प्रागभावस्येति, तदुच्चारणजन्यशाब्दधीप्रागभावस्येत्यर्थः, प्रागभावत्वेनेति शेषः। यत्र तादात्म्यसम्बन्धेन कार्य्यं तत्र प्रतियोगितासम्बन्धेन प्रागभाव इति तादात्म्य-प्रतियोगित्वघटितसामानाधिकरण्यप्रत्यासत्त्या प्रागभावत्वेन कार्य्यत्वेन कार्य्य-कारणभावादिति भावः। 'शब्दे नासाधारण्यमिति आकाङ्क्षाया न शाब्दान्यमात्रानिरूपितकारणतामात्रवत्त्वमित्यर्थः, प्रागभावत्वरूपेणान्यत्रापि हेतुत्वादिति भावः। न चेष्टापत्तिः, आकाङ्क्षा शाब्दबुद्धावसाधारणकारणमिति सकलप्रामाणिकप्रवादविरोधापत्तेरिति हृदयम्। ननु शाब्दबुद्धिनिरूपितकारणतामात्रवत्त्वं न प्रामाणिकप्रवादार्थः किन्तु शाब्दबुद्धिमात्रनिरूपितकारणतावत्त्वं तच्च प्रागभावत्वेनान्यत्र हेतुत्वेऽपि निरुक्तप्रागभावत्वेन कारणतामादाय सम्भवतीत्यत आह, 'उत्थितेति सम्बन्धिकपदनिरूपिताकाङ्क्षा उत्थिताकाङ्क्षा, तादृशपदानिरूपिताकाङ्क्षा उत्थाप्याकाङ्क्षा, 'उत्कर्षेति उत्थितोत्थाप्यव्यवहारनियामकौ उत्कर्षापकर्षौ न स्यातामित्यर्थः, यथाश्रुतेन बोध्यं, 'तदभावादिति उत्कर्षादेरसम्भवादित्यर्थः, उत्कर्षादेर्जातित्वादिति भावः। इदमप्ययुक्तं सम्बन्धिकपदार्थतात्पर्य्यकपदज्ञानघटितत्वाघटितत्वाभ्यामेवोत्थितोत्थाप्यव्यवहारोपपत्तेरतिरिक्तोत्कर्षादिजातौ मानाभावादन्यथा सिद्धान्तलक्षणेऽप्यगतेः।

---

(१) तत्परामर्शात् तृतीयक्षण इति पा०।

इत्युत्कर्षापकर्षौ न स्यातां प्रागभावे तदभावात्।

मैवम्, तदुच्चारणजन्यतादृशशाब्दधीप्रागभावस्याकाङ्क्षात्वे घटः कर्मत्वमित्यादौ घटवत्कर्मत्वमित्यादिभेदान्वयबोधापत्तिर्दुर्वारा तदुच्चारणजन्यतादृशशाब्दधीप्रागभावस्याप्रसिद्ध्या तदभावेन तत्र तादृशशाब्दबुद्ध्यभावस्य वक्तुमशक्यत्वात् घटमानयेत्याद्युच्चारणान्तरजन्यतादृशशाब्दधीप्रागभावस्य च तत्रापि सत्त्वात्[1] कार्य्याभावस्य कारणाभावाधीनत्वात्। अथ घटवत्कर्मत्वमित्यादिभेदान्वयबोधं प्रति घटमित्याद्यानुपूर्व्वीविशेषस्य हेतुत्वात् तदभावादेव तत्र तादृशशाब्दबोधाभावः। न चैवमानुपूर्व्वीविशेष एवाकाङ्क्षास्तु किं शिरस्कप्रागभावरूपाकाङ्क्षायास्तत्त्वेन हेतुतयेति वाच्यं। घटमानयेत्यादौ शतापि वक्तुः शाब्दबोधद्वयेच्छामेकेनैवोच्चारणेन धारावाहिकद्वितादिशाब्दबोधवारणाय तेन रूपेण हेतुत्वाभ्युपगमादिति चेत्, न, तद्वारणाय प्राथमिकशाब्दबोधव्यक्तिं प्रति तत्प्रागभावत्वेनैतत्प्रागभावत्वेन हेतुत्वस्यैवोचितत्वात् तदुच्चारणजन्यशाब्दबुद्ध्यन्तरस्याप्रसिद्धतया प्राथमिकतद्बुद्धिप्रागभावाभावेनैव द्वितीयादिक्षणे तदुच्चारणजन्यतादृशशाब्दबुद्ध्यापत्तिवारणसम्भवात् एकेनोच्चारणेन शाब्दबुद्धिद्वयाजनकत्वात् कार्य्यकारणभाववाहुल्यस्य तुल्यत्वात् कारणतावच्छेदक-कार्य्यतावच्छेदकयोर्गौरवस्य पुनस्तत्राधिकत्वात्। तादृशशाब्दबुद्धिसामान्यापादनस्य तत्रापि दुर्वारं तदुच्चारणान्तरजन्यता-

[1] तथाच तादृशशाब्दधीप्रागभावाभावोऽपि नात्र कार्य्याभावप्रयोजक इति भावः।

दृशशाब्दधीप्रागभावस्य सत्त्वेन विशेषसामग्रीविरहस्य वक्तुमशक्यत्वात्
तत्तदुच्चारणाभावेन विशेषसामग्रीविरहस्य ममापि सुवचत्वात्।
अथ यत्र शब्दद्वयेच्छावशात् एकोच्चारणादेव क्रमेण शाब्दबुद्धि-
द्वयं तत्र चतुर्थादिक्षणे तदुच्चारणजन्यतादृशशाब्दबुद्ध्यन्तरस्य वार-
णाय तदुच्चारणजन्यतादृशशाब्दबुद्धिप्रागभावस्य तदुच्चारणजन्यता-
दृशशाब्दधीहेतुत्वमावश्यकं। न च तत्राप्युत्पन्नव्यक्तिद्वयप्रागभावयो-
र्विरहेणैव तदुच्चारणजन्यतादृशशाब्दबुद्ध्यसम्भवः[1] तदुच्चारणजन्यता-
दृशशाब्दबुद्ध्यन्तरस्याप्रसिद्धत्वादिति वाच्यं। उत्पन्नव्यक्तिद्वयप्रागभा-
वयोस्तत्तद्व्यक्तित्वावच्छिन्नकारणतया[2] तेन तस्यान्यथासिद्ध्यसम्भवात्
तत्तद्व्यक्तित्वावच्छिन्नविशेषकारणेन सामान्यकारणस्यान्यथासिद्धि-
करणे जन्यद्रव्यसामान्यं प्रति विजातीयसंयोगादेरपि सामान्यकार-
णत्वविलोपापत्तिरिति चेत्, न, तावता तत्र तदुच्चारणजन्यतादृश-
शाब्दधीप्रागभावस्य हेतुत्वसिद्धावपि अन्यत्र तदुच्चारणजन्यतादृश-
शाब्दधीप्रागभावस्य तादृग्रूपेण हेतुत्वे मानाभावात्। वस्तुतस्तु तदपि
न तदुच्चारणभेदेनानन्तकार्यकारणभावासङ्गात् तदुच्चारणजन्यतादृ-
शशाब्दधीप्रागभावविरहेण चतुर्थादिक्षणे तदुच्चारणजन्यतादृशशाब्द-
बुद्धेरुत्पत्त्यसम्भवेऽपि तादृशशाब्दधीसामान्योत्पत्तिप्रसङ्गाच्च, परन्तु
तादृशशाब्दधीसामान्ये तादृशशाब्दबुद्धिसामान्यं प्रतिबन्धकं तथाच
तत एव चतुर्थादिक्षणे तदुच्चारणजन्यतादृशशाब्दधीविरहः। न च

(1) तथाच तादृशशाब्दबुद्धिद्वयप्रागभावविरह एव तत्र कार्यानुत्पाद-
प्रयोजक इति भावः।

(2) तत्तद्व्यक्तित्वावच्छिन्नविशेषकारणतयेति ख०।

तत्तद्व्यक्तित्वावच्छिन्नोत्पत्तिनियामिकायास्तत्सामग्र्या अभावादेव तत्त-
च्छब्दे चतुर्थादिक्षणे सामान्यसामग्रीतस्तादृशशब्दबुद्ध्यापत्तेरसम्भवात्
विशेषसामग्रीघटिताया एव सामान्यसामग्र्याः फलोपधायकत्वात्
इति वाच्यं । तत्तद्व्यक्तित्वावच्छिन्नकार्यत्वमादायातिप्रसङ्गवारणे
तदन्तरसामान्यकारणविलोपापत्तेरस्यैव दर्शितत्वात् तच्च तद्वारण-
जन्यतादृशशब्दधीप्रागभावस्य हेतुत्वासिद्धेश्च । न च तादृशशब्दबुद्धौ
तादृशशब्दबुद्धेः प्रतिबन्धकत्वे खण्डवाक्यार्थबोधानन्तरं खण्डवाक्यार्थ-
घटितमहावाक्यार्थबोधो न स्यादिति वाच्यं ; महावाक्यार्थबोधस्य
खण्डवाक्यार्थबोधपूर्वकत्वानभ्युपगमात् अनभिमतान्वयस्यैव ग्रन्थकार-
सम्मतत्वात् । अस्तु वा महावाक्यार्थबोधसामग्री उत्तेजिका एवं
क्रमिकशाब्दबोधद्वयतात्पर्यग्रहोऽप्युत्तेजकः तेन वक्तुः क्रमिकशाब्द-
बोधद्वयेच्छायां क्रमिकशाब्दबोधद्वयं नानुपपन्नं । न चैवं यत्र शुक्लो
घट इति वाक्यप्रयोगानन्तरं पदार्थोपस्थितिः श्वेतः कलश इति
वाक्योपस्थितिस्तयोरेकः कालः ततश्च शुक्लाभिन्नो घट इति शाब्द-
बुद्धिः ततः श्वेतः कलश इति वाक्यजन्यपुनःपदार्थोपस्थितिः तत्र
पुनः शुक्लाभिन्नो घट इति शाब्दबोधो न स्यात् समानाकार-
शाब्दबोधस्य प्रतिबन्धकस्य सत्त्वादिति वाच्यं । तत्र प्राथमिकशाब्द-
बोधनाशे चतुर्थक्षण एव तादृशशाब्दबोधान्तराभ्युपगमात् । अस्तु
वा तद्वाक्यजन्योपस्थितिव्यक्तीनां उत्तेजकत्वं एवं यद्वदुपस्थितित्वे
समानाकारशाब्दबोधत्वेऽप्यन्वयबोधस्यावश्यमेवोत्तेजकत्वं बोध्यमिति
प्राहुरिति संक्षेपः ।

अथ ज्ञाप्य-तदितरान्वयप्रकारकजिज्ञासानुकूलपदार्थोपस्थितिजनकत्वे सत्यजनिततात्पर्य्यविषयान्वय-

---

बोधकत्वं लक्षणमाह, 'अथ ज्ञाप्येति', 'ज्ञाप्य-तदितरयोः' तत्पदार्थोपस्थाप्य-तत्पदार्थोपस्थाप्येतरयोः, योऽन्वयः संसर्गस्तत्प्रकारिका या जिज्ञासा तदनुकूलेत्यर्थः, तदुभयपदार्थयोः तत्संसर्गप्रकारकेत्यादिकं तदुभयपदार्थयोस्तत्संसर्गकान्वयबोधे आकाङ्क्षा इति पर्य्यवसितार्थः। ज्ञाप्येतरत्वनिवेशे च[१] प्रयोजनाभावात् नीलो घट इत्यादावभिन्नयोरप्याकाङ्क्षासत्त्वाच्च जिज्ञासानुकूलत्वं तत्स्वरूपयोग्यत्वं तेनाजिज्ञासोरपि अन्वयबोधविलम्बो न स्यात्[२]। अत्र सत्यन्तेन घटः कर्म्मत्वमित्यादिस्वरूपायोग्यनिरासः, राज-पुत्रयोरन्वयबोधमात्रतात्पर्य्यकेऽयमित्यादौ राज-पुत्रयोरन्वयबोधानन्तरं राज-पुरुषयोरन्वयबोधवारणाय विशेष्यदलं। न च तत्र तात्पर्य्यज्ञानाभावादेव न तदानीं राज-पुरुषयोरन्वयबोधः तात्पर्य्यभ्रमे जाते राज-पुत्रयोरन्वयबोधानन्तरं राज-पुरुषयोरन्वयबोधः सर्व्वसिद्ध एवेति वाच्यं। पञ्चलक्षणानुपदमेव तद्दोषस्य वक्ष्यमाणत्वात् राज-पुत्रयोरन्वयबोधमात्रतात्पर्य्यके अयमेतीत्यादौ तात्पर्य्यभ्रमेण राज-पुरुषयोरन्वयबोधानन्तरं तात्पर्य्यप्रमया राज-पुरुषयोरन्वयबोधसम्पादनाय तात्पर्य्यविषयेत्यन्वयबोधविशेषणं। न चैवं खण्डवाक्यार्थबोधानन्तरं खण्डवाक्यार्थघटितमहावाक्यार्थबोधो न स्यात् एवं राज-पुत्रान्वय-

---

(१) तत्पदजन्यज्ञानविषय-तत्पदजन्यज्ञानविषयभिन्नत्वनिवेशे चेत्यर्थः।

(२) अन्वयबोधो न विलम्ब इति ख०, ग०।

बोधकत्वमाकाङ्क्षा, घटमानयतीत्यत्र घटमित्युक्ते किमा- नयति पश्यति वा, आनयतीत्युक्ते किं घटं अन्यद्वेति जिज्ञासा भवति। घटः कर्मत्वमानयनं कृतिरित्यत्रा-

---

बोध-राज-पुरुषान्वयबोधोभयतात्पर्य्यकेऽयमेतीत्यादौ तात्पर्य्यपरि- पौर्व्वापर्य्यक्रमेण राज-पुरुषयोरन्वयबोधानन्तरं राज-पुरुषयोरन्वय- बोधश्च न स्यादिति वाच्यं। तस्याशीन-तत्पुरुषीयत्वविशिष्ट-खण्ड- मितत्वाभावव्यत्तात्पर्य्यविषयान्वयबोधकत्वस्य विशेष्यत्वेन विवक्षित- त्वात्। न चैवं तादृशान्वयबोधद्वयतात्पर्य्यके अयमेतीत्यादौ राज- पुरुषयोरन्वयबोधानन्तरं राज-पुरुषयोरन्वयबोधसमये राज-पुरुषयो- रपि पुनरन्वयबोधः स्यादिति वाच्यं। खण्डवाक्यार्थबोधानन्तरं खण्डवाक्यार्थघटितमहावाक्यार्थबोधवदिष्टत्वादिति भावः। घटमान- यतीत्यत्र स्वात्मन्तरजनकत्वं प्रतिपादयति, 'घटमानयतीति, 'घटमि- त्युक्त' इति केवलं घटमित्युक्त इत्यर्थः, 'किमानयतीति किमानयनं घटकर्मतानिरूपकं दर्शनं वेत्यर्थः, 'आनयतीत्युक्ते' केवलमानयती- त्युक्ते इत्यर्थः, किं घटमिति 'किं घटनिष्ठकर्मत्वं आनयननिष्ठनि- रूपकताकमन्यनिष्ठकर्मत्वं आनयननिरूपकताकं वेत्यर्थः,(१) 'जिज्ञासा भवति' प्रश्नो भवति, अतो घटकर्मत्वानयनयोर्निरूपकतात्मकसम्बन्ध- प्रकारकजिज्ञासाजनकयोग्यपदार्थोपस्थितिजनकत्वमिति शेषः(२)। जिज्ञासां विना प्रश्नानुपपत्त्या केवल घटमित्यादिस्थले घटमित्या-

---

(१) किं घटनिष्ठकर्मत्वमानयननिष्ठनिरूपकताकमन्यद्वेत्यर्थ इति ख०।

(२) इत्यर्थ इति ख०।

शाब्दवैलक्षण्येनोपस्थितिः, त्रयाणां तुल्यवत् स्मरणे प्रथमं यतो राज्ञ इति पुरुषेण नान्वेति किन्तु पुत्रेण ततश्चाग्रेऽपि व्यर्थमजनितान्वयबोधत्वमिति।

घटः कर्मत्वमित्यादिवाक्यस्थघटादिपदजन्यघटाद्युपस्थितिवैलक्षण्येनेत्यर्थः, तथाच वैलक्षण्यमेवाप्रसिद्धमिति भावः। 'अजनितेत्यादि'-विशेषणप्रयोजनं सूचयति, 'त्रयाणामिति राज-पुत्र-पुरुषाणामित्यर्थः, 'तुल्यवत्' एकदा, 'प्रथमं' अजनितान्वयबोधदशायां, 'यतः' तात्पर्यधीविरहतः, 'तत एव' तात्पर्यधीविरहादेव, 'अग्रेऽपि' अजनितान्वयबोधदशायामपि, 'पुरुषेणान्वेती'त्यनुषज्यते 'व्यर्थमिति नोक्तप्रयोजनकमित्यर्थः। यथाश्रुतन्तु न सङ्गच्छते, घटमानयेत्यादौ धारावाहिकशाब्दबोधवारणायाजनितान्वयबोधकत्वदलस्यावश्यकतया वैयर्थ्याभावात्।

केचित्तु 'व्यर्थमिति यथाश्रुतमेव साधु। न च घटमानयेत्यादौ धारावाहिकशाब्दबुद्धिवारणाय तस्यावश्यकतया कुतो वैयर्थ्यमिति वाच्यं। अनुमितौ समानाकारसिद्धेरिव शाब्दबोधेऽपि समानाकारशाब्दबोधस्य प्रतिबन्धकतयैव धारावाहिकशाब्दबोधाभावसम्भवात् अन्यथा तदुपादानेऽपि तज्ज्ञानस्यैव शाब्दधीहेतुतया अविनश्यदवस्थतज्ज्ञानमादाय धारावाहिकशाब्दबोधापत्तेर्दुर्वारत्वादित्यभिप्राय इत्याहुः।

नव्यास्तु धारावाहिकप्रत्यक्षवदेव धारावाहिकशाब्दस्याप्युपगम-

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शब्दाकाङ्क्षावादपूर्वपक्षः ॥

तादीयर्थमित्यभिप्रायः, अतएव सिद्धान्तलक्षणे अनितान्वयबोधेऽति-व्याप्तिवारणाय विशेषणं कण्ठतो ग्रन्थकृता नोक्तमिति प्राञ्चः(1) ॥०॥

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाकाङ्क्षावादपूर्वपक्षरहस्यं ॥

---

(१) नोक्तमिति भाव इति क० ।

अथ शब्दाकाङ्क्षावादसिद्धान्तः ।

उच्यते । अभिधानापर्य्यवसानमाकाङ्क्षा यस्य येन विना न स्वार्थान्वयानुभावकत्वं तस्य तदपर्य्यवसानं,

---

अथ शब्दाकाङ्क्षावादसिद्धान्तरहस्यम् ॥

टीकाकारोक्तं लक्षणमेव परिष्कृत्य सिद्धान्तयति, 'अभिधानेति, अभिधानपदं करणव्युत्पत्त्या शब्दोच्चारणमभिधत्ते तस्यापर्य्यवसानं फलानुत्पादः, तथाच तदुच्चारणजन्यतादृशशाब्दबुद्धौ तदुच्चारणजन्यतादृशशाब्दधीप्रागभाव आकाङ्क्षेति फलितं, तच्च पूर्व्वोक्तरूपेण दुष्टं । न चाभिधानपदं भावव्युत्पत्त्या शाब्दबोधपरं तस्यापर्य्यवसानं अभावः तथाच तादृशशाब्दबोधे तादृशशाब्दबोधाभाव आकाङ्क्षेति फलितार्थ इति वाच्यं । घटः कर्म्मत्वमित्यादावतिव्याप्तेरित्यतः पारिभाषिकमभिधानापर्य्यवसानपदार्थमाह, 'यस्येति, यत्पदनिष्ठ-त्पदेव विनेत्यर्थः, 'न स्वार्थान्वयानुभावकत्वमिति न तादृशान्वयबोध-इत्यर्थः, 'तस्य तदिति तत्पदस्य तत्पदवत्त्वमित्यर्थः, 'अपर्य्यवसानं' तादृशान्वयबोधे अभिधानापर्य्यवसानं, तथाच यत्पदभिन्नयत्पद-व्यतिरेकप्रयुक्तो यादृशान्वयबोधाभावस्तत्पदस्य तत्पदवत्त्वं तादृशा-न्वयबोधे अभिधानापर्य्यवसानं इति फलितार्थः । एवञ्च शब्दत्वं,

प्रयुक्तत्वस्य कारणाभावात् कार्य्याभाव इति प्रतीतिसाक्षिकः स्वरूप-सम्बन्धविशेषः, तत्प्रतियोगिजन्यप्रतियोगिकत्वं वा तत्प्रयुक्तत्वं, भवति चाव्यवहितपूर्ववर्त्तिताकरूपसमभिव्याहारसम्बन्धेन घटपदनिष्ठस्यानु-स्वारपदस्य व्यतिरेकप्रयुक्तो घटवत्कर्म्मत्वमिति भेदान्वयबुद्ध्यभाव-इति तादृशान्वयबोधे घटपदस्यानुस्वारपदवत्त्वमाकाङ्क्षा । एवं विभि-गमनाविरहादव्यवहितोत्तरवर्त्तिताकरूपसमभिव्याहारसम्बन्धेनानुस्वार-पदनिष्ठस्य घटपदस्य व्यतिरेकप्रयुक्तोऽपि घटवत्कर्म्मत्वमिति भेदा-न्वयबुद्ध्यभाव इत्यनुस्वारपदस्य घटपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा, घटः कर्म्मत्वमित्यादौ अव्यवहितपूर्ववर्त्तिताकरूपसमभि-व्याहारसम्बन्धेन घटपदस्य कर्म्मत्वपदवत्त्वमव्यवहितोत्तरवर्त्तिताकरूप-समभिव्याहारसम्बन्धेन कर्म्मत्वपदस्य घटपदवत्त्वञ्च न घटवत्कर्म्मत्व-मिति भेदान्वयबोधे आकाङ्क्षा, अव्यवहितपूर्ववर्त्तिताकरूपसमभि-व्याहारसम्बन्धेन घटपदनिष्ठस्य कर्म्मत्वपदस्याव्यवहितोत्तरवर्त्तिताकरूप-समभिव्याहारसम्बन्धेन कर्म्मत्वपदनिष्ठस्य घटपदवत्त्वस्य च व्यतिरेक-योर्घटवत्कर्म्मत्वमिति भेदान्वयबोधाभावाप्रयोजकत्वात् कारणाभा-वस्यैव कार्य्याभावप्रयोजकत्वात्, अव्यवहितपूर्ववर्त्तितासम्बन्धेन घट-पदनिष्ठस्य कर्म्मत्वपदस्याव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्म्मत्वपदनिष्ठस्य घटपदवत्त्वस्य वा तादृशभेदान्वयबुद्धावहेतुत्वात् । न च घटपदेऽनु-स्वारपदवत्त्वस्यानुस्वारपदे घटपदवत्त्वस्य च घटवत्कर्म्मत्वमिति भेदा-न्वयबुद्धावाकाङ्क्षात्वे अमं घट इत्यादावपि तादृशान्वयबुद्ध्यापत्तिः अव्यवहितोत्तरवर्त्तितासम्बन्धेन घटपदेऽनुस्वारपदवत्त्वस्याव्यवहित-पूर्ववर्त्तितासम्बन्धेनानुस्वारपदे घटपदवत्त्वस्य च तत्र सत्त्वादिति

वाच्यं। यादृशसमभिव्याहारसम्बन्धेन यत्पदनिष्ठस्य तत्पदस्य व्यतिरेकप्रयुक्तो यादृशान्वयबुद्ध्यभावस्तादृशसमभिव्याहारसम्बन्धेन तत्पदस्य तत्पदवत्त्वं तादृशान्वयबोधे आकाङ्क्षेति विवक्षितत्वादित्यस्य अव्यवहितपूर्ववर्त्तितारूपसमभिव्याहारसम्बन्धेन घटपदे अनुस्वारपदवत्त्वमव्यवहितोत्तरवर्त्तितारूपसमभिव्याहारसम्बन्धेनानुस्वारपदे घटपदवत्त्वमेव वा तादृशभेदान्वयबोधे आकाङ्क्षा। न च यादृशसमभिव्याहारसम्बन्धेन यत्पदनिष्ठस्य यत्पदस्य जन्यो यादृशान्वयबोध इति भावगर्भमेव लक्षणमस्तु लाघवादिति वाच्यं। न ह्यन्वयबोधाभावाभावस्य ज्ञानं कारणं येन गौरवं दूषणावहं स्यात्, अपि तु तत्तत्सम्बन्धेन तत्तत्पदस्य तत्तत्पदवत्त्वमेवाकाङ्क्षा, तज्ज्ञानञ्च शाब्दधीहेतुस्तत्परिचायकस्यान्वयबोधाभावान्तं। न च तत्र गौरवं दोषमावहति, परिचायकशब्दलाघव-गौरवयोरकिञ्चित्करत्वादिति भावः। इदञ्च ज्ञायमानशब्दकरणतामते, शब्दज्ञानकरणतापक्षे तु यादृशसमभिव्याहारसम्बन्धेन यत्पदविशेष्यक-यत्पदप्रकारकोपस्थितिव्यतिरेकप्रयुक्तो यादृशान्वयबुद्ध्यभाव इति पूर्वदलं विवक्षणीयं, उत्तरदलन्तु तुल्यमेवान्यथा असम्भवापत्तेः, पदज्ञानस्यैव कारणतया घटवत्कर्मत्वमिति भेदान्वयबुद्ध्यभावादौ घटपदनिष्ठस्यानुस्वारपदादेर्व्यतिरेकस्याप्रयोजकत्वात् कारणाभावस्यैव कार्याभावप्रयोजकत्वात्। न चैवं घटः कर्मत्वमित्यादावव्यवहितपूर्ववर्त्तितासम्बन्धेन घटपदे कर्मत्वपदवत्त्वस्याव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्मत्वपदे घटपदवत्त्वस्य च घटवत्कर्मत्वमिति भेदान्वयबोधे आकाङ्क्षात्वापत्तिः तादृशभेदान्वयबुद्ध्यभावस्याव्यवहितपूर्ववर्त्तितासम्बन्धेन घटपदविशेष्यक-कर्मत्व-

पदप्रकारकोपस्थितेः अव्यवहितोत्तरवर्त्तितासम्बन्धेन कर्मत्वपदविशे-
ष्यक-घटपदप्रकारकोपस्थितेश्च व्यतिरेकेणापि प्रयुक्तत्वात् अव्यवहित-
पूर्ववर्त्तितासम्बन्धेनानुस्वारत्वरूपेण कर्मत्वपदप्रकारकघटपदविशेष्यक-
भ्रमस्याव्यवहितोत्तरवर्त्तितासम्बन्धेनानुस्वारत्वरूपेण कर्मत्वपदविशे-
ष्यक-घटपदप्रकारकभ्रमस्य च तादृशान्वयबोधजनकत्वादिति वाच्यं।
तत्संसर्गक-यत्पदत्वधर्म्मितावच्छेदकक-यत्पदत्वविशेषणतावच्छेदकक-
निश्चयव्यतिरेकप्रयुक्तो यादृशान्वयबुद्ध्यभावस्तत्सम्बन्धेन तत्पदत्वविशिष्टे
तत्पदत्वविशिष्टत्वं तादृशान्वयबोधे आकाङ्क्षेति विवक्षितत्वात्। न
च तथापि अव्यवहितपूर्ववर्त्तितासम्बन्धेन घटपदत्वावच्छिन्ननिष्ठ-
कर्मत्वपदत्वावच्छिन्नवत्त्वादावतिव्याप्तिः घटः कर्मत्वं घटमिति समू-
हालम्बनस्य घटवत्कर्मत्वमिति भेदान्वयबोधजनकतया घटपदत्व-
धर्म्मितावच्छेदककाव्यवहितपूर्ववर्त्तितासंसर्गक-कर्मत्वपदत्वावच्छिन्नप्र-
कारकनिश्चयादिव्यतिरेकेणापि प्रयुक्तत्वात् तादृशान्वयबुद्ध्यभावस्येति
वाच्यं; तथाविधनिश्चयत्वावच्छिन्नव्यतिरेकप्रयुक्तत्वस्य विवक्षितत्वात्
घटपदत्वधर्म्मितावच्छेदककाव्यवहितपूर्ववर्त्तितासंसर्गककर्मत्वपदत्वविशेष-
णतावच्छेदककनिश्चयत्वावच्छिन्नाभावप्रयुक्तस्य न घटवत्कर्मत्वमिति
भेदान्वयबोधाभावः कारणतावच्छेदकावच्छिन्नाभावेनैव प्रयुक्तत्वात्
कार्य्याभावस्य, तत्प्रतियोगिजन्यप्रतियोगिकत्वं तत्प्रयुक्तत्वमिति पक्षे
जन्यत्वमेव तादृशं विवक्षणीयमिति न कश्चिद्दोषः। एवं यादृश-
शाब्दाभावोऽपि यादृशशाब्दत्वघटितधर्म्मावच्छिन्नाभावो विवक्षितस्तेन
तादृशसमूहालम्बनेन घटाभिन्नं कर्मत्वं घटश्च तत्कर्मत्वमिति समू-
हालम्बनशाब्दधीजननात्तादृशसमूहालम्बनात्मकघटधर्म्मिककर्मत्वमिति-

भेदान्वयबोधाभावस्य घटपदत्वधर्म्मितावच्छेदककाव्यवहितपूर्व्ववर्त्तिता-संसर्गक-कर्म्मत्वपदत्वविशेषणतावच्छेदककनिश्चयत्वावच्छिन्नाभावप्रयुक्त-त्वेऽपि न क्षतिः कार्य्यतावच्छेदकावच्छिन्नाभावस्यैव कारणतावच्छेद-कावच्छिन्नाभावप्रयुक्तत्वेन घटवृत्तिकर्म्मत्वमिति भेदान्वयबुद्धित्वघटित-धर्म्मावच्छिन्नाभावस्य निरुक्तनिश्चयत्वावच्छिन्नाभावाप्रयुक्तत्वात् तादृ-शभेदान्वयबुद्धित्वघटितधर्म्मस्य तत्कार्य्यतानवच्छेदकत्वादिति भाति-श्चापि प्रसक्तापि, इत्थञ्च कर्म्मत्व-कर्त्तृत्व-करणत्वादिविशेष्यकाधेयतासंस-र्गक-घट-पटादिप्रकारकशाब्दबोधेऽव्यवहितपूर्व्ववर्त्तितासम्बन्धेन घट-पटादिपदेऽनुस्वारादिमत्त्वस्याव्यवहितोत्तरवर्त्तितासम्बन्धेनानुस्वारादि-पदे घटपदादिमत्त्वस्याकाङ्क्षा तेन घटं पटं घटेन पटेन इत्यादावेव तादृशान्वयबोधो न तु घटः कर्म्मत्वं पटः कर्म्मत्वं घटः कर्त्तृत्वं पटः कर्त्तृत्वं घटः करणत्वं पटः करणत्वमित्यादौ तथान्वय-बोधः, एवं कृति-व्यापाराश्रयत्वादिविशेष्यकानुकूलत्व-विषयित्व-निरूपितत्वादिसंसर्गकानयन-गमन-दर्शनादिप्रकारकशाब्दबोधं प्रति अव्यवहितपूर्व्ववर्त्तितासम्बन्धेन आनय-गच्छ-पश्यपदादौ त्यादिपद-वत्त्वमव्यवहितोत्तरवर्त्तितासम्बन्धेन त्यादिपदे आनय-गच्छ-पश्य-पदादिमत्त्वस्याकाङ्क्षा तेनानयति गच्छति पश्यतीत्यादावेव तादृ-शान्वयबोधो न तु आनयनं कृतिः गमनं व्यापारः दर्शनमाश्रयत्वं इत्यादौ तथान्वयबोध इति निर्व्यूढं। न चैतेषां ज्ञानस्य हेतुत्वे मानाभावः कर्म्मत्वादिविशेष्यकाधेयतासंसर्गकघटादिप्रकारकशाब्द-बोधे विभक्तिजन्यकर्म्मत्वाद्युपस्थितेर्हेतुत्वाभ्युपगमादेव घटः कर्म्मत्व-मित्यादौ तादृशान्वयबोधाभावसम्भवादेवं कृत्यादिविशेष्यकानुकूल-

त्वादिसंसर्गकानयनादिप्रकारकशाब्दबोधे त्यादिप्रत्ययजन्यकृत्याद्युप-स्थितेर्हेतुत्वाभ्युपगमेनैवानयनं कृतिः गमनं व्यापार इत्यादौ तथा-न्वयबोधाभावसम्भवादिति वाच्यं। अम् घट घटाम् टा-घट घट-टा इत्यादौ घटोऽस्ति चैत्रेण पच्यते घटोऽस्ति घटश्चानयेत्यादौ च तथान्वयबोधापत्तेः अमादिविभक्तिजन्यकर्मत्वाद्युपस्थितिसत्त्वात्, एवं तिरानयनं, आनयनं तिरित्यादौ आनयनमस्ति पचति चेत्यादौ च तथान्वयबोधापत्तेश्च त्यादिप्रत्ययजन्यकृत्याद्युपस्थितिसत्त्वात्। न चैतादृशाकाङ्क्षाज्ञानस्य हेतुत्वे विपरीतव्युत्पन्नस्य चैत्रः कर्तृत्वं घटः कर्मत्वमित्यादौ चैत्रनिष्ठकर्तृत्वं घटवृत्ति कर्मत्वमित्याद्यन्वयबोधः कथं स्यादिति वाच्यं। विपरीतव्युत्पन्नस्य कर्मत्वादिपदेऽनुस्वार-त्वादिभ्रमादेव तत्र तादृशशाब्दबोधोदयात्। न हि वस्तुगत्या घटपदादौ अनुस्वारादिमत्त्वस्य अनुस्वारादौ घटपदादिमत्त्वस्य वा ज्ञानमेव तादृशशाब्दबोधे हेतुः, अपि तु घटपदत्वादिधर्मिताव-च्छेदकानुस्वारत्वादिविशेषणतावच्छेदकं अनुस्वारपदत्वधर्मिताव-च्छेदककं घटपदत्वादिविशेषणतावच्छेदककं वा भ्रम-प्रमासाधारणं ज्ञानमेव तादृशशाब्दबुद्धौ हेतुः, यस्य पुंसः कर्मत्वपदादौ नानु-स्वारत्वभ्रमः तस्य तु घट-कर्मत्वादिपदात् घट-कर्मत्वाद्योरुपस्थित्या मानसोऽन्वयबोधः शब्दप्रयोज्यत्वनिवेशनस्य शाब्दत्वानुभवः। न चैवं घटवृत्तिकर्मत्वमित्याद्यन्वयबोधे घटमित्याद्यानुपूर्वीविशेष आकाङ्क्षा आनयनानुकूलकृतिरित्याद्यन्वयबोधे च आनयतीत्याद्यानुपूर्वीविशेष-आकाङ्क्षेति फलितं तथा च घटमानयतीत्यादौ धारावाहिकशाब्द-बोधापत्तिः तादृशानुपूर्वीविशेषज्ञानस्य स्वप्रयोज्यतत्तत्पदार्थोप-

स्थितिद्वारैव हेतुतया अन्वयबोधे जातेऽपि तादृशपदार्थोपस्थिति-द्वारा तत्सत्त्वादिति वाच्यं। अमति विषयान्तरसञ्चारादौ धारा-वाहिकप्रत्यक्षवत् धारावाहिकशाब्दबोधोऽपीष्यत एव। अस्तु वा अनुमितौ समानाकारसिद्धिरिव शाब्दबोधेऽपि उक्तक्रमेण समा-नाकारशाब्दधीर्विरोधिनीति मणिकृतो निष्कर्षः।

ननु तथापि कर्मताविशेष्यकाधेयतासंसर्गकघटप्रकारकान्वय-बोधेऽव्यवहितपूर्ववर्त्तितासम्बन्धेन घटपदेऽनुस्वारवत्त्वज्ञानस्य अव्यव-हितोत्तरवर्त्तितासम्बन्धेनानुस्वारे घटपदवत्त्वज्ञानस्य चोभयोर्हेतुत्वे परस्परं व्यभिचारः प्रत्येकज्ञानमात्रादपि तादृशशाब्दबोधोदयात् दण्ड-चक्रवत्सम्भूयेन कारणत्वस्यासम्भवात्। किञ्च घटं घटौ घटान् कलशं कलशौ कलशान् कुम्भं कुम्भौ कुम्भानित्यादौ घटस्यानयनं कलशस्यानयनं कुम्भस्यानयनमित्यादौ च तादृशान्वयबोधे व्यभिचारः। न च तत्र घटमित्यानुपूर्व्वीस्मरणादेव तादृशान्वयबोध इति वाच्यं। विनिगमनाविरहात् घटादिपदे ओकारादिमत्त्वं कलशादिपदे-ऽनुस्वारादिमत्त्वमेव वा तादृशान्वयबोधे आकाङ्क्षा घटमित्यत्र च तत्स्मरणादेवान्वयबोध इत्यस्य सुवचत्वात्। एवमुक्तविशेष्यकानुकूल-त्वादिसंसर्गकानयनप्रकारकशाब्दबोधेऽव्यवहितपूर्व्ववर्त्तितासम्बन्धेनान-यपदे तिपदवत्त्वज्ञानस्य अव्यवहितोत्तरवर्त्तितासम्बन्धेन तिपदे आनयपदवत्त्वज्ञानस्य चोभयोर्हेतुत्वे परस्परं व्यभिचारः, आनयति आनयतः आनयन्ति प्रापयति प्रापयतः प्रापयन्ति इत्यादावपि तादृशान्वयबोधात् व्यभिचारश्च। अथाव्यवहितपूर्व्ववर्त्तितासम्बन्धेन घटोपस्थापकनामपदे कर्मत्वोपस्थापकविभक्तिमत्त्वस्य अव्यवहितो-

त्तरवर्त्तित्वसम्बन्धेन कर्म्मत्वोपस्थापकविभक्तौ घटोपस्थापकनामपदत्वस्य च द्वयोराकाङ्क्षात्वं, इत्थञ्च घटं घटौ घटान् कलसं कलसौ कलसान् कुम्भं कुम्भौ कुम्भानित्यादौ घटस्यानयनमित्यादौ च न क्वापि व्यभिचारः घटोपस्थापकनामपदत्वेन कर्म्मत्वोपस्थापकविभक्तित्वेन च सर्व्वेषामनुगमात्। नापि यत्र घटमित्यादौ घटादिपदस्य पटे लक्षणया पटवृत्ति कर्म्मत्वमिति बोधस्तत्रापि न व्यभिचारः। न च तथाप्युक्तयोर्द्वयोरेव परस्परं व्यभिचार इति वाच्यं। विनिगमनाविरहेण उभयोर्ज्ञानस्यैव हेतुत्वसिद्धौ सर्व्वत्रोभयोर्ज्ञानादेव तादृशशाब्दधीर्न तु प्रत्येकमात्रज्ञानादित्यनायत्याभ्युपगमात्, एवमुक्तरीत्यैवानुकूलत्वादिसंसर्गकानयनादिप्रकारकशाब्दबोधेऽव्यवहितपूर्व्ववर्त्तितासंसर्गेण आनयनोपस्थापकधातौ कृत्युपस्थापकाख्यातत्वस्य अव्यवहितोत्तरवर्त्तितासंसर्गेण कृत्युपस्थापकाख्याते आनयनोपस्थापकधातुमत्त्वस्य च द्वयोराकाङ्क्षात्वं एवञ्चानयति आनयतः आनयन्ति प्रापयति प्रापयतः प्रापयन्ति इत्यादौ न क्वापि व्यभिचारः आनयनोपस्थापकधातुत्वेन कृत्युपस्थापकाख्यातत्वेन च सर्व्वेषामनुगमात्, नापि यत्र पचतीत्यादौ पचादिधातोरानयने लक्षणया आनयनानुकूला कृतिरित्यन्वयबोधस्तत्रापि व्यभिचारः। न चैवं घटमित्यादावमादिविभक्तिविरहात् कथमन्वयबोध इति वाच्यं। तत्रानुस्वारत्वादिना अमादिस्मृत्या अन्वयबोध इति सर्व्वसिद्धत्वात् अन्यथा अनुस्वारादेः कर्म्मत्वे शक्तिविरहात् ततः कर्म्मत्वादिशाब्दबोधानुपपत्तिः वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दधीहेतुत्वादिति चेन्न, घटाम् घटमम् इत्यादावपि घटवृत्तिकर्म्मत्वमित्याद्यन्वय-

बोधापत्तेः घटोपस्थापकनामपदे अम्-शसादिविभक्तिमत्त्वस्य सत्त्वात्, नामत्व-विभक्तित्वयोर्धातुत्वाख्यातत्वयोश्च सर्व्वसाधारणयोरनुगतयोरभावात् तादृशेणानुगमासम्भवाच्च। अपिच घटाद्युपस्थापकनामादिपदे कर्म्मत्वाद्युपस्थापकविभक्त्यादिमत्त्वस्य येन केनापि रूपेण ज्ञानं हेतुः तादृशनामत्व-विभक्तित्वादिना वा घटपदत्वाम्पदत्वादिना वा, नाद्यः प्रमेयत्वादिरूपेण ज्ञानादपि शाब्दज्ञानापत्तेः, न द्वितीयः घटमित्यादौ घटादिपदस्य नामत्वादिकममादिपदस्य विभक्तित्वादिकमविदुषोऽपि शाब्दबोधोदयात्, नान्त्यः अननुगमतादवस्थ्यात् इति चेन्नाहुः अव्यवहितपूर्व्ववर्त्तितासंसर्गक घटपदत्वधर्म्मितावच्छेदककानुस्वारत्वादिविशेषणतावच्छेदकनिश्चयत्वेन कारणता तादृशनिश्चयविशिष्टकर्म्मत्वविशेष्यताकाधेयतासंसर्गक-घटप्रकारकशाब्दबुद्धित्वेन कार्य्यता, एवमव्यवहितोत्तरवर्त्तितासंसर्गकानुस्वारत्वधर्म्मितावच्छेदकक-घटपदत्वविशेषणतावच्छेदककनिश्चयत्वेन कारणता तादृशनिश्चयविशिष्टकर्म्मत्वविशेष्यकाधेयत्वसंसर्गक-घटप्रकारकशाब्दबुद्धित्वेन कार्य्यता, वैशिष्ट्यञ्च स्वाधिकरणावच्छेदेन स्वाव्यवहितोत्तरक्षणवर्त्तित्वं, तच्च संसर्गविधया प्रविष्टमिति तदननुगमो न दोषाय स्वरूपसम्बन्धस्थले सम्बन्धाननुगमस्यादोषतायाः स्वीकृतत्वात् अन्यतमत्वादिना यथाकथञ्चिदनुगमसम्भवाच्च। एवं घटं घटौ घटान् कलसं कलसौ कलसान् कुम्भं कुम्भौ कुम्भानित्यादौ यद्यदानुपूर्व्वीतः कर्म्मत्वविशेष्यकाधेयतासंसर्गक-घटप्रकारकान्वयबोधोऽनुभवसिद्धः तत्तदानुपूर्व्वीनिश्चयविशिष्टत्वमेवं स्वाधिकरणावच्छिन्नस्वाव्यवहितोत्तरवर्त्तितासम्बन्धेन कार्य्यतावच्छेदके प्रवेश्य तत्तदानुपूर्व्वीविशेषा-

काङ्क्षानिश्चय-कर्मत्वविशेष्यकाधेयतासंसर्गक-घटप्रकारकशाब्दबोधयोः कार्य्य-कारणभावः कल्पनीयः[१] तत्तदानुपूर्व्वी घटकपदयोर्विशेष्य-विशेषणभावभेदात् उभयक्रमेण कार्य्य-कारणभावद्वयमिति न परस्परं व्यभिचारः, एवमेव कर्तृत्व-करणत्वादिविशेष्यक-घटप्रकारकान्वय-बोधेऽपि घटेन घटाभ्यां घटैः कलसेन कलसाभ्यां कलसैरित्याद्यानु-पूर्व्वीविशेषात्मकाकाङ्क्षानिश्चयानां कर्मत्वादिविशेष्यक-पटादिप्रकार-कान्वयबोधे च पटं पटौ पटान् वस्त्रं वस्त्रे वस्त्राणीत्याद्यानुपूर्व्वी-विशेषात्मकाकाङ्क्षानिश्चयानां कार्य्य-कारणभावः । न च तथापि पदार्थोपस्थित्यादिना तत्तदानुपूर्व्वीविशेषात्मकाकाङ्क्षानिश्चयनाशे-ऽपि शाब्दबोधोदयाद्व्यभिचार इति वाच्यं । स्वप्रयोज्यतत्पदार्थोप-स्थितिसम्बन्धेनैव तस्य हेतुतया तन्नाशेऽपि तेन सम्बन्धेन सत्त्वात् । एतेन तत्प्रमेयमित्यादौ तदादिपदेनापि घटादिनिष्ठकर्मत्वाद्युप-स्थितिद्वारा कर्मत्वादिविशेष्यकाधेयतासंसर्गक-घटादिप्रकारकान्वय-बोधजननात् तत्र घटमित्याद्यानुपूर्व्वीविशेषात्मकाकाङ्क्षाज्ञानस्य व्यभिचारः, एवं घटः प्रमेय इत्यादौ केवलघटादिपदेनापि घट-निष्ठकर्मत्वादौ लक्षणादिना कर्मत्वादिविशेष्यकाधेयतासंसर्गक-घटा-दिप्रकारकान्वयबुद्धिजननात् तत्र घटमित्याद्यानुपूर्व्वीविशेषात्म-काकाङ्क्षाज्ञानस्य इत्यपि निरस्तं । स्वाधिकरणावच्छिन्नक्षणावच्छि-न्नोत्तरवर्त्तितासम्बन्धेन तत्तदानुपूर्व्वीनिश्चयविशिष्टतादृशशाब्दबोधं प्रत्येव तत्तदानुपूर्व्वीनिश्चयानां हेतुत्वात् तदादिपदजन्यतादृशशाब्द-बुद्धेस्तादृशत्वात् ।

(१) तत्तदानुपूर्व्वीत्यादिः कल्पनीय इत्यन्तः पाठः ग० घ० पुस्तके नास्ति ।

कश्चित्तु[1] कर्मत्वोद्देश्यक-घटविधेयकशाब्दबुद्धित्वस्य घटमित्याद्यानुपूर्व्वीविशेषात्मकाकाङ्क्षानिरूपकार्य्यतावच्छेदकतया तदादिपदजन्यकर्मत्वविशेष्यक-घटप्रकारकशाब्दबोधे न व्यभिचारः विशिष्टस्य पदार्थत्वेन तादृशोद्देश्य-विधेयभावापन्नत्वाभावात्[2] घटमित्यादौ च कर्मत्वत्वावच्छेदेन घटसंशयविरोधिनिश्चयिताव्याप्यतादृशविषयिताया अनुभवबलेनाभ्युपेयत्वात् इत्याह[3]। तदसत्। तथापि घटं घटौ घटान् कलसं कलसौ कलसान् इत्याद्यानुपूर्व्वीविशेषाणां परस्परव्यभिचारवारणायोक्तक्रमस्यावश्यमनुसरणीयत्वात्।

न चैवंरूपेण हेतु-हेतुमद्भावे घटः कर्मत्वमित्यादावपि कर्मत्वविशेष्यकाधेयत्वसंसर्गक-घटप्रकारकशाब्दबोधापत्तिः[4] घटं कलसमित्याद्यानुपूर्व्वीविशेषात्मकाकाङ्क्षाज्ञानानां तादृशज्ञानाव्यवहितोत्तरवर्त्तितादृशशाब्दबोधं प्रत्येव हेतुत्वादिति वाच्यं। घटं कलसमित्याद्यानुपूर्व्वीविशेषज्ञानाव्यवहितोत्तरवर्त्त्यतिरिक्ततादृशशाब्दबोधस्याप्रसिद्धतया तदानुपूर्व्वीविशेषज्ञानात्मकविशेषसामग्रीविरहादेव तत्र तादृशशाब्दबोधानुदयात् विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलोपधायकत्वात्। न च घटं कलसं इत्याद्यानुपूर्व्वीज्ञानाव्यवहितोत्तरवर्त्त्यतिरिक्तस्तादृशशाब्दबोधः तत्पदादिजन्यतादृशशाब्दबोध एव प्रसिद्धस्तस्यैव घटः कर्मत्वमित्यादौ उत्पत्तिप्रसङ्गः

---

(१) केचित्त्विति ख०, ग०।

(२) एकपदोपस्थाप्यपदार्थानां उद्देश्य-विधेयभावास्वीकारादिति भावः।

(३) इत्याहुरिति ख०, ग०।

(४) योग्यताज्ञानबलादेवेत्यादिः।

नाम-विभक्ति-धात्वाख्यात-क्रिया-कारकपदानां पद-

इति वाच्यं। तत्पदादिजन्यतादृशशाब्दबोधे स्वजन्यघटनिष्ठकर्मत्वाद्यात्मकविशिष्टोपस्थितिद्वारा तत्पदादिज्ञानस्य हेतुतया तदभावादेव तस्यासम्भवात्। तादृशोपस्थितिद्वारा तत्पदादिज्ञानस्य कार्य्यतावच्छेदकञ्च तत्पदादिज्ञानविशिष्टतादृशशाब्दबुद्धित्वं वैशिष्ट्यञ्च स्वाधिकरणावच्छेदेन स्वजन्यघटनिष्ठकर्मत्वविषयकतत्तदुपस्थित्यव्यवहितोत्तरवर्त्तित्वं, इत्थञ्च कृत्यादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकशाब्दबोधेऽपि अव्यवहितपूर्ववर्त्तितासंसर्गकानयनपदत्वधर्मितावच्छेदकक-तिपदत्वविशेषणतावच्छेदककनिश्चयत्वेन कारणता तादृशनिश्चयविशिष्टकृत्यादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकशाब्दबुद्धित्वेन कार्य्यता, एवमव्यवहितोत्तरवर्त्तितासंसर्गकतिपदत्वधर्मितावच्छेदककानयनपदत्वविशेषणतावच्छेदककनिश्चयत्वेन कारणता तादृशनिश्चयविशिष्टकृत्यादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकशाब्दबुद्धित्वेन कार्य्यता इत्यादिक्रमेण आनयति आनयतः आनयन्ति प्रापयति प्रापयतः प्रापयन्तीत्यादिपदानुपूर्वीतः शक्त्या लक्षणया वा कृत्यादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकान्वयबोधोऽनुभवसिद्धः तत्तदानुपूर्वीनिश्चयमेव कार्य्यतावच्छेदके प्रवेश्य प्रत्येकानुपूर्वीघटकपदयोर्विशेष्य-विशेषणभावभेदात् कार्य्य-कारणभावद्वयं बोध्यं, आनयनं कृतिरित्यादौ तु विशेषणसामर्थ्यविरहादेव न तादृशशाब्दबोधोदय इति समासः।

वाक्येषु वचनं सङ्गमयति, 'नाम-विभक्तीति घटादिपदानुसारा-

कुतो न शाब्दबोधः, एवं चैत्रः पच्यते तण्डुलं पचतीत्यादौ कर्तृत्व-कर्मत्वादिसम्बन्धेन पाकादिविशेष्यकः चैत्र-तण्डुलादिप्रकारकः कुतो न शाब्दबोधः, एवं पचति गच्छति चेत्यादौ उत्तरवर्त्तित्वादि-सम्बन्धेन गमनादिविशेष्यकः पाकादिप्रकारकः कुतो न शाब्दबोधः। न च नामार्थयोर्नामार्थ-धात्वर्थयोर्धात्वर्थयोश्च भेदेन परस्परमन्वयबोधस्य(१) अव्युत्पन्नत्वान्न तत्र तथा शाब्दबोध इति वाच्यम्। निराकाङ्क्षत्वमन्तरेणाव्युत्पन्नेर्निर्वक्तुमशक्यत्वात् आकाङ्क्षायाश्च एतादृशशाब्दबुद्धावनिर्वचनात्। अथ तत्प्रमेयमित्यादावेव तादृशशाब्दबोधः प्रसिद्धः तदादिपदेन तादृशविशिष्टोपस्थितिद्वारा तादृशशाब्दबोधजननात् तथाच तादृशशाब्दबोधं प्रति स्वजन्यतादृशविशिष्टोपस्थितिसम्बन्धेन तदादिपदज्ञानस्य हेतुतया तदभावादेव नोक्तस्थलेषु तादृशशाब्दबोधः। न च तथापि संयोगादिसम्बन्धेन घटाद्युद्देश्यको नीलादिविधेयकः कुतो न शाब्दबोधः तादृशोद्देश्यविधेयभावापन्नज्ञानं प्रति तदादिपदज्ञानस्याहेतुत्वात् विशिष्टस्य पदार्थत्वे तु तादृशविषयताविरहादिति वाच्यम्। यत्र हि तत्संयुक्तादिघट-तदीयधन-तद्वृत्तिरूप-तत्कर्तृक-तत्कर्मकपाकाद्यात्मकसम्बन्ध एव घटत्व-धनत्वादिरूपेण शक्त्या लक्षणया वा षष्ठ्यादिविभक्त्यर्थो यथा नीलस्य गृहं चैत्रस्य वाटी पटस्य रूपत्वं तण्डुलस्य कृतिः चैत्रस्यौदनं इत्यादौ तत्रैव तादृशोद्देश्य-विधेयभावापन्ना शाब्दबुद्धिः प्रसिद्धा, सम्प्रदायमते तु नीलस्य घटः चैत्रस्य धनं घटस्य रूपं तण्डुलं पचति चैत्रेण पच्यते इत्यादावपि तादृशशा-

(१) परस्परभेदान्वयबोधस्येति ख०, ग०,।

व्युत्पत्तिः प्रसिद्धा, तन्मते च तत्र षष्ठ्याद्यर्थस्य संयोग-स्वत्वादेः संसर्गतया प्रकारतया च भानाभ्युपगमात्, एवञ्च घटवृत्ति कर्मत्वमित्याद्यन्वयबोधे घटादिपदे द्वितीयादिविभक्तिमत्त्वादिकमिव नीलादिपदे षष्ठ्यादिविभक्तिमत्त्वमेव तादृशान्वयबोधे आकाङ्क्षा, स्वप्रयोज्यवृत्तिज्ञानजन्यनील-घटाद्युभयोपस्थितिसम्बन्धेन च तन्निश्चयस्य तादृशान्वयबोधे हेतुत्वं तेन तादृशविभक्तिमत्त्वज्ञानेऽपि ततो नील-घटाद्यनुपस्थितौ न तथान्वयबोधः, सम्प्रदायमते च पूर्ववर्त्तित्वोत्तरवर्त्तित्वान्यतरसमभिव्याहारसम्बन्धेन षष्ठ्याद्यन्तनीलादिपदे घटादिपदवत्त्वमपि तादृशान्वयबोधे आकाङ्क्षा, स्वप्रयोज्यवृत्तिज्ञानजन्यविशेष्य-विशेषणसंसर्गोपस्थितिसम्बन्धेन च तन्निश्चयस्य हेतुत्वं, तेन नीलस्य घटः चैत्रस्य धनं इत्यादौ षष्ठ्यादिना संयोग-स्वत्वादेरुपस्थितिदशायां समानकालीनत्वादिसम्बन्धेन नील-चैत्रादेर्घट-धनादौ नान्वयः समानकालीनत्वादिसंसर्गस्य षष्ठ्याद्यनुपस्थापितत्वात्, इत्यञ्च यथा घटः कर्मत्वमित्यादौ घटमित्याद्यानुपूर्वीविशेषाकाङ्क्षानिश्चयरूपविशेषसामग्रीविरहाद्घटवृत्ति कर्मत्वमित्याद्यन्वयबोधाभावस्तथा नीलो घट इत्यादावपि तत्तदानुपूर्वीविशेषात्मकाकाङ्क्षानिश्चयरूपविशेषसामग्रीविरहादेव नोद्देश्य-विधेयभावापन्नतादृशान्वयबोध इति चेत्, तर्हि नीलो घटोऽस्ति नीलं घटमानयेत्यादौ तादात्म्यसम्बन्धेन नीलादेर्घटादावन्वयो न स्यात्(१) घटाद्युद्देश्यक-नीलादिविधेयकशाब्दबोधे नीलादिपदे षष्ठ्यादिविभक्तिमत्त्वस्य स्वप्रयोज्यनील-घटाद्युभयोपस्थितिसम्बन्धेन हेतुतया तदभावात् प्रकृते घटादेर्नी-

(१) घटादावन्वयः कथं स्यादिति ग० ।

न्वयबोधे आकाङ्क्षासम्पत्त्यर्थमेवेत्यर्थः, न तु तदर्थस्य नीलत्वाद्यवच्छि-
न्नेन सममन्वयबोध इति भावः । यद्यपि विशेषणविभक्तेरभेदान्वय-
बोधे कथमाकाङ्क्षासम्पादकत्वं । न च नीलेन घटमानयेत्यादा-
वभेदान्वयबोधे आकाङ्क्षाभावाद्विशेषण-विशेष्यवाचकपदयोः समान-
विभक्तिसमभिव्याहारस्याभेदेनान्वयबोधे आकाङ्क्षात्वात्तस्य आकाङ्क्षा-
सम्पादकत्वमिति वाच्यम् । नीलघटः नीलोत्पलमित्यादिसमा-
सस्थले सुन्दर दधि दधीदमित्यादावसमासस्थले चाभेदान्वयबोधा-
नुपपत्तेः(१) । न च तत्र लुप्तविभक्तिस्मरणादेवान्वयबोध इति वाच्यम्
तदस्मरणेऽपि अभेदान्वयबोधात् राजपुरुष इत्यादिषष्ठीतत्पुरुषा-
लुप्तविभक्तिस्मरणेनापि समानविभक्तिकत्वानुपपत्तेश्च तत्र षष्ठ्या
लुप्तत्वात् न तु प्रथमायाः, एवं नीलोत्पलमित्यादिकर्मधारयादाव-
लुप्तविभक्तिस्मरणेन समानविभक्तिकत्वासम्भवः तत्र तत्र प्रथमाया
लुप्तत्वात् न तु षष्ठ्याः । न च प्रथमादेर्लुप्तत्वेऽपि तत्स्मरणात्
तत्रान्वयबोध इति वाच्यम् । स्फुटतरानुभवविरोधात् । अत
विरुद्धविभक्तिराहित्यमभेदान्वयबोधे तन्त्रमित्यपि निरस्तं । विरु-
द्धविभक्तिराहित्यं हि विशेषणवाचकपदे विशेष्यवाचकपदोत्तरवि-
भक्तिभिन्नविभक्तिराहित्यं, विशेष्यवाचकपदे विशेषणवाचकपदो-
त्तरविभक्तिभिन्नविभक्तिराहित्यं वा, नाद्यः सुन्दरं दधीत्यादा-
वसिद्धेः प्रतियोगिकोटौ विभक्तिप्रवेशे प्रसिद्धिसम्भवेऽपि तद्धर्मि-
त्याभावात् स्तोकं पचतीत्यादावभावाच्च । न द्वितीयः, इदं
नीलोत्पलमित्यादौ अप्रसिद्धेः प्रतियोगिकोटौ विभक्तिप्रवेशे

(१) अभेदान्वयबोधाभावापत्तेरिति ग० ।

यद्वा समानविभक्तिकयोरभेदानुभवबलात् विशेष[illegible]

सिद्धिसम्भवेऽपि तद्राहित्याभावात् स्तोकं पचतीत्यादावभावाच्च ।
अत एव विशेषणवाचकपदे विशेष्यवाचकपदोत्तरानुसन्धीयमानवि-
भक्तिभिन्नविभक्तिराहित्यं, विशेष्यवाचकपदं विशेषणवाचकपदोत्त-
रानुसन्धीयमानविभक्तिभिन्नविभक्तिराहित्यं वा तदित्यपि न, स्तोकं
पचतीत्यादावभावात् सुन्दरं दधि दधीदं नीलोत्पलमित्यादौ लुप्त-
विभक्तिमत्त्वरतोऽप्यभेदान्वयबोधाच्च, द्वितीये राजपुरुष इत्यादि-
षष्ठीतत्पुरुषादौ नीलोत्पलमित्यादिकर्मधारये च लुप्तविभक्तिस्मर-
णेनाप्यनुपपत्तेश्चेति । तथापि यादृश-यादृशविशेषण-विशेष्यवाचक-
नीलघटादिपदसमभिव्याहारात् नील-घटयोरभेदान्वयबोधोऽनु-
भवसिद्धस्तादृश-तादृशनील-घटादिसमभिव्याहार एव नील-घटा-
द्योरभेदान्वयबोधे आकाङ्क्षा, समभिव्याहारश्च क्वचिदव्यवहितपूर्ववर्-
त्तित्वं, क्वचिदव्यवहितोत्तरवर्त्तित्वं, क्वचित्पूर्ववर्त्तितत्पदपूर्ववर्त्ति-
त्वादिकं, क्वचिदुत्तरवर्त्तितत्पदोत्तरवर्त्तित्वादिकं इति क्रमेण बोध्यं
तत्तत्सिद्धयश्च स्वविशिष्टनीलघटाद्यभेदान्वयबुद्धित्वावच्छिन्नं प्रति
हेतुत्वमिति न परस्परं व्यभिचारः, तादृशसमभिव्याहारमध्ये
समानविभक्तिकयोः समभिव्याहारोऽपि प्रविष्ट इति विशेषणविभ
भेराकाङ्क्षासम्पादकत्व युक्तमिति ध्येयं ।

प्रकृत्यर्थतावच्छेदकावच्छिन्नान्वितस्वार्थबोधकत्वं सम्भवति तस्य
रित्यागस्यानौचित्यादाह, 'यद्वेति, 'अभेदानुभवबलादिति, अभेद
संसर्गतया प्रकारतया चोभयथानुभवस्वीकारात् इत्यर्थः, 'विशेषण

यान्वितविभक्तेरभेदार्थकत्वं अतो विशेषण-विशेष्यभावानुभावकत्वं तत्पदयोः, न परस्परं विना । द्वारमित्यत्राध्याहारं विना प्रतियोग्यलाभात् न स्वार्थी-

---

श्वितेति, विशेष्य-विशेषणवाचकपदोत्तरप्रथमा-द्वितीयादेरित्यर्थः, 'विशेषण-विशेष्यभावेन परस्परं विशेष्य-विशेषणभावेन स्वार्थतावच्छेदकावच्छिन्नानुभवजनकत्वमित्यर्थः, 'तत्पदयोरित्यनन्तरं छेदः विशेषणवाचकपद-तदुत्तरविभक्त्योरित्यर्थः, न परस्परं विनेति न स्वार्थतावच्छेदकावच्छिन्नयोः परस्परं विशेष्य-विशेषणभावं विनानुभवजनकत्वमित्यर्थः, इत्थञ्च नीलघट इत्यादावेकत्ववन्नीलाभिन्नान् तादृशनीलाभेदवांश्च[1] एको घट इत्यन्वयबोध इति भावः ।

ननु कृत्यादिविशेष्यकानुकूलत्वादिसंसर्गकानयनादिप्रकारकशाब्दबोधं प्रत्यानयनादिपदे त्यादिपदस्यैवाकाङ्क्षाऽस्ति केवलं द्वारमित्युक्तावपि आनयनकृत्यादिरूपार्थाध्याहारात् द्वारकर्मकानयनानुकूलकृतिमान् इत्यन्वयबोधः कथं स्याद् घटः कर्मत्वमित्यादाविव यावद्विशेषणाभावविरहादित्यत आह, 'द्वारमित्यत्रेति, 'अध्याहारं विनेति आनयतीत्यादिपदाध्याहारं विना, 'न स्वार्थेति न द्वारकर्मकानयनानुकूलकृतिमान् इत्यन्वयबोधजनकत्वमित्यर्थः, अत्र हेतुमाह, 'प्रतियोग्यलाभादिति, कारणीभूतान्वयप्रतियोग्युपस्थितेरभावादित्यर्थः, वृत्त्या पदजन्यपदार्थोपस्थितेः शाब्दबुद्धौ हेतुत्वादिति भावः । ननु स्वर्गकामो यजेतेत्यादौ स्वर्गकामस्य कार्यो याग-

---

(1) एकत्ववन्नीलाभेदवांश्चेति ख० ।

न्वयानुभावकत्वं, विश्वजिता यजेतेत्यत्र यजेदं कार्य्य-मिति प्रवर्त्तकतात्पर्य्यविषयज्ञानं नाधिकारिणं विनेति तदाकाङ्क्षा ।

यद्वा कर्त्तुरिवाधिकारिणोऽपि आक्षेपादेव लाभ-

इति प्रतीतेः स्वर्गकामस्य यजेतेत्यादौ च तदप्रतीतेश्च विध्युपस्थाप्य-कार्य्यत्वेन सह स्वर्गकामान्वयं स्वर्गकामादिपदं स्यादिपदत्वस्यैव साकाङ्क्षा वाच्या तथाच विश्वजिता यजेतेत्यादौ स्वर्गकामरूपा-धिकार्य्यध्याहारात् कथं तादृशान्वयबोध' आकाङ्क्षाविरहादित्यत आह, 'विश्वजिदिति, 'यजेदमिति' स्वर्गकामत्वं कृतिसाध्यमित्याकारक-मित्यर्थः, 'प्रवर्त्तकेति. प्रवर्त्तकतात्पर्य्यविषयीभूतं ज्ञानमित्यर्थः, 'नाधिकारिणं विनेति, अध्याहृतस्वर्गकामपदाध्याहारं विनेत्यर्थः, 'तदाकाङ्क्षेति, तदाकाङ्क्षाज्ञानमित्यर्थः, भवतीति शेषः । 'कर्त्तु-रिवेति यथ यजेतेत्यादिपदमात्रं प्रयुक्तं न तु चैत्र इत्यादि तत्र यथा पाक-कर्त्तुरन्वयबोधायाक्षेपानुमानादिना वाक्यार्थविशेष्यकान्वय-बोधस्तथेत्यर्थः, 'अधिकारिणोऽपि' विश्वजितेत्यादौ स्वर्गकामस्यापि, 'आक्षेपादेव' अनुमानादेव, अनुमानं व्याप्तिज्ञानं, तेन 'किन्त्वानु-मानिक इति ग्रन्थस्य न पौनरुक्त्यं, 'लाभः' विध्यर्थकार्य्येऽन्वयबोधः, 'तदन्वयः' विध्यर्थकार्य्ये तदन्वयः, 'आनुमानिकः' अनुमितिरूपः, यद्वा 'लाभः' उपस्थितिः । ननु स्वर्गकामस्यानुमानेन उपस्थितावपि कार्य्यत्वेन सह तदन्वयः शब्दप्रतिपाद्य एवेति च दोषस्तदवस्थ-

आनयनं कृतिरित्यादौ अभेदेन नान्वयबोधोऽयोग्यत्वात् तत्तत्पदेभ्यस्तात्पर्यविषयतत्तत्पदार्थस्वरूपज्ञानञ्च पदान्तरं विनैव। घटमानयतीत्यत्रैव क्रमेण तथान्वयतात्पर्येऽपि क्रिया-कारकभावेन नान्वयः, नाम-

त्वादिविशिष्टकाधेयत्वादिभेदसंसर्गक-घटादिप्रकारकान्वयबुद्धिं प्रत्येव घटमित्याद्यानुपूर्वीविशेषस्याकाङ्क्षात्वात् घटः कर्मत्वमित्यादौ तादृशाकाङ्क्षाभावाद्बुद्धिर्माऽस्तु अभेदसंसर्गेण तु कुतो नान्वयबोध इत्यत आह, 'घटः कर्मत्वमिति, 'अयोग्यत्वात्' योग्यताज्ञानविरहात्, योग्यता-भ्रमदशायान्तु भवत्येवेति भावः। ननु यदि तत्र न योग्यता तदा तत्पदार्थोपस्थितिरेव कुत इत्यत आह, 'तत्तदिति, 'पदान्तरं विनैवेति, का तु कथा योग्यताया इत्यर्थः[1]। ननु आधेयत्वादि-संसर्गक-कर्मत्वादिविशेष्यक-घटादिप्रकारकान्वयबोधे घटमित्याद्या-नुपूर्व्यां विशेषस्यैवाकाङ्क्षात्वे घटः कर्मत्वमित्यादावपि कदाचित्ता-दृशान्वयबोधे तात्पर्यदशायां तादृशान्वयबोधो दृश्यते च कथं स्यादित्यत आह, 'घटमिति, 'क्रमेणेति अयथार्थेनेत्यर्थः, 'अभेदे' तृतीया, तथा चायथार्थतथान्वयतात्पर्येऽपीत्यर्थः, तद्वाक्यात् तथा-न्वयबोधानुत्पत्त्या तदिच्छाया अयथार्थत्वमिति भावः। 'क्रियेति घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधस्य कदापि नेत्यर्थः, अत्र हेतुमाह, 'नामेति, अत्र इत्यादिः, 'अन्वयबोधे' अभेदातिरिक्त-

(१) घटादिपदे अनुस्वारात्पदं विनैवेत्यर्थः, योग्यतायाः का कथा योग्यतायाः सत्त्वे पदार्थोपस्थितिः सुतरां भविष्यतीति भावः।

विभक्ति-धात्वाख्यात-क्रिया-कारकपदानां अन्वयबोधे तान्येव पदानि समर्थानि न तु तदर्थकानि पदान्तराणि। अग्निः करणत्वं ओदनः कर्म्मता पाकः कृतिः इष्टसाधनता इत्यादिपदेभ्यः अग्निनौदनं पचेतेत्यत्रेव अन्वयाबोधात्, अग्निकरणकौदनकर्म्मकपाकविषयक-कृतिरिष्टसाधनं इति तु वाक्यं न पदं, अतएव द्वार-

सम्बन्धेन स्वार्थान्वयबोधे, 'तान्येव पदानि' नामादिपदसमभिव्याहृत-विभक्त्यादिरूपाण्येव पदानि, 'समर्थानि' स्वरूपयोग्यानि। नन्वत्र किं प्रमाणं इत्यत आह, 'अग्निरिति, 'कृतिरिष्टसाधनेति, कृतौष्ट-साधनत्वं विषयः इत्येकदेशमताभिप्रायेणेदं। ननु नाम-विभक्त्या-द्यर्थानामभेदातिरिक्तसम्बन्धेनान्वयबोधे नामादिपदसमभिव्याहृत-विभक्त्यादेरेव स्वरूपयोग्यत्वेऽग्निकरणकौदनकर्म्मकेत्यादावग्निनौदनं पचेतेत्यत्रेवान्वयबोधः कथं स्यादित्यत आह, 'अग्निकरणकेति, 'इति तु वाक्यमिति इति च वाक्यं समर्थं', 'न पदं' न तादृशार्थप्रत्यायकं, अग्निनौदनं पचेदित्यत्र हि अग्निर्निरूपकतासम्बन्धेन विशेषणतया तृतीयार्थकरणत्वेऽन्वेति, करणत्वञ्च निरूपकतासम्बन्धेन विशेषणतया पाके, कार्य्यत्वञ्च(१) तृतीयार्थेऽग्निनिरूपितत्वसम्बन्धेन विशेषणतया तृतीयार्थकार्य्यत्वे,(२) तच्चाश्रयतासम्बन्धेन विशेषणतया पाके, एवमोदनं निष्ठतासम्बन्धेन विशेषणतया द्वितीयार्थे कर्म्मत्वे, कर्म्मत्वञ्च निरू-

(१) अन्यत्वञ्चेति ख०। (२) तृतीयार्थजनकस्य इति ख०।

मित्यत्र विधिलिङ्पदाध्याहारः, क्रियापदार्थस्यान्यत उप-

पकतासम्बन्धेन विशेषणतया पाके, पाकस्य विषयितासम्बन्धेन विशेषणतया विध्यर्थकृतौ, तादृशपाकविषयककृतौ च विधेरर्थान्तरमिष्टसाधनत्वमाश्रयतासम्बन्धेन विशेषणतयाऽन्वेति, अग्निकरणीत्यादौ च अग्निपदस्याग्निनिष्ठे लक्षणा, करणपदस्य करणतानिरूपके लक्षणा, तदेकदेशे करणतायामग्निनिष्ठस्याभेदेनान्वयः, तादृशकरणतानिरूपकस्य तु लक्षणया पाकपदार्थस्य पाकनिरूपितस्यैकदेशे पाकेऽभेदेनान्वयः, एवमोदनपदं ओदननिष्ठपरं, कर्मपदं कर्मतानिरूपके लाक्षणिकं, तदेकदेशे कर्मतायाञ्च ओदननिष्ठस्याभेदेनान्वयः, तादृशकर्मतानिरूपकस्य लक्षणया पाकपदार्थस्य पाकनिरूपितस्य एकदेशे पाकेऽभेदेनान्वयः, तादृशनिरूपितस्य[1] तु लक्षणया विषयपदार्थस्य विषयितानिरूपितैकदेशे विषयितायामभेदेनान्वयः, विषयिताश्रयस्य तु कृतावभेदेनान्वयः, इष्टपदस्य इष्टनिरूपितपरं तस्य च साधनपदार्थैकदेशे साधनतायामभेदेनान्वयः, साधनस्य कृत्यादावभेदेनान्वयः, अभेदसम्बन्धेन एकदेशान्वयार्थं उक्तितायाञ्च विषयपदस्यैवाग्निनिष्ठकरणतानिरूपकौदननिष्ठकर्मतानिरूपकपाकविषयिणि लक्षणा, अन्यत् सर्वं तात्पर्यग्राहकं, तादृशविषयिणि कृतेरभेदेनान्वयः, इष्टपदमपि तात्पर्यग्राहकं, साधनपदस्येष्टसाधनपरं, तस्य च कृतावभेदेनान्वयः इति भावः। 'अतएवेति यतो नाम-धात्वाख्यातादिभिर्यादृशान्वयबोधो जन्यते तादृशान्वयबोधे तान्येव पदानि समर्थानि न तु पदान्तराणीत्यर्थः, 'क्रियापदार्थस्येति धात्वर्थस्यापि धानस्येत्यर्थः,

(1) पाकपदार्थस्य पाकनिरूपितस्येति ख० ।

स्थितौ अपि कारकानन्वयात् असामर्थ्यञ्च स्वभावात्। अनासन्नमपि आसन्नतादशायां आसत्तिभ्रमेण वा अन्वयबोधसमर्थमेव। वह्निना सिञ्चतीत्यत्र क्रिया-कारकपदयोरन्वयबोधे सामर्थ्येऽपि अयोग्यताज्ञानं

'अन्यत' धातुं विना, 'कारकेति' कर्मत्वाद्यन्वयासम्भवादित्यर्थः। ननु पदत्वाविशेषेऽपि किञ्चिदेव स्वरूपयोग्यं किञ्चिन्नेत्यत्र किं नियामकमित्यत आह, 'असामर्थ्यञ्चेति, स्वरूपायोग्यत्वञ्चेत्यर्थः, 'स्वभावात्' तत्तदानुपूर्वीविशेषरूपात् तत्तदन्वयबोधकस्वरूपयोग्यतावच्छेदकधर्मविरहात्। नन्वेवमनासन्नस्यापि स्वरूपायोग्यत्वादेव शाब्दबोधाजनकत्वोपपत्तेः किमासत्तेः पृथक् हेतुत्वेनेत्यत आह, 'अनासन्नमपीति व्यवहितोच्चारितमपीत्यर्थः। 'आसन्नतादशायां' अव्यवधानेनान्वयप्रतियोग्युपस्थितिदशायां। तदज्ञानस्य प्रतियोग्युपस्थित्यव्यवधानस्य स्वरूपसतो हेतुत्वपक्षे, तज्ज्ञानस्य हेतुत्वपक्षे त्वाह, 'आसत्तिभ्रमेण वेति, 'अन्वयबोधसमर्थमेवेति अन्वयबोधोपधायकमेवेत्यर्थः, तथाच तस्य स्वरूपायोग्यत्वे नातः कदापि तदुपधानं न स्यादिति भावः। ननु नाम-विभक्ति-धात्वाख्यात-क्रिया-कारकपदार्थानामभेदातिरिक्तसम्बन्धेनान्वयबोधे नामादिसमभिव्याहृतविभक्त्यादीनां स्वरूपयोग्यत्वे वह्निना सिञ्चतीत्यत्र कुतो न तादृशान्वयबोध इत्यत आह, 'वह्निनेति, 'सामर्थ्येऽपि' स्वरूपयोग्यत्वेऽपि, 'अयोग्यताज्ञानं' अयोग्यतानिश्चयः, 'अतएव' अयोग्येऽपि स्वरूपयोग्यत्वसत्त्वादेव। ननु योग्यताभ्रमदशायां स्वरूपयोग्यताभ्रमादेवान्वय-

प्रतिबन्धकं दाहे समर्थस्याप्यग्नेर्मणिरिव। अतएव योग्यताभ्रमात् प्रतिबन्धकाभावे ततोऽप्यन्वयबोधः। नहि स्वभावतोऽसमर्थं आरोपितसामर्थ्यं वा दहति पचति वेति, प्रकृते तु पदार्थस्वरूपज्ञानं न त्वन्वयभ्रमोऽपि। पुरुषपदं विनापि राज्ञ इत्यस्य पुत्रेण समं स्वार्थान्वयानुभावकत्वं इति न तदाकाङ्क्षा।

बोध इत्यत आह, 'न हीति, 'स्वभावतोऽसमर्थं' स्वरूपतः जनकं, 'आरोपितसामर्थ्यं' आरोपितजनकताकं। ननु घटः कर्मत्वमित्यादेः स्वरूपयोग्यत्वे तत्र शाब्दप्रमानुत्पादेऽपि आकाङ्क्षाभ्रमो जायत एव स कथं स्यादित्यत आह, 'प्रकृते त्विति, घटः कर्मत्वमित्यादावित्यर्थः। अन्वितमजनितान्वयबोधजनकत्वस्य आकाङ्क्षात्वविरहादथवेतीत्यादौ राज-पुत्रयोरन्वयबोधानन्तरं द्वितीयक्षणे राज-पुरुषयोरन्वयबोधापत्तिराकाङ्क्षासत्त्वात् पुरुषविशेष्यक-राज-प्रकारकान्वयबोधस्याजनितत्वादनुदितो सिद्धेरिव समानाकारक-शाब्दबोधस्य प्रतिबन्धकताया अपि तत्र वक्तुमशक्यत्वादित्यत आह, 'पुरुषपदं विनापीति पुरुषविशेष्यकराजप्रकारकान्वयबुद्धिजनकत्वेऽपीत्यर्थः, 'स्वार्थान्वयानुभावकत्वं' जनितस्वार्थानुभावकत्वं, 'न तदाकाङ्क्षेति न तत्राकाङ्क्षेत्यर्थः, राज-पुरुषयोरन्वयबोधजनिकेति शेषः। तत्पदजन्यशाब्दबोधे तत्पदजन्यशाब्दबोधसामान्यस्यैव प्रतिबन्धकत्वादिति भावः।

यद्वा त्रयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वये तात्पर्य्याभावात् नान्वयबोध इत्यग्रेऽपि तथा । न च पुत्रस्योत्थिताकाङ्क्षत्वात् तेनैवान्वयबोध इति वाच्यं । तात्पर्य्यवशात् पुरुषेणैव[1] प्रथममन्वयबोधात् । अतएवान्वयबोधसमर्थत्वे सति अजनिततात्पर्य्यविष-

---

ननु एवं राज-पुत्रयोरन्वयबोधोत्तरं तात्पर्य्यभ्रमेऽपि राज-पुरुषयोरन्वयबोधो न स्यात् प्रतिबन्धकसत्त्वादित्यस्वरसात्, 'यद्वेति', 'त्रयाणां' राज-पुत्र-पुरुषैतत्त्रयाणां, 'अजनितेति' पुंसा सममजनितान्वयबोधदशायामित्यर्थः, 'तात्पर्य्याभावात्' तात्पर्य्यनिश्चयाभावादेव. 'अग्रेऽपि' पुंसा सममन्वयबोधं जनितेऽपि, 'तथा' पुरुषान्वये तात्पर्य्यनिश्चयाभावादेव नान्वयबोधः, तात्पर्य्यनिश्चयसत्त्वे भवत्येवेति भावः । ननु पुंसा सममजनितान्वयबोधदशायां प्रथमं पुरुषेण सममन्वयधीर्न भवति किन्तु पुत्रेणैव तत्र पुत्रस्योत्थिताकाङ्क्षत्वमेव बीजं न तु तात्पर्य्यज्ञान-तदभावौ निबन्धने इत्याशङ्कते, न चेति. 'उत्थिताकाङ्क्षत्वात्' सम्बन्धिकत्वात्, सम्बन्धिकत्वञ्च सम्बन्ध्युपस्थितिनियतोपस्थितिकत्वं, भवति हि स्वजन्यपुंस्त्वादिरूपं पुत्रत्वादिकं राजादिघटितमिति भावः[2] । 'तात्पर्य्यवशात्' तात्पर्य्यज्ञानवशात्, 'पुरुषेणैवेति' क्वचिदादर्शे, क्वचित्तथैव पाठः, तथा चोत्थिताकाङ्क्षा व्यभिचारिणीति भावः । 'अत एवेति' तत्तु-र्थोक्तयुक्तेः, अयमेतीत्यादौ राज-पुत्रयोरन्वयबोधानन्तरं राज-

---

(१) क्वचित् पुरुषेणैवेति क० । (२) राजादिघटितमित्यर्थः ।

यान्वयबोधत्वमाकाङ्क्षेति केचित् । प्रकृति-प्रत्ययाभ्या-

पुरुषयोरन्वयबोधवारणायैवेत्यर्थः, अन्वयबोधसमर्थत्वे सतीति तद्वि-
शेष्यक-तत्प्रकारक-तत्संसर्गकान्वयबुद्धिजनकत्वे सतीत्यर्थः, 'आकाङ्क्षा'
तद्विशेष्यक-तत्प्रकारक-तत्संसर्गकान्वयबोधे आकाङ्क्षा, अत्र सत्यन्तेन
घटः कर्मत्वमित्यादिनिरासः, जनकतावच्छेदकन्तु तत्तदानुपूर्वी-
विशेषविशिष्टत्वमेव, 'अजनि'त्यादिना राजपुत्रान्वयबुद्धिमात्रता-
त्पर्य्यकेऽयमेतीत्यादौ राज-पुत्रयोरन्वयबोधानन्तरं राज-पुरुषयो-
रन्वयबोधनिरासः, राजपुत्रान्वयबोधमात्रतात्पर्य्यके अयमेतीत्यादौ
तात्पर्य्यभ्रमेण राज-पुरुषयोरन्वयबोधे जातेऽपि राज-पुत्रयोरन्वय-
बोधे आकाङ्क्षासम्पादनाय तात्पर्य्यविषयत्वमन्वयबोधविशेषणं । न
चैवमस्माद्राज-पुत्रयोरन्वयबुद्धिः राज-पुरुषयोरन्वयबुद्धिश्च भव-
त्वितीच्छयोच्चरितेऽयमेतीत्यादौ तात्पर्य्यगतपौर्व्वापर्य्यक्रमेण राज-
पुत्रयोरन्वयबोधानन्तरं राज-पुरुषयोरन्वयबोधेऽपि आकाङ्क्षा न
स्यात्, एवं घटमानयेत्यादौ वक्तुः क्रमिकशाब्दबोधद्वयेच्छायामपि
शाब्दबोधद्वये आकाङ्क्षा न स्यादिति वाच्यं । 'अजनि'त्यादिना
तत्कालीन-तत्पुरुषीय-स्वजनितापर्य्याप्तयत्किञ्चित्तात्पर्य्यविषयताव-
च्छेदकत्वस्य विवक्षितत्वात् तत्कालीनत्व-तत्पुरुषीयत्वयोः स्वजनित-
त्वविशेषणात्कालान्तरे पुरुषान्तरे वा तादृशशाब्दबोधजननेऽपि
न क्षतिः, तत्कालपदं फलीभूतशाब्दबोधाव्यवहितपूर्वक्षणपरं । न
चैवं तादृशसमूहालम्बनतात्पर्य्यकेऽयमेतीत्यादौ राज-पुत्रयोरन्वय-
बोधोत्तरं राज-पुरुषयोरन्वयबोधसमये राज-पुत्रयोरपि पुनरन्वय-

बोधापत्तिरिति वाच्यं । खण्डवाक्यार्थबोधोत्तरं खण्डवाक्यार्थघटितमहावाक्यार्थबोधवद्दिष्टत्वात्, तात्पर्य्यविषयत्वञ्च वक्तृ-तदितरसाधारणप्रकृतपदजन्यत्वप्रकारकेच्छाविषयत्वं तेन शुकादिवाक्यस्थले भगवत्तात्पर्य्यमादायाकाङ्क्षाधौव्यं । न चैवं राजपुत्रान्वयबुद्धिमात्रतात्पर्य्यकेऽयमेतीत्यादौ राज-पुत्रयोरन्वयबोधानन्तरमपि राज-पुरुषयोरन्वयबोधे आकाङ्क्षापत्तिः भगवत्तात्पर्य्यस्य राज-पुरुषान्वयबोधेऽपि सत्त्वादिति वाच्यं । तद्वाक्येन राज-पुरुषयोरन्वयबोधाजननात्तद्वाक्यजन्यत्वप्रकारकभगवदिच्छाया राजपुरुषान्वयबोधे विरहात् भगवदिच्छाया अयथार्थत्वाभावनियमात् । न च तेनैव वाक्येन पुरुषान्तरस्य कालान्तरे तस्यैव वा पुरुषस्य राजपुरुषान्वयबोधजननात् तद्वाक्यजन्यत्वप्रकारकभगवदिच्छाया अपि राज-पुरुषान्वयबोधे सत्त्वमेव इति वाच्यं । यत्र तस्मादेव वाक्यात् पुरुषान्तरस्य कालान्तरे तस्यैव वा पुरुषस्य राज-पुरुषयोरन्वयबोधस्तत्र राज-पुत्रयोरन्वयबोधोत्तरमपि राज-पुरुषान्वयबोधे आकाङ्क्षासत्त्वस्य दृष्टत्वात्, राज-पुरुषयोरन्वयबोधाभावस्थलेऽपि राज-पुरुषान्वयबोधे भगवत्तात्पर्य्यस्य तदानीं ज्ञानाभावेन तात्पर्य्यघटिताकाङ्क्षाज्ञानविरहादथ वा तस्माद्वाक्यादिदानीमेतस्य पुरुषस्य तद्विशेष्यक-एतत्प्रकारकान्वयबुद्धिर्भवत्वित्याकारकं तत्कालीनत्व-तत्पुरुषीयत्वप्रकारकं तात्पर्य्यमत्र घटकमिति नोक्तदोषः । न च तथापि यत्र वक्तुः राजपुत्रान्वयबुद्धिमात्रे तात्पर्य्यं श्रोतुस्तदानीन्तन-पुरुषान्तरस्य वा, राजपुरुषान्वयबोधेऽपि तात्पर्य्यं तत्र राजपुत्रान्वयबोधानन्तरमपि राजपुरुषान्वयबोधे आकाङ्क्षापत्तिरिति वाच्यं ।

कर्मत्वं आनयनं कृतिरित्येवम्विधपदाज्जन्यपदार्थोप-
स्थितिर्वा आसत्तिरन्वयबोधाङ्गमित्यासत्त्यभावादेव-
म्विधशब्दान्नान्वयबोधः त्वयाप्येवम्विधपदार्थोपस्थिते-

मित्यपि बोध्यं(१)। 'पदविशेषेति घटमानयेत्याद्यानुपूर्व्वीविशेषघट-कौस्तुभतत्सद्घटपदाम्पदादिजन्यघट-कर्मत्वाद्युपस्थितिरित्यर्थः। नन्वे-वमप्यननुगमवाक्यत्वं कारणतावच्छेदकगौरवं पुनरधिकं लाघवाद्-घटमानयेत्याद्यानुपूर्व्वीविशेषज्ञानस्यैव हेतुत्वौचित्यात्। न च तत्पद-जन्यपदार्थोपस्थितेः पृथक्कारणत्वस्यावश्यकत्वाद्गौरवमिति वाच्यं। घटं कलशमित्यादिप्रत्येकानुपूर्व्वीघटकतत्तत्पदव्यक्तिभेदेन कार्य-कारणभावत्वाकल्प्यं कारणतावच्छेदकगौरवञ्चापेक्ष्य घटादिशाब्दबोधमात्रं प्रति वृत्त्या शब्दजन्यघटाद्युपस्थितित्वेन कार्य-कारणभावैक्यकल्पनाया एव लघुत्वादित्यसमसादात्, 'घटः कर्मत्वमित्यादि, 'पदार्थोपस्थितिः' घट-कर्मत्वाद्युपस्थितिः, इत्यत्र भेदकूटस्य कारणतावच्छेदकत्वाद्घटं कलशमित्यादिसकलानुपूर्व्वीसाधारण एक एव कार्यकारणभाव इति भावः। अत्र वृत्त्या शब्दजन्यत्वेन पदार्थोपस्थितिर्विशेषणीया तेन यथाकथञ्चित्पदार्थोपस्थितिमादाय नातिप्रसङ्गः। अर्थाध्या-हारवादिनये तु यथाश्रुतमेव साधु। 'अन्वयबोधाङ्गमिति कर्मत्वा-दिविशेष्यक-घटादिप्रकारकान्वयबोधाङ्गमित्यर्थः। न चैवं द्वितीया-पद-कर्मत्वपदोभयगोचरसमूहालम्बनेन यत्र कर्मत्वोपस्थितिस्तत्राप्य-न्वयबोधो न स्यादिति वाच्यं। तादृशविभक्तिज्ञानाजन्या या कर्म-

---

(१) इत्यादि ध्येयमिति क०।

शाकाङ्क्षाहेतुत्वेनावश्यमभ्युपेयत्वात्, अजनितान्वयबोधात् नान्वयान्तरबोधः तात्पर्य्याभावादित्याकाङ्क्षायाः कारणत्वमेव नास्ति, किन्तु स्वजनकोपस्थितेः परिचायकत्वमात्रमिति ।

त्वादिपदजन्योपस्थितिः तदन्योपस्थितित्वेन हेतुत्वस्य विवक्षितत्वात्, 'एवंविधशब्दादिति घटः कर्मत्वमित्यादिस्वरूपायोग्यशब्दादित्यर्थः, 'आकाङ्क्षाहेतुत्वेनेति आकाङ्क्षानिश्चयसहकारित्वेनेत्यर्थः, अन्यथाऽगृहीतामादिपदशक्तिकस्य घटमित्यादिनिश्चयवतो घटः कर्मत्वमित्यादेर्घट-कर्मत्वाद्युपस्थितौ तथान्वयबोधस्य दुर्वारत्वापत्तेरिति भावः । 'अजनितान्वयबोधादिति अयमेतोऽगाडी पुत्रेण जनितान्वयबोधाद्वाक्यपदादित्यर्थः, 'नान्वयान्तरबोध इति न पुनरन्वयबोध इत्यर्थः, अनन्वित शङ्केतिशेषः, 'तात्पर्य्याभावादिति तात्पर्य्यज्ञानाभावादित्यर्थः, एवं धाराधिकरणानाकारशाब्दबुद्धावपि भवदुक्तैव गतिरिति भावः । 'आकाङ्क्षायाः' आकाङ्क्षाज्ञानस्य, 'स्वजनकोपस्थितेः' शाब्दबोधजनकोपस्थितेः । अत्र 'नव्या इत्यस्वरसोद्भावनं, तद्बीजन्तु भेदकूटानां विशेष्य-विशेषणभावे विनिगमकाभावात् गुरुतरानन्तकार्य्य-कारणभावप्रसङ्गः, अन्यथा घटादिपदवदनुस्वारपदादिनिश्चयत्वरहितं यद्यत् तदन्यत्वेनैव लाघवात् हेतुत्वौचित्यात् तथा घट-कर्मत्वाद्युपस्थितेर्व्यापारत्वाच्च नातिप्रसङ्गशङ्कापीति दिक् ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शब्दाकाङ्क्षावादसिद्धान्तः ।

समाप्तोऽयमाकाङ्क्षावादः ॥

इति श्रीमथुरानाथतर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये शब्दाकाङ्क्षावादरहस्यम् ॥

समाप्तमाकाङ्क्षावादरहस्यम् ॥

अथ योग्यतावादः ।

ननु का योग्यता,(१) न तावत् सजातीयेऽन्वयदर्शनं,

अथ योग्यतावादरहस्यं ।

आकाङ्क्षां निरूप्य योग्यतां निरूपयितुं पृच्छति, 'ननु केति,(२) आकाङ्क्षादिकं सहकारीति यत् पूर्व्वमुक्तं तत्रादिपदग्राह्या योग्यता केत्यर्थः, अत्र शाब्दबोधलक्षणैककार्य्यानुकूलत्वमेव सङ्गतिरिति भावः । 'सजातीयेति, तत्सजातीये तत्सजातीयस्यान्वयदर्शनं संसर्ग-निश्चयस्तच्च तच्छाब्दबुद्धौ योग्यतेत्यर्थः, अस्ति च पयसा सिञ्चती-त्यादौ प्रकृतसेकसजातीये पयोऽन्तरकरणकसेके प्रकृतपयःकरणकत्व-सजातीयस्य पयोऽन्तरकरणकत्वस्य संसर्गनिश्चयः, वह्निना सिञ्चती-त्यादौ तु सेकसजातीये क्वापि सेके वह्निकरणकत्वसजातीयस्य कस्यापि वह्निकरणकत्वस्य संसर्गनिश्चयो नास्ति बाधितत्वात् । न च तत्र तत्संसर्गनिश्चयस्तच्च तच्छाब्दबोधे योग्यता इत्येव सम्यक् किं सजातीयत्वपर्य्यन्तनिवेशनेति वाच्यं । गेहवृत्तिघटो नील इत्यादौ गेहवृत्तिघटव्यक्तौ तन्नीलव्यक्तेः शाब्दबोधानुपपत्तेः शाब्दबोधपूर्व्वं तद्घटव्यक्तौ तन्नीलव्यक्तेः संसर्गनिश्चयाभावात्, सजातीयत्वोपादाने तु तद्घटसजातीये व्यक्त्यन्तरे तन्नीलव्यक्तिसजातीयस्य नीलव्यक्त्यन्तरस्य

---

(१) ननु केयं योग्यतेति ख० ।

(२) ननु केयमिति क०, ख० ।

यथाकथञ्चित् साजात्यस्याव्यावर्त्तकत्वात्। पदार्थता-

संसर्गनिश्चयो वर्त्तत एवेति न काप्यनुपपत्तिरिति भावः। अत्र येन केनापि धर्मेण साजात्यं विवक्षणीयं[१] अन्वयितावच्छेदकधर्मेण वा,[२] आद्ये तन्निष्ठधर्मावच्छिन्ने तन्निष्ठधर्मावच्छिन्नस्य संसर्गनिश्चयस्तत्र तच्छाब्दबोधे योग्यतेति फलितार्थः, द्वितीये अन्वयितावच्छेदत्वं यादृशधर्मविशिष्टस्य तस्य फलीभूतशाब्दबोधविषयत्वं तादृशधर्मत्वं, तथा च तद्धर्मनिशिष्टतद्विशेष्यक-तद्धर्मविशिष्टतद्विशेषणकशाब्दबोधे तद्धर्मरूपेण यत्र कुत्रचित् तद्धर्मरूपेण यस्य कस्यचित् संसर्गनिश्चयो योग्यतेति पर्य्यवसितार्थः। तत्र न प्रथमइत्याह 'अथेति, 'अव्यावर्त्तकत्वादिति वह्निना सिञ्चतीत्यादौ सेको न वह्निकरणक इति बाधनिश्चयदशायां शाब्दबुद्धेरव्यावर्त्तकत्वादित्यर्थः, तादृशबाधनिश्चयसत्त्वेऽपि क्रिया वह्निकरणिका प्रमेयं वह्निकरणकं सेको द्रव्यकरणकः सेकः प्रमेयकरणकः सेकः प्रमेयवान् इत्याकारकस्य सेकनिष्ठधर्मावच्छिन्ने वह्निकरणत्वनिष्ठधर्मावच्छिन्नसंसर्गनिश्चयस्य सम्भवात्। न च तदानीं तादृशनिश्चयसम्भवेऽपि बाधनिश्चयस्य प्रतिबन्धकत्वादेव नान्वयबोध इति वाच्यं। तथा सत्यावश्यकत्वात्तदभाव एव हेतुरस्तु किमेतस्या हेतु-

---

(१) विवक्षितमिति ख०, ग०।

(२) अन्यथा तत्तस्य वाक्यार्थत्वात् पदार्थतावच्छेदकत्वाभावेन पदार्थतावच्छेदकधर्मेणेत्युपेक्ष्यान्वयितावच्छेदकधर्म्मपर्य्यन्तानुधावनं।

वच्छेदकेन साजात्यस्याज्ञातः पयः पिबतीत्यादावभावात् वाक्यार्थस्यापूर्व्वत्वाच्च । नापि समभिव्याहृत-

त्वेनेति भावः(१)। नान्य इत्याह, 'पदार्थतावच्छेदकेनेति, अन्वयितावच्छेदकधर्मरूपेण तत्सजातीयेऽन्वयितावच्छेदकधर्मरूपेण तत्सजातीयसंसर्गनिश्चयस्येत्यर्थः, 'अभावादिति, तत्र शाब्दबोधात् पूर्व्वमज्ञातत्वरूपेण काप्यज्ञाने पयःपानकर्तृत्वरूपेण पयःपानकर्तृत्वसंसर्गनिश्चयाभावादिति भावः । 'पदार्थतावच्छेदकेनेति यथाश्रुतन्तु न सङ्गच्छते पदार्थतावच्छेदकत्वस्य प्रकृतपदार्थतावच्छेदकत्वस्य च केवलान्वयितया तेन रूपेण साजात्यविवक्षणेऽपि वह्निना सिञ्चतीत्यादौ क्रिया वह्निकरणिका प्रमेयं वह्निकरणकं सेको द्रव्यकरणक इत्यादिनिश्चयमादाय सेकः सकरणक इत्यादिनिश्चयमादाय चातिप्रसङ्गतादवस्थ्यात् सन्दर्भविरोधापत्तेः अज्ञातेत्यादिप्रकृतदूषणासङ्गत्यापत्तेश्च प्रमेयत्व-मनुष्यत्वाद्याश्रयनिष्ठस्य निष्ठप्रत्ययार्थतावच्छेदकाश्रयत्वादेः(२) पदार्थतावच्छेदकत्वात्(३) तेन रूपेणाज्ञातसजातीये पयःपानकर्तृत्वसंसर्गनिश्चयस्य तत्रापि सत्त्वादिति ध्येयं । दूषणान्तरमाह, 'वाक्यार्थस्येति, पयसा सिञ्चती-

(१) तथाच शाब्दबुद्धौ बाधबुद्धेर्न प्रतिबन्धकत्वं किन्तु तत्तत्संसर्गाभावरूपयोग्यताविरहस्यैव शाब्दे इति भावः ।

(२) प्रमेयत्व-मनुष्यत्वादिनिष्ठप्रत्ययार्थतावच्छेदकाश्रयत्वादेरिति ख० ।

प्रमेयत्व-मनुष्यत्व-निष्ठाप्रत्ययार्थतावच्छेदकाश्रयत्वादेरिति ग० ।

(३) प्रमेयत्व-मनुष्यत्वाश्रयत्वादेः तत्तद्धातूत्तरक्तप्रत्ययार्थतावच्छेदकत्वादित्यर्थः ।

त्यादावपीत्यादिः, पयसा सिञ्चतीत्यादावपि वाक्यार्थस्य सेकत्वा-
द्यवच्छिन्ने पयःकरणकत्वाद्यवच्छिन्नसंसर्गनिश्चयस्यापूर्व्वत्वाच्च सर्व्वत्र
शाब्दबोधात् पूर्व्वमभावादित्यर्थः, तथाच पयसा सिञ्चतीत्यादावपि
यदा तादृशनिश्चयो नास्ति तदापि शाब्दबोधस्यानुभवसिद्धत्वा-
द्व्यभिचार इति भावः। दूषणद्वयमिदं दर्शनपदस्य निश्चयपरत्व-
मभिप्रेत्य, संशय-निश्चयसाधारणज्ञानमात्रपरत्वे तु नैतद्दोषद्वयाव-
काशः, अश्वजातीत्यादावप्यश्वजातत्वावच्छिन्ने पयःपानकर्तृत्वस्य संश-
यात्मकसंसर्गज्ञानसम्भवात्, एवं पयसा सिञ्चतीत्यादावपि सेकः
पयःकरणकत्वसंसर्गवानिति निश्चयविरहदशायां सेकः पयःकरणक-
त्वसंसर्गवान्न वेति संशयात्मकसंसर्गज्ञानसम्भवात्। न च यदा
तादृशसंशयोऽपि नास्ति तदापि तादृशशाब्दबोधाद्व्यभिचार इति
वाच्यं। तदानीं शाब्दबोधासिद्धेः, अन्यथा तद्धर्मावच्छिन्ने तद्ध-
र्मावच्छिन्नत्वरूपनिष्कृष्टयोग्यतापक्षेऽपि व्यभिचारस्य दुर्व्वारत्वात्।
वस्तुतस्तु करकाभिप्रायप्रयुक्ते[1] पयसा सिञ्चतीत्यादौ सेको न
जलत्वाश्रयैतद्व्यक्तिकरणक इति सेके करकाकरणकत्वबाधनिश्चय-
दशायामपि सेकत्वावच्छिन्ने जलकरणकत्वप्रकारेण करकाकर-
णकत्वान्वयबोधापत्तिः, तादृशबाधनिश्चयदशायामपि सेकत्वरूपेण
सेके जलकरणकत्वत्वरूपेण जलकरणकत्वस्य संसर्गनिश्चयाभावात्।
न चेष्टापत्तिः, साम्प्रदायिकैस्तदानीं तादृशान्वयबोधस्यानभ्युपगमा-
दित्येव दूषणं, नव्यमते तु वक्ष्यमाणनिष्कृष्टयोग्यतापेक्षया गौरव-
मेवात्र दूषणमित्यवधेयं।

(१) जलत्वरूपेण करकाबोधेच्छयोच्चरित इत्यर्थः।

केचित्तु अस्य योग्यतात्वे वह्निना सिञ्चतीत्यादौ सेको न वह्निकरणक इति बाधनिश्चयदशायां सेकत्वावच्छिन्ने वह्निकरणकत्वत्वरूपान्वयितावच्छेदकावच्छिन्नसंसर्गज्ञानासम्भवात् सेकत्वावच्छिन्ने वह्निकरणकत्वत्वरूपविशिष्टधर्मान्वयितावच्छेदककशाब्दबोधासम्भवेऽपि विशेष्ये विशेषणमिति न्यायेन सेको वह्निकरणक इति शाब्दबोधो दुर्वारः, तत्र वह्नित्व-करणत्वत्वादेः प्रत्येकधर्मस्यैवान्वयितावच्छेदकतया यथोक्तबाधनिश्चयसत्त्वेऽपि सेकत्वावच्छिन्ने करणत्वत्वावच्छिन्नस्य करणत्वत्वावच्छिन्ने वह्नित्वावच्छिन्नस्य च संसर्गनिश्चयसम्भवादित्याहुः । तदसत्, अन्वयितावच्छेदकत्वरूपेण लक्षणे न प्रवेशः परन्तु सेकत्वावच्छिन्ने करणत्वत्वरूपेण करणत्वं प्रकारः करणत्वत्वावच्छिन्ने वह्नित्वेन वह्निः प्रकारः इत्याकारकशाब्दबुद्धिं प्रति सेकत्वावच्छिन्ने वह्निकरणकत्वत्वरूपविशिष्टधर्मावच्छिन्नसंसर्गज्ञानं योग्यतेत्यादिक्रमेण लक्षणं विवक्षितं, अतो विशेष्ये विशेषणमिति न्यायेन विशिष्टस्यैव वैशिष्ट्यमिति न्यायेन च सेको वह्निकरणक इति शाब्दबोधस्य यथोक्तबाधनिश्चयसत्त्वेऽसम्भवात् उभयसाधारण-वह्निकरणकत्वत्वावच्छिन्नप्रकारताया एवोक्तक्रमेण लक्ष्यतावच्छेदके प्रवेशात् । न चोभयसाधारणविशिष्टप्रकारताया ज्ञानाभाव इति वाच्यं । तथा सति रक्तदण्डवान् पुरुष इत्यादिविशिष्टबुद्धौ पुरुषो न रक्तदण्डवानित्यादिबाधबुद्धेः प्रतिबध्यप्रतिबन्धकभावद्वयापत्तेः वक्ष्यमाणनिष्कृष्टयोग्यतापक्षेऽप्युक्तदोषस्य दुर्वारत्वापत्तेश्चेति दिक् ।

'समभिव्याहृतेति प्रकृतेत्यर्थः, तदीयतत्संसर्गव्याप्यधर्मवत्त्वं तत्सं

पदार्थसंसर्गव्याप्यधर्मवत्त्वं, वाक्यार्थस्यानुमेयत्वापत्तेः न च वस्तुगत्या संसर्गव्याप्यो यो धर्मस्तद्वत्त्वं तच्च ? ज्ञातमुपयुज्यते इति नानुमेयः संसर्ग इति वाच्यम् योग्यताभ्रमाच्छाब्दभ्रमानुपपत्तेः। अतएवानन्वयनि-

सर्गेण तद्योग्यतेति फलितार्थः, 'वाक्यार्थस्येति एतत्संशयविरह-स्वीयशाब्दबोधमात्रस्यैव पूर्व्वमेकपदार्थेऽपरपदार्थसंसर्गस्यानुमानापत्तेरित्यर्थः, एतत्संशयविरहस्थले यत्र यत्र शाब्दबोधस्तत्र तत्रैव शाब्दबोधात् पूर्व्वं एतन्निश्चयस्य त्वयाभ्युपगमात् व्याप्यवत्तानिश्चय-सत्त्वेनानुमितिसामग्रीसत्त्वादिति भावः। 'संसर्गव्याप्येति, तदीय-तत्संसर्गव्याप्येत्यर्थः, 'तद्वत्त्वमिति, तत्संसर्गेण तद्योग्यतेति शेषः। 'योग्यताभ्रमादिति, इदञ्च शाब्दभ्रमानुपपत्तौ हेतुः,(१) वह्निना सिञ्चतीत्यादौ सतो निरुक्तयोग्यताया भ्रमो न तु स्वरूपसती सा अतः शाब्दभ्रमानुपपत्तेरित्यर्थः। न चेयं शाब्दप्रमायां हेतुरिति वाच्यं। बाधनिश्चयदशायां शाब्दप्रमापत्तेः विनष्टचैत्रे विनष्टरूप-वत्तादात्म्यप्रतिपादकमयंचैत्र इत्यादिवाक्यजप्रमायामव्याप्तेश्चेति भावः।

(१) योग्यताभ्रमादित्यत्र पञ्चम्यर्थः प्रयोज्यत्वं, अन्वयश्चास्य शाब्दभ्रमानुपपत्तौ तथाच योग्यताभ्रमप्रयुक्ता या शाब्दभ्रमानुपपत्तिस्तत इत्यर्थः, प्रयुक्तत्वञ्च तद्विषययोग्यत्वाभावप्रयोज्यत्वं, भवति चायोग्यस्थले निरुक्त-योग्यतायाः स्वरूपसत्याः कारणत्ववादिनस्तव मते योग्यताविरहप्रयुक्तश्च शाब्दभ्रमाभावः, सिद्धान्तिमते तु तद्भ्रमादेव शाब्दभ्रमः इति भावः।

बाधविरह एव योग्यता स्वरूपसती हेतुः तच्च तद्धर्मा-

केचित्तु निरुक्तयोग्यताया भ्रमादयः शाब्दभ्रमः तदनुपपत्ते-रित्यर्थ इत्याहुः । तदसत्, निरुक्तयोग्यताभ्रमादित्यत्र हि पञ्चम्यर्थो जन्यत्वमुत्तरत्वं वा, नाद्यः शाब्दभ्रमे निरुक्तयोग्यताभ्रमजन्यत्वस्यैवासिद्धेः योग्यताभ्रमजन्यत्वस्य प्रकृतानुपयोगितया तदभिधानस्य व्यर्थत्वापत्तेः । अत एव न द्वितीयोऽपि तदभिधानस्य व्यर्थत्वादिति ध्येयं[1] ।

'अत एवेति वह्निना सिञ्चतीत्यादौ शाब्दभ्रमानुपपत्तेरेवेत्यर्थः, तत्र[2] अन्ततो भगवत एवानन्वयनिश्चयस्य सर्वदा सत्त्वादिति भावः । इदमुपलक्षणं पयसा सिञ्चतीत्यादावेकस्य पुरुषस्यानन्वयभ्रमसत्त्वे पुरुषान्तरस्यापि शाब्दप्रमानुत्पत्त्यापत्तेश्चेत्यपि बोध्यं । 'अनन्वयनिश्चयेति, तद्धर्म्मान्वयितावच्छेदकसम्बन्धावच्छिन्न-तद्धर्म्मावच्छिन्नप्रतियोगिताकाभावप्रकारकनिश्चयसामान्यस्य विशे-

(1) तथाचायोग्यस्थले स्वजन्ये योग्यताविरहादेव शाब्दानुपपत्तेरित्यस्यैव वक्तुमुचितत्वात् तत्स्थलीयशाब्दबुद्धेर्योग्यताभ्रमस्य जन्यताया उत्तरवर्त्तितायाश्च प्रदर्शनानर्थक्यादिति भावः । वस्तुतस्तु शाब्दभ्रमो न जायत एव तत्रेत्याशङ्कामपनेतुं योग्यताभ्रमजन्यतया तस्य प्रसिद्धिर्दर्शितेत्येवात्र ध्यानवीजं मन्तव्यं ।

(2) यत्र सेको न वह्निकरणक इति निश्चयस्तत्र मास्तु वह्निना सिञ्चतीति शाब्दभ्रमः यत्र तु स नास्ति तत्रैव तादृशशाब्दभ्रमस्य निष्प्रतिपक्षिकत्वेन च शाब्दभ्रमानुपपत्तिः अन्वयाभावनिर्णयाभावस्यैव योग्यतात्वस्य वक्तव्यत्वादित्याशयेन यदुक्तं अनन्वयेत्यादि तदपि न, ईश्वरीयतादृशनिर्णयस्य सर्वदैव सत्त्वादित्याह तत्रेत्यादिना ।

भावनिश्चये तत्प्रकारकशाब्दज्ञानानुदयात् इति परास्तम्[१]। नापि समभिव्याहृतपदार्थसंसर्गाभाव

च्छतावच्छेदकतासम्बन्धेनाभावः,[२] तादृशनिश्चयसामान्यस्य विशिष्यतावच्छेदकत्वाभावो वा तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नस्य योग्यतेत्यर्थः, वह्निना सिञ्चतीत्यादौ एकत्वेऽपि घटादिनिष्ठस्य वह्निकरणत्वाभावप्रकारकनिश्चयस्याभावसत्त्वादतिव्याप्तिवारणाय सामान्यपदं 'स्वरूपसती हेतुरिति, यत्र विशेष्यतावच्छेदकतासम्बन्धेन तद्धर्मावच्छिन्नप्रकारकशाब्दबोधः, तत्र विशेषणताविशेषसम्बन्धेन निरुक्तोऽभाव इति सामानाधिकरण्यप्रत्यासत्त्या स्वरूपसन् हेतुरित्यर्थः स्वरूपसद्धेतुत्वे व्यतिरेकसहचारं प्रमाणयति, 'तत्रेति, तद्धर्मावच्छिन्न इत्यर्थः. 'तद्धर्माभावनिश्चय इति स्वस्य तद्धर्मावच्छिन्नाभावप्रकारकनिश्चय इत्यर्थः, 'तत्प्रकारकेति स्वस्य तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नप्रकारकशाब्दबोधानुदयादित्यर्थः, 'परास्तमिति। न च तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नाभावप्रकारकतत्पुरुषीयनिश्चयसामान्याभावस्तद्धर्मावच्छिन्ने तत्पुरुषीयतद्धर्मावच्छिन्नप्रकारकान्वयबोधे योग्यतेति विवक्षणीयं अतो नोक्तदोष इति वाच्यं। स्वीयान्वयनिश्चयविरहदशायामयोग्येऽतिव्याप्त्यापत्तेः केवलान्वयिन्यव्याप्त्यापत्तेर्दुर्वारत्वाच्चेति भावः। 'समभिव्याहृतेति प्रकृतेत्यर्थः, तदीयतत्-

---

(१) दूषणपास्तमिति क०, ख० ।

(२) तद्धर्मावच्छिन्ने तादृशनिश्चयस्य सत्त्व एव तद्धर्मेऽपि अवच्छेदकतासम्बन्धेन तन्निश्चयसत्त्वादिति भावः ।

व्याप्यधर्मशून्यत्वम्, प्रमेयमभिधेयमित्यादौ संसर्गाभावस्याप्रसिद्ध्या तदनिरूपणात् गेहनिष्ठघटाभावे प्र-

संसर्गाभावव्याप्यधर्मशून्यत्वं तेन संसर्गेण तद्योग्यतेति फलितार्थः । इदञ्च ज्ञातमुपयुज्यते इति न शाब्दभ्रमानुपपत्तिः शाब्दभ्रमस्थले वस्तुगत्यैतस्यासत्त्वेऽप्येतद्भ्रमादेव शाब्दभ्रमोपपत्तेरिति भावः । 'अप्रसिद्धेति, प्रमेयादितादात्म्यस्य केवलान्वयित्वादिति भावः । 'तदनिरूपणात्' उक्तयोग्यताज्ञानासम्भवात् । नन्वेकपदार्थान्वयितावच्छेदकसंसर्गेऽपरपदार्थनिष्ठत्वाभावव्याप्यधर्मशून्यत्वं सेति नोक्तदोषः(१) इत्यरुचेराह, 'गेहनिष्ठेति गेहे घटाभावनिश्चय इत्यर्थः, 'तन्निश्चयेऽपि' उक्तयोग्यतानिश्चयेऽपि, 'घटोऽस्तीति वाक्यात्' गेहे घटोऽस्तीति वाक्यात्, 'अन्वयज्ञानानुदयादिति योजना, तथा चैतस्य योग्यतात्वे गेहे घटोऽस्तीत्यादौ बाधनिश्चयसत्त्वेऽपि एतन्निश्चयसत्त्वे शाब्दबोधापत्तिः । न च बाधनिश्चयस्य विशिष्टबुद्धिमात्रे प्रतिबन्धकत्वात् तत्सत्त्वादेव न तदानीं शाब्दबोध इति वाच्यं । तर्हि आवश्यकत्वात्तदभाव एव हेतुरस्तु किमेतज्ज्ञानस्य हेतुत्वेन तदभावसत्त्वे एतज्-

(१) प्रमेयमभिधेयमित्यादौ न ह्येवं कोऽपि अभिधेयार्थनिष्ठत्वाभावो यः प्रमेयतादात्म्यत्वं व्याप्नोति, व्याप्नोति च गगनत्वं, तच्छून्यत्वन्तु वर्त्तत एव प्रमेयतादात्म्यस्य इति नोक्तदोष इत्यर्थः. जगद्वृत्तित्वात् प्रमेयतादात्म्यस्य गगनादेस्तु तथात्वादिति भावः । वह्निना सिञ्चतीत्यादौ [illegible] वह्निकरणत्वीयसंसर्गप्रतियोगित्वस्य सेकनिष्ठत्वाभावव्याप्यत्वात् वह्निकरणत्वीयसंसर्गसम्बन्धस्य सेकावृत्तित्वादिति भावः ।

मिते घटोऽस्तीतिवाक्यात्तन्निश्चयेऽप्यन्वयज्ञानानुदयाच्च। नापि बाधकप्रमाणाभावः, अन्यत्र यद्बाधकं तदभावस्यायोग्येऽपि सत्त्वात्। नापि प्रकृतसंसर्गबाधकस्याभावः, प्रतियोगिसिद्ध्यसिद्धिव्याघातात्। न च

ज्ञानस्य व्यतिरेके एतदभावज्ञाने वा शाब्दबोधाभावस्य अनुभवसिद्धत्वाभावादिति भावः[१]। 'बाधकप्रमाणेति' तच्च तत्संसर्गाभावप्रमाविशेष्यत्वाभावस्तच्च तद्योग्यतेत्यर्थः, एतस्या ज्ञानं शाब्दधीहेतुरिति न शाब्दभ्रमानुपपत्तिः, बाधनिश्चयदशायाञ्च नैतज्ज्ञानसम्भव इति बाधनिश्चयदशायां न शाब्दबोधातिप्रसङ्ग इत्यभिमानः। केवलान्वयिन्यप्रसिद्धतादवस्थ्यञ्च स्वयमेव वक्ष्यत इति न सन्दर्भविरोधः विशेषाभावाभिप्रायेण दोषमाह, 'अन्यत्रेति', 'अन्यत्र यद्बाधकं' अन्यनिष्ठं यद्वह्निकरणत्वादिसंसर्गाभावप्रमाविशेष्यत्वं तदभावस्य सेकादावपि सत्त्वादित्यर्थः, तथाचातिप्रसङ्ग इति भावः। 'नापि प्रकृतेति' तन्निष्ठं यत्तत्संसर्गाभावप्रमाविशेष्यत्वं तस्य तथाभावस्तच्च तद्योग्यतेत्यर्थः, एवञ्च वह्निना सिञ्चतीत्यादौ सेकादिनिष्ठं यद्वह्निकरणत्वादिसंसर्गाभावप्रमाविशेष्यत्वं तदभावस्य सेकादावसत्त्वान्नातिप्रसङ्ग इति भावः। 'व्याघातादिति'[२] पयसा

---

(१) तथाच नान्वय-व्यतिरेक इति भावः।

(२) प्रकृतकरणकत्वसंसर्गाभावप्रकारकप्रमाविशेष्यत्वं यदि च सेकादिनिष्ठं तदा न तदभावः, यदि च तत्र नास्त्येव तादृशविशेष्यत्वं तदा सेकादिनिष्ठतादृशविशेष्यत्वस्याप्रसिद्धतया तदभावस्याप्यसिद्धिरतो व्याघातादित्यर्थः।

प्रकृतसंसर्गे अन्यत्र सिद्धस्य बाधकप्रमाणस्याभावः, प्रकृतसंसर्गस्य प्रथममप्रतीतेः अयोग्येऽपि तत्स-

---

म्भवतीत्यादौ योग्यव्यवहारव्याघातादित्यर्थः । सामान्याभावस्तु(१) 'नापीतरे'त्यादिना अग्रे निराकार्य्य इति नाशङ्कितः । 'प्रकृतसंसर्ग' इति तदीयप्रकृतसंसर्गेऽन्यत्र प्रसिद्धायास्तद्वृत्तित्वाभावप्रमाया अभावस्तत्र तद्योग्यतेत्यर्थः, 'प्रकृतसंसर्गस्ये'ति, तदीयप्रकृतसंसर्गस्य तदीयप्रकृतसंसर्गत्वरूपेण शाब्दबोधात्प्रागप्रतीतेरित्यर्थः, तदीयप्रकृतसंसर्गत्वं हि तन्निष्ठतदीयसंसर्गत्वं शाब्दबोधात्पूर्व्वञ्च एकपदार्थनिष्ठतया नापरपदार्थसंसर्गस्य ज्ञानमिति भावः । ननु प्रकृतत्वमन्वयितावच्छेदकत्वमतो नायं दोष इत्यत आह, 'अयोग्येऽपी'ति अन्वयिनिष्ठताद्दृशप्रमाव्यतिरेकाभावमादायायोग्येऽपि तत्सत्त्वाच्चेत्यर्थः, एतच्च विशेषाभावाभिप्रायेण, सामान्याभावस्तु 'अपि चे'त्यादिना अग्रे निराकरणीयः ।

---

(१) ननु प्रमाविशेष्यत्वीयविशेषाभावात्मकयोग्यताभिप्रायनिराकरणपरत्वे प्रस्तुतस्यापि सामान्याभावस्य निराकरणानभिधानं, अभिधानञ्च प्रकारान्तराभावनिराकरणस्य इत्यशङ्कितमित्येव न यतस्तस्यापि वक्तव्यत्वादित्याह, 'सामान्याभावस्त्वि'ति । न तस्य वक्तव्यत्वात् तदभिधानमत्र तु न कृत इति वाच्यं । तत्र तदुक्तेः सन्दर्भविशेषायत्तत्वात् स्वतन्त्रेच्छाधीनत्वाच्च । वस्तुतोऽत्र तादृशप्रमाविशेष्यताया सामान्याभावो विवक्षणीयस्तत्रायोग्ये योग्ये च न कोऽपि दोषः कथमन्यथाभिधाय तत्र व्याघातदोषकथनमित्यसङ्गतिरिति चेत्, न, सामान्याभावस्यापि निराकरणीयत्वादित्याह सामान्याभावस्त्विति ।

त्वाच्च। तत्र बाधकमप्यस्तीति चेत्, तर्हि प्रकृतसंसर्ग-बाधकस्याभावः तत्राप्रसिद्धम्। अतएव तत्र बाधक-स्याप्यनिरूपणम्। नापीतरपदार्थसंसर्गाभावप्रमा-

---

शङ्कते, 'तत्रेति अयोग्य इत्यर्थः, 'बाधकमप्यस्तीति वह्निकरणत्वा-द्यन्वयितावच्छेदकसम्बन्धे सेकादिवृत्तित्वाभावप्रमैवास्तीत्यर्थः, तथा च तदीयान्वयितावच्छेदकसम्बन्धे तदीयान्वयितावच्छेदकसम्बन्धनिष्ठा-धारतावृत्तित्वाभावप्रमाया अभावस्तत्र नायोग्यतेति भावः। भावार्थ-मनूद्य दूषयति, 'तर्हि प्रकृतेति तदीयान्वयितावच्छेदकसम्बन्धे त-दीयान्वयितावच्छेदकसम्बन्धनिष्ठाधारतावृत्तित्वाभावप्रमाया अभाव इत्यर्थः, तत्र तद्योग्यत्वमिति शेषः। 'तत्र' तद्रूपं योग्यत्वञ्च, 'अप्रसिद्धं' योग्यस्थले प्रतियोग्यप्रसिद्ध्या अप्रसिद्धम्। ननु पयसा सिञ्चतीत्यादौ पयःकरणकत्वसंसर्गे यदि पयःकरणत्वसंसर्गनिष्ठसेकवृत्तित्वाभावप्रमा-या अभावोऽप्रसिद्धस्तदा तादृशप्रमावत्त्वाज्ञानं कुतो न भवतीत्यत आह, 'अत एवेति अप्रसिद्धत्वादेवेत्यर्थः, 'तत्र' योग्यस्थले, 'बाधक-स्याप्यनिरूपणमिति पयःकरणत्वाद्यन्वयितावच्छेदकसम्बन्धे पयःकर-णत्वाद्यन्वयितावच्छेदकसम्बन्धनिष्ठसेकादिवृत्तित्वाभावप्रमावत्त्वस्याप्य-ज्ञानमित्यर्थः, प्रथमे सामान्याभावमाशङ्कते,[1] 'नापीतरेति तत्र

---

(1) प्रथमे बाधकप्रमाणाभाव इति लक्षणस्य तत्र तत्संसर्गाभावप्रका-रकप्रमाविशेष्यत्वाभावरूपोऽर्थः। तत्र सामञ्जस्ये घटकत्वं सामान्या-भावमित्यत्रान्वेति तथा च तादृशविशेष्यत्वाभावघटको योऽभावः स सामान्याभाव एव विवक्षित इत्याशयः।

विषयत्वाभावोऽपरपदार्थे, केवलान्वयिन्यप्रसिद्धेः । एतेन यत्रासम्बन्धग्राहकं प्रमाणं नास्ति तद्योग्यमिति निरस्तम् । नापि बोधनीयसंसर्गाभावप्रमाविरहः, प्रतियोग्यप्रसिद्धेः, बोधनीयसंसर्गस्य प्रागप्रतीतेः योग्यता च न स्वरूपसत्युपयुज्यते इत्युक्तम्, अयोग्ये तत्-

तदीयसंसर्गाभावप्रमाविशेष्यत्वसामान्याभावस्तत्र तद्योग्यतेत्यर्थः, 'केवलान्वयिनीति, प्रमेयादितादात्म्यसंसर्गस्य केवलान्वयित्वादिति भावः । 'एतेन' केवलान्वयिन्यप्रसिद्धत्वेन, 'असम्बन्धग्राहकेति, यत्र यदीयान्वयितावच्छेदकसम्बन्धाभावप्रमाकरणं नास्तीत्यर्थः, 'तद्योग्यमिति तत्र तद्योग्यमित्यर्थः,[१] पूर्वत्र तत्तत्संसर्गाभावप्रमाविशेष्यत्वाभावः, अत्र च स्वजन्यतत्तत्संसर्गाभावप्रमाविशेष्यत्वसम्बन्धेन[२] तत्करणाभाव इति भेदः । 'बोधनीयसंसर्गेति बोधनीययोर्द्वयोर्योऽन्वयितावच्छेदकसम्बन्धस्तन्निष्ठतदन्वयितावच्छेदकसम्बन्ध इति यावत्, तदभावप्रमाप्रागस्त्वाभावस्तत्र तद्योग्यतेत्यर्थः, 'प्रतियोग्यप्रसिद्धेरिति प्रमेयमभिधेयमित्यादौ केवलान्वयिनि प्रतियोग्यप्रसिद्धेरित्यर्थः, प्रमेयनिष्ठाभिधेयतादात्म्यसंसर्गस्याभावाप्रसिद्धेरिति भावः । दूषणान्तरमाह, 'बोधनीयेति, बोधनीयैकपदार्थनिष्ठतया बोधनीयापरपदार्थसंसर्गस्य शाब्दबोधात् प्रागप्रतीतेरित्यर्थः । नन्वियं स्वरूपसती हेतुरिति नायं दोष इत्यत आह, 'योग्यता चेति, अक्षयोग्यता

(१) तत्तद्योग्यमित्यर्थ इति क०, ख० ।

(२) अत्र स्वपदं तादृशप्रमाकरणपरं ।

सम्बन्धानिरूपणाच्च । अपि च स्वीयबाधकप्रमावि-

षेत्यर्थः, 'इत्युक्तमिति' इत्यत्र युक्तिः[1] पूर्व्वमेवोक्तेत्यर्थः, तथा सति वह्निना सिञ्चतीत्यादौ शाब्दभ्रमानुपपत्तिरिति भावः । दूषणान्तरमाह, 'अयोग्य' इति, 'तत्सत्त्वस्येति' सेकादिनिष्ठस्य वह्निकरणत्वादिसंसर्गस्याप्रसिद्धा सेकादौ सेकादिनिष्ठस्य वह्निकरणत्वादिसंसर्गस्य याऽभावप्रमा तत्सत्त्वस्य ज्ञानासम्भवाच्चेत्यर्थः,[2] तथाच तत्रायोग्यत्वव्यवहारानुपपत्तिरिति भावः[3] । इदमुपलक्षणं तन्निष्ठतत्संसर्गस्तत्र तद्योग्यतेत्यस्यैव सम्यक्त्वेन शेषांशस्यानतिप्रयोजनकत्वाच्चेत्यपि बोध्यं[4] । ननु तदीयान्वयितावच्छेदकसम्बन्धे तद्वृत्तित्वाभावप्रमासामान्याभावस्तत्र तदन्वयबोधे योग्यतेति विवक्षणीयमतो विशेषाभावमादाय न पूर्व्वोक्तातिप्रसङ्ग इत्यरुचेराह, 'अपि चेति', तादृशप्रमासामान्याभावपदेन तत्तत्पुरुषीय-तादृश-

---

(1) वह्निना सिञ्चतीत्यादौ योग्यताभ्रमात् शाब्दभ्रमानुपपत्तिरूपयुक्तिरित्यर्थः ।

(2) तथाच प्रतियोग्यप्रसिद्धा तदभावाप्रसिद्धिस्तदप्रसिद्धा तज्ज्ञानस्याप्यलीकत्वमिति भावः ।

(3) व्यवहर्त्तव्यस्य तादृशप्रमाभावरूपायोग्यत्वस्य ज्ञानासम्भवादिति भावः ।

(4) न च योग्येऽपि शाब्दबोधात् पूर्व्वं योग्यत्वव्यवहारानुपपत्तिरयम् दोष एव सेकादौ सेकादिनिरूपयकरणकत्वादिसंसर्गाभावप्रमाभावज्ञानाभावात् व्यवहारोपयिकतादृशाभावरूपयोग्यत्वात्मकव्यवहर्त्तव्यतावच्छेदकज्ञानस्य तत्पूर्व्वमपेक्षणीयत्वात् इति वाच्यं । शाब्दधीप्राक् तादृशव्यवहारस्य निष्प्रयोजनकतया तस्य शाब्दात् परत एव स्वीकारात् ।

रहस्यायोग्येऽपि सत्त्वात् बाधकप्रमामात्रविरहस्य योग्येऽपि ज्ञातुमशक्यत्वात् परप्रमाया अयोग्यत्वात् । न

प्रमात्वावच्छिन्नाभावो विवक्षितः तादृशप्रमात्वावच्छिन्नाभावो वा, आद्ये तत्तान्वयितावच्छेदकसम्बन्धे तत्तत्पुरुषीय-तद्वृत्तित्वाभाव-प्रमात्वावच्छिन्नाभावस्तत्र तत्तत्पुरुषीयतदन्वयबोधे योग्यतेति लक्षणं फलितं तच्चायोग्येऽतिव्याप्तं वह्निना सिञ्चतीत्यादावपि यस्य पुरुषस्य शाब्दभ्रमः वह्निकरणत्वादिसंसर्गे तत्पुरुषीयसेकादिवृत्तित्वाभावप्रमासामान्याभावस्य सत्त्वादित्याह, 'स्वीयेति यस्य पुरुषस्य[1] शाब्दभ्रमस्तत्पुरुषीयसेकादिवृत्तित्वाभावप्रमात्वावच्छिन्नाभावस्येत्यर्थः, 'अयोग्येऽपि' वह्निकरणत्वादिसंसर्गेऽपि । न च तत्तत्पुरुषीय-तदन्वयबोधे योग्यतापि तत्रास्तीति वाच्यं । सकलपुरुष-सकलकालसाधारणायोग्यताया एव तत्राभ्युपगमादिति भावः । द्वितीये आह, 'बाधकप्रमामात्रेति तद्वृत्तित्वाभावप्रमात्वावच्छिन्नाभावस्येत्यर्थः, 'ज्ञातुं' प्रत्यक्षतो ज्ञातुं, 'अयोग्यत्वादिति तादृशप्रमात्वावच्छिन्नाभावस्याप्ययोग्यत्वादित्यर्थः, अयोग्यप्रतियोगिकत्वादिति भावः ।

---

(१) वह्निना सिञ्चतीत्यादौ यस्य वह्निकरणत्वीयसेकसंसर्गसम्बन्धे कदापि सेकादिवृत्तित्वाभावप्रमा न जाता तस्यैव तादृशप्रमाभावमादायायं दोषः । अन्यथा यस्य वह्निकरणत्वसम्बन्धे कदाचित् सेकादिवृत्तित्वाभावप्रमा जायते कदाचित् तादृशस्थले शाब्दभ्रमोऽपि जायते तस्य तादृशसम्बन्धे तादृशप्रमासामान्याभावविरहात् तादृशस्थले दोषाभाव इति ध्येयम् ।

च स्वरूपसन्नेवायं हेतुः, स्वीयबाधकप्रमाविरहदशायां योग्यताभ्रमेण शाब्दभ्रमानुपपत्तेः, अन्वयप्रयोजकरूपवत्त्वेन बाधकप्रमामात्रविरहोऽनुमेय इति चेत्। न। सेकानन्विततोये द्रवद्रव्यत्वे सत्यपि बाधकसत्त्वेन व्यभिचारात् उपजीव्यत्वेन तस्यैव योग्यतात्वापत्तेश्च। न चैवमेवेति वाच्यम्। आकाङ्क्षासत्त्यन्वयप्रयोजक-

---

'स्वीयबाधकप्रमेति वह्निकरणकत्वादिसंसर्गे स्वीयसेकादिवृत्तित्वाभावप्रमाविरहदशायामित्यर्थः, 'योग्यताभ्रमेणेति उक्तयोग्यताभ्रमस्यैव सत्त्वेनेत्यर्थः, एवकारादसदुक्तयोग्यताव्यवच्छेदः, 'अन्वयप्रयोजकेति, अन्वयस्वरूपयोग्यतावच्छेदकधर्मवत्सम्बन्धत्वेनेत्यर्थः, जलसंसर्गः सेककरणत्ववृत्तित्वाभावप्रमामात्रविरहवान् द्रवद्रव्यसम्बन्धत्वादित्यनुमानप्रकार इति भावः। 'सेकानन्वितेति, सेकाकरणीभूततोये इत्यर्थः,[1] 'बाधकसत्त्वेन' तत्सम्बन्धे सेककरणत्ववृत्तित्वाभावप्रमासत्त्वेन, इदमुपलक्षणं सेककरणीभूततोयस्यापि सेककरणत्वावृत्तिसम्बन्धे[2] व्यभिचारो बोध्यः। 'उपजीव्यत्वेन' भवदुक्तयोग्यताज्ञानोपजीव्यज्ञानविषयत्वेन, 'तस्यैव' अन्वयप्रयोजकरूपवत्त्वस्यैव।

---

(१) सेकाकरणत्वावृत्तितोयसम्बन्ध इति यावत्। 'द्रवद्रव्यत्वे' द्रवद्रव्यसम्बन्धत्वे इत्यधिकः पाठः ग॰पुस्तके वर्त्तते।

(२) सेककरणीभूततोयस्य स्वीयरूपादिवृत्तिसमवायादौ सेककरणत्ववृत्तित्वाभावप्रमासत्त्वादिति भावः।

रूपवत्त्वे सत्यप्यनाप्तवाक्ये[1] बाधकप्रमायामन्वयाबोधात्, बाधकप्रमाविरहो हेतुरिति वेद्याऽवश्यकत्वात् सैव योग्यता ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे योग्यतावादपूर्व्वपक्षः ॥

'अन्वयप्रयोजकरूपवत्त्वेऽपि' तज्ज्ञानसत्त्वेऽपि, 'अनाप्तवाक्ये' स्थलजलाभिप्रायप्रयुक्ते पयसा सिञ्चतीत्यादिवाक्ये, 'बाधकप्रमायामिति सेको न जलकरणक इत्यनुभव इत्यर्थः, 'बाधकप्रमाविरह इति बाधनिश्चयाभावोऽपि स्वरूपसद्धेतुरित्यर्थः, 'सैव' बाधनिश्चयशून्यतैव, 'योग्यता' शाब्दधीजनिका, अस्त्विति शेषः । किमेतज्ज्ञानस्य हेतुत्वेनेति भावः । इदमापाततः तादृशप्रमात्वसामान्यलक्षणप्रत्यासत्तिजन्यतादृशप्रमासामान्यज्ञानाभावत्वसामान्यलक्षणप्रत्यासत्तिजन्यतदभावज्ञान-तदसंसर्गाग्रहसहकृतेन तज्जन्यविशिष्टानुभवजन्यस्मृतिसहकृतेन वा मनसैवोपनीतभानात्मकस्य तन्निश्चयस्य क्वचित् संशयस्य च सम्भवात् आप्तवाक्यादिना व्यभिचारादेरयथार्थदशायां व्यभिचारिणा लिङ्गेन च तज्ज्ञानस्य सम्भवाच्च । वस्तुतस्तु वृत्तित्वस्याधिकस्य प्रवेशाद्वक्ष्यमाणापेक्षया गौरवमेवात्र दूषणमवसेयमिति दिक् ।

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये योग्यतावादपूर्व्वपक्षरहस्यं ॥

---

(१) अनाप्तोक्ते वाक्य इति ख० ।

अथ योग्यतावादसिद्धान्तः ।

उच्यते बाधकप्रमाविरहो योग्यता, सा चेतरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वप्र-

अथ योग्यतावादसिद्धान्तरहस्यं ।

ननु तद्धर्मावच्छिन्नेऽन्वयितावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताक-तद्धर्मावच्छिन्नाभावप्रमाविशेष्यत्वसामान्याभावो बाधकप्रमाविरहः स च प्रमेयं वाच्यमित्यादावप्रसिद्धः तादात्म्यसम्बन्धेन वाच्यत्वावच्छिन्नाभावाप्रसिद्धेः, एवं प्रमेयस्य घट इत्यादौ यत्र प्रमेयत्वादिलक्षणाभेदसम्बन्ध एव षष्ठ्यर्थस्तस्य च विशेषणताविशेषसम्बन्धेन घटादावन्वयस्तत्र, यत्र वा स रूपवानित्यादौ तदादिपदं विशेषणताविशेषसम्बन्धेन प्रमेयत्वादिरूपेण प्रमेयघटादिपरं तत्र चाव्याप्तिः विशेषणताविशेष्यसम्बन्धेन प्रमेयत्वाद्यभावाप्रसिद्धेः, एवं भगवता ज्ञायते[1] घट इत्यादावपीत्यत आह, 'सा चेति बाधकप्रमाविरहरूपा योग्यता चेत्यर्थः, 'इतरपदार्थेति, अत्र इतरत्वमपरत्वञ्चाविवक्षितं तद्बुद्धेरहेतुत्वात् अयं घट इत्यादौ[2] विशेषण-

(१) अत्र तृतीयार्थः कर्तृत्वं तच्चाधेयत्वरूपं भासते, धात्वर्थो ज्ञानं, विषयत्वमाख्यातार्थः, तदन्वयश्च स्वरूपसम्बन्धेन घटे, तथाच भगवदाधेयज्ञानविषयतावान् घट इत्येव बोधस्तत्र स तु न सम्भवति तत्र स्वरूपसम्बन्धेन तादृशविषयत्वाभावाप्रसिद्ध्या निरुक्तयोग्यताविरहादिति भावः ।

(२) तत्र इदन्त्वावच्छिन्नस्यैव घटतया घटस्यैव इदन्त्वावच्छिन्नतया इतरत्वादेरप्रसिद्धेरिति भावः ।

माविशेष्यत्वाभावः। प्रमेयं वाच्यमित्यत्र प्रमेयत्वि-

विशेष्ययोरभेदस्थले योग्यत्वानुपपत्तेश्च। परन्तु तदीयान्वयितावच्छेदकसम्बन्धे तन्निष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वसामान्याभावस्तत्र तद्योग्यतेत्येव विवक्षितं, वह्निना सिञ्चतीत्यादौ वह्निनिष्ठकरणताया निरूपकत्वरूपान्वयितावच्छेदकसम्बन्धे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वस्यैव सत्त्वान्नातिव्याप्तिः। वह्निनिष्ठकरणतायां निरूपकत्वरूपसंसर्गेऽपि सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वस्य घटादिनिष्ठस्याभावसत्त्वादतिव्याप्तिवारणाय सामान्यपदोपादानं। न च श्रोतुर्यदा वह्निनिष्ठकरणताया निरूपकत्वसंसर्गे सेकनिष्ठात्यन्ताभावप्रतियोगित्वप्रमा नास्ति तदाऽतिव्याप्तिरिति वाच्यं। स्व-परसाधारणप्रमामात्र-विशेष्यत्वाभावस्य प्रवेशादनादौ संसारे तदानीमप्यवश्यं कस्यचित् पुरुषस्य तत्र तादृशप्रतियोगित्वप्रमासत्त्वादतो भगवत्प्रमासत्त्वाच्च। पयसा सिञ्चतीत्यादौ पयोनिष्ठकरणताया निरूपकतारूपान्वयितावच्छेदकसम्बन्धेऽपि सेकनिष्ठात्यन्ताभावप्रतियोगित्वभ्रमविशेष्यत्वसत्त्वादसम्भववारणाय प्रमेति। न च सर्वदा तादृशभ्रमविरहाद् यदाकदाचित् तादृशज्ञानविशेष्यत्वाभावमादायैव तत्र लक्षणसङ्गतिरिति वाच्यं। अनादौ संसारे सर्वदैवावश्यं कस्यचित् पयोनिष्ठकरणतानिरूपकत्वत्व-प्रमेयत्वादिना येन केनापि रूपेण वा तत्र तादृशप्रतियोगित्वभ्रमसत्त्वात्, प्रमात्वञ्च भ्रमभिन्नत्वं तेन पयोनिष्ठकरणतासंसर्गकांशे सेकनिष्ठात्यन्ताभावप्रतियोगित्वाविषयित्वाविशिष्टक-सकलभ्रमभिन्नप्रमाविशेष्यत्वमादाय नासम्भवः। न च तथापि पयोनि-

ष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वं गोत्वे प्रसिद्धं.

ष्ठकरणतासंसर्गः सैकनिष्ठात्यन्ताभावप्रतियोगिधर्मत्वानित्यादिप्रमा-विशेष्यतया असम्भव इति वाच्यं । तादृशप्रतियोगित्वप्रकारत्वावच्छिन्नायाः प्रमाविशेष्यताया अभावस्य विवक्षितत्वात्, प्रकारत्वञ्च विशेषणताविशेषसम्बन्धावच्छिन्नं ग्राह्यं तेन एककालीनत्वादिसम्बन्धेन तादृशप्रतियोगित्वप्रकारकप्रमामादाय नासम्भवः । अथैवं विषयतात्वमपहाय विशेष्यतात्वेन कथमुपादानं । न च पयःकरणत्वसंसर्गत्वं सैकनिष्ठात्यन्ताभावप्रतियोगीति प्रमाविषयत्वं पयःकरणत्वसंसर्गत्वघटकतया पयःकरणत्वसंसर्गेऽप्यस्तीत्यसम्भववारणाय(१) तेन रूपेणोपादानमिति वाच्यं । तादृशप्रतियोगित्वप्रकारकत्वावच्छिन्नविषयताविवक्षयैव तन्निरासम्भवादिति चेत्, न, विषयताविशेष्यतात्वयोः(२) समशरीरतया लाघव-गौरवाभावेनाशोकवनिकान्याया-

(१) तादृशसंसर्गत्वेऽप्यतादृशसंसर्गस्यापि निवेशात् तादृशसंसर्गत्वनिष्ठतादृशप्रतीतिविशेष्यतायास्तादृशसंसर्गेऽवच्छेदकत्वात्तद्विषयत्वमस्त्येवेत्यर्थः ।

(२) विषयतायां तादृशप्रतियोगित्वप्रकारकत्वावच्छिन्नत्वं तादृशप्रतियोगित्वानतिरिक्तवृत्तित्वं तन्मते। तादृशप्रकारकत्वस्य ज्ञानवृत्तित्वेन ज्ञाननिष्ठज्ञानविषयकज्ञानीयविषयतायामेव तादृशावच्छिन्नत्वसम्भवात्सङ्गतेः इति न युक्तं तथा सति अनतिरिक्तत्वप्रवेशे गौरवात् प्रमापदवैयर्थ्याभावाच्च भ्रमविषयतायाः पयःकरणकत्वादिनिरूपकत्वे सत्त्वेऽपि न तस्याः सैकादिवृत्त्यभावप्रतियोगित्वानतिरिक्तवृत्तित्वमिति तामादायासम्भवानवकाशात् किन्तु प्रतियोगित्वनिष्ठप्रकारतानिरूपितत्वमिति ।

त्वात्, प्रतियोगित्वस्यान्वयितावच्छेदकसम्बन्धतानियामकसम्बन्धावच्छिन्नत्वेन विशेषणीयं, तेन व्यधिकरणसम्बन्धावच्छिन्न-तादृशप्रतियोगित्वमादाय नासम्भवः । न च तादृशप्रतियोगित्वसामान्याभाव एव सम्यक् किं प्रमाविशेष्यत्वप्रवेशेनेति वाच्यं । अखण्डाभावतया वैयर्थ्याभावात् । ननु तत्र तद्भिन्नात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वसामान्याभावस्तत्त्व तद्योग्यतेत्येवास्तु किमन्वयितावच्छेदकसम्बन्धस्य अनुयोगिकुक्षिनिक्षेपेण, प्रतियोगित्वस्यान्वयितावच्छेदकसम्बन्धावच्छिन्नत्वेन विशेषणीयं नातो व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगित्वमादायासम्भवः तथापि सम्बन्धविशेषावच्छिन्नत्वप्रवेशस्यावश्यकत्वादिति चेत्, न, अयं घट इत्यादावभेदान्वयबोधस्थलेऽन्वयितावच्छेदकतादात्म्यसम्बन्धावच्छिन्नात्यन्ताभावप्रतियोगित्वाप्रसिद्ध्याऽव्याप्त्यापत्तेः । न चात्यन्ताभावत्वेन नोपादेयं किन्त्वभावत्वेनेति नायं दोष इति वाच्यं । तथापि पर्वतो घटो नास्तीत्यादावन्वयितावच्छेदकानुयोगित्व-प्रतियोगित्वादिरूपनियामकसम्बन्धावच्छिन्नप्रतियोगिताया अप्रसिद्धत्वेनाव्याप्त्यापत्तेः । अत्यन्ताभावस्य प्रतियोगिव्यधिकरणत्वेन विशेषणीयः, अन्यथा नीलो घट इत्यादावव्याप्त्यापत्तेः तत्राव्याप्यवृत्तिनो नीलरूपस्यैव नीलरूपविशिष्टतादात्म्यत्वेनान्वयितावच्छेदकसम्बन्धत्वात्[1] तस्य च उत्पत्तिकालाव-

(१) सर्वत्रैवान्वयितावच्छेदकसम्बन्धीयसम्बन्धानां सम्बन्धत्वं अन्वयितावच्छेदकसम्बन्धविशिष्टत्वात् सम्बन्धत्वेन अन्यथा अयोग्यमात्रेऽतिव्याप्तेः सेकादिस्थलीयभावप्रतियोगित्वप्रमाविशेष्यत्वाभावस्य वह्निकारणकत्वीयनिरूपकत्वरूपसम्बन्धेऽसत्त्वेऽपि निरूपकत्वत्वेन निरूपकत्वे सत्त्वस्य निष्प्रत्यूहत्वात् सेके पयःकरणकत्वीयनिरूपकत्वस्यैव सत्त्वादिति भावः ।

च्छेदेन रक्ततादशायाञ्च घटेऽत्यन्ताभावसत्त्वात्, एवं काष्ठं पचतीत्यादौ यत्र तिङोऽनुकूलव्यापारे वह्नौ तत्वस्य संयोगेन च तदन्वयः कर्त्तरि काष्ठादौ तत्र संयोगस्यैवान्वयितावच्छेदकसम्बन्धतया तस्य च किञ्चिदवच्छेदेन काष्ठादावत्यन्ताभावादव्याप्त्यापत्तेः। एतेन वैशिष्ट्य-व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगित्वमादायापि नासम्भवः तस्य च प्रतियोगिव्यधिकरणत्वाभावात्। न च तथापि यत्रान्वयितावच्छेदकसम्बन्धो नाना तत्र चालनीन्यायेनाभावमादायाव्याप्तिरिति वाच्यं। तद्व्यक्तिनिरूपितान्वयितावच्छेदकसम्बन्धे तद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावस्तद्व्यक्तौ तद्व्यक्तियोग्यतेति क्रमेण प्रत्येकपर्याप्तिकतया तत्तद्व्यक्तेरेव तत्तद्घटत्वतया चालनीन्यायेनाभावमादायाव्याप्तिविरहात् अन्यथा पदार्थतावच्छेदकरूपेण पदार्थयोः सम्बन्धतावच्छेदकरूपेण अन्वयितावच्छेदकसम्बन्धस्य च लक्षणघटकत्वे नीलो घट इत्यादावव्याप्त्यापत्तेः नीलत्वादात्म्यस्य रक्तघटादिनिष्ठाभावप्रतियोगित्वेन घटनिष्ठात्यन्ताभावप्रतियोगित्वप्रमाविशेष्यत्वाभावविरहात्। न चैवं यद्यद्व्यक्तिद्वयोः परस्परमन्वयस्तत्तद्व्यक्तिद्वयोरेव प्रातिस्विकरूपेण परस्परयोग्यत्वज्ञानं हेतुरिति फलितं तच्च[1] युगसहस्रेणाप्यशक्यमिति वाच्यं। योग्यतायाः संशयसाधारणज्ञानस्यैव हेतुतया प्रातिस्विकसकलव्यक्तीनां परस्परयोग्यतानिश्चयविरहेऽपि क्षतिविरहात्[2]। न च प्रातिस्विकनिखिलव्यक्तीनां परस्परयोग्यतासंशयोऽपि सर्व्वत्र दुःसम्भव इति वाच्यं। यद्व्यक्ति-

(१) योग्यत्वज्ञानञ्च।

(२) तथा योग्यतासंशयादेव शाब्दबोध इति भावः।

द्वयोः परस्परं योग्यताज्ञानं तयोरेव परस्परमन्वयोऽस्तु ययो-ऽस्तु संशयात्मकं निश्चयात्मकं वा न तज्ज्ञानं तयोः शाब्दबोध-विषयत्वेऽपि भानाभाव इत्यभिप्रायात् । न चैवं तत्तद्व्यक्तित्वरूपेणा-योग्यताज्ञानस्य हेतुत्वे सामान्यतः पदार्थतावच्छेदकरूपेणायोग्यता-निश्चयेऽपि शाब्दबोधापत्तिरिति वाच्यं। अन्वयितावच्छेदकाश्रयत्व-विशिष्टतत्तद्व्यक्तित्वरूपेण योग्यताज्ञानस्य हेतुत्वाभ्युपगमात् । न च तथापि स्पर्शवानित्यादौ यत्र तदादिपदं समवायसम्बन्धेन रूप-प्रकारेण रूपवद्वायुपरं तत्रापि योग्यत्वापत्तिः वायौ रूपव्यक्ति-निरूपितत्वविशिष्टसमवायाभावसत्त्वेऽपि तदभावस्य समवायात्मकप्रति-योगिसमानाधिकरणत्वादिति वाच्यं । तद्व्यक्तिनिरूपितान्वयिताव-च्छेदकसम्बन्धपदेनान्वयितावच्छेदकसम्बन्धावच्छिन्नतद्व्यक्तिनिरूपितध-र्म-धर्मिभावस्य विवक्षितत्वात्, धर्म-धर्मिभावश्च वृत्तिनियामकानि-यामकसम्बन्धेन तत्तत्साधारणः स्वरूपसम्बन्धविशेषः, न त्वाधा-राधेयभावमात्रं, तेन वृत्त्यनियामकानुकूलत्वादिसम्बन्धस्थलेऽपि नाप्र-सिद्धिः । अतएव धर्म-धर्मिभावविषयकैकज्ञानत्वं विशिष्टज्ञानत्वमिति मीमांसकाः । इत्यस्य प्रतियोगित्वप्रमेत्यत्र प्रतियोगित्वं विशेषणा-ताविशेषसम्बन्धावच्छिन्नत्वेनैव सर्वत्र विशेषणीयं । न च तथापि स प्रमेय इत्यादौ यत्र तदादिपदं समवायसम्बन्धेन गुणाद्यन्यत्ववि-शिष्टसत्तावद्गुणपरं तत्रापि योग्यत्वापत्तिः विशिष्टसत्तायाः सत्ता-नतिरिक्ततया सत्ताव्यक्तिनिरूपितसमवायसम्बन्धावच्छिन्नधर्मित्वस्य गुणनिष्ठाभावप्रतियोगित्वविरहादिति वाच्यं । तत्र योग्यत्वस्येष्ट-त्वात्, यदा तु विशिष्टनिरूपिताधारत्वसम्बन्धेन विशिष्टसत्तावद्-

गुणपदं तद्वैवायोग्यत्वस्याभ्युपगमात् । वस्तुतस्तु वृत्त्यनियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वात् तद्व्यक्तौ तद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावस्तद्व्यक्तौ तद्व्यक्तेर्योग्यतेत्येव लक्षणार्थः । संसर्गपदस्य प्रतियोगित्वस्यान्वयितावच्छेदकसम्बन्धावच्छिन्नत्वलाभाय अन्यथा व्यधिकरणसम्बन्धावच्छिन्नाभावप्रतियोगित्वमादायासम्भवापत्तेः; अत्यन्ताभावत्वस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यधिकरणाभावत्वं,(१) न तु मानसंसर्गाभावत्वं, मातस्तादात्म्यसंसर्गकान्वयबोधस्थले अन्वयितावच्छेदकतादात्म्यसम्बन्धावच्छिन्नात्यन्ताभावप्रतियोगित्वाप्रसिद्ध्या अव्याप्तिः, घटस्य घटत्वमित्यादौ यत्र संयोगादिरेव षष्ठ्यर्थस्तत्र समवायेन घटत्वेऽन्वयस्तत्र, यत्र वा चैत्रो गच्छतीत्यादौ तिङोऽनुकूलव्यापारे संयोगादौ लक्षणा तत्र च समवायेन चैत्रेऽन्वयस्तत्र च संयोगादेरव्याप्यवृत्तितया घटत्वचैत्रादिनिष्ठाभावप्रतियोगित्वादव्याप्तिवारणाय प्रतियोग्यधिकरणत्वमभावविशेषणं । न स्पर्शवानित्यादौ यत्र तदादिपदं समवायसम्बन्धेन रूपप्रकारेण रूपवद्वायुपरं तत्रापि वायौ समवायसम्बन्धावच्छिन्नरूपवत्त्वाभावस्य समवायेन रूपात्मकप्रतियोग्यधिकरणतया नातिव्याप्तिरित्यपि रमणीयम्(२)। केवलान्वयिनि पूर्वोक्ता-

---

(१) तथाच प्रतियोग्यनधिकरणतद्व्यक्तिनिष्ठाभावप्रतियोगित्वप्रमाविशेष्यत्वाभावस्तद्व्यक्तौ तद्व्यक्तेर्योग्यतेति भावः ।

(२) तथाच रूपसमवायस्य समवायानतिरिक्ततया पूर्वकल्पेऽतिव्याप्तिरिति भावः ।

वाच्यत्वसंसर्गे तदभावः ।

अव्याप्तिमुद्धरति, 'प्रमेयमिति, 'प्रमेयनिष्ठात्यन्ताभावेति प्रमेयत्वाश्रयादिनिष्ठप्रतियोगिव्यधिकरणाभावेत्यर्थः, 'गोत्वे' . गोत्वाधिकरणत्वे, अन्यथा विशेषणताविशेषसम्बन्धावच्छिन्नाभावस्यैव लक्षणघटकतया तदवच्छिन्नगोत्वाभावस्य प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणत्वाभावात् गोत्वे प्रसिद्धासम्भवात् विशेषणताविशेषसम्बन्धेन गोत्वस्य प्रतियोगिनोऽधिकरणाप्रसिद्धेः ।' व्याप्यवृत्तित्वस्य प्रतियोगिव्यधिकरणत्वस्यानुपादेयत्वमते वस्तुतस्तुकल्पे च यथाश्रुतमेव साधु । 'वाच्यत्वसंसर्गे' वाच्यत्वरूपतादात्म्यसंसर्गावच्छिन्नधर्मधर्मिभावे,(१) वस्तुतस्तुकल्पे च 'वाच्यत्वसंसर्गे' वाच्यत्वसंसृष्टेऽस्मादौ ।

केचित्तु तत्तद्युक्तिनैव लक्षणघटकत्वेऽपूर्वव्यक्तिविशेषलाभः शाब्दबोधे क्वापि न स्यात् एवं च प्रमेय इत्यादौ यत्र तदादिपदं समवायसम्बन्धेन गुणाद्यन्यत्वविशिष्टसत्तात्वप्रकारेण तादृशसत्त्ववद्गुणपरं तत्राप्ययोग्यत्वं सर्वसिद्धमतस्तद्धर्मावच्छिन्ननिरूपितत्वविशिष्टाधिकरणतावच्छेदकसम्बन्धे तद्धर्मावच्छिन्ननिष्ठात्यन्ताभावप्रतियोगित्वप्रकारकप्रमाविशेष्यत्वाभावस्तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नस्यान्वयबोधे योग्यतेत्येव लक्षणार्थः(२) । न चैवं शिंशपा वृक्षः नीलो घट इत्यादाव-

---

(१) धर्मितानिरूपितधर्मित्व इत्यर्थः ।

(२) तथाच विशिष्टसत्तानिरूपितत्वविशिष्टसमवायाधिकरणता न गुणादाविति भावः ।

व्याप्तिः विशेष्यता-नीलादितादात्म्यस्य रूप-घटत्वाद्यवच्छिन्ननिष्ठात्य-
न्ताभावप्रतियोगित्वादिति वाच्यं। तद्धर्मावच्छिन्ननिष्ठात्यन्ताभाव-
पदेन तद्धर्मावच्छिन्नत्वव्यापकात्यन्ताभावस्य विवक्षितत्वात्। न चैवं
प्रमेयं वाच्यमित्यत्र गोत्वे गोत्वाधिकरणत्वे वा प्रसिद्ध्यभिधानम-
युक्तं गोत्व-तदधिकरणत्वयोः प्रमेयत्वव्यापकात्यन्ताभावप्रतियोगित्व-
विरहादिति वाच्यं। विशेषणताविशेषावच्छिन्नगोत्वाभावस्य केवला-
न्वयित्वेन प्रमेयत्वव्यापकतया गोत्वे प्रसिद्धिसम्भवात् प्रमेयं वाच्य-
मित्यत्र विशेषणताविशेषस्यैव लक्षणघटकत्वात्[१]। न च विशेषणता-
विशेषसम्बन्धावच्छिन्नगोत्वाभावो न प्रतियोगितावच्छेदकसम्बन्धेन
प्रतियोगिव्यधिकरण इति वाच्यं। व्याप्यवृत्तिस्थले तस्यानुपादेय-
त्वात् अव्याप्यवृत्तावव्याप्तिवारणाय व्याप्यवृत्तित्वस्यैवाभावविशेषण-
त्वात् व्याप्यवृत्तित्वं निरवच्छिन्नवृत्तित्वं। न चैवं वैशिष्ट्य-व्यासज्य-
वृत्तिधर्मावच्छिन्नाभावमादायासम्भव इति वाच्यं। तद्धर्मावच्छि-
न्ननिरूपितत्वविशिष्टान्वयितावच्छेदकसम्बन्धतावच्छेदके तद्धर्माव-
च्छिन्नत्वव्यापकात्यन्ताभावप्रतियोगितावच्छेदकत्वप्रमाविशेष्यत्वाभाव-
स्य विवक्षितत्वात्[२]। न चैवं वह्निना सिञ्चतीत्यादौ अतिप्रसङ्गः
वह्नित्वावच्छिन्नाधेयत्वत्वे करणत्वव्यापकात्यन्ताभावप्रतियोगिता-

---

(१) अन्वयितावच्छेदकसम्बन्धतानियामकसम्बन्धेनाभावस्य लक्षणे निवेशनी-
यतया वाच्यतादात्म्यस्य वाच्यत्वरूपतया तन्नियामकसम्बन्धो विशेषणता-
ताविशेष एवेति भावः।

(२) प्रमानिरूपितावच्छेदकत्वनिष्ठप्रकारता च पर्याप्तिसम्बन्धावच्छिन्ना
ग्राह्या अतः पुनर्नोक्तदोष इति भावः।

वस्तुतस्त्वितरपदार्थसंसर्गेऽपरपदार्थनिष्ठात्यन्ताभाव-

वच्छेदकत्वाभावस्य एवं करणत्वावच्छिन्ननिरूपकत्वे सेकत्वव्याप-कात्यन्ताभावप्रतियोगितावच्छेदकत्वाभावस्य च सत्त्वादिति वाच्यं । वह्नित्वावच्छिन्न-करणत्वावच्छिन्नयोः सेकत्वावच्छिन्न-करणत्वाव-च्छिन्नयोश्च प्रत्येकान्वये तथापि योग्यता अस्त्येव वह्निकरणत्वरू-पविशिष्टधर्मावच्छिन्न-सेकत्वावच्छिन्नयोरन्वये परं योग्यता नास्ती-त्युपगमादिति न कोपि दोषः । एवमग्रिमलक्षणमपि बोध्यमि-त्याहुः, तदसत्, निष्ठपदस्य व्यापकत्वपरत्वे उदाहरणत्वापत्तेः करका-भिप्रायप्रयुक्तपयसा सिञ्चतीत्यादावपि जलकरणकत्वप्रकारेण कर-काकरणत्वबोधने योग्यतापत्तेश्च जलकरणत्वरूपविशिष्टधर्मावच्छि-न्ननिरूपितत्वविशिष्टान्वयितावच्छेदकसम्बन्धतावच्छेदके सेकत्वव्याप-काभावप्रतियोगितावच्छेदकत्वाभावसत्त्वात्, न चेष्टापत्तिः, जलकर-णत्वरूपेण करकाकरणत्वबोधनेऽपि साम्प्रदायिकैस्तत्र योग्यत्वाभ-भ्युपगमादिति दिक् ।

अत्र प्रमाविशेष्यत्वघटितत्वेन गौरवं तादृशप्रतियोगित्वप्रमात्वेन तादृशप्रतियोगित्वप्रमानुपस्थितिदशायां दुर्ग्रहत्वञ्च न हि सर्वत्र शाब्दबोधात् पूर्वं तादृशप्रतियोगित्वप्रमात्वावच्छिन्नोपस्थितिनियम-इत्यतस्तदंशपरित्यागेन लक्षणमाह, 'वस्तुतस्त्विति. अत्रापीतरत्वम-परत्वञ्चाविवक्षितं,[१] तथाच तत्सम्बन्धीयान्वयितावच्छेदकसम्बन्धे तन्न-

[१] अयं घट इत्यादौ विशेषण-विशेष्ययोरभेदस्थले योग्यतानुपपत्तेरिति शेषः ।

प्रतियोगितावच्छेदकधर्मशून्यत्वं योग्यता लाघवात् अवश्यमानत्वाच्च।

व्यक्तौ वा तत्तद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकधर्मशून्यत्वं तत्तद्व्यक्तौ तत्तद्व्यक्तेर्योग्यतेत्यर्थः, पदार्थतावच्छेदकरूपेण पदार्थयोः प्रवेशे शिंशपा वृक्षः नीलो घट इत्यादावनुगमेनाव्याप्तिरिति तद्व्यक्तित्वेन प्रवेशः। अत्यन्ताभावत्वस्य व्याप्यवृत्त्यभावत्वं, पूर्वोक्ताव्याप्यवृत्तिस्थलेऽव्याप्तिवारणाय व्याप्यवृत्तीति, व्याप्यवृत्तित्वं निरवच्छिन्नवृत्तित्वं, वैशिष्ट्य-व्यासज्यवृत्तिधर्मावच्छिन्नाभावस्यापि व्याप्यवृत्तित्वात्तत्प्रतियोगितामादायासम्भववारणायावच्छेदकानुसरणं। न च तथाप्यसम्भवः तादृशप्रतियोगितावच्छेदकस्य वैशिष्ट्यस्य व्यासज्यवृत्तिधर्मस्य च सर्वत्र सत्त्वादिति वाच्यं। 'इतरपदार्थसंसर्ग' इत्यस्य तद्व्यक्तीयत्वविशिष्टान्वयितावच्छेदकसम्बन्धतावच्छेदक इत्यर्थः, इतरपदार्थे इतरपदार्थतावच्छेदकाश्रये संसर्गो यस्येति व्युत्पत्त्या पदार्थतावच्छेदकाश्रयनिष्ठतद्व्यक्तित्वे इति वार्थः, 'प्रतियोगितावच्छेदकधर्मशून्यत्वमित्यस्य च प्रतियोगितावच्छेदकस्य धर्मः प्रतियोगितावच्छेदकत्वं तच्छून्यत्वमित्यर्थः, तथाच तत्तद्व्यक्तीयत्वविशिष्टान्वयितावच्छेदकसम्बन्धतावच्छेदके तद्व्यक्तित्वे वा तद्व्यक्तिनिष्ठव्याप्यवृत्त्यभावप्रतियोगितावच्छेदकत्वशून्यत्वं तद्व्यक्तौ तद्व्यक्तेर्योग्यतेत्यर्थस्य फलिततया वैशिष्ट्यादिरूपावच्छेदकमादायासम्भवविरहात् शेषं दर्शितदिशावसेयं। लाघवादिति प्रमाविशेष्यत्वाप्रवेशेन लाघवादित्यर्थः, 'अवश्यमान्यत्वाच्चेति तादृशप्रतियोगित्वप्रमात्वेनानुपस्थितिदशायामपि अवश्यमान्यत्वाच्चेत्यर्थः।

अत्र नव्याः अन्वयितावच्छेदकसम्बन्धेन तद्धर्मो तद्धर्मिकत्वमेव तद्धर्मो तद्धर्मयोग्यताऽतिलाघवात्, घटत्वाश्रये तद्धर्मिणी त्वत्वाश्रयी-तद्धर्मिमतीत्यादिक्रमेण च संशय-निश्चयसाधारणं तज्ज्ञानं हेतुः तेन सामान्यतः पदार्थतावच्छेदकरूपेणायोग्यतानिश्चयेऽपि न शाब्द-बोधः न वा शाब्दबोधात्पूर्वं सर्वत्र तादृशनिश्चयविरहेऽपि कापि क्षतिः । वस्तुतस्तु अन्वयितावच्छेदकसंसर्गेण तद्धर्मावच्छिन्ने तद्ध-र्मावच्छिन्नवत्त्वमेव तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नान्वयबोधे योग्यता तेन प्रातिस्विकरूपेण सर्वत्र शाब्दबोधात्पूर्वं निखिलतद्धर्मिषु तत्त-द्धर्मिमत्त्वग्रहाभावेऽपि न क्षतिः । न चैवं वह्निना सिञ्चतीत्यादा-वतिप्रसङ्गः करणत्वावच्छिन्ने वह्नित्वावच्छिन्नस्य सेकत्वावच्छिन्ने करणत्वावच्छिन्नस्य च सत्त्वादिति वाच्यं । वह्नित्वावच्छिन्न-करण-त्वावच्छिन्नयोः सेकत्वावच्छिन्न-करणत्वावच्छिन्नयोश्च प्रत्येकान्वये तथापि योग्यतास्त्येव वह्निकरणत्वावच्छिन्न-सेकत्वावच्छिन्नयोर्वि-शिष्टान्वये परं योग्यता नास्ति सेकत्वावच्छिन्ने वह्निकरणत्वरूप-विशिष्टधर्मावच्छिन्नवत्त्वविरहादित्यभ्युपगमात् । नन्वेवं सेको न वह्नि-करणक इत्ययोग्यतानिश्चयदशायां विशिष्टस्य वैशिष्ट्यमिति न्यायेन सेकत्वावच्छिन्ने वह्निकरणत्वरूपविशिष्टधर्मावच्छिन्नस्यान्वयो मास्तु तादृशान्वये सेकत्वावच्छिन्ने वह्निकरणत्वरूपविशिष्टधर्मावच्छिन्न-वत्त्वस्य योग्यतात्वात् उक्तायोग्यतानिश्चयसत्त्वे च तज्ज्ञानासम्भवात्, विशेष्ये विशेषणमिति न्यायेन सेको वह्निकरणक इत्यन्वयस्तु स्यात् करणत्वावच्छिन्ने वह्नित्वावच्छिन्नवत्त्वस्य सेकत्वावच्छिन्ने करणत्व-त्वावच्छिन्नवत्त्वस्य च उक्तायोग्यतानिश्चयसत्त्वेऽपि ग्रहसम्भवादिति

35

न च नरशिरःशौचानुमानबाधात् तदशौचबोधकशब्दात्[१] अन्वयाबोध इति वाच्यम्। उपजीव्यजाती-

---

येत्। न। सैकत्वावच्छिन्ने करणत्वत्वरूपेण करणत्वं प्रकारः करणत्वावच्छिन्ने वह्नित्वरूपेण वह्निः प्रकार इत्याकारकशाब्दबुद्धिं प्रत्येव सैकत्वावच्छिन्ने वह्निकरणत्वत्वरूपविशिष्टधर्मावच्छिन्नवत्त्वस्य योग्यतात्वादिति शिष्टस्य वैशिष्ट्यमिति न्यायेन विशेष्ये विशेषणमिति न्यायेन च उभयथैव शाब्दबोधस्य तादृशायोग्यतानिश्चयदशायामसम्भवात् उक्तक्रमेणोभयसाधारणविशिष्टप्रकारतायाः एव तच्छाब्दस्य कार्यतावच्छेदकत्वात्। न चैवं करकाभिप्रायप्रयुक्तपयसा सिञ्चतीत्यादावपि योग्यतापत्तिः सैकत्वावच्छिन्ने पयःकरणकत्वत्वरूपविशिष्टधर्मावच्छिन्नवत्त्वसत्त्वादिति वाच्यं। तथापि सैकत्वावच्छिन्ने जलत्वप्रकारेण करकाकरणत्वबोधने योग्यत्वेष्टत्वात् करकात्वरूपेण करकाकरणकत्वबोधने पुनरयोग्यत्वाभ्युपगमात् साम्प्रदायिकप्रवादस्य च नियुक्तिकत्वेनाश्रद्धेयत्वादिति[२] प्राञ्चः।

'न चेति नरशिरःकपालं शुचि प्राण्यङ्गत्वात् शङ्खवदित्यनुमित्यात्मकबाधबुद्धिसत्त्वादित्यर्थः, 'शब्दात्' वेदात्, 'अन्वयाबोधः' अन्वयबोधासम्भवः, प्रतिबन्धकसत्त्वेन उक्तयोग्यताज्ञानाभावादिति भावः। 'उपजीव्येति भवदुक्तशौचानुमानस्य उपजीव्यौ दृष्टान्तः

---

(१) नरशिरःशौचानुमानबाधितत्वादशौचबोधकशब्दादिति ख०।

(२) नियुक्तिकत्वेनानादेयत्वादितीति ख०, ग०।

बलत्वेन शब्दस्य बलवत्त्वात् तेनैव तदनुमानबाधात् । नन्वाकाङ्क्षासत्तिमत्त्वेन शब्दस्य प्रमाणता न तु योग्यतापि तन्निवेशिनी बाधाभावस्य प्रमामात्रहेतुत्वादिति चेत् । न । बाधे हि प्रमाणदोषोऽवश्यं वक्तव्यः,

---

शब्दे श्रुतिताद्रूप्यसाध्यनिश्चायको वेदस्तस्य निश्चितप्रामाण्यकतया तज्जातीयत्वेनेत्यर्थः, 'शब्दस्य' अशौचबोधकवेदस्य, 'बलवत्त्वात्' निश्चितप्रामाण्यकत्वात्, 'तेनैव' तद्वेदज्ञानेनैव, 'तदनुमानबाधादिति' शौचानुमानस्याप्रामाण्यज्ञापनादित्यर्थः । न च वेदाच्छाब्दबोधानन्तरमेवानुमानेऽप्रमात्वज्ञानं स एव च प्रथमं कुत इति वाच्यं । फलबलेन तद्वेदज्ञानस्यैव शुद्धोधकाविषया अप्रामाण्योपस्थापकत्वकल्पनात् तज्जन्याप्रामाण्योपस्थितिप्रतिबन्धकत्वस्यैव विनापि शाब्दबोधमप्रमात्वज्ञानसम्भवात् फलानुरोधित्वात् कल्पनाया इति भावः । 'आकाङ्क्षासत्तिमत्त्वेन' आकाङ्क्षासत्तिज्ञानसहकारेणैव, 'प्रमाणता' शाब्दबोधजनकता, 'योग्यतापि' योग्यताधीरपि । न च स्वतन्त्रान्वय-व्यतिरेकानुविधानाद्योग्यताज्ञानस्यापि हेतुत्वमिति वाच्यं । तस्यैवासिद्धेरिति भावः । नन्वेवं वह्निना सिञ्चतीत्यादौ बाधनिश्चये सति कुतो नान्वयबोध इत्यत आह, 'बाधेति बाधबुद्ध्यभावस्येत्यर्थः, 'प्रमामात्रेति विशिष्टबुद्धिमात्रेत्यर्थः, तथाच सामान्यसामग्र्यभावादेव न तदानीं शाब्दबोध इति भावः । 'बाधे हीति वह्निना सिञ्चतीत्यादिषु बाधबुद्धावित्यर्थः, 'प्रमाणेति शाब्दबुद्धिकारणीभूतज्ञानस्य प्रतिबन्धो भवतीत्यवश्यं वाच्यमित्यर्थः,

अन्यथा प्रमाणविषये बाधासम्भवात् यथानुमाने बाधादुपाधिकल्पनद्वारा व्याप्तिविघातः, निरुपाधौ बाधानवकाशात्।

'अन्यथेति, 'प्रमाणविषये' बाधबुद्धावपि शाब्दबुद्धिकारणीभूतयोग्यताज्ञानसत्त्वे, 'बाधासम्भवादिति बाधबुद्धेः शाब्दबुद्धिप्रतिबन्धकत्वासम्भवादित्यर्थः, कारणीभूतज्ञानं विघटयत एव ज्ञानस्य परोक्षानुभवप्रतिबन्धकत्वादिति भावः। तत्र दृष्टान्तमाह, 'यथेति, 'अनुमाने' अनुमितिस्थले, 'बाधादिति बाधबुद्ध्या इत्यर्थः, 'उपाधिकल्पनेति उपधिज्ञानेत्यर्थः, 'व्याप्तिविघातः' अनुमितिकारणीभूतव्याप्तिज्ञानप्रतिबन्धः, एतच्च यत्र बाधितसाधनवान्पक्षस्तत्र बोध्यं, अन्यत्र तु पक्षधर्मताज्ञानप्रतिबन्धो बोध्यः। ननु बाधबुद्धौ कथमुपाधिज्ञानमित्यत आह, 'निरुपाधाविति पक्षधर्महेतौ निरुपाधौ सतीत्यर्थः, 'बाधानवकाशात्' बाधासत्त्वात्, तथाच व्याप्त्या व्यापकानुमानमिति भावः। बाधोऽत्र साध्यवद्भिन्नपक्षकत्वं तेन गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधिते उपाध्यसत्त्वेऽपि न क्षतिरिति बोध्यम्(१)। इदमापाततः कारणीभूतज्ञानं विघटयत एव ज्ञानस्य परोक्षानुभवप्रतिबन्धकत्वमिति व्याप्तेरप्रयोजकत्वात् उपमितिस्थले व्यभिचारात् बाधज्ञानस्य सादृश्यादिज्ञानप्रतिबन्धकत्वे मानाभावात् गन्धप्रागभावकालावच्छिन्नो घटो गन्धवान्

(१) इति भाव इति ग०।

पृथिवीत्वादित्याद्यनुमितिप्रतिबन्धके गन्धप्रागभावकालविशेष्यक-गन्धाभावनिश्चये व्यभिचाराच्च। वस्तुतस्तु शाब्दधीसाधारणविशिष्ट-बुद्धिसामान्यं प्रत्येव बाधनिश्चयस्य प्रतिबन्धकत्वे मुखं चन्द्र: इत्यादिमुख-चन्द्राद्यभेदान्वयबोधकरूपकादौ प्रहसनादौ च बाध-निश्चयसत्त्वेऽपि अनुभवसिद्धस्य शाब्दबोधस्यापलापापत्तिः कलहादौ मिथ्याभिशापवचनाच्छाब्दबोधानुपपत्तिश्च तत्र शाब्दबोधं विना क्रोधाद्यनुपपत्तेः, अत एवोक्तं "अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि। बाधात्तु न प्रमा तत्र अतः प्रामाण्यनिश्चयः"॥ इति बाधितत्वेन निश्चितेऽप्यर्थे शब्दो ज्ञानं जनयति किन्तु तदानीं तज्ज्ञाने प्रामाण्याभावज्ञानमात्रं जायते अतः प्रामाण्यनिश्चयः निष्कम्पप्र-वृत्तिप्रयोजकः, अन्यथा तत्रापि प्रवृत्त्यापत्तेरिति तदर्थात्, तथाच शाब्दान्यविशिष्टबुद्धिं प्रत्येव बाधनिश्चयस्य प्रतिबन्धकतया वह्निना सिञ्चतीत्यादौ बाधनिश्चयसत्त्वे शाब्दबोधवारणाय योग्यताधीः शा-ब्दधीहेतुरावश्यकी। न च योग्यताज्ञानस्य हेतुत्व एव बाधितार्थक-रूपकादौ कथं शाब्दधीः बाधनिश्चयत्वेन तद्धर्मावच्छिन्ने तद्ध-र्मावच्छिन्नवत्त्वरूपयोग्यताज्ञानस्यैवासम्भवात् अन्यथा वह्निना सिञ्च-तीत्यादावपि बाधनिश्चयसत्त्वे शाब्दबोधस्य दुर्वारत्वादिति वाच्यं। बाधनिश्चयसत्त्वेऽप्याहार्य्ययोग्यताज्ञानादेव तत्र शाब्दबोधसम्भवात्, वह्निना सिञ्चतीत्यादावपि बाधनिश्चयसत्त्वेऽप्याहार्य्ययोग्यताज्ञानात् कदाचित्[1] शाब्दबोधस्येष्टत्वात्। न चैवं शङ्खो न पीत इत्यादिबाध-

---

(१) कस्यचिदिति क०

निश्चयसत्त्वेऽपि शङ्खः पीत इति दोषविशेषजन्ययोग्यताभ्रमेण शङ्खः पीत इति शाब्दबोधप्रसङ्गः बाधनिश्चयविरहदशायां शङ्खः पीत-इति दोषविशेषजन्ययोग्यताभ्रमाच्छङ्खः पीत इति शाब्दबोधोदयात् दोषविशेषजन्ययोग्यताज्ञानस्यापि हेतुत्वेनाभ्युपेयत्वादिति वाच्यं । अप्रत्यप्रामाण्यनिश्चये दृष्टत्वात् आहार्य्ययोग्यताज्ञानतुल्यत्वात् एवं यद्येकेन्द्रियजन्यबाधनिश्चयसत्त्वेऽप्यन्येन्द्रियजन्ययोग्यताज्ञानमानुमानिकादिबाधनिश्चयसत्त्वेऽपि लौकिकप्रत्यक्षात्मकयोग्यताज्ञानञ्च तदा तत्रापि शाब्दबोधे दृष्टापत्तिः आहार्य्ययोग्यताज्ञानतुल्यत्वात् अबाधितार्थकस्थलादौ शाब्दबोध एवाहार्य्यात्मकोऽभ्युपेयतां तथाचाहार्य्यप्रत्यक्षेतरत्ववदाहार्य्यशाब्देतरत्वस्यापि बाधनिश्चयप्रतिबध्यतावच्छेदके प्रवेशादेव बाधितार्थकस्थलादौ बाधनिश्चयसत्त्वे शाब्दबोधस्य वह्निना सिञ्चतीत्यादौ बाधनिश्चयसत्त्वे शाब्दबोधाभावस्य च सम्भवेऽपि किं पृथग्योग्यताधीहेतुत्वेन, तत्रापि शाब्देतरत्वस्य प्रतिबध्यतावच्छेदके प्रवेशस्यावश्यकत्वात् । न च मम शाब्देतरत्वं शाब्दत्वावच्छिन्नप्रतियोगिताकोऽखण्डो भेदस्तत्र चाहार्य्यशाब्देतरत्वं अहार्य्यत्वस्याननुगतस्याभावात्तत्तच्छाब्दबुद्धिभेदकूटरूपमतः प्रतिबध्यतावच्छेदकगौरवमिति वाच्यं । अतिरिक्तकार्य्य-कारणभावकल्पनामपेक्ष्य कार्य्यतावच्छेदक-कारणतावच्छेदकयोः शरीरगौरवस्य न्याय्यत्वात् तत्तदप्रामाण्यज्ञानाभावकूटविशिष्टयोग्यताज्ञानस्यैव शाब्दधीहेतुतया तत्रापि कारणतावच्छेदकशरीरगौरवसत्त्वाच्च कार्य्य-कारणभावान्तरकल्पनं पुनरधिकमिति चेत् । न । शाब्दबोधस्याहार्य्यत्वाभ्युपगमेऽपसिद्धान्तात् प्रत्यक्षेतरज्ञानस्याहार्य्यत्वानभ्युपगमात् ।

किञ्चाहार्य्यशाब्देतरत्वस्य प्रतिबध्यतावच्छेदकप्रवेशे शाब्देच्छाविरह-
दशायां बाधनिश्चयसत्त्वे आहार्य्यशाब्देतरशाब्दानुत्पादेऽप्याहार्य्य-
शाब्दबोधस्य कुतो नोत्पाद इत्याहार्य्यशाब्दबोधं प्रति तत्तच्छाब्दे-
च्छानां विशेषतो हेतुत्वस्यावश्यकत्वात् एवं शाब्देच्छासत्त्वे अनाहार्य्य-
शाब्दबोधवारणाय अनाहार्य्यशाब्दबोधं प्रति तत्तदिच्छाभावाना-
मपि हेतुत्वस्यावश्यकत्वादनन्तकार्य्य-कारणभावकल्पनप्रसङ्गाद्भेदकूट-
प्रवेशेन प्रतिबध्यतावच्छेदकगौरवाच्च तदपेक्षया पृथग्योग्यताज्ञान-
हेतुतैव लघीयसी । अथ तत्राप्रामाण्यज्ञानाभावविशिष्टयोग्यताज्ञानं
शाब्दधीहेतुस्तत्र च सामानाधिकरण्यमेव वैशिष्ट्यं अन्यथा विषयता-
सम्बन्धावच्छिन्नतत्तत्पुरुषीयाप्रामाण्यज्ञानाभावानां विशेषणताविशेष-
सम्बन्धेन योग्यताज्ञानविशेषणत्वे तत्तत्पुरुषीयत्वस्य कार्य्यता-कारण-
तावच्छेदके प्रवेशप्रसङ्गाद्गौरवापत्तेः तथाच तत्तदप्रामाण्यज्ञानाभा-
वानां सामानाधिकरण्यसम्बन्धेन परस्परं विशेषण-विशेष्यभावे विनिग-
मनाभावाद्गुरुतरधर्म्मावच्छिन्नानन्तकार्य्य-कारणभावो दुर्वारः अप्रा-
माण्यज्ञानाभावानां विशेषण-विशेष्यभावभेदेन विशिष्टबुद्धि-बाधनि-
श्चययोरनन्तप्रतिबध्य-प्रतिबन्धकभावस्यानुमित्यादिस्थलानुरोधेन द्व-
योरेव तुल्यः । न च तत्राहार्य्यशाब्देतरत्वस्य तत्तच्छाब्दबुद्धिभेदकूट-
रूपस्य विशेषण-विशेष्यभावभेदेन प्रतिबध्यतावच्छेदकभेदाद्गुरुतर-
धर्म्मावच्छिन्नानन्तप्रतिबध्य-प्रतिबन्धकभावोऽधिकः, मम तु शाब्देत-
रत्वमखण्डो भेद इति नानन्तप्रतिबध्य-प्रतिबन्धकभाव इति वाच्यं ।
मम परस्परासंसृष्टानां तत्तच्छाब्दबुद्धिभेदकूटानां विशिष्टबुद्धित्वस्य
चैकत्र द्वयमिति न्यायेन व्यासज्यवृत्तिप्रतिबध्यतावच्छेदकताभ्युपग-

आदिकत्वान्यस्याविशेषणतया विशेषण-विशेष्यभावे विनिगमकाभाव-विरहात् परस्परं विशेषण-विशेष्यभावे सामानाधिकरण्यरूपवैशिष्ट्य-प्रवेशेन गौरवप्रसङ्गस्यैव विनिगमकत्वात् तत्र प्रामाण्यज्ञानाभाव-विशिष्टयोग्यताज्ञानस्थले सामानाधिकरण्यरूपवैशिष्ट्यप्रवेशस्यावश्यकत्वात् विशेषण-विशेष्यभावे विनिगमकाभावात्। न च तत्तच्छाब्दबुद्धिभेदकूटानां विशेषणताविशेषसम्बन्धेन विशिष्टबुद्धित्वस्य च समवायसम्बन्धेन ज्ञाननिष्ठतया सम्बन्धभेदेन व्यासज्यवृत्त्यवच्छेदकत्वस्यैकस्यासम्भव इति वाच्यं। तत्तच्छाब्दबुद्धिभेदकूटानां(१) विशिष्टबुद्धित्वाधिकरणत्वस्य च विशेषणताविशेषसम्बन्धेन व्यासज्यवृत्त्यवच्छेदकत्वाभ्युपगमादिति चेत्। न। निश्चिताप्रामाण्यकादपि योग्यताज्ञानाच्छाब्दबोधो जायत एव परन्तु तच्छाब्दबोधेऽपि अप्रामाण्यनिश्चयो जायत इत्यभ्युपगमात् अप्रामाण्यज्ञानाभावविशिष्टत्वस्य मम कारणतावच्छेदककोटावप्रवेशात् अन्यथा रूपकादिस्थले आहार्य्ययोग्यताज्ञानाच्छाब्दबोधानुपपत्तेः अनाहार्य्ययोग्यताज्ञाने विशेषतोऽप्रामाण्यनिश्चयस्यावश्यकत्वात्(२)। किञ्च यदि निश्चिताप्रामाण्यकयोग्यताज्ञानान्न शाब्दबोधस्तदा तत्तदप्रामाण्यज्ञानाभावकूट-योग्यताज्ञानयोः द्वयोरेव स्वातन्त्र्येण दण्ड-चक्रवद्धेतुता न तु परस्परं विशेषण-विशेष्यभाव इति विशेषण-विशेष्यभावभेदादनन्त-कार्य्य-कारणभावः। तत्र चाहार्य्यशाब्दबोधं प्रति तत्तच्छाब्देच्छा-

(१) बुद्धिभेदकूटानामिति ग०।

(२) विशेषदर्शनादप्रामाण्यनिश्चयस्यावश्यकत्वादिति ग०।

नामनन्तकार्य्य-कारणभावस्यावश्यकत्वात् । न च तवाप्यनन्तयोग्यता-
ज्ञानव्यक्तिकल्पनमिति वाच्यं । तस्य फलमुखत्वात् पदार्थोपस्थिते-
स्तात्पर्य्यज्ञानस्य वा नियतयोग्यताविषयकत्वाभ्युपगमेनातिरिक्तकल्प-
नाभावाच्च । अथाहार्य्यशाब्देतरत्वं प्रतिबध्यतावच्छेदके न प्रवेशनीयं
अपि तु तत्तच्छाब्देच्छाविरहविशिष्टबाधनिश्चयत्वेन प्रतिबन्धकत्वं
वाच्यं तथा चाहार्य्यशाब्दबोधं प्रति तत्तच्छाब्देच्छानां अनाहार्य्य-
शाब्दं प्रति तत्तच्छाब्देच्छाभावानाञ्च न विशेषतो हेतुत्वमिति
मम नानन्तकार्य्य-कारणभावः । एवमाहार्य्यप्रत्यक्षेतरत्वमपि न
प्रतिबध्यतावच्छेदकं आहार्य्यप्रत्यक्षं प्रति तत्तत्प्रत्यक्षेच्छानामनन्त-
कारणत्वकल्पनापत्तेरपि तु तत्तत्प्रत्यक्षेच्छाविरह उत्तेजक इति
चेत् । न । तथापि तत्तच्छाब्देच्छाविरहाणां विशेषण-विशेष्यभाव-
भेदेनानन्तप्रतिबध्य-प्रतिबन्धकभावस्य दुर्वारत्वात् मम च केवलयो-
ग्यताज्ञानस्य दण्ड-चक्रन्यायेन तत्तदप्रामाण्यज्ञानाभावकूटयोग्यता-
ज्ञानयोर्द्वयोर्वा हेतुत्वात् । किञ्च तत्तच्छाब्देच्छाविरहाणां तत्त-
त्प्रत्यक्षेच्छाविरहाणाञ्च उत्तेजकत्वेऽनुमित्युपमिति-स्मृतिसाधारणो
नैकः प्रतिबध्य-प्रतिबन्धकभावः तथा सति शाब्दबोधो जाय-
तामित्यादीच्छासत्त्वे बाधनिश्चयसत्त्वेऽप्यनुमित्युपमिति-स्मृत्यापत्तेः
शाब्दबोधो जायतामितीच्छासत्त्वेऽपि प्रत्यक्षापत्तेः प्रत्यक्षं जायतामि-
तीच्छासत्त्वे बाधनिश्चयसत्त्वेऽपि शाब्दबोधापत्तेश्च अपि तु प्रत्यक्ष-
शाब्देतरविशिष्टबुद्धित्वेन प्रतिबध्यता अनाहार्य्याप्रामाण्यकबाधनिश्च-
यत्वेन प्रतिबन्धकता इत्येकः स्मृत्यनुमित्युपमितिसाधारणः प्रति-
बध्य-प्रतिबन्धकभावः, प्रत्यक्षं प्रति तु विशिष्टप्रत्यक्षत्वेन प्रतिबध्यता

तत्तत्प्रत्यक्षेच्छाविरहविशिष्टागृहीताप्रामाण्यकबाधनिश्चयत्वेन प्रतिबन्धकता एवं शाब्दबोधं प्रति तत्तच्छाब्देच्छाविरहविशिष्टागृहीताप्रामाण्यकबाधनिश्चयत्वेन प्रतिबन्धकतेति प्रत्यक्षमात्रसाधारणः प्रतिबध्य-प्रतिबन्धकभावः[१]। तथाच शाब्दबोधं प्रति तत्तच्छाब्देच्छाविरहविशिष्टागृहीताप्रामाण्यकबाधनिश्चयाभावत्वेन कारणत्वमपेक्ष्य लाघवात्तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नवत्त्वरूपयोग्यताज्ञानत्वेनैव हेतुतोचिता। न च तथापि निश्चिताप्रामाण्यकयोग्यताज्ञानत्वेनैव हेतुतया तदपेक्षया यथोक्तबाधनिश्चयाभावत्वेनैव लघु अप्रामाण्यनिश्चयत्वस्य गुरुतरानेकपदार्थघटितत्वादिति वाच्यं। निश्चिताप्रामाण्यकादपि योग्यताज्ञानाच्छाब्दबोधाभ्युपगमात् अनिश्चिताप्रामाण्यकत्वं न कारणतावच्छेदककोटौ प्रवेशनीयमित्युक्तत्वात्, अनिश्चिताप्रामाण्यकत्वस्य तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकतत्तदप्रामाण्यनिश्चयव्यक्त्यभावकूटविशिष्टत्वरूपत्वेनानिश्चिताप्रामाण्यकत्वस्य कारणतावच्छेदककोटिप्रवेशेऽप्यप्रामाण्यनिश्चयत्वस्याप्रवेशाच्च। न चैवं तत्तद्व्यक्त्यभावकूटप्रवेशे गौरवमिति वाच्यं। तथापि तत्तच्छाब्देच्छाव्यक्त्यभावकूटस्य प्रवेशात् अभावद्वयप्रवेशस्य निश्चयत्वप्रवेशस्य चाधिकत्वात् बाधनिश्चयविशेषणीभूतस्यागृहीताप्रामाण्यकत्वस्य तत्तदप्रामाण्यज्ञानाभावकूटरूपतया तेषां परस्परं विशेषण-विशेष्यभावभेदेन नवानन्तकार्य्य-कारणभावप्रसङ्गाच्च मम तु केवलयोग्यताज्ञानस्य दण्ड-चक्रन्यायेन तत्तदप्रामाण्यनिश्चयव्यक्त्यभावकूट-योग्यताज्ञानयो-

---

(१) प्रतिबन्धकतेति शाब्दबोधसाधारणो नैकः प्रतिबध्य-प्रतिबन्धकभाव-इति ख०।

द्वयोर्वा हेतुत्वेनानन्तकार्य्य-कारणभावविरहात् । न चैवमनुमित्यादावपि योग्यताज्ञानस्य हेतुत्वापत्तिः प्रत्यक्ष-शाब्देतरविशिष्टबुद्धित्वावच्छिन्नं प्रति बाधनिश्चयाभावत्वेन कारणत्वमपेक्ष्य संशय-निश्चयसाधारणविशेष्यविशेषणतत्स्वरूपयोग्यताज्ञानस्य हेतुत्वे लाघवात् बाधनिश्चयदशायां योग्यताज्ञानव्यतिरेकादेवानुमित्यादिव्यतिरेकसम्भवादिति वाच्यं । योग्यताज्ञानं विनापि स्मृतेरनुभवसिद्धतया स्मृतौ व्यभिचारात् पक्षे साध्यसन्देह-तन्निश्चययोरसत्त्वेऽपि अनुमितेरिदन्त्वावच्छिन्ने गवयपदवाच्यत्वादिसन्देह-निश्चययोरसत्त्वेऽपि अनुमितेश्चानुभवसिद्धत्वाच्च । किञ्चैवमाहार्य्यसाध्यसन्देहात्मकबाधनिश्चयसत्त्वेऽप्यनुमित्यापत्तिः बाधनिश्चयानन्तरमाहार्य्यसाध्यसन्देहात्मकपरामर्शादनुमित्यापत्तिश्चेति[1] सिद्धान्तानुयायिनः ।

उच्छृङ्खलास्तु मुखं चन्द्र इत्यादिबाधितार्थकरूपकादौ बाधनिश्चयदशायां मुखादौ चन्द्रादेर्नाभेदान्वयबोधः किन्तु चन्द्रादिपदस्य चन्द्रसदृशादौ लक्षणया तस्यैव मुखादावभेदान्वयः सङ्गमादौ कलहादिस्थलीयमिथ्याभिशापवचनादौ च न शाब्दबोधोऽपि तु तत्तत्पदेभ्यस्तत्तत्पदार्थोपस्थितौ दोषजन्यो मानसो विशिष्टसाक्षात्कारः तथाच शाब्दबुद्धिसाधारणविशिष्टबुद्धिमात्रं प्रति बाधनिश्चयस्य प्रतिबन्धकत्वादेव वह्निना सिञ्चतीत्यादौ बाधनिश्चयदशायां नान्वयबोध इति योग्यताज्ञानस्य शाब्दधीहेतुत्वे मानाभावः बाधनिश्चयप्रतिबध्यतावच्छेदककोटौ शाब्दान्यत्वं प्रवेश्य बाधनिश्चयस्थले शाब्दबोधवारणायातिरिक्तयोग्यताज्ञानकारणत्वकल्पनायाः प्रक्षालनाद्धीति न्यायेनानुचितत्वादित्याहुः ।

सेयं न स्वरूपसती प्रयोजिका शाब्दाभासोच्छेद-

केचित्तु मुखं चन्द्र इत्यादिबाधितार्थकरूपकादौ बाधनिश्चय-दशायामपि मुखादौ चन्द्रादेरभेदान्वयबोधस्यानुभवसिद्धत्वा-च्छाब्दबोधे बाधनिश्चयोन प्रतिबन्धक इति सत्यमेव परन्तु योग्य-ताज्ञानमपि न हेतुर्मानाभावात्। न चैवं वह्निना सिञ्चतीत्यादा-वपि बाधनिश्चयदशायां शाब्दबोधापत्तिरिति वाच्यं। तदानीं शाब्दबोधोजायत एव किन्तु तस्मिन् शाब्दबोधे भ्रमत्वप्रकारक-प्रमात्वज्ञानमात्रं जायत इत्यभ्युपगमात्, तथाप्याहार्य्यात्मिकयोग्यता-ज्ञानसत्त्वे तदानीं तत्र शाब्दबोधसम्भवात्, न हि बाधनिश्चयसत्त्वे आहार्य्ययोग्यताज्ञानं विना न शाब्दबोध इत्यनुभवोलौकिकानां तथा सति अन्वय-व्यतिरेकबलादेव योग्यताज्ञानहेतुत्वसिद्धेः सम्भा-वादौ ज्ञानान्तरानुसरणप्रयासवैफल्यापत्तेः[1]। न चेवमनुमित्यादा-वपि बाधनिश्चयस्याप्रतिबन्धकत्वापत्तिः बाधनिश्चयदशायामप्यनु-मित्यादिर्जायत एव किन्तु तस्यामनुमित्यादिविषयकाप्रमात्व-ज्ञानमात्रं जायत इत्यस्य सुवचत्वादिति वाच्यं। "अत्यन्तासत्यपि ह्यर्थे इत्यादिना शाब्दबोधस्यापि एव तथानुभवस्य सकलप्राचीनै-र्निर्णीतत्वादिति प्राहुरिति सम्प्रसः।

प्रकृते, 'सेयमिति. 'प्रयोजिकेति शाब्दबुद्धिसामान्य इत्यादिः, 'शाब्दाभास इति वह्निना सिञ्चतीत्यादावतिस्फुटं स्वरूपयोग्यता-याअसत्त्वादिति भावः। 'न भवति' सर्वत्र शाब्दबोधात्पूर्व्वं न

[1] वस्त्वन्तरानुसरणप्रयासवैफल्यापत्तिरिति ख०।

प्रसङ्गात्। तन्निश्चयश्च न भवत्युपायाभावात् इति चेत् । न। संशय-विपर्य्यय-प्रमासाधारणस्य योग्यताज्ञान-मात्रस्य कारणत्वात् । अयोग्यताज्ञानस्य प्रतिबन्धकस्य सर्व्वथाभावात् क्वचित्तन्निश्चयोऽपि योग्यानुपलब्ध्या यथेह घटो नास्तीति ।

इति श्रीगङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे योग्यतावादः ॥

सम्भवति, 'उपायाभावात्' सर्व्वत्र शाब्दबोधात्पूर्व्वं निश्चयसामग्री-विरहात्, 'विपर्य्ययः' निश्चयरूपो भ्रमः, 'प्रमा' निश्चयात्मिका प्रमा । ननु योग्यतायाः संशय एव कथं स्यात् अयोग्यतानिश्चयस्य प्रतिब-न्धकस्य सत्त्वात् इत्यत आह, 'अयोग्यताज्ञानस्येति अयोग्यतानि-श्चयस्येत्यर्थः, यत्र चायोग्यतानिश्चयो वर्त्तते तत्र शाब्दबोधोऽपि न भवतीति भावः । ननु संशय-निश्चयसाधारणयोग्यताज्ञानस्य तदा हेतुत्वं सम्भवति यदि तन्निश्चयोऽपि कश्चिद्भवति, न चैवं कुत्रापि तन्निश्चयस्यासम्भवादित्यत आह, 'क्वचिदिति. 'तन्निश्चयोऽपि' निरुक्तप्रतियोगितावच्छेदकशून्यत्वरूपयोग्यतानिश्चयोऽपि, 'यथेति यथा घटाभाववति भूतले योग्यानुपलब्ध्या इह भूतले घटो नास्तीति निश्चयस्तथेत्यर्थः ॥

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये योग्यतावादरहस्यम् ॥

अथासत्तिवादः ।

आसत्तिश्चाव्यवधानेनान्वयप्रतियोग्युपस्थितिः, सा

अथासत्तिवादरहस्यम् ।

एककार्य्यकारित्वसङ्गत्या योग्यतानिरूपणानन्तरं आसत्तिं निरूपयति, 'आसत्तिश्चेति अन्वयप्रतियोगिनोः पदार्थयोरव्यवधानेनोपस्थितिरासत्तिरित्यर्थः, स्वाव्यवहितत्वसम्बन्धेन तत्तत्पदार्थोपस्थितिमत्त्वे तत्तत्पदार्थोपस्थितिमत्पदार्थे तत्पदार्थस्यासत्तिरिति तु फलितार्थः । न चैवमासन्नानासन्नविभाग एव व्याहतः समूहालम्बनरूपपदार्थोपस्थितेरेव सर्व्वत्र शाब्दबोधोपयोगितया गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादावपि शाब्दानुभवाव्यवहितपूर्व्ववर्त्तिसमूहालम्बनरूपोपस्थितिमादायाव्यवधानेनोपस्थितिसत्त्वात् उपस्थितेरेकत्वेन व्यवधानासम्भवात्[१] इति वाच्यं । भेदगर्भाव्यवधानस्य पूर्व्वोत्तरक्षणसाधारणस्यात्र प्रवेशात्, तच्च स्वध्वंसाधिकरणभिन्नत्वे सति यः स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणक्षणस्तद्वच्छेदेन स्व-

---

[१] तावत्पदार्थसमूहालम्बनैकोपस्थितेर्व्यवधानाभावादिति भावः ।

समवायिदेशोत्पत्तिकाले सति स्वभिन्नत्वं, इत्थञ्च प्रथमं या प्रत्येकपदेभ्यः प्रत्येकपदार्थानां क्रमिकस्मृतिः सैवासत्तिः, न त्वन्वयबोधाव्यवहितपूर्व्ववर्त्तिसमूहालम्बनरूपोपस्थितिः[1]। अत एवासत्तिज्ञानं हेतुः प्रत्येकपदजन्यप्रत्येकपदार्थोपस्थितीनामाशुविनाशिनीनां युगपच्छाब्दबोधपूर्व्वमसम्भवेन स्वरूपसद्धेतुत्वासम्भवात्। न चैवं दण्डी कुण्डली वासस्वी देवदत्त इत्यादावेकविशेष्यक-नानाविशेषणकान्वयबोधस्थले आसत्त्यभावप्रसङ्गः तत्रैकविशेषणोपस्थितेर्विशेषणान्तरोपस्थित्या व्यवधानादिति वाच्यं। प्रकृतान्वयबोधाननुगुणो यः स्वध्वंसाधिकरणक्षणस्तद्भिन्नत्वस्य चाव्यवधानघटकीभूतस्यान्तर्दलार्थत्वात्, विशेषणान्तरोपस्थितिक्षणश्च न प्रकृतान्वयबुद्ध्यननुगुणः, अननुगुणत्वञ्च फलबलकल्प्यं, यादृशयादृशक्षणव्यवधानेऽपि अन्वयबोधोऽनुभवसिद्धस्तत्तत्क्षणभिन्नक्षणत्वस्यैवाननुगुणत्वरूपत्वात्। अत एव गिरिर्भुक्तमित्यादौ भुक्तादिपदार्थोपस्थितिक्षणो यत्र वैकपदोच्चारणानन्तरं चिरतरं विलम्ब्यापरपदमुच्चरितं तत्र व्यवधायकक्षणोऽपि चाननुगुणः तत्रान्वयबोधानुत्पत्तेरिति तदुभयत्र नासत्तिः। न चैवं यत्र पदोपस्थितिर्व्यवधानेन पदार्थोपस्थितिश्चाव्यवधानेन तत्राप्यासत्त्यापत्तिरिति वाच्यं। तत्पदोपस्थित्यव्यवहिततत्पदोपस्थितिजन्यायास्तत्पदार्थोपस्थितेरव्यवधानेन तत्पदार्थोपस्थितिः तत्पदद्वयजन्यं तत्पदार्थयोरन्वयबोधे आसत्तिरिति विवक्षणीयत्वात्। एवञ्च यत्र पदोपस्थितिरव्यवधानेन पदार्थोपस्थितिश्च व्यवधानेन, यत्र वा पदार्थोपस्थितिरव्यवधानेन पदोपस्थितिश्च व्यवधानेन तत्रोभ-

(१) समूहालम्बनोपस्थितेरेकतया स्वभिन्नत्वाभावादिति भावः।

तत्रापि नासत्तिः, किन्त्वेकपदोपस्थितिजन्यपदार्थोपस्थितिरपरपदोपस्थितिश्च समूहालम्बनरूपा ततोऽपरपदार्थोपस्थितिः पदान्तरोपस्थितिश्च समूहालम्बनरूपेत्यादिक्रमेण पदार्थोपस्थितिस्तत्रैवासत्तिः, पदोपस्थितेरव्यवधानमपि पूर्वोक्तलक्षणसाधारणप्रकृतान्वयबोधाननुगुणलक्षणघटितं बोध्यं। न चासत्तिभ्रमाच्छाब्दबोध इति सङ्गीर्यते स कुत्रेति वाच्यं। यत्र व्यवहितपदोपस्थितावव्यवहितत्वधीर्व्यवहितायां पदार्थोपस्थितावव्यवहितत्वधीर्वा तत्रैव तत्सम्भवात्। अथैवं आसत्तिज्ञानस्य शाब्दबोधहेतुत्वे स्वरूपसत्याः पदजन्यपदार्थोपस्थितेः पृथक्कारणत्वे किंमानं। न च विशेषणज्ञानसाध्यं विशिष्टज्ञानमिति विशेषणज्ञानत्वेन तत्कारणमिति वाच्यं। आसत्तिज्ञानस्यैव पदार्थविषयकत्वेन विशेषणज्ञानत्वादिति चेत्, न, तद्विलम्बेनापि शाब्दधीविलम्बात् तस्यापि पृथक्हेतुत्वात्। न च तद्व्यतिरेकस्थले आसत्तिविलम्बादेव शाब्दबोधविलम्ब इति वाच्यं। न ह्यासत्तिः स्वरूपसती हेतुः, किन्तु तज्ज्ञानमेव, तस्य तद्व्यतिरेकस्थलेऽपि सत्त्वादिति निर्णयकृतः। तदसत्, एकतिङुपस्थाप्यकृति-वर्त्तमानत्वयोरन्वयबोधस्थलेऽव्याप्तेः[1] यत्र लिप्यादिना एकदैव पदजातमनुमितं स्मृतं वा ततः समूहालम्बनं पदार्थवर्गस्मरणं जातं तत्राव्याप्तेश्च तत्र प्रत्येकपदार्थोपस्थितेरभावात्। न च तत्रापि क्रमिकप्रत्येकपदार्थोपस्थितिः कल्पनीयेति वाच्यं। अनुभवविरोधात् प्रत्येकपदार्थोपस्थितिमन्तरेणापि तत्र शाब्दबोधस्यानुभविकत्वात्। किञ्च एतस्याः स्वरूपसद्धेतुत्वं स्वयमेव निराकृतं क्रमिकप्रत्येकपदा-

(१) भेदगर्भाव्यवधानविशिष्टपदजन्यपदार्थोपस्थितेरभावादिति भावः।

र्थोपस्थितेः शाब्दबोधात् पूर्वं चिरविनष्टत्वात् । नाप्येतज्ज्ञानं कारणं मानाभावात् । न स्मृत्युपस्थितिज्ञानविलम्बाच्छाब्दबोधविलम्बश्चानुभविकः । न च दैवाद्दृष्टादिना पदार्थस्मृतौ पदजन्यत्वभ्रमेण शाब्दबोधोदयात् तज्ज्ञानस्यापि हेतुत्वमिति वाच्यं । वृत्त्या पद-जन्यपदार्थोपस्थितेः स्वरूपसत्त्या हेतुत्वात् तद्भ्रमे शाब्दबोधाभावात् अव्यवधानांशवैयर्थ्याच्च । न चैतद्भ्रमानन्तरं शाब्दानुभवदर्शनादेव तज्ज्ञानं हेतुरिति वाच्यं । न हि यत्कृते यदुत्पत्तिस्तदेव तत्कारणं, घटाव्यवहितपूर्ववर्त्तियावत्पदार्थानामेव घटहेतुत्वापत्तेः । न च पदजन्यपदार्थोपस्थितौ अव्यवहितत्वाव्यवहितपदजन्यत्वयोः संशये व्यवहितत्व-व्यवहितपदजन्यत्वनिश्चये च शाब्दबोधानुत्पत्तेस्तन्निश्चयो हेतुः तयोः प्रतिबन्धकत्वकल्पने गौरवादिति वाच्यं । तात्पर्यादिज्ञानसत्त्वे व्यवहितपदजन्यत्वग्रहेऽपि शाब्दबोधदर्शनादनुत्पत्तेरेवासिद्धेः । न चैवं व्यवहितपदकदम्बात्मकश्लोकादौ योजनया कृतायामेवान्वयबोधो न त्वन्यथेत्यत्र किं बीजमिति वाच्यं । योजनायास्तात्पर्यग्राहकत्वात्, अतएव यस्य योजनां विनैव तात्पर्यग्रहस्तस्य न योजनापेक्षा एतेन[1] अन्वयप्रतियोगिपदं तदुपस्थापकपदपरं तथाच तदुपस्थापकपदोपस्थित्यव्यवधानेन तदुपस्थापकपदोपस्थितिस्तयोरासत्तिः, न तु पदार्थोपस्थितीनामव्यवधानमपेक्षितमिति केषाञ्चिन्मतमपास्तं । वक्ष्यमाणान्योन्याश्रयग्रहानुस्थितेश्च

---

(१) अव्यवधानेन पदजन्यपदार्थोपस्थितेरासत्तित्वया शाब्दबोधे हेतुत्वेनेत्यर्थः ।

समूहालम्बनपदोपस्थितिमादाय सर्व्वत्रासत्तेः[१] सत्त्वेनासत्त्वानासत्ति-विभागव्याघातापत्तेश्च । न च भेदगर्भमव्यवधानं विवक्षणीयं, प्रागु-क्तदोषानुवृत्तेः[२] एतज्ज्ञानस्य तद्रूपेण कारणत्वे मानाभावाच्च ।

केचित्तु अव्यवधानेनेति विशेषणे तृतीया, अन्वयप्रतियोगि-पदस्य अन्वयप्रतियोगिन उपस्थितिर्यस्मादिति व्युत्पत्त्या अन्वयप्रति-योग्युपस्थापकशब्दपरं, तथा च तत्पदार्थान्विततत्पदार्थशाब्दबुद्धौ तत्पदे तत्पदाव्यवधानमासत्तिः, न तु उपस्थित्योरव्यवधानं विवक्षितं, मौलिश्लोकादौ च क्रियादिरूपदोषविशेषादव्यवधानभ्र-मेणान्वयबोधः । न चैवं श्लोकादौ योजनयाप्यन्वयबोधो न स्यात् तत्रा इदं व्यवधानेनोच्चरितमिति विशेषदर्शनेन भ्रमासम्भवादिति वाच्यं । योजनयोपस्थितवाक्यान्तरादेव तत्रान्वयबोधात् न तु श्लोकादितः, अव्यवधानज्ञानानुगुण्येन भेदाभेदसाधारणं स्व-परसाधारणञ्च निर्वाच्यं[३] तेनैकशब्दाद्युपस्थापितयोः कृति-वर्त्तमान-त्वयोरन्वयबोधेऽपि न काप्यनुपपत्तिरित्याहुः । तदप्यसत्, वक्ष्य-माणान्योन्याश्रयशङ्कानुत्थितेः तात्पर्यादिज्ञानसत्त्वेऽव्यवधानज्ञानाभा-वेऽपि शाब्दबुद्धेरानुभविकत्वाच्च ।

---

(१) आसत्तेः ।

(२) एकपदोपस्थाप्यकृति-वर्त्तमानत्वयोरन्वयबोधस्थले ऽव्याप्तेरित्यादिदोष-सत्त्वादित्यर्थः ।

(३) शाब्दबोधानुगुणः स्वध्वंसाधिकरणान्यत्वे सति स्वप्रागभावाधिकरण-क्षणसमयप्रागभावानधिकरणो यः क्षणस्तदवच्छेदेनोत्पत्तिकत्वं न तु भेद-गर्भमिति ।

च स्मृतिर्नानुभवोऽतोनान्योन्याश्रयः । अथ नानावि-

'नव्यास्तु वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिः, इयञ्च स्वरूप-सत्येव हेतुः । अतएव चिमूर्ण्यां "आसत्तिस्तु यद्यपि स्वरूपसत्येव प्रयोजिकेत्यादि प्राभाकरोपाध्यायेनोक्तं । न चैतस्या अपि कारणत्वे मानाभाव इति वाच्यं । तथा सति आनयेतिवाक्यमाकर्णयतः प्रत्यक्षेण घटं पश्यतो घटस्य शाब्दबोधापत्तेः घटमानयेति वाक्यमाकर्णयतः कारणतया घटपदादाकाशस्मरणवत् आकाशस्य शाब्दबोधापत्तेश्च । मूलार्थस्तु 'अव्यवधानेन' वृत्तिसंसर्गकपदप्रकारक-ज्ञानाव्यवधानेन, तादृशपदप्रकारकज्ञानजन्येति यावत्, 'अन्वय-प्रतियोग्युपस्थितिः' पदार्थोपस्थितिरिति । अतएव वक्ष्यति 'अत्र वदन्ति सन्निधिर्न पदजन्यान्वयबोधे हेतुरिति, अन्यथा तदनु-त्थितेः । न चैवं गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यादितो गिरिर-ग्निमान् भुक्तं देवदत्तेनेत्यान्वयबोधापत्तिरिति वाच्यं । तथा तात्प-र्यादिग्रहसत्त्वे इष्टापत्तेः कदाचित्तादृशान्वयबोधस्य सर्वैरेवेष्ट-त्वात् । न चैवं क्वचित् योजनायाः कथमपेक्षेति वाच्यं । तात्प-र्यग्रहार्थं तदुपयोग इत्युक्तत्वादिति[१] प्राञ्चः ।

नन्वव्यवधानेनान्वयप्रतियोग्युपस्थितिरासत्तिरुक्ता सा च शाब्द-बुद्धिरूपैव, तथाच शाब्दबुद्धौ जातायां तज्ज्ञानं तज्ज्ञाने च शाब्दबुद्धिः आसत्तिज्ञानस्य शाब्दधीहेतुत्वादित्यन्योन्याश्रय इत्यत आह, 'सा चेति, 'नानुभवः' न शाब्दानुभवः ।

---

(१) तदपेक्षेतीति ग० ।

श्लेषक-कर्म-कर्तृ-करणाधिकरण-क्रियादिक्रमिकप-
दज्ञानजन्यक्रमिकपदार्थस्मृतीनां न यौगपद्यं सम्भवति
आशुतरविनाशिनां क्रमिकाणां मेलकानुपपत्तेरिति
कथं तावत्पदार्थान्वयबोधः विशेषणज्ञानसाध्यत्वाद्वि-

नव्यास्तु ननु वृत्त्या पदजन्यपदार्थोपस्थितिरासत्तिरुक्ता सा च शाब्दधीरेव तथाच तस्यामप्यासत्तिः कारणं सापि शाब्दबोधरूपैव तथाच यदि अपरासत्तिः कारणमुच्यते तदा अनवस्था फलीभूता चेत्तदान्योन्याश्रय इत्यत आह, 'सा चेती'त्याहुः ।

प्रसङ्गात् अन्वयबोधनिर्वाहकपदजन्यपदार्थोपस्थितिपरिपाटीं प्रदर्शयितुमाशङ्कते, 'अथे'ति ।

नव्यास्तु वृत्त्या पदधीजन्यपदार्थोपस्थितिर्यदासत्तिस्तदा नानाविशेषणकस्थले(१) कथमन्वयबोधः पदार्थोपस्थितीनामेकदाभावादित्याशङ्कते, 'अथेती'त्याहुः ।

'मेलकं' मिलनं । न च सकलपदगोचरैकस्मरणाभावेऽपि प्रत्येकपदानुभवजनितप्रत्येकपदार्थस्मरणाहितसंस्कारेभ्य एव सकलपदार्थगोचरमेकस्मरणं सम्भवति तथाच सकलपदगोचरैकस्मरणपर्यन्तानुधावनं विफलमिति वाच्यं । प्रकारान्तरेण पदार्थोपस्थितेः शाब्दबोधाहेतुत्वात् पदज्ञानजन्यत्वोपपत्तये तथानुधावनात् । 'विशेषणज्ञानसाध्यत्वादि'ति 'विशेषणं' पदार्थः, तदुपस्थितिसाध्यत्वादि-

---

(१) दण्डी कुण्डली वाससी चैत्र इत्यादिस्थले ।

शिष्टज्ञानस्येति चेत्, श्रौत्रप्रत्येकपदानुभवजन्यसंस्कारमेलकादेकदैव तावत्पदस्मृतिः तत एकदैव तावत्पदार्थस्मृतौ सत्यां वाक्यार्थानुभवः। न चान्यविषयक-

---

त्यर्थः, कृत्वा पदधीजन्येत्यादिः, 'विशिष्टज्ञानस्य' शाब्दानुभवस्य, 'मेलकात्' समूहात्, 'एकदैव तावत्पदस्मृतिरिति सकलपदगोचरस्मृतिरित्यर्थः। ननु श्रोत्रेण प्रत्येकपदानुभवोऽपि न सम्भवति तथा हि घोत्पत्तिः, ततो द्वितीयक्षणे घत्वनिर्व्विकल्पकमकारोत्पत्तिश्च, अथ तृतीयक्षणेऽकार-तत्त्वनिर्व्विकल्पकं घत्वविशिष्टधीः टोत्पत्तिर्घकारनाशश्च, चतुर्थक्षणे अत्वविशिष्टधीः ट-टत्वनिर्व्विकल्पकम-कारनाशश्चरमाकारोत्पत्तिश्च तदानीञ्च घकारभानं न सम्भवति प्रत्यक्षं प्रति विषयस्यापि हेतुत्वात्, ततः पञ्चमक्षणे टत्वविशिष्टज्ञा-नमकार-तत्त्वनिर्व्विकल्पकं टकारनाशः तदानीं प्राथमिकाकारभानं न सम्भवति प्रत्यक्षं प्रति विषयस्यापि हेतुत्वात्। ततः षष्ठक्षणे अत्वविशिष्टबुद्धि-अकारनाशौ, तदानीं टकारभानं न सम्भवति तदभावात्। तथा च कथं वर्णसमूहात्मकपदगोचरश्रौत्रानुभवः। न च पूर्व्वपूर्व्ववर्णोपनयसहितान्त्यवर्णसन्निकर्षात्पदगोचरश्रौत्रानुभव इति वाच्यं। बहिरिन्द्रियजप्रत्यक्षे उपनीतं विशेषणतयैव भासत इति नि-यमेन प्रत्येकवर्णसमूहमुख्यविशेष्यकपदप्रत्यक्षस्योपनयमर्यादया श्राव-णत्वासम्भवात् पदप्रत्यक्षे प्रत्येकं सर्व्वस्यैव वर्णस्य मुख्यविशेष्यत्वात्। न च पूर्व्ववर्णोऽन्त्यवर्णे विशेषणतया तत्र भासत इति वाच्यं। पूर्व्व-वर्णेऽन्त्यवर्णविशेषणत्वनियामकस्य तत्सम्बन्धस्याभावादिति। मैवं।

संस्कारेण नान्यत्र स्मरणमिति वाच्यं । बाधकाभावा-
नुपपत्त्या फलबलेन संस्काराणां परस्परसहकारेण

घादिसमुदायमात्रं न घटादिपदं ट-घादेरपि घटपदत्वापत्तेः अपि तु अव्यवहितोत्तरत्वसम्बन्धेन पूर्व्वपूर्व्ववर्णवदुत्तरोत्तरवर्ण एव पदं तच्च श्रवणाच्च दुर्ग्रहं पूर्व्वपूर्व्ववर्णानुभवसहकारेणाव्यवहितोत्तरत्वसम्बन्धेनोत्तरोत्तरवर्णे विशेषणतया पूर्व्वपूर्व्ववर्णग्रहसम्भवात् ।

यत्तु घसमानकालीनप्रागभावप्रतियोगिटत्वं घसमानकालीनत्वसम्बन्धेन घध्वंसवत्टत्वं वा घटपदत्वमिति । तन्न । घपट इत्यत्रापि घटपदत्वापत्तेरित्यलं विस्तरेण ।

'अन्यविषयकसंस्कारेण' अन्यमात्रविषयकसंस्कारेण, 'नान्यत्र स्मरणं' नान्यविषयकस्मरणं, तदविषयकसंस्कारो न तत्स्मरणजनक इति यावत्, यथाश्रुतन्तु न सङ्गच्छते घटत्वविषयकसंस्कारेण घटत्वान्यघटविषयकस्मरणजननात् दण्डी पुरुष इति विशिष्टसंस्कारेण तादृशविशिष्टस्मरणजननाच्च व्यभिचारापत्तेः[१] घट-पटविषयकप्रत्येकसंस्काराभ्याञ्च न घट-पटयोः समूहालम्बनस्मरणमित्यभिमानः । तथा च सर्व्वत्र कथं समूहालम्बनरूपतावत्पदार्थस्मृतिः नानापदार्थगोचरसमूहालम्बनसंस्कारस्थले तत्सम्भवेऽपि[२] प्रत्येकपदार्थमात्रविषयकनानासंस्कारस्थले तदसम्भवात् इति भावः । 'फलबले-

---

(१) तादृशसंस्कारस्य पुरुषान्यदण्डविषयकत्वादिति भावः ।

(२) तन्मात्रविषयकसंस्कारेणैव तदन्यविषयकस्मृत्यजननात्समूहालम्बनसंस्कारात् समूहालम्बनस्मृत्युत्पत्तौ बाधकाभावादिति भावः ।

नथैकस्मरणकल्पनात् । प्रत्येकवर्णसंस्काराणामिवा-

नेति सर्वत्र सकलपदार्थगोचरैकस्मरणरूपस्य फलस्य प्रमाणसिद्ध-त्वेनेत्यर्थः, तदन्यथानुपपत्त्यैवेति शेषः। क्वचित्तु 'फलकल्पन' इति पाठः तत्र सर्वत्र सकलपदार्थगोचरैकस्मरणे प्रमाणसिद्धे इत्यर्थः, 'संस्काराणां' प्रत्येकपदार्थमात्रगोचरसंस्काराणामपि, 'तत्र' सकल-पदार्थेषु, 'एकस्मरणकल्पनात्' एकस्मरणजनकताकल्पनात्, इदञ्च परमतदयानुरञ्जनमात्रं। वस्तुतस्तु घट-पटेन्द्रियसन्निकर्षाभ्यां स्वार्थ-समाजग्रस्तघट-पटसमूहालम्बनप्रत्यक्षवत् सर्वेषामेव संस्काराणामेकदै-वोद्बोधकलाभादर्थसमाजग्रस्ता एकदैव तावत्पदार्थस्मृतिरित्यत्रापि न किमपि बाधकं। 'प्रत्येकवर्णेति, 'वर्णपदं पदपरं, 'पदस्मरणे' तावत्पदस्मरणे, यथाश्रुते प्रत्येकवर्णसंस्कारेभ्य आनुपूर्वीविशेषविशि-ष्टात्मकस्य पदस्य स्मरणानुपपत्तेः। ननु घटपदस्मरणानन्तरं घट-पदार्थाम्पदयोः समूहालम्बनोपस्थितिस्ततः कर्मत्व-आनीपदयोः समू-हालम्बनोपस्थितिस्ततोऽनुभवसामग्र्या सत्त्वाद् घट-कर्मत्वयोरन्वय-बोधः तत आनीपदोपस्थितिरानयनोपस्थितिराख्यातोपस्थितिश्च समूहालम्बनरूपा, ततोऽनुभवसामग्र्याः सत्त्वाद् घटविशिष्टकर्मत्व-स्यानयनेऽन्वयबोधः इत्थं पदजन्यपदार्थोपस्थितिमात्रस्य स्मृत्यनुभ-वसाधारणस्य शाब्दधीहेतुत्वेन घट-कर्मत्वयोः स्मरणस्य नाशेऽपि शाब्दबोधात्मकविशिष्टवत्ताबुद्ध्युपस्थितिसत्त्वेनानयने तदन्वयबोधे बाधकाभावात् तत आख्यातार्थकृत्युपस्थितिस्ततो घटवत्कर्मत्वविशि-ष्टानयनस्य कृतावन्वयबोध इत्याद्याकारेण, अवान्तरवाक्यार्थान्व-

मन्यगतिकतया पदस्मरणे। अथ "पदं यदाकाङ्क्षितं योग्यं सन्निधानं प्रपद्यते। तेन तेनान्वितः स्वार्थः पदैरेवावगम्यते"। न चैवमन्वयान्तराभिधानं न स्यात् विरम्य व्यापाराभावादिति वाच्यं। एवमपि प्रथममनन्वये हेत्वनुपन्यासात् उत्तरस्य हीदं सामग्री-

---

यबोधपूर्व्वकमेव महावाक्यार्थान्वयबोधसम्भवात् किं पदपदार्थसमूहालम्बनस्मरणेनेत्याशङ्कते, 'अथे'ति, स्वार्थाकाङ्क्षितं स्वार्थयोग्यं यत् सन्निधानं प्रपद्यते स्वार्थोपस्थित्यव्यवधानेनोपस्थितिविषयो भवति, तेन तेनैवान्वितः स्वार्थः, 'पदैरेवाभिधीयते' पदैः प्रथममनुभाव्यते,(१) अनन्तरं महावाक्यार्थबोध इत्यन्वयः, तथाच किं पदपदार्थयोः समूहालम्बनस्मरणेनेति भावः। 'न चैव'मिति, 'एवं' घटादिपदैरेकवारमवान्तरवाक्यार्थान्वयबुद्धिजनने, 'अन्वयान्तरे'ति पुनस्तस्मान्महावाक्यार्थज्ञानं न स्यादित्यर्थः, 'विरम्ये'ति, शब्द-बुद्धि-कर्म्मणां(२) 'विरम्य' एकवारं फलं जनयित्वा, 'व्यापाराभावात्' पुनः फलान्तरजनकत्वाभावादित्यर्थः, शब्दस्य जनितान्वयबोधत्वेन निराकाङ्क्षत्वादिति भावः। 'एवमपी'ति अनन्वये अवान्तरवाक्यार्थबोधानुत्पादे, न हि प्रयोजनवतिभिया सामग्री कार्य्यं नार्जयतीति भावः। 'उत्तरस्य ही'ति, 'उत्तरस्य' महावाक्यार्थबोधस्य,

---

(१) 'पदैरेवावगम्यते' इत्यत्र 'पदैरेवाभिधीयते' इति रहस्यकृत्सम्मतः पाठः।

(२) शब्द-ज्ञान-क्रियैतत्त्रयाणामित्यर्थः।

वैकल्यं न पूर्वस्येति चेत्, अस्तु तावदेवं तथापि चरमं तावत्पदार्थघटितवाक्यार्थानुभवे उक्तैव गतिरनन्य-

'इदं' निराकाङ्क्षत्वरूपं, 'न पूर्वस्य' नावान्तरवाक्यार्थबोधस्येत्यर्थः, तथाच भवन्मतेऽपि सामग्रीसत्त्वेऽवान्तरवाक्यार्थबोधस्य दुर्वारतया तात्पर्यविषयान्वयबोधस्याजनमात्र निराकाङ्क्षत्वमित्यवश्यं स्वीकरणीयमिति भावः। "अस्तु तावदिति, कैश्चिदिति शेषः। 'एवमिति विनापि समूहालम्बनस्मरणं खण्डवाक्यार्थबोधेद्वारा महावाक्यार्थबोध-इत्यर्थः 'चरममिति चरमोक्तं धात्वर्थमादाय कर्तृ-करणाधिकरणा-दीनां पदार्थानामन्वयबोध इत्यर्थः, यत्र मिथो विशेषण-विशेष्यभा-वानापन्नानां कर्तृ-करणाधिकरणादीनां चरमोपस्थितायामेकस्यामेव क्रियायामेकत्र द्वयमिति न्यायेनान्वयबोधस्तत्रेति फलितार्थः, 'उक्तैव गतिरिति समूहालम्बनपदार्थस्मृतिरेव गतिरित्यर्थः, न हि तत्र कर्त्रादीनां परस्परमवान्तरान्वयबोधः सम्भवति, परस्परमयोग्यत्वा-दिति भावः। यद्वा 'चरम' खण्डवाक्यार्थबोधोत्तरक्षणिकचरमपदो-पस्थिति-चरमपदार्थोपस्थित्योरनन्तरं, 'तावत्पदार्थघटितवाक्यार्थानु-भवे' महावाक्यार्थबोधे, यत्र घट-कर्मत्वयोरन्वयबोधानन्तरं नी-पदार्थस्यैवोपस्थितिर्न तु तिपदोपस्थितिस्तद्बोधकविरहात्, ततो घट-विशिष्टकर्मत्वस्य नीधात्वर्थेऽन्वयबोधः तदुत्तरमेव तिपदोपस्थितिः[१] ततः तिपदार्थोपस्थितिः तदनन्तरं महावाक्यार्थबोधस्तत्रेति तु

(१) तिपदोपस्थितिरिति ख०।

फलितार्थः, 'उक्तैव गतिरिति, तच्च खण्डवाक्यार्थानुभवस्य चरम-पदार्थोपस्थितिसमये नाशादिति भावः ।

प्राञ्चस्तु 'अस्तु तावदेवमिति भवतु सामग्रीवशात्प्रथमं खण्ड-वाक्यार्थबोधस्तथापीत्यर्थः, 'चरमं तावत्पदार्थघटितवाक्यार्थानुभव' इति महावाक्यार्थबोध इत्यर्थः, 'उक्तैव गतिरिति समूहालम्बनपद-पदार्थस्मृतिरेव गतिरित्यर्थः, पदजन्यपदार्थस्मृतेरेव शाब्दधीहेतु-तया खण्डवाक्यार्थानुभवरूपपदार्थोपस्थितौ महावाक्यार्थबोधासम्भ-वात्, अतएव सर्व्वत्र विशेष्ये विशेषणमिति न्यायेनैवान्वयबोधो न तु विशिष्टवैशिष्ट्यविधया, पदजन्यविशेषणतावच्छेदकप्रकारकविशे-षणस्मृतेरभावात्, अतएव च "वृद्धा युवानः शिशवः कपोताः खले यथामी युगपत्पतन्ति । तथा हि सर्व्वे युगपत्पदार्थाः परस्परेणान्व-यिनो भवन्ति[1]" इति प्राभाकरा वदन्ति । अथ पदार्थोपस्थिते-र्वृत्त्या पदजन्यपदार्थस्मृतित्वेन न कारणता किन्तु स्मृति-शाब्दानुभव-साधारणपदज्ञानविशिष्टपदार्थोपस्थितित्वेनैव, अस्य व्यापकधर्म्मत्वेऽपि निश्चिताव्यभिचारकत्वात् वैशिष्ट्यञ्च वृत्तिलक्षणसम्बन्धेन पदार्थप्र-कारकपदज्ञानीय-पदार्थस्मृति-शाब्दानुभववृत्तितत्तज्जन्यतात्मकज-न्यताविशेषसम्बन्धेन तेन पदज्ञानजन्यानुमितिरूपपदार्थोपस्थितेः, समवायेन सम्बन्धितया घटादिपदजन्याकाशस्मृतेश्च न शाब्दबोध-हेतुत्वं, तत्तज्जन्यतानामननुगमेऽपि सम्बन्धविधयैव प्रवेशाद्दोषः।

---

(१) वृद्धा युवानः शिशवः कपोताः पतन्ति सर्व्वे युगपद्यथा च ।
खले तथामी सहिताः पदार्थाः परस्परेणान्वयिनो भवन्तीति ग० ।

इत्थञ्च खण्डवाक्यार्थबोधात्मकपदार्थोपस्थितितोऽपि महावाक्यार्थ-बोधे बाधकाभावः, तस्या अपि तादृशजन्यतासम्बन्धेन पदज्ञानविशि-ष्टत्वादिति चेत्, न, शाब्दानुभवनिष्ठजन्यतायाः कारणतावच्छेदक-घटकत्वे गौरवात्, स्मृतिनिष्ठजन्यतामात्रसम्बन्धेन पदज्ञानविशिष्ट-पदार्थस्मृतित्वेन तादृशजन्यतामात्रसम्बन्धेन पदज्ञानविशिष्टपदार्थो-पस्थितित्वेन वा लाघवाद्धेतुत्वाभिषिक्तताव्यभिचारकल्पस्यागुरुतायाः-मेव सन्दिग्धव्यभिचाररूपेण कारणत्वकल्पनाभावात् । वस्तुतस्तु पदज्ञानविशिष्टपदार्थस्मृतित्वादिकमपि न प्रवेशनीयं परन्तु विल-क्षणतत्तदर्थविषयकत्वेनैव तत्तदर्थविषयकशाब्दित्वावच्छिन्नं प्रति हे-तुता, वैलक्षण्यञ्च पदजन्यपदार्थस्मृतिनिष्ठशाब्दबुद्धिसामान्यजनक-तावच्छेदकतया पदजन्य-तत्तत्पदार्थस्मृतिनिष्ठ-तत्तत्पदार्थशाब्दबु-द्धिजनकतावच्छेदकतया वा लाघवात् सिद्धः स्मृतित्वव्याप्यो जाति-विशेषः । स्मृति-शाब्दानुभवसाधारणपदार्थोपस्थितिमात्रस्य हेतुत्वे च न वैजात्येन हेतुत्वसम्भवः स्मृति-शाब्दत्वाभ्यां साङ्कर्यापत्तेः । न च तथापि वैजात्येन हेतुत्वे पद-पदजन्यपदार्थस्मृत्युद्बोध-कान्तरवशादुत्कृष्टखण्डपदार्थान्तरस्यापि भाने तत्र तत्पदार्थस्यापि शाब्दबोधापत्तिः जातेरांशिकत्वाभावादिति वाच्यं । शाब्दबोधोप-धायकपदजन्यपदार्थस्मृत्युत्कृष्टखण्डपदार्थान्तरभाने मानाभावादिति प्राञ्चः । तदसत्, अस्तु लाघवात् सर्वत्र पदार्थस्मृतेरेव शाब्द-धीहेतुत्वं तथापि विशेष्ये विशेषणमिति न्यायेनैव शाब्दबोधो न तु विशिष्टवैशिष्ट्यविधयेत्युक्तमयुक्तमेव, यत्र हि खण्डवाक्यार्थ-बोधोत्तरं समूहालम्बनपदार्थस्मृतिः तत्रार्थसमाजग्रस्तस्य विशिष्ट-

गतिकत्वात्। अत्र वदन्ति, सन्निधिर्न पदजन्यैवान्वयबोधहेतुः द्वारमित्यादौ अध्याहृतेनापि पिधानादिना अन्वयबोधदर्शनात्। न च पिधेहीति शब्द एवा-

वैशिष्ट्यविषया सत्त्वावाक्यार्थशाब्दबोधस्य दुर्वारत्वात् खण्डवाक्यार्थबोधात्मकस्यैव विशेषणतावच्छेदकप्रकारकनिश्चयस्य सत्त्वात्। न हि सामान्यतो विशिष्टवैशिष्ट्यबुद्धित्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुतायामपि क्षतित्वं तन्त्रमिति कृतं विस्तरेण। 'अत्र वदन्तीति, प्राभाकरा इति शेषः। 'सन्निधिः' पदार्थोपस्थितिः, तच्छाब्दबुद्धौ पदजन्यैव तदुपस्थितिर्न हेतुरिति फलितार्थः, किन्तु तदुपस्थितिमात्रं तदन्वयप्रतियोग्युपस्थापकयत्-किञ्चित्पदज्ञानञ्चेति भावः। अन्यथा[1] पदमात्राजन्यप्रत्यक्षस्थल-पदार्थोपस्थितिमादायान्वयबोधापत्तेः, 'अध्याहृतेनापीति पदज्ञानं विना स्मृतेनापीत्यर्थः, 'अन्वयबोधदर्शनादिति, तथाच किं सकल-पदगोचरस्मरणेनेति भावः। वस्तुतस्तु तथाच कथं[2] वृत्त्या पद-जन्यपदार्थोपस्थितिरासत्तिरिति भावः। अत्र शब्दज्ञानजन्यघटो-पस्थितित्वं घटशाब्दबुद्धिजनकतावच्छेदकम् वेत्यादिविप्रतिपत्तिः। यद्वा घटमुख्यविशेष्यकशाब्दबोधत्वं घटवृत्तितया शब्दज्ञानजन्यत्व-

(१) 'अन्यथा' अन्वयप्रतियोग्युपस्थापकयत्किञ्चित्पदज्ञानानपेक्षतदुपस्थितिमात्रस्य हेतुत्वे इत्यर्थः।

(२) तत्र व्यभिचारादित्यादिः।

ध्याह्रियते, अनुपयोगात्। अर्थस्यैवान्वयप्रतियोगित्वेनोपयोगित्वात् आवश्यकत्वाच्च। अर्थापत्तेरुपपादकविषयत्वात्। न च शब्दमात्रमुपपादकं, अपि

व्याप्यं न वेत्यादिविप्रतिपत्तिः, तेन न्यायनयेनापि जातिविशेषस्यैव जनकतावच्छेदकतया पदज्ञानजन्यत्वादेर्जनकतावच्छेदककोटावप्रवेशेऽपि न क्षतिः। अत्रापि विधिकोटिर्नैयायिकानां निषेधकोटिरर्थाध्याहारवादिनां प्राभाकराणां, न्यायनयेऽपि घटवृत्तिपदज्ञानं विनापि घटस्य संसर्गविधया भानाद्यवतारणाय विशेष्यतात्वेनोपादानं, घटनिष्ठवृत्तिज्ञानं विनापि द्रव्यपदादिना लक्षणया घटप्रकारेण घटवतो बोधनाच्चेति, यदि च द्रव्यत्वादिरूपेण घटादौ शक्तिग्रहादेव लाघवज्ञानमलकारेण द्रव्यादिपदाद्द्रव्यत्वादिरूपेण घटादेर्ज्ञानमभ्युपगम्यते तदा तु लाघवज्ञानाजन्यत्वेनापि शाब्दबोधो विशेष्य इति दिक्। 'न चेति, तत्रेति शेषः, 'अध्याह्रियते' स्मर्यते, 'अनुपयोगात्' अप्रयोजनकत्वात्,[1] तथाच शब्दस्मृतौ मानाभाव इति भावः। 'अन्वयप्रतियोगित्वेन' अन्वयबोधविषयत्वेन, तदुपस्थितेरेवेति शेषः, अर्थोपस्थितिद्वारा तस्याप्युपयोगित्वमस्त्येवेत्यनुशयादाह,[2] 'आवश्यकेति पिधेहिशब्दोपस्थितिं कल्पयित्वापि पिधानरूपपदार्थोपस्थितिकल्पनस्यावश्यकत्वाच्चेत्यर्थः। हेत्वन्तरमाह, 'अर्थापत्तेरिति 'अर्थापत्तेः' अनुपपत्तिकरणकार्थापत्तेः, 'उपपादकविषयकत्वात्' साक्षादुपपादकमात्रविषयकत्वात्, तथाचास्य

(१) निष्प्रयोजनकत्वादिति ख०, ग०। (२) इत्यस्वरसादाहेति ग०।

तु तदर्थः, अवश्यकल्प्यार्थसाहचर्य्येण दैववशसम्पन्नशब्दस्मृतेरन्यथासिद्धेः, अन्यथा पदबोधितस्यैवार्थस्या-

पुरुषस्य पिधानोपस्थापकपदोपस्थितिं विना द्वारमिति वाक्यात् पिधानशाब्दबुद्धिरनुपपन्नेत्यनुपपत्तिकरणकार्थापत्त्यैव पिधेहिशब्दोपस्थितिः कल्पनीया, तच्च न सम्भवति अर्थापत्तेः साक्षादुपपादकमात्रविषयकत्वनियमादिति भावः। इदमापाततः, एवं सति दिवाऽभोजिनो देवदत्तस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजित्वमपि न सिद्ध्येत भोजनस्य साक्षात्पीनत्वानुपपादकत्वादिति ध्येयं। 'शब्दमात्रं' पिधानोपस्थापकशब्दोपस्थितिः, 'उपपादकं' साक्षादुपपादकं, 'तदर्थः' तदर्थोपस्थितिः। ननु यत्र दैववशेन शब्दस्मरणं तेन सार्थस्मृतिः तत्र यदि पिधानशाब्दबुद्धित्वावच्छिन्नं प्रति शब्दज्ञानविशिष्टपिधानोपस्थितित्वेन कारणत्वं तदाऽन्यत्रापि तदुपस्थापकशब्दोपस्थितिरवश्यं कल्पनीयेत्यत आह, 'अवश्यकल्प्येति पिधानशाब्दबुद्धित्वावच्छिन्नं प्रति कारणतावच्छेदकत्वेनावश्यं कल्पनीयेत्यर्थः,[१] 'अर्थसाहचर्य्येण' अर्थोपस्थितित्वस्य जन्यतासम्बन्धेन समवधानेनेत्यर्थः, 'अन्यथासिद्धेरिति जन्यतासम्बन्धेनान्यथासिद्धिनिरूपकत्वादित्यर्थः, तथाच तत्रापि शब्दज्ञानविशिष्टपिधानोपस्थितित्वेन[२] कारणत्वमिति भावः। 'अन्यथेति अस्यान्यथासिद्धिनिरूपकत्वे इत्यर्थः, 'पदबोधितस्यैवेति पदजन्यपिधानाद्युपस्थिति-

(१) शब्दज्ञानविशिष्टपिधानोपस्थितित्वेन कारणतावच्छेदकत्वेनावश्यकल्पनीयस्येत्यर्थ इति ग०।

(२) शब्दज्ञानविशिष्टपदार्थोपस्थितित्वेनेति ग०।

न्वयबोधकत्वमिति नियमशक्तिकल्पनापत्तेः । स्वार्थान्वयपरत्वाच्छब्दानां द्वारमिति न पिधानान्वयबोधक-

त्वेनैवान्वयबोधजनकत्वमित्यर्थः, 'नियमेति गुरुधर्म्मेण नियमशक्तेः कारणतायाः कल्पनापत्तेरित्यर्थः, गुरुधर्म्मस्य कारणतावच्छेदकत्वकल्पनापत्तेरिति तु फलितार्थः ।

केचित्तु ननु यत्र दैववशेन शब्दार्थयोरुभयोरेवोपस्थितिस्तत्र यदि पिधानशाब्दबुद्धित्वावच्छिन्नं प्रति पिधानोपस्थापकपदोपस्थितेः कारणत्वं क्लृप्तं तदान्यत्रापि तदुपस्थापकशब्दोपस्थितिरवश्यं कल्पनीयेत्यत आह, 'अवश्यकल्प्येति पिधानशाब्दत्वावच्छिन्नं प्रति हेतुत्वेनावश्यकल्प्येत्यर्थः, 'अर्थः' पिधानोपस्थितिः । तथाच तत्रापि पिधानोपस्थापकपदोपस्थितेर्न कारणत्वमिति भावः । 'अन्यथेत्यस्य विवरणं 'पदबोधितस्यैवेति, 'अन्वयबोधकत्वं' अन्वयबोधविषयत्वं, 'इतीति इति स्वीकारे इत्यर्थः, 'नियमेति, 'नियमः' विशेषधर्म्मः, पदजन्यपदार्थोपस्थितित्वमिति यावत्, तेन शक्तेः कारणतायाः कल्पनापत्तेरित्यर्थः । न चेष्टापत्तिः, गौरवादिति भाव इत्याहुः । तदसत्, 'अवश्यकल्प्येत्यादेर्न्नित्यादिना वक्ष्यमाणेन पौनरुक्त्यापत्तेः । शङ्कते, 'स्वार्थेति, 'स्वार्थान्वयपरत्वात्' शक्त्युपस्थापितार्थमात्रान्वयबोधजनकत्वात्[1] स्वानुपस्थापितार्थशक्तपदज्ञानं विना स्वानुपस्थापितार्थबुद्ध्यजनकत्वादिति यावत्, तच्छक्तपदज्ञानस्य तच्छाब्दबुद्धौ हेतुत्वादिति भावः । 'न पिधानेति पिधानशक्तपदज्ञानं विना न

(१) शक्त्योपस्थापितमुख्यार्थमात्रान्वयबोधजनकत्वादिति ख० ।

अध्याहृते तेषां तात्पर्य्यमिति वाच्यं। श्रुतार्था-न्वयानुपपत्त्या, अध्याहृते तात्पर्य्यात्। कथं तर्ह्योदनं पचतीत्यत्र समभिव्याहृतमाषान्वयः कलायादेरपि स्मृतत्वात् इति चेत्। न। तात्पर्य्यनियमादित्यवेहि यत्परः शब्दः स हि शब्दार्थः, अन्यथा तत्रापि दैव-वशस्मृतकलायपदोपस्थापितेनान्वयबोधः[१] स्यात्। अथ देवदत्त ओदनमित्यादिवाक्ये क्रियापदाध्याहाराभा-वेन कर्त्तुरनभिधानात् तृतीया स्यात् इति चेत्। न।

जनितान्वयबोधत्वेन निराकाङ्क्षत्वात्, अस्मन्मते तु श्रुतपदे आकाङ्क्षा-विरहेऽपि न क्षतिः अध्याहृतपदे एवाकाङ्क्षासत्त्वादिति भावः। 'श्रुतार्थान्वयानुपपत्त्येति' तात्पर्य्यविषयीभूतान्वयबोधानुपपत्त्येत्यर्थः, 'तात्पर्य्यात्' आकाङ्क्षासत्त्वात्। 'कथं तर्हीति' यदुक्तं तत्पदार्थो-पस्थितिरपि हेतुरित्यर्थः, 'समभिव्याहृतेति' उद्बुद्धसंस्कारकलायाद्यु-पस्थितिदशायामपि समभिव्याहृतमाषान्वय इत्यर्थः, 'तात्पर्य्यनिय-मात्' तात्पर्य्यज्ञानस्य नियामकत्वात्, 'यत्परः' यत्तात्पर्य्यकः, 'शब्दार्थः' शब्दजन्यज्ञानविषयः, 'अन्यथा' तात्पर्य्यज्ञानस्यानियाम-कत्वे 'तत्रापीति', ओदनं पचतीत्यत्रेति शेषः, 'दैववशस्मृतेति' दैववशात्स्मृतेत्यर्थः, क्वचित् तथैव पाठः, 'उपस्थापितेन' कलायेन, 'अनभिधानादिति' आख्यातादिना अबोधनादित्यर्थः, 'तृतीयेति',

---

(१) दैववशसम्भूतकलायपदोपस्थापितेनान्वयबोध इति ख०।

अध्याहृतपचतिपदेनापि कर्तुरनभिधानात्, कर्तृ-
संख्याभिहितेति चेत् । न । देवदत्तस्य पाक इत्यत्रापि
तृतीयापत्तेः, तात्पर्य्यतस्तत्र व्यवस्थेति चेत्, तुल्यं । ननु

कृदाख्याताभ्यामनभिहिते(१) कर्त्तरि तृतीयाभिधानादिति भावः ।
'अध्याहृतेति आख्यातस्य कृतावेव शक्तेरिति भावः । 'कर्तृसंख्येति,
तथचानभिहिते कर्त्तरीत्यधिकारसूत्रस्य कृदाख्याताभ्यां कर्तृ-
तद्गतसंख्यान्यतरानभिधाने कर्त्तरि तृतीयेति निष्कृष्टोऽर्थ इति भावः ।
अन्यतरत्वेनोपादानादेव देवदत्तः पाचक इत्यादौ वुण्प्रत्ययादिना
कर्तृगतसंख्याभिधानेऽपि न तृतीया कर्तुरेवाभिधानादिति ध्येयं(२) ।
'देवदत्तस्येति, अत्र षष्ठ्या कर्तुस्तद्गतसंख्यायाश्चानभिधानादिति
भावः । ननु अनभिहिताधिकारीयतृतीयाविधायिका स्मृतिरेतद्-
तिरिक्तस्थलपरा षष्ठ्यादिकृद्योगे षष्ठ्यास्तृतीयापवादकत्वात् । न च
तथापि देवदत्तस्य पाक इत्यर्थं बोधनीये यत्र देवदत्तस्येतिमात्र-
मुच्चरितं तत्र तृतीयापवादकृद्योगाभावादाख्यात-संख्यां कर्तृ-तद्गत-
संख्यानभिधानाच्च तृतीयापत्तिरिति वाच्यं । तत्रापि पच्यमानपाका-
दिपदस्य वक्तुरभिप्रायविषयतया तदतिरिक्तस्थलस्यैव तृतीयावि-
धायकसूत्रविषयत्वादित्यत आह, 'तात्पर्य्यत इति तृतीयाविधायक-
सूत्रतात्पर्य्यत इत्यर्थः, 'तुल्यमिति देवदत्तस्य पाक इत्याद्यतिरि-

---

(१) कृदाख्यातान्यतरेणानभिहित इति क० ।

(२) इति भाव इति क० ।

द्वारं पिधेहीत्यादौ पिधानशब्दानुभवे पिधानोपस्थापकपदत्वेन जनकत्वमिति चेत्। न। अन्वयप्रतियोग्युपस्थापकपदत्वेन जनकत्वात् न तु तदुपस्थापकयावत्पदत्वेन गौरवात्। एवं पिधानान्वयबोधेऽपि।

क्वचित्स्थले यत्र कर्तृ-तद्गतसङ्ख्यान्यतराभिधायकशब्दाख्याताम्तक्रियापदं वक्तुरभिप्रेतं तत्र न तृतीया यत्र तु न तदभिधायकशब्दाख्यातान्तक्रियापदं वक्तुरभिप्रेतं तत्र तृतीयेति वैयाकरणस्मृतेस्तात्पर्य्यादेव देवदत्त ओदनमित्यादौ न तृतीया तत्र पचतिपदस्य वक्तुरभिप्रेतत्वात्। न चैवं शब्दाध्याहारः सिद्धोत एवेति वाच्यं, पदस्य वक्तुरभिप्रेतत्वेऽपि श्रोत्रा तदनध्याहारादिति भावः। 'अन्वयप्रतियोगीति पिधानान्वयप्रतियोगीत्यर्थः, तटस्थशङ्कां निराकरोति, 'न त्विति, 'तदुपस्थापकेति पिधानान्वयप्रतियोग्युपस्थापकेत्यर्थः, 'गौरवादित्युपलक्षणं, यावत्पदस्य तुच्छाद्यसम्भवाश्चेत्यपि द्रष्टव्यं। 'एवं' तादृशपदं, पिधानान्वयप्रतियोग्युपस्थापकपदमिति यावत्, 'पिधानान्वयबोधेऽपीति अध्याहृतपिधानान्वयबोधस्थलेऽपीत्यर्थः, तत्रापि पिधानान्वयप्रतियोग्युपस्थापकपदस्य द्वारमित्यस्यैव सत्त्वादिति भावः। ननु लाघवात् तदुपस्थापकपदत्वेन तच्छाब्दबुद्धित्वेन हेतु-हेतुमद्भावो न तु तदन्वयप्रतियोग्युपस्थापकपदत्वेन गौरवादित्यत आह, 'अन्वयेति तदन्वयबोधं प्रति तदुपस्थापकपदत्वेनैव कारणत्वे इत्यर्थः, 'गौणेति गौण-लाक्षणिकस्थले अन्वयबोधाभावापत्तेरित्यर्थः, 'तयोः' गौण-लाक्षणिकपदयोः, 'अननुभावकत्वात्' पदार्थानुपस्थापकत्वात्,

अन्यथा गौण-लाक्षणिकयोरन्वयबोधो न स्यात् तयो-रननुभावकत्वादिति ॥

प्रवाहादिरूपशक्योपस्थितिरेव लक्ष्यस्मारिका न तु लाक्षणिकपदो-पस्थितिरिति प्राचीनसिद्धान्तादिति भावः । तदयमध्याहार-पूर्व्वपक्षनिष्कर्षः, तच्छाब्दबुद्धौ पदजन्यैव तदुपस्थितिर्हेतुरिति न नियमः तच्छाब्दबुद्धौ पदज्ञानविशिष्टतदुपस्थितित्वेन विजातीय-तद्विषयकत्वेन वा हेतुत्वकल्पनामपेक्ष्य लाघवेन तदुपस्थितित्वेन हेतुत्वौचित्यात् पदज्ञानविशिष्टत्वाप्रवेशादतिरिक्तजातिकल्पनाविर-हाच्च द्वारमित्यादौ अध्याहृतेनापि पिधानादिना अन्वयबोधदर्श-नेन तथा कार्य्य-कारणभावे व्यभिचाराच्च । न च तत्रापि पिधेहि-शब्द एवाध्याह्रियत इति वाच्यं । गौरवान्मानाभावाच्च । न च पिधानशाब्दबुद्धिं प्रति शक्ति-लक्षणान्यतरसम्बन्धेन(१) पिधान-प्रकारकवृत्तितावच्छेदकधर्म्मावच्छिन्नशब्दविशेष्यकज्ञानत्वेन हेतुतया पिधेहिशब्दस्मृतिरावश्यकीति वाच्यं । तादृशकार्य्य-कारणभावे मा-नाभावात् । न चैवमोदनं पचतीत्युक्ते कारणतया स्मारितस्य भा-काष्ठस्य प्रत्यक्षादिनोपस्थितस्य कलायादेश्चान्वयबोधापत्तिरिति वाच्यं । सति तात्पर्य्यग्रहे इष्टापत्तेः, अन्यथा तथापि ओदनं पचती-त्युक्ते दैववशास्मृतकलायपदोपस्थितेन कलायेनान्वयबोधस्य दुर्व्वार-त्वादिति दिक् ।

---

(१) वृत्तिसम्बन्धेनेति ख०, ग० ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ
शब्दाख्यतृतीयखण्डे आसत्तिवादपूर्व्वपक्षः ॥०॥

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये
आसत्तिवादपूर्व्वपक्षरहस्यम् ॥०॥

अथासत्तिवादसिद्धान्तः ।

उच्यते, क्रियापदोपस्थापिता क्रिया, कारकपदोपस्थापितञ्च कारकं परस्परमाकाङ्क्षति न तूपस्थितिमात्रं अन्यथा द्वारं कर्म्मता पिधेहि, द्वारं पिधानं कृतिरित्यत्रापि क्रिया-कर्म्माध्याहार इवान्वयबोधप्रसङ्गः ।

अथासत्तिवादसिद्धान्तरहस्यम् ।

'क्रियापदेति धातुपदेत्यर्थः, 'क्रिया' पिधानादि, 'कारकपदेति अमादिपदेत्यर्थः, 'कारकं' कर्म्मत्वादि, 'आकाङ्क्षतीति परस्परं शाब्देच्छाविषयो भवतीत्यर्थः, 'अन्यथेति यथाकथञ्चिदुपस्थितक्रियादिमात्रस्यैव परस्परं शाब्देच्छाविषयत्वे इत्यर्थः, 'क्रिया-कर्म्माध्याहार इवेति क्रिया-कर्म्मत्वरूपार्थाध्याहार इवेत्यर्थः,[१] इदञ्च पदस्मारितपदार्थविषया आकाङ्क्षेत्याचार्य्यमतेन, नव्यमते तु कर्म्मत्वादिविशेष्यकाधेयतासंसर्गकद्वारप्रकारकशाब्दबोधे द्वारमित्यानुपूर्व्वीविशेषस्य कृतिविशेष्यकानुकूलत्वसंसर्गकपिधानप्रकारकशाब्दबोधे च पिधेहीत्यानुपूर्व्वीविशेषस्य आकाङ्क्षात्वमावश्यकम्, अन्यथा द्वारं कर्म्मत्वं पिधेहि द्वारं पिधानं कृतिरित्यत्रापि तादृशान्वयबोधापत्ते-

(१) क्रिया-कर्म्मरूपाध्याहार इवेत्यर्थ इति ख० ।

क्रियायाः कर्मणश्चोपस्थितेस्तुल्यत्वात्। एवंविधपदोपस्थापिते परस्परमाकाङ्क्षा नास्तीति चेत्, तर्ह्याकाङ्क्षायां पदविशेषोपस्थापितत्वं तन्त्रं न तूपस्थितिमात्रं, अर्थविशेषेऽसाधुत्वान्नान्वयबोध इति चेत्, न, पिधेहीति पदं विना द्वारमित्यस्याप्यसाधुत्वात् तदर्थयोगे साधुत्वस्य तुल्यत्वात् साधुत्वज्ञानस्यान्वयबोधे-

---

रिति केवलं पिधेहीत्युक्तौ द्वारमित्यस्य केवलं द्वारमित्युक्तौ पिधेहिपदस्याध्याहार आवश्यक इति ध्येयं। 'एवंविधेति द्वारं कर्मत्वेत्यादिपदेत्यर्थः, 'आकाङ्क्षा' शाब्दबोधेच्छा, 'आकाङ्क्षायां' परस्परं शाब्दबोधेच्छायां। ननु द्वारं कर्मत्वमित्यादौ भेदान्वयबोधे असाधुत्वज्ञानमेव प्रतिबन्धकमित्याशङ्कते, 'अर्थविशेषे असाधुत्वादिति द्वारं कर्मत्वमित्यादौ भेदान्वयबोधे असाधुत्वादित्यर्थः, तच्चासाधुत्वञ्च तद्-जनकतया पाणिन्याद्यभिप्रेतत्वं, 'असाधुत्वादिति क्रिया-कर्मभावेनान्वयबुद्ध्यजनकतया पाणिन्याद्यभिप्रेतत्वादित्यर्थः। ननु साधुत्वस्य(१) फलोन्नेयतया यत्रान्वयबोधो न दृश्यते तत्रैवासाधुत्वं कल्प्यते, न हि द्वारमित्यत्र पिधेहिपदं विना नान्वयबोध इत्युभयसिद्धमित्यस्वरसाद्,(२) 'साधुत्वज्ञानस्येति निश्चितासाधुत्वाभावज्ञानस्येत्यर्थः, तथाच जनकीभूतं ज्ञानं विघटयत एव ज्ञानस्य प्रतिबन्धकतया नासाधुत्व-

---

(१) असाधुत्वस्येति ग०।

(२) इत्यनुभवसिद्धमित्यस्वरसादिति ग०।

अयोग्यत्वाच्च गौरवादपभ्रंशादप्यन्वयबोधाच्च । न चाभासंसर्गाग्रहः, बाधकाभावात् । तस्मात् क्रिया-

ज्ञानं प्रतिबन्धकमिति भावः(१) । गौरवेणान्यथासिद्धिमुक्त्वा व्यभिचारमप्याह, 'अपभ्रंशादपी'ति साधुत्वेनाज्ञायमानादपीत्यर्थः, 'च' अपभ्रंशस्थले; 'बाधकाभावादि'ति संसर्गग्रहे बाधकाभावादित्यर्थः, साधुत्वज्ञानस्य(२) हेतुत्वासिद्धेरिति भावः । ननु द्वारं कर्मत्वं पिधेहि द्वारं पिधानं कृतिरित्यादावेकदेशनिराकाङ्क्षस्थले क्रियाकर्मभावेनान्वयबोधे इष्टापत्तिः सत्येकदेशसाकाङ्क्षत्वे अन्वयप्रतियोग्यन्तरस्य यथाकथञ्चिदुपस्थितेरेव शाब्दधीहेतुत्वाभ्युपगमेन प्रत्यक्षानुमानादिना तदुपस्थितिर्वा निराकाङ्क्षपदजन्योपस्थितेरपि शाब्दबोधे बाधकाभावात् । न चानुभवविरोध इति वाच्यं । तथा सति पदजन्यपदार्थोपस्थितिं विना नान्वयबोध इत्यनुभवादेव शब्दाध्याहारसिद्धौ विवादपर्य्याप्तिः । न चैवं कृत्यादिविशेष्यकपिधानादिप्रकारकान्वयबोधे पिधेहीत्याद्यानुपूर्व्वीविशेषात्मकाकाङ्क्षाज्ञानस्य हेतुत्वमुपेयते न वा, आद्ये अर्थाध्याहारस्थले एकदेशनिराकाङ्क्षस्थले च व्यभिचारः, अन्त्ये द्वारं कर्मत्वं पिधानं कृतिरित्यादि निराकाङ्क्षस्थलेऽपि द्वारकर्मकपिधानानुकूलकृतिमानि-

(१) तथाच शाब्दबोधे असाधुत्वज्ञानं न साक्षात् प्रतिबन्धकं अपि तु कारणीभूतज्ञानविघटकतयेति भावः ।

(२) तत्र व्यभिचारादि[illegible] ।

पदस्य कारकपदेन कारकपदस्य क्रियापदेन सहा-
न्वयबोधकत्वं न त्वेवं विनाऽपरस्य। अपि च स-

त्यासत्त्यन्वयबोधापत्तिः अर्थोपस्थितेस्तुल्यत्वादिति वाच्यं। तत्तदा-
नुपूर्व्वीविशेषात्मकाकाङ्क्षानिश्चयस्य व्याप्यवच्छिन्नोत्तरवर्त्ति-तादृश-
तादृशान्वयबुद्धिं प्रत्येव हेतुतया व्यभिचाराभावात् अर्थाध्याहारा-
दिस्थलीयान्वयबोधस्य तदव्यवच्छिन्नोत्तरवर्त्तित्वाभावात्[1]। न चैवं
सर्व्वनिराकाङ्क्षस्थलेऽपि अर्थाध्याहारादिस्थलवत् द्वारकर्त्तृकपिधाना-
नुकूलकृतिमानित्यन्वयबोधापत्तिर्दुर्व्वारैवेति वाच्यं। द्वारकर्म्मकपिधा-
नानुकूलकृतिमानित्यन्वयबोधो हि द्विविधः, द्वारमित्याद्यानुपूर्व्वी-
निश्चयाव्यवच्छिन्नोत्तरवर्त्ति-द्वारप्रकारक-कर्म्मत्वविशेष्यकान्वयबोधत्वाश्र-
यः पिधेहीत्याद्यानुपूर्व्वीनिश्चयाव्यवच्छिन्नोत्तरवर्त्ति-पिधानप्रकारक-
कृतिविशेष्यकान्वयबोधत्वाश्रयश्च तदतिरिक्तस्त्वाकांक्षः। तथाच अन्य-
तरविशेषसामग्रीविरहादेव सर्व्वनिराकाङ्क्षस्थले न तादृशान्वयबोधः।
एतेन[2] यथाकथञ्चित्पदार्थोपस्थितिमात्रस्य हेतुत्वे प्रतियोग्युपस्था-
पकपदमात्राश्रवणेऽपि यत्किञ्चिद्वर्णज्ञानदशायां उपकुम्भपदार्थोप-
स्थितिमात्रात्शाब्दबोधप्रसङ्गः तथाच भट्टमताविशेषः। न च तद-
न्वयप्रतियोग्युपस्थापकपदत्वेन हेतुतया न तथान्वयबोध इ... र्थं।
साक्षात्परम्परासाधारणस्य तदन्वयप्रतियोगित्वस्यानुगतानतिप्रसक्तस्य

---

(१) तदनव्यवच्छिन्नोत्तरवर्त्तित्वादिति ख०, ग०।

(२) उक्तविशेषसामग्रीसहकारविरहेणेत्यर्थः।

कर्म्मकक्रियापदयोगं विना द्वितीयानुपपत्तिः, न हि क्रियापदार्थयोगे द्वितीया, घट आनयनं कृतिरित्यत्रापि द्वितीयापत्तेः, तथा च पुष्पेभ्य इत्यत्र स्पृहयति-

पदस्यैव स्वात् तदुक्तपदज्ञानत्वापेक्षया गुरुत्वाच्चेत्यपि निरस्तं। तथापि विशेषणसामग्रीविरहादेव शाब्दबोधाभावोपपत्तेरित्याशयादाह, 'अपि चेति।

केचित्तु ननु पदज्ञानजनितपदार्थोपस्थितेरेव आकाङ्क्षा तज्ज्ञानादेरपि शाब्दबोधात्, आनुपूर्व्वीविशेषः तत्त्वामननुगततया अनन्तकार्य्य-कारणभावापत्तेः, किन्तु घटः कर्म्मत्वमित्यादिपदविशेषान्यपदार्थोपस्थितिरेवाकाङ्क्षा सा चार्थाध्याहारस्थलेऽप्यस्ति नास्ति च सर्व्वनिराकाङ्क्षस्थले एकदेशनिराकाङ्क्षस्थले चेति न तत्रान्वयबोधः किं पदाध्याहारेणेत्यत्राह, 'अपि चेतीत्याहुः। तदसत्, भेदकूटानां[१] विशेषण-विशेष्यभावे विनिगमनाविरहेणानन्तकार्य्य-कारणभावापत्तेः अन्वयप्रतियोग्युपस्थापकपदमात्राश्रवणेऽपि पदार्थोपस्थितिमात्राच्छाब्दबोधस्य दुर्व्वारत्वाच्च तदन्वयप्रतियोग्युपस्थापकपदत्वेन हेतुत्वस्य उक्तक्रमेण वक्तुमशक्यत्वादिति ध्येयम्। 'कर्म्मकक्रियापदयोगं विनेति सकर्म्मकक्रियापदैकवाक्यताभिप्रायकत्वं विनेत्यर्थः, 'द्वितीयानुपपत्तिरिति द्वितीयायाः साधुत्वानुपपत्तिरित्यर्थः,[२] पाणिनि-चान्द्राद्यनुशासनकर्तृभिस्तथैव निर्णीतत्वादि-

(१) पदविशेषान्यत्वव्याप्यभेदकूटानामित्यर्थः।

(२) एकवाक्यत्वं सकर्म्मकक्रियापदसहकारेण स्वार्थबोधकत्वं।

पदाध्याहारं विना चतुर्थ्यनुपपत्तिः । यदि स्पृहयति-
पदार्थयोगे चतुर्थी तदा पुष्पमिच्छतीत्यत्रापि स्यात्
स्पृहयतीच्छतिपदयोरेकार्थत्वात् । अथ साधुत्वार्थं
द्वारं पुष्पेभ्य इत्यत्र पिधेहि-स्पृहयतिपदाध्याहारो-
ऽनुमन्यते न त्वन्वयबोधार्थं तस्यान्वयप्रतियोगिविज्ञा-
नादेवोपपत्तेरिति चेत्, तर्हि क्रियापदयोगं विना न
कारकविभक्तिः, कारकपदयोगं विना न तदन्वययोग्यं
क्रियापदमिति केवलकारकपदे क्रियापदाध्याहारः,
केवलक्रियायाञ्च कारकपदाध्याहारः साधुत्वार्थमाव-
श्यक इति तज्जन्योपस्थितिरन्वयबोधौपयिकी तस्मात्

ति[१] भावः । साधुत्वञ्च धर्मविशेषजनकत्वं अधर्माजनकत्वं वा,
'क्रियापदाद्ययोग इति वचनात् सकर्मकक्रियापदस्य योऽर्थस्तद-
न्वितस्वार्थबोधकत्वाभिप्रायविषयत्व एवेत्यर्थः, 'द्वितीयेति, साध्वीति
शेषः, 'द्वितीयापत्तेः' द्वितीयायाः साधुत्वापत्तेः, 'चतुर्थ्यनुपपत्तिरिति
कर्मत्वपरचतुर्थ्याः साधुत्वानुपपत्तिरित्यर्थः, 'चतुर्थी' कर्मत्वपरचतुर्थी,
साध्वीति शेषः । 'साधुत्वार्थमिति द्वितीयादेः साधुत्वार्थमित्यर्थः, 'न
कारकविभक्तिरिति साध्वीति शेषः, 'तज्जन्योपस्थितिरिति द्वार-

---

(१) सकर्मकक्रियापदसत्त्वे तत्र स्वार्थबोधकपदाद्द्वितीयाया उक्त-
त्वादित्यर्थः ।

क्रिया-कारकपदोपस्थापितयोरेव क्रिया-कारकयोः परस्परमन्वय इति शब्दाध्याहार एव। कर्माक्षेपे तु वक्ष्यामः॥

मित्यादावध्याहारस्थलेऽपि पदज्ञानजन्यपदार्थोपस्थितिरन्वयबोधौपयिकीत्यर्थः, तथाच नोक्तव्यभिचार इति भावः। 'तस्मादिति व्यभिचाराभावेनेति शेषः। नन्वेवं पचतीत्यादौ कर्माक्षेपस्थले अनुमितेन चैत्रादिना कथमन्वयबोधः तव मते पदजन्यपदार्थोपस्थितेरेव शाब्दबोधाङ्गत्वादित्यत आह 'कर्माक्षेप इति, तत्रापि प्रथमाक्षिप्तचैत्रादिपदाध्याहारादेवान्वयबोधः न त्वनुमितचैत्रादिना, कर्तुराक्षेपलभ्यत्वप्रवादस्त्वाप्यायमेवार्थः[1] न त्वनुमानलभ्यत्वमिति भावः। इदञ्चापाततः गेह इत्यादिपदं विनापि यत्र घटोऽस्तीत्याद्यभिहितं तत्र गेह इत्यादिपदं विनापि साधुतया पदाध्याहाराभावेन व्यभिचारस्य दुर्वारत्वात् सकर्मकक्रियादियोगस्य विनैव साधुतानियामकत्वेऽभिप्रायशून्यमुखव्यापकाद् [illegible] विष्णुपूजये-दित्यादिविधिवाक्यस्याप्यसाधुत्वापत्तेः अभिप्रायघटितस्य सकर्मक-क्रियायोगस्य तत्राप्यभावात्[2]। किञ्च साधुत्वार्थं वक्तुर[illegible]-ताभिप्रायविषयत्वरूपस्य सकर्मकक्रियापदादियोग[illegible] [illegible]पदाध्याहारस्य कथमावश्यकत्वं। न च [illegible]

(१) [illegible]पदोपस्थाप्यत्वमेवार्थ इति [illegible]।
(२) [illegible]क्रियापदयोगस्याभावादिति [illegible]।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे आसत्तिवादः ॥०॥

सकर्मकक्रियापदादियोगस्य साधुत्वज्ञापकतया साधुत्वज्ञानार्थं तज्ज्ञानमावश्यकं तदेव पदाध्याहार इति वाच्यं । साधुत्वज्ञानस्य शाब्दबोधाहेतुतया तदज्ञानेऽपि क्षतिविरहात्, अस्तु वा शब्दाध्याहार आवश्यकस्तथापि तस्यान्यपदार्थोपस्थितित्वेन कुतो हेतुत्वं लाघवात् पदार्थोपस्थितित्वेनैव हेतुत्वस्योचितत्वात्तथा च ओदनं पचतीत्यादौ सति तात्पर्यवशे यथाकथञ्चिदुपस्थिताकाङ्क्षाया-देरप्यन्वयबोध एवेत्यध्याहारपक्ष एव सम्यगित्यवधेयम्[1] ।

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये आसत्तिवादरहस्यम् ॥

---

(१) सम्यगिति क्षेममिति ग० ।

अथ तात्पर्य्यवादः ।

तात्पर्य्याधीनं शब्दप्रामाण्यं तच्च तत्परत्वं न तत्साध्यकत्वं पदार्थ-तत्संसर्गयोः शब्दासाध्यत्वात् । अथ

अथ तात्पर्य्यवादरहस्यम् ।

आसत्तिं निरूप्य तात्पर्य्यं निरूपयितुमाह, 'तात्पर्य्याधीनमिति तात्पर्य्याधीनं तात्पर्य्यज्ञानसाध्यधीनं, 'शब्दप्रामाण्यं' शब्दस्यानुभवजनकत्वं, तात्पर्य्यस्य ज्ञानमपि शब्दस्य सहकारीति फलितार्थः । एतेनासत्त्या सह शाब्दबोधस्यैककार्य्यानुकूलत्वं सङ्गतिरिति सूचितं, यद्यपीतरव्यैतरपदेत्यादिना तात्पर्य्यं प्रागेव निरूपितं, तथापि परमतनिराकरणाय पुनरयमारम्भ इति बोध्यं । तत् परं यस्य स तत्परस्तस्य भावस्तात्पर्य्यं, परशब्दस्य कार्य्यवाची, तथाच तत्कार्य्यकत्वमेव तात्पर्य्यं, भवति च घटादिपदं घटादिप्रतीतिकार्य्यकम् अतो घटादिप्रतीतिपरमिति यथाश्रुतशब्दार्थभाग्यं निराकरोति, 'तच्चेति, विषयत्वं सप्तम्यर्थः, अन्वयश्चास्य 'तत्परत्वमित्यनेन, तथाच तद्विषयीभूतं तत्परत्वमित्यर्थः, 'तत्साध्यकत्वं' तत्कार्य्यकत्वं । यद्वा 'तच्च' तात्पर्य्यं, भिन्नत्वं सप्तम्यर्थः, 'तत्परत्वमिति भावप्रधानो निर्देशः, एवं 'तत्साध्यकत्वमित्यपि, तथाच तद्भिन्नं तत्परत्वत्वं न तत्साध्यकत्वत्वमित्यर्थः, 'शब्दासाध्यत्वादिति शब्दाजन्यत्वादित्यर्थः,

तद्गोचरप्रवृत्तिनिवृत्तिसाधकत्वं तत्परत्वं, तच्च भाव्यार्थस्य साक्षात् भूतार्थस्य तु प्रशंसा-निन्दावाक्यस्य प्रशस्त-निन्दितार्थप्रतिपादनद्वारा लाक्षणिकस्य लक्षणीयविषयप्रवृत्ति-निवृत्तिजनकत्वं तत्परत्वमिति चेत्, न, तत्परत्वे तज्ज्ञानं जनयित्वा तत्र प्रवर्त्तकत्वं तत्प्रवर्त्तक-

---

तथाच घटादिपदं घट-तत्संसर्गादिपरमिति व्यवहारो न स्यादिति भावः। 'तद्गोचरप्रवृत्तिनिवृत्तीति तद्गोचरप्रयत्नेत्यर्थः, यथाश्रुते एकस्य वाक्यस्योभयासाधकत्वादसम्भवापत्तेः प्रत्येकसाधकत्वस्य वैकल्पिकलक्षणत्वे तु परस्पराव्याप्त्यापत्तेरिति ध्येयं। 'तच्च' प्रयत्न-कार्य्यकत्वञ्च, 'भाव्यार्थस्य' विधिवाक्यस्य, 'साक्षात्' इष्टसाधनत्वादिज्ञानद्वारा, 'भूतार्थस्य त्विति प्रशंसा-निन्दावाक्यस्य विशेषणं, विधिभिन्नस्य प्रशंसा-निन्दावाक्यस्येत्यर्थः, तच्च परिणतिसुरसं आम्र-फलं परिणतिविरसं पनसफलमित्यादिवाक्यमिति भावः। 'प्रशस्त-निन्दितेति उत्कृष्टत्वापकृष्टत्वेत्यर्थः, सुशब्द-विशब्दयोरुत्कृष्टापकृष्ट-वाचित्वादिति भावः। नन्वेवं लाक्षणिकस्य लक्षणीयगोचरप्रयत्ना-जनकत्वाल्लक्षणीयार्थपरत्वं न स्यादित्यत आह, 'लाक्षणिकस्येति, लक्षणीयानुभवद्वारेति शेषः, 'तत्परत्वं' लक्षणीयपरत्वं, अत इत्यादिः, 'तत्परत्वे' तत्परत्वज्ञाने, 'तज्ज्ञानं' तच्छाब्दबोधं, 'तत्र प्रवर्त्तकत्वं' तद्गोचरप्रयत्नफलोपधायकत्वं, स्वरूपयोग्यतायाः पूर्व्वमपि सत्त्वेन शाब्दबोधानपेक्षितत्वादयथाश्रुतासङ्गतेः, 'तत्प्रवर्त्तकत्वञ्च' तद्गोचरप्र-

त्वञ्च तत्परत्वमिति परस्पराश्रयात् । लाक्षणिकस्यान-नुभावकत्वेऽपि लक्षणीयपरत्वात् काव्यादेः खरूपा-

यत्नोपधायकत्वञ्च, 'इति परस्पराश्रयादिति तद्गोचरप्रयत्नफलोपधाने सति तदुपधायकत्वज्ञानात्तच्छाब्दबोधस्तच्छाब्दबोधे जात एव तद्गोचरप्रयत्नोपधानमित्यन्योन्याश्रय इति भावः । न च तद्गोचर-प्रयत्नस्वरूपयोग्यतावच्छेदकपरत्वं तत्परत्वमिति वाच्यं । तदवच्छेद-करूपापरिचयादिति भावः । ननु तद्गोचरप्रयत्नोपधायकत्वस्य लौकिकप्रत्यक्षं न हेतुर्येन तदुपधानं विना तदुपधायकत्वज्ञानं न स्यात् किन्तु तद्गोचरज्ञानमात्रं तथाचायेतनतदुपधायकत्वस्यापि यथाकथञ्चिदुपनयादिवशाज्ज्ञानं भविष्यतीत्यरुचेराह, 'लाक्षणिक-स्येति, 'अननुभावकत्वेऽपीति, अनुभवजनकत्वं विना[१] प्रयत्नाजनक-त्वादिति[२] भावः । शक्तिलक्षणान्यतरसम्बन्धेन तदन्[३]पदज्ञान-त्वपेक्ष्य लाघवाच्छक्तिसम्बन्धेन तदन्वयप्रतियोगिमत्पदज्ञानत्वेनैव हेतुता शक्तिमपेक्ष्य लक्षणायाः शक्यसम्बन्धात्मकत्वेन गुरुत्वात्, गङ्गायां घोष इत्यादौ च घोषादिपदमेव तीराद्यनुभावकं न तु गङ्गादिपदं तस्य तीराद्यन्वयप्रतियोगिशक्तत्वाभावात्, अन्वयप्रति-योगित्वञ्च साक्षात् परम्परया अन्वयनिरूपकत्वं, तच्चाभेदेऽपि, तेन घटादिपदस्य न घटाद्यनुभावकत्वानुपपत्तिः सर्व्वलाक्षणिकस्थले च

(१) अनुभावकत्वं विनेति ख० ।

(२) प्रयत्नजनकत्वासम्भवादितीति ख० ।

(३) अन्वयप्रतियोगिमदित्यर्थः ।

ख्यानमात्रपरत्वेनापि पर्य्यवसानाच्च। ननु तद्बुद्धिजन-कत्वं तत्परत्वं प्रशंसा-निन्दावाक्यमपि प्रशस्त-निन्दि-तस्वार्थधीहेतुत्वेन तत्परमेव, तच्च ज्ञानं प्रशस्ते सर्वः प्रवर्त्तते निन्दिताच्च निवर्त्तते इति स्वविषये प्रवृत्ति-

---

शाब्दबोध एव नोत्पद्यते किन्तु पदार्थोपस्थितिमात्रमिति लाक्ष-णिकस्याननुभावकत्वादिना प्राचां निगर्भः[१]। ननु गङ्गादिलाक्ष-णिकपदस्यापि तीराद्यनुभवजनकपदार्थोपस्थितिद्वारा तद्गोचरप्रयत्न-जनकत्वमस्त्येव, पदार्थोपस्थितिर्गङ्गादिपदादेव, शाब्दानुभवजनकत्वं पुनर्न तस्य किन्तु तत्समभिव्याहृतशक्तपदस्येत्येव प्राचीनसिद्धान्ता-दित्यस्वरसादाह, 'काव्यादेरिति, 'स्वरूपाख्यानमात्रपरत्वेनापीति'[२] तद्गोचरज्ञानमात्रजनकत्वेनापीत्यर्थः, मात्रपदात् प्रयत्नव्यवच्छेदः, 'पर्य्यवसानाच्च' तत्परत्वाच्चेत्यर्थः, इदमुपलक्षणं विध्यादेरपि इष्टसा-धनत्वादिपरत्वं न स्यात् तद्गोचरप्रयत्नाजनकत्वादित्यपि द्रष्टव्यं। नन्वेवं परिणतिसुरसमाम्रफलमित्यादि प्रशंसा-निन्दावाक्यं प्रवृत्ति-निवृत्तिपरमिति व्यवहारो न स्यात् तस्य प्रवृत्ति-निवृत्तिगोचर-ज्ञानाजनकत्वादित्यत आह, 'तच्चेति, 'ज्ञानं' प्रशस्त-निन्दितस्वार्थ-ज्ञानं, 'प्रशस्ते' प्रशस्तत्वेन ज्ञाते, 'निन्दितात्' निन्दितत्वेन ज्ञातात्, 'तत्परमुच्यत इति प्रशंसा-निन्दावाक्यं प्रवृत्तिनिवृत्तिपरमुच्यत-

---

(१) निष्कर्ष इति ख० ; निगर्व इति क० ।

(२) स्वरूपाख्यानमात्रेतीति ख० ।

निवृत्तौ जनयतीति तत्परमुच्यत इति चेत् । न । गौण-लाक्षणिकयोरननुभावकत्वात् तद्बुद्धिजनने त-त्परत्वमित्यन्योन्याश्रयाच्च । तज्जननयोग्यत्वमिति चेत्, तर्ह्येकचोच्चारणे नानार्थे नानार्थपरत्वं लक्षणायाञ्च मुख्यार्थपरत्वं स्यात् योग्यतायाः सत्त्वात् । नापि तत्-प्रतिपाद्यकत्वं, तात्पर्य्यं विना न तथेत्यन्योन्याश्रयात् ।

इत्यर्थः, तथाच तत्परत्वव्यवहारोभाक्त इति भावः । 'गौण-लाक्षणिकयोरिति गौण-तदितरलाक्षणिकयोरित्यर्थः; गो-वृषावानये-त्यादाविव सादृश्यसम्बन्धेन लक्षणा गौणीवृत्तिः यथा चन्द्रपदस्य मुखे, 'अननुभावकत्वादिति । यद्यपि तस्याननुभावकत्वेऽपि पदा-र्थोपस्थितिमादाय लक्षणसाम्राज्यं, तथापि लक्षणे बुद्धिपदमनुभव-परमित्यभिप्रायात्[१] । यद्वा 'अननुभावकत्वात्' संसर्गज्ञानाजनक-त्वात्, तथाच तयोः संसर्गपरत्वं न स्यादिति भावः । एवमग्रेऽपि, 'तद्बुद्धिजनने' तदनुभवोपधाने, 'तत्परत्वं' तत्परत्वज्ञानं, लक्षणे बुद्धित्वेन प्रवेशे अन्योन्याश्रयोऽपि संसर्गमादाय बोध्यः अन्यथा पदा-र्थोपस्थितिं प्रति तात्पर्य्यज्ञानस्याहेतुतया तामादायैवान्योन्याश्रय-परीहारादित्यवधेयं, एवमग्रेऽपि सर्व्वत्र बोध्यं। 'एकचोच्चारण इति एकमात्रप्रतीतीच्छयोच्चारण इत्यर्थः, 'लक्षणायाञ्चेति वक्तुर्लक्षणीय-मात्रप्रतीतीच्छायाञ्चेत्यर्थः, 'तत्प्रतिपाद्यकत्वमिति स्वजन्यप्रतिपत्ति-

---

(१) इति भाव इति ख० ।

प्रशंसा-निन्दावाक्यस्य[1] प्रवृत्त्याद्यप्रतिपादकत्वात् ला-क्षणिकस्याप्रतिपादकत्वाच्च। अथ गङ्गापदं स्वार्थाविनाभावि तीरं प्रतिपादयत्तत्परमिति चेत्। न।

विषयताकत्वमित्यर्थः, विशेषण-विशेष्यभावभेदाच्च पूर्व्वतो भेदः अन्यत् सर्व्वं पूर्व्ववत्। 'प्रवृत्त्यादीति, तथाच तत्परत्वव्यवहारो न स्यादिति भावः। 'अप्रतिपादकत्वात्' अननुभावकत्वात्, 'स्वार्थाविनाभावीति स्वार्थाविनाभावसम्बन्धेन तीरं प्रतिपादयदित्यर्थः, इदञ्च तादात्म्यसम्बन्धावच्छिन्नस्वार्थाविनाभावरूपशक्यसम्बन्ध एव लक्षणा न तु सम्बन्धसामान्यमिति प्राचीनमतानुसारेण, तथाच तत्प्रतिपत्त्यनुकूलसम्बन्धवत्त्वं तत्परत्वं, सम्बन्धः शक्तिर्लक्षणा च, पद-पदार्थ-सम्बन्धग्रह एव पदार्थस्मृतिद्वारा संसर्गप्रतिपत्त्यनुकूल इति संसर्गमादायापि नाव्याप्तिरिति भावः। 'तेन विनेति स्वार्थाविनाभावेन विनेत्यर्थः। ननु मञ्चसम्बन्धी पुरुषस्तादात्म्येन मञ्चव्याप्य एव एवं पुरुषान्तरमपि तादात्म्येन येन केनचित् सम्बन्धेन मञ्चव्याप्यमेव स्वार्थाविनाभावस्य लक्षणात्वे व्याप्यदिशि तादात्म्यसम्बन्धनियमेऽपि व्यापकदिशि सम्बन्धानियमादित्यरुचेराह, 'गङ्गादिपदमिति गङ्गादिपदं मत्स्यादिपरं तीरपरञ्च मुख्ये स्यादिति योजना, 'मुख्ये' मुख्यमात्राभिप्राये मुख्यार्थप्रतीतीच्छयोच्चारणे इति यावत्, 'मत्स्यादीत्यादिना तीरेतरपरिग्रहः, तीरस्य पृथगुपादानात्, 'अविनाभावस्य' स्वार्थाविनाभावस्य, इदमुपलक्षणं सर्वस्यैव सर्व्वदा सर्व्वपरत्वं

---

(१) प्रशंसादिवाक्यस्येति ख०।

मत्स्याः क्रोशन्तीत्यत्र तेन विनापि पुरुषे तात्पर्य्यात् गङ्गादिपदं मत्स्यादिपरं मुख्ये तीरपरञ्च स्यात् अविनाभावस्य तादवस्थ्यात् । मुख्ये बाधके सतीति चेत्, तर्हि मुख्यार्थपरतैव न स्यात् . न स्याच्च गच्छ गच्छसीत्यत्र गमनाभावपरत्वं । उच्यते । तत्प्रयोजनकत्वं तत्परत्वं तदर्थस्य प्रतीतिः प्रवृत्ति-निवृत्ती च,

---

स्यात्तत्रणाया अव्यावर्त्तकत्वादित्यपि बोध्यं । प्रकृतातिव्याप्तिवारक-विशेषणमाशङ्कते, 'मुख्ये बाधके सतीति मुख्याभिप्राये बाधके सती-त्यर्थः, मुख्यार्थप्रतीतीच्छयानुच्चरितत्वे सतीति यावत्, 'तर्हीति, इदमुपलक्षणं तीरप्रतीतीच्छयोच्चारणे मत्स्य-घोषादिपरं स्यात् येन केनचित् सम्बन्धेनाविनाभावस्य तथापि सम्भवादित्यपि बोध्यं । 'गच्छ गच्छसीत्यत्रेति । गच्छ गच्छसि चेत् कान्त पन्थानः सन्तु ते शिवाः । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवान् ॥ इति विदेशगमनोद्यतं भर्त्तारं प्रति. उत्कण्ठितायाः प्रियाया वाक्य-इत्यर्थः, 'गमनाभावपरत्वमिति व्यञ्जनया गमनाभावपरत्वमित्यर्थः, मुख्यार्थाभिप्रायाभाववत्त्वविरहादिति भावः । श्लोकार्थस्तु हे कान्त त्वं गच्छसि चेत् गच्छ ते तव पन्थानः शिवाः कल्याणरूपाः सन्तु किन्तु ममापि जन्म तत्रैव भूयाद्यत्र भवान् गत इति गमिष्य-तीत्यर्थे अत्यन्तमुत्कण्ठितत्वात् करणापाटवेन तथाभिधानं तस्मा-द्भवद्देशान्तरगमनानन्तरमेव मम मरणं भविष्यतीति त्वया न गन्तव्यमिति व्यङ्ग्यार्थः । 'तदर्थस्येति 'तत्प्रयोजनकत्वमित्यत्र तच्छ-

प्रयोजनत्वञ्च न साध्यत्वं अन्योन्याश्रयात्। नापि प्रतिपाद्येच्छाविषयत्वं, यस्य यदिच्छाविषयः तं प्रति तत्परत्वापत्तेः। तदर्थसाध्यत्वेन इच्छानियम इति चेत्। न। इह धूम इत्यत्र जन्य-ज्ञाप्यभेदेन साध्यस्य बहु-

---

ब्दार्थस्येत्यर्थः, 'साध्यत्वं' उपधायकत्वं, 'अन्योन्याश्रयात्' उक्तान्योन्याश्रयतादवस्थ्यात्, 'प्रतिपाद्येति तद्गोचरप्रतिपाद्येच्छाविषयत्वं तत्परत्वमित्यर्थः, 'प्रतिपाद्यः' श्रोता, भवति च अस्माच्छब्दादेतत्प्रतीतिर्भवत्विति प्रतीतिगोचरेच्छायाः शब्दोऽपि विषय इति भावः। 'यस्येति, श्रोतुः पुरुषस्येति शेषः, 'यदिच्छाविषयः' यद्यद्वस्तुशब्दगोचरमनुष्यानन्वनेच्छाविषयः, 'तं प्रति' तत्पुरुषं प्रति, 'तत्परत्वापत्तेरिति तत्तद्वस्तुपरत्वापत्तेरित्यर्थः। 'तदर्थसाध्यत्वेनेति तत्तच्छब्दार्थविशेष्यकस्वसाध्यत्वप्रकारकत्वेनेत्यर्थः, स्वपदं शब्दपरं, तथाच स्वसाध्यत्वप्रकारकतद्गोचरेच्छाविषयत्वं तत्परत्वं, तच्छब्दार्थः 'प्रतीतिः प्रवृत्ति-निवृत्ती चेत्युक्तमेव, भवति चास्माच्छब्दादमुकगोचरप्रतीतिर्भवतु अमुकगोचरप्रवृत्त्यादिर्वा भवत्वितीच्छा प्रतीति-प्रवृत्त्यादौ शब्दसाध्यत्वप्रकारिका साध्यत्वस्य पञ्चम्यर्थत्वादिति भावः। 'इह धूम इतीति इह धूमशब्दो धूम-तत्प्रवृत्तिपर इतिवाक्यस्यैकदेशोत्कीर्त्तनं, तथाच इह धूमशब्दो धूम-तत्प्रवृत्तिपर इत्यत्रेत्यर्थः, 'साध्यस्य' साध्यपदार्थस्य, 'वाक्यभेदेति एकस्यैव परशब्दस्य विभिन्नप्रकारकज्ञानजनकत्वप्रसङ्गादित्यर्थः, धूमपर इत्यनुरोधात् ज्ञाप्यत्वप्रकारकेच्छाया अभिधेयत्वात्

विधतया वाक्यभेदप्रसङ्गात् पुमिच्छाया नियन्तुमशक्यत्वात्, किन्तु प्रतिपादकेच्छाविषयत्वं तत्परत्वं, यः शब्दः वक्त्रा यदिच्छया प्रयुक्तः स तत्परः, सा चेच्छा

धूमस्य धूमपदजन्यत्वाभावेन स्वजन्यत्वप्रकारकेच्छायास्तत्र बाधितत्वात् धूमप्रवृत्तिपर इत्यनुरोधाच्च स्वजन्यत्वप्रकारकेच्छाया अभिधेयत्वात् धूमगोचरप्रवृत्तेर्धूमपदज्ञाप्यत्वाभावेन ज्ञाप्यत्वघटितस्य तत्र बाधितत्वादिति भावः। यद्वा 'वाक्यभेदप्रसङ्गात्' परशब्दज्ञानभेदप्रसङ्गात्, परशब्दस्यावृत्तिप्रसङ्गादिति यावत्, सकृदुच्चरितेत्यादिव्युत्पत्तेरिति भावः। नन्वित्थं वाक्यभेदे इष्टापत्तिरेव अन्यथा सिद्धान्तेऽप्यगतिरित्यरुचेर्दोषान्तरमाह, 'पुमिच्छाया इति श्रोतुरिच्छाया इत्यर्थः, तथाच यत्र वक्तुरेकगोचरप्रतीतावितिच्छा श्रोतुस्तद्विरुद्धप्रतीतौ तत्र विरुद्धप्रतीतिपरत्वप्रसङ्ग इति भावः। 'प्रतिपादके'ति, 'प्रतिपादकः' वक्ता, 'इच्छाविषयत्वं' जनकतासम्बन्धेन तत्प्रकारकेच्छाविशेष्यत्वं अन्यतासम्बन्धेन तद्विशेष्यकेच्छाप्रकारत्वं वा, एतदेव विवृणोति, 'यः शब्द-' इति, 'यदिच्छया' जनकतासम्बन्धेन यत्प्रकारकेच्छया अन्यतासम्बन्धेन यद्विशेष्यकेच्छया वा, 'प्रयुक्तः' अनुसंहितः, तथाच जनकतासम्बन्धेन तत्प्रकारकवक्त्रिच्छाविशेष्यत्वं अन्यतासम्बन्धेन तद्विशेष्यकवक्त्रिच्छाप्रकारत्वं वा तत्परत्वं विनिगमकाभावात्, भवति चायं शब्दोऽमुकप्रतीतिमान् भवत्वितीच्छाया जनकतासम्बन्धेन प्रतीतिप्रकारिकायाः[१]

---

(१) अयं शब्दः अमुकप्रतीतिमान् भवत्विति जनकतासम्बन्धेन प्रतीतिप्रकारकेच्छाया इति ख०।

प्रतिपाद्यधी-प्रवृत्ति-निवृत्तिविषयेति तत्परत्वं। नानार्थात् श्लिष्टादनेकपदार्थान्वितैकक्रियापदात् मुख्य-लाक्षणिकपराद्वावृत्त्या क्रमेणानेकपदार्थज्ञानं न त्वे-

---

विशेष्यः शब्दः अमुकगोचरप्रतीतिरेतच्छब्दाद्भवत्विती च्छाया जन्यता-सम्बन्धेन प्रतीतिविशेष्यिकायाश्च प्रकारः शब्द इति प्रतीतिपरत्वं शब्दस्य, एतेन प्रवृत्त्यादिपरत्वमपि व्याख्यातं, किन्तु प्रतीतिपरत्वमेव च शाब्दबोधोपयोगि न तु प्रवृत्त्यादिपरत्वं अर्थपरत्वव्यवहारस्तु तद्गो-चरप्रवृत्तिपरत्वनिबन्धनोभाक्त इति भावः। नन्वेवं वक्तृवाक्यस्य श्रोतुः शाब्दबोधप्रवृत्त्यादिपरत्वं न स्यात् वक्तुरिच्छायाः श्रोतृशाब्दबोधाद्यवि-षयकत्वादित्यत आह, 'सा चेति वक्तृनिष्ठा चेत्यर्थः, 'प्रतिपाद्यः' श्रोता, 'विषया' विषयापि। नन्वेवं नानार्थादौ एकदा वक्तुरनेकप्रतीतीच्छया अनेकार्थप्रतीतिप्रसङ्ग इत्यत आह, 'नानार्थादिति, 'नानार्थात्' हर्य्या-दिपदात्, 'श्लिष्टात्' श्वेतो धावतीत्यादौ श्वेतादिपदात्, 'अनेकेति घटं पटञ्चानयेत्यादिवाक्यादित्यर्थः, 'मुख्येति मुख्य-लाक्षणिकबोधकाद्गङ्गा-यां घोष-मत्स्यौ स्त इत्यादौ गङ्गादिपदादित्यर्थः, 'आवृत्त्येति तत्-स्थानस्थितस्य पदस्य पुनरनुसन्धानमावृत्तिः, नेदीयःस्थलान्तरस्थितस्य पदस्य पुनरनुसन्धानमनुषङ्गः, दवीयःस्थलान्तरस्थितस्य पुनरनुसन्धा-नमनुवृत्तिः, सा च सिंहगुहावलोकन-मण्डूकप्लुति-गङ्गास्रोतोवदिति त्रिधा, अश्रुतशब्दानुसन्धानमध्याहार इति बोध्यं(१)। 'सकृदुच्चरित-

---

(१) इति ध्येयमिति क०।

कदैव, सकृदुच्चरितस्य सकृदर्थपरत्वनियमेनैकचोच्चारणे अनेकार्थपरत्वाभावादिति सकलतान्त्रिकैकवाक्यतया[1] वदन्ति ।

वयन्तु ब्रूमः[2] । अनेकपदार्थप्रतीतीच्छया एकमुच्चारणं[3] भवत्येव पुमिच्छाया नियन्तुमशक्यत्वात् ।

स्येति एकपदविषयकैकज्ञानस्येत्यर्थः, 'सकृदर्थपरत्वनियमेन' सकृदर्थमात्रानुभवजनकत्वनियमनिश्चयेन, अनेकार्थानुभावकत्वनियमनिश्चयेनेति यावत्, "सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति सिद्धान्तादिति भावः। 'एकचोच्चारणे' एकस्मिन् वाक्ये, 'अनेकार्थपरत्वाभावादिति' एकदा अनेकार्थप्रतीतिपरत्वाभावादित्यर्थः, उक्तनियमनिश्चयरूपविशेषदर्शनेन वक्तुरेकदा अनेकार्थप्रतीतीच्छानुत्पत्तेरिति भावः। न चैकदा सूर्य-चन्द्रोभयादिप्रतिपादकपुष्पवन्तादिपदज्ञाने कृति-वर्त्तमानत्वैकत्वादिप्रतिपादके लडादिपदज्ञाने कृतिसाध्यत्वेष्टसाधनत्वादिप्रतिपादके विध्यादिपदज्ञाने कर्मत्वैकत्वादिप्रतिपादके द्वितीयादिपदज्ञाने द्व्यादिपदज्ञाने चायं नियमो व्यभिचारीति वाच्यं। यत्पदे एकैकपदमात्रविषयकज्ञानस्यापि नानार्थविषयकानुभवजनकत्वमनुभवसिद्धं तदतिरिक्तपदस्थल एव एतन्नियमाभ्युपगमात्, तच्च घटपद-पटपदादिकमेव[4]। न च तथापि घटौ घटा इत्यादौ एक-

---

(१) सकलतान्त्रिकाणामेकवाक्यतयेति क० ।

(२) अत्र ब्रूम इति ख० ।

(३) अनेकार्थप्रतीतीच्छया एकोच्चारणमिति क० ।

(४) घटपद-पटपदाद्यपदादिकमेवेति क० ।

यदि च तदुच्चारणं नानेकार्थपरं तदावृत्तिरपि न स्यात् तात्पर्य्यनिर्वाहार्थमावृत्तिकल्पनात्। अन्यथैकपरेऽपि तदापत्तेः। अतएव तदुच्चारणस्य उभय-

घटपदमात्रविषयकज्ञानेनैव नानाघटप्रत्यायनाद्व्यभिचार इति वाच्यं। अतएव तत्र सरूपैकशेषाभ्युपगमात् तथाच लुप्तघटपदप्रतिसन्धानादेव घटान्तरबोधः सरूपैकशेषं विना घटादिपदादुद्दिवचनादितो नानाघटविषयकबोधस्याप्रसिद्ध एवेति प्राचीनमतनिष्कर्षः।

'नियन्तुं' विशेषदर्शनेन निवर्त्तयितुं, तदिच्छाप्रतिबन्धकत्वे मानाभावादिति भावः। इदमुपलक्षणं विशेषदर्शनस्यासार्व्वत्रिकत्वान्नेत्यपि बोध्यं। 'तदावृत्तिरपि न स्यादिति' तदावृत्तिकल्पनापि न स्यादित्यर्थः, 'तात्पर्य्येति, 'तात्पर्य्यनिर्व्वाहार्थं' तात्पर्य्यविषयान्वयबोधनिर्व्वाहार्थं, 'आवृत्तिकल्पनादिति' तया आवृत्तिकल्पनादित्यर्थः, 'अन्यथा' तात्पर्य्यविषयान्वयानुपपत्तिं विनाप्यावृत्तिकल्पने, 'एकपरेऽपि' घटोऽस्तीत्यादावपि, 'तदापत्तेः' तदावृत्तिकल्पनापत्तेः,(१) इदमुपलक्षणं अनेकार्थे तात्पर्य्यासत्त्वे आवृत्त्यैवार्थे कथमन्वयबोधः आवृत्त्या बोधनीये अर्थे वक्तुस्तात्पर्य्याभावात्, किञ्च वक्तुस्तादृशाभिप्रायाभावेऽपि यत्र विशेषादर्शनात् श्रोतुरुभयपरत्वभ्रमस्तत्र युगपदुभयानुभवो दुर्व्वार इत्यपि द्रष्टव्यं। ननु अनेकार्थतात्पर्य्यसत्त्वेऽपि न युगपदनेकार्थानुभवः एकैकमात्रविषयकशाब्दबुद्धित्वस्य शब्दजन्यतावच्छेदकत्वादित्यत आह, 'अतएवेति यत-

(१) तदावृत्तिकल्पनापत्तेरिति ख०।

परतायां नास्ति कारणं तस्मात्तुल्यवदनेकार्थोपस्थितौ तात्पर्य्यादिज्ञाने युगपदनेकान्वयबोधो भवति सामग्र्यास्तुल्यत्वात् प्रथममेकस्यान्वयबोधो न तदन्यस्येति[1] नियन्तुमशक्यत्वाच्च। अथ विवादाध्यासितमस्मत्पदोच्चारणं एकपदैकशक्तिविषयमेकमेवानु-

---

एव न तादृशकार्य्य-कारणभावोऽत एवेत्यर्थः, 'तदन्यस्येति' एकैकस्यैव खड्गादिपद-पुष्पवन्तादिपदस्येत्यर्थः, 'उभयपरतायामिति' कृति-वर्त्तमानत्व-सूर्य्य-चन्द्रोभयादिपरताग्रहे इत्यर्थः, 'तुल्यवदिति' युगपदित्यर्थः, 'सामग्र्यास्तुल्यत्वादिति' एकदा सर्वेषामेवानुभावकसामग्रीसत्त्वादित्यर्थः। ननु खड्गादिपद-पुष्पवन्तादिपदातिरिक्तस्थले तादृशकार्य्य-कारणभाव इत्यत आह. 'प्रथममिति'। 'अथेति' एकमात्रानुभवजनकतयोभयवादिसिद्धे अस्मत्पदोच्चारणेऽतः सिद्धसाधनवारणाय 'विवादाध्यासितमिति' विवादाध्यासितत्वञ्चानेकार्थतात्पर्य्याकाङ्क्षादिज्ञानसमवधानत्वं,[2] पदज्ञानस्यैवानुभावकतया बाधवारणाय 'उच्चारणमिति', 'उच्चारणं' ज्ञानं, पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वात्स्वरूपेणाच्चं पश्यतीत्यादौ समूहालम्बनात्पदद्वयानुसन्धाने अंशतो बाधः, 'एकपदेति', सर्व्वस्यैव पदज्ञानस्यान्वयप्रतियोगिपदार्थान्तरविषयकानुभवजनकत्वादप्रसिद्धिवारणाय 'एकशक्तिविषयमिति'। यद्यप्येकशक्तिविषयत्वस्य केवलान्वयितया तद्दोष-

(१) प्रथममेकस्यान्वयबोधोऽनन्तरं तदन्यस्येतीति क०।

(२) विवादपदमिति विवादपदत्वञ्चानेकार्थतात्पर्य्याकाङ्क्षादिज्ञानसमवहितत्वमिति ख०, ग०।

नादवस्थ्यं, तथाप्येकशक्तिविषयत्वं स्वविषयान्वपदनिष्ठशक्तिविषयत्वं, स्वपदं पञ्चीभूतस्यानपरं, विषयत्वञ्च विशेष्यत्वं, अन्यथा जाति-तत्-संसर्गयोरप्यनुभवजननादप्रसिद्ध्यापत्तेः, सिद्धसाधनवारणाय 'एकमे-वेत्यवधारणं, अन्वयप्रतियोगिपदार्थान्तरं जात्यादिकमादायाप्रसि-द्धितादवस्थ्यात् 'एकमिति, नानार्थविषयकस्मृतिजननाद्बाधः स्यादित्यतोऽनुभवत्वेनोपादानं जनकत्वञ्च फलोपधायकत्वं, स्वरूप-योग्यत्वे साध्ये बाधापत्तेः, तेन स्वविषयान्वपदनिरूपितशक्तिविशे-ष्यैकमात्रानुभवोपधायकत्वं साध्यं पर्य्यवसितं । यद्यपि तादृशैकमा-त्रानुभवोपधायकत्वं न तादृशैकभिन्नाननुभावकत्वे सति तादृशै-कानुभावकत्वं, अन्वयप्रतियोगिपदार्थान्तरं जात्यादिकमादायाप्रसि-द्धितादवस्थ्यात्, तथापि तादृशशक्तिविशेष्यद्वयाननुभावकत्वे सति तादृशशक्तिविशेष्यानुभावकत्वं बोध्यं, तच्च स्वविषयान्वपदनिष्ठशक्ति-विशेष्यं यत्तज्जन्यशाब्दबोधविषयस्तन्निष्ठान्योन्याभावाप्रतियोगित्वज-न्यशाब्दबोधविषयस्वविषयान्वपदनिष्ठशक्तिविशेष्यकत्वं, न तु तादृश-शक्तिविशेष्यद्वयविषयकानुभवाजनकत्वे सति तादृशशक्तिविशेष्यानु-भवजनकत्वं, क्वचिन्नानाविषयकानुभवजनकत्वमादायार्थान्तरापत्तेः, अन्योन्याभावस्य प्रतियोगिवृत्तित्वबोध्यः, तेनोभयान्योन्याभावादिक-मादाय न दोषः(१) । यदि चाकाशादिपदात्काश्यत्व-स्वाश्रयत्वा-दिना नानाशक्तिग्रहानन्तरं नैकदोभयप्रकारेणान्वयबोधस्तदा वि-शेष्यपदस्थाने प्रकारपदं निवेश्यापि साध्यान्तरं बोध्यं, अत्रैव सत्यन्त-

(१) साध्याप्रसिद्धिरूपो दोषः ।

भावयति एकपदोच्चारणत्वात् घटपदोच्चारणवत् ।

पदे वा[1] तस्यापि निवेशः कार्य्य इति । 'एकपदोच्चारणत्वादिति एकाक्षपदविषयकज्ञानत्वादित्यर्थः, अन्यथा साध्ये विशिष्याक्षपदोपादानाद्व्यभिचारापत्तेः, साध्ये हेतौ चाक्षपदस्थले यत्तत्पदं निवेश्य सामान्यतोव्याप्तिरवसेया, तेन घटपदोच्चारणस्य न दृष्टान्तत्वविरोधः । अक्षेणाक्षं पश्यतीत्यादौ समूहालम्बनाक्षपदद्वयानुसन्धाने व्यभिचारवारणाय एकेत्यक्षपदविशेषणं, पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वाच्च भागासिद्धिर्न दोषाय । यद्यप्येकाक्षपदविषयकत्वं नाक्षपदद्वयाविषयकत्वे सत्यक्षपदविषयकत्वं,[2] अक्षेण विभीतकं पश्येत्यादौ विभीतकपदाक्षपदगोचरसमूहालम्बने व्यभिचारात्, नाप्यक्षपदसमानशक्यतावच्छेदककपदद्वयाविषयकत्वे सत्यक्षपदविषयकत्वं,[3] यत्र क्रमिकाक्षपद-विभीतकपदज्ञानाभ्यां क्रमिकविभिन्नाक्षपदज्ञानाभ्यां वा समूहालम्बनानार्थविषयकशाब्दबोधस्तत्राक्षपदज्ञाने व्यभिचारापत्तेः । तथापि स्वविशेष्याक्षपदनिष्ठान्योन्याभावप्रतियोगियदक्षपदसमानशक्यतावच्छेदककं पदं तद्विषयकज्ञानाविशिष्टत्वे सत्यक्षपदप्रकारिविशेष्यनिष्ठसमभिव्याहृतपदान्तरलक्षणाज्ञानाविशिष्टज्ञानत्वं विवक्षितं, चरमविशिष्टान्तोपादानादक्षेण घटं पश्येत्यादौ घटपदस्याक्षे लक्षणादशायां घटपदाक्षपदगोचरसमूहालम्बने

(१) अत्रैव वा सत्यन्तपदेनेति क० ।

(२) अक्षपदविषयकज्ञानत्वमिति ख० ।

(३) अक्षपदविषयकज्ञानत्वमिति ख० ।

न व्यभिचारः, अन्योन्याभावस्य प्रतियोग्यवृत्तित्वेऽर्थः,[१] वैशिष्ट्यञ्च स्वाव्यवहितकालावच्छेदेनैकात्मवृत्तित्वं, स्वाव्यवहितत्वञ्च स्वक्षणपूर्वोत्तरक्षणान्यतरासाधारणं,[२] तेन यत्रानुभवसामग्र्यादिप्रतिबन्धकवशेन विनश्यदवस्थाक्षपदस्मरणाद्विभीतकादिपदस्मृत्यात्मिकाक्षपदान्तरस्मृत्यात्मिका वा अक्षपदार्थस्मृतिस्ततो विभीतकादिपदार्थस्मृतिस्ततो मिलिता शाब्दबोधोपधानं तत्राक्षपदज्ञाने न व्यभिचारः, स्वभिन्नाक्षपदज्ञानाविशिष्टत्वेनापि विशेषणीयं, तेनैकस्यैवाक्षपदस्य क्रमेणावृत्त्या यत्र नानार्थविषयकः शाब्दबोधस्तत्र न व्यभिचारः। न च तथापि अक्षे अक्षाणीत्यादौ व्यभिचारस्तत्र एकेनैवाक्षपदज्ञानेन नानार्थबोधादिति वाच्यं। तत्र स्वरूपैकशेषाभ्युपगमेन लुप्ताक्षपदस्मरणादेव नानार्थबोधात् स्वरूपैकशेषं विना नानार्थबोधस्यासिद्धेः। न च घटपदोच्चारणस्य दृष्टान्तत्वानुरोधेन यत्तद्भ्यां सामान्यतो व्याप्तिरेवादरणीया तथा च चन्द्र-सूर्य्याद्युभयोपस्थापकपुष्पवन्तादिपदज्ञाने करणत्वैकत्वादिबोधकतृतीयादिविभक्तिज्ञाने च व्यभिचार इति वाच्यं। तत्तत्पदाविषयकत्वे सतीत्यनेनापि ज्ञानविशेषणात्। यदि च घटपदोच्चारणं व्यतिरेकेण दृष्टान्तः अन्वयदृष्टान्तश्च एकमात्रबोधकतयोभयवादिसिद्धमक्षपदज्ञानं तदा तद्विशेषणानुपादानेऽपि न क्षतिः। न च तथापि कारणान्तरविलम्बेन यत्र फलविल-

---

(१) अन्यथा हेत्वप्रसिद्धिरिति भावः।

(२) तथाचात्र अव्यवहितत्वं स्वध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वं।

यदा एकदोच्चारणे नानाशक्त्या नानार्थाननुभावकं

त्वञ्च व्यभिचार इति वाच्यं । अक्षपदवाच्यनिष्ठतात्पर्य्याकाङ्क्षादि-ज्ञानसमवहितत्वेनापि विशेषणादिति भावः । 'घटपदोच्चारणवदिति एकपरघटपदज्ञानवदित्यर्थः, नानापरघटपदज्ञानस्य पक्षसमत्वात्, 'यद्वेति, अत्राक्षपदमेव पक्षः, साध्ये च 'नानार्थेति स्वरूपकथनं, नाना-शक्त्याननुभावकत्वमात्रं विवक्षितं, तत्राननुभावकत्वमात्रस्य साध्यत्वे अनुभावकेऽक्षतो बाध-व्यभिचारावतः 'नानाशक्त्येति स्वीयनानाशक्त्ये-त्यर्थः, अन्यथा सर्वस्यैव पदस्यान्वयप्रतियोगिपदार्थान्तरविषयकानु-भवजनकत्वेन तद्दोषतादवस्थ्यात्, शक्तिपदं शक्यतावच्छेदकपरं, तेनेश्वरेच्छारूपायाः शक्तेरेकत्वेऽपि न क्षतिः, प्रकारत्वं तृतीयार्थः, तथाच स्वीयनानाशक्यतावच्छेदकप्रकारकानुभवजनकत्वाभावः साध्यः, तथाच यावन्ति अक्षपदशक्यतावच्छेदकानि प्रातिस्विकरूपेणोपादाय प्रत्येकं स्वशक्यतावच्छेदकीभूततत्प्रकारकानुभवजनकत्वे सति तदित-रस्वशक्यतावच्छेदकप्रकारकानुभवजनकत्वाभावकूटः साध्यः समूहाल-म्बनरूपैवानुमितिः, तादृशविशिष्टाभावकूटत्वमेव वा साध्यतावच्छेद-कमिति तु निष्कर्षः । तादृशानुभवजनकत्वस्याक्षेणाक्षं पश्येत्यादौ अक्षपदद्वयविषयकसमूहालम्बने प्रसिद्धं, एकस्यैवाक्षपदस्यावृत्त्यादि-क्रमेणानेकार्थबोधकत्वात् ज्ञानकारणतात्वादिनाऽस्य पदस्याननुभावक-त्वाच्च बाध-व्यभिचार-सिद्धसाधनापत्तिरित्यत उक्तं 'एकदोच्चारण-इति समानविषयकज्ञानसामान्ये इत्यर्थः,(१) तादृशविशिष्टाभाव-

(१) समानविषयकज्ञानमादायेत्यर्थ इति ख०, ग० ।

न व्यभिचारः, अन्योन्याभावस्य प्रतियोग्यवृत्तित्वेर्बाध्यः,[१] वैशिष्ट्यञ्च स्वाव्यवहितकालावच्छेदेनैकात्मवृत्तित्वं, स्वाव्यवहितत्वञ्च स्वध्वंसपूर्वोत्तरक्षणद्वयसाधारणं,[२] तेन यत्रानुभवसामग्र्यादिप्रतिबन्धकवशेन विनश्यदवस्थाक्षपदस्मरणादिभीतकादिपदस्मृत्यात्मिकाक्षपदान्तरस्मृत्यात्मिका वा अक्षपदार्थस्मृतिस्ततो विभीतकादिपदार्थस्मृतिस्ततो मिलिता शाब्दबोधोपधानं तत्राक्षपदज्ञाने न व्यभिचारः, स्वभिन्नाक्षपदज्ञानाविशिष्टत्वेनापि विशेषणीयं, तेनैकस्यैवाक्षपदस्य क्रमेणावृत्त्या यत्र नानार्थविषयकः शाब्दबोधस्तत्र न व्यभिचारः। न च तथापि अक्षे अक्षाणीत्यादौ व्यभिचारस्तत्र एकेनैवाक्षपदज्ञानेन नानाक्षबोधादिति वाच्यं। तत्र स्वरूपैकशेषाभ्युपगमेन लुप्ताक्षपदस्मरणादेव नानाक्षबोधात् स्वरूपैकशेषं विना नानाक्षबोधस्यासिद्धेः। न च घटपदोच्चारणस्य दृष्टान्तत्वानुरोधेन यत्तद्भ्यां सामान्यतो व्याप्तिरेवादरणीया तथाच चन्द्र-सूर्य्याद्युभयोपस्थापकपुष्पवन्तादिपदज्ञाने करणत्वैकत्वादिबोधकतृतीयादिविभक्तिज्ञाने च व्यभिचार इति वाच्यं। तत्तत्पदाविषयकत्वे सतीत्यनेनापि ज्ञानविशेषणात्। यदि च घटपदोच्चारणं व्यतिरेकेण दृष्टान्तः अन्वयदृष्टान्तश्च एकमात्रबोधकतयोभयवादिसिद्धमक्षपदज्ञानं तदा तद्विशेषणानुपादानेऽपि न क्षतिः। न च तथापि कारणान्तरविलम्बेन यत्र फलविल-

---

(१) अन्यथा हेतुत्वप्रसिद्धिरिति भावः।

(२) तथाचात्र अव्यवहितत्वं स्वध्वंसाधिकरणसमयध्वंसानधिकरणत्वे सति स्वप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वं।

प्रकरणादिना भिन्ने तात्पर्य्यप्रमायां भ्रमे वा प्रतिपाद्ययोरेकदैवावृत्तिं विनानेकार्थप्रतीतिर्न तु तत्रैको विलम्बते, एवं घटं पटं वा आनयेत्यत्रानयनस्योभयपरत्वे एकदैवान्वयबोधो न त्वावृत्तिः वाक्यभेदस्त्वर्थभेदात् न ज्ञानभेदात् । गङ्गायां जलं घोषश्च प्रतिवसतीत्यत्र[1] गङ्गापदस्य युगपत्प्रवाह-तीरयोस्तात्पर्य्यग्रहे तयोर्द्वयोरप्येकदोपस्थितौ जल-घोषयोरेकदैवान्वयबोधः । न च युगपद्वृत्तिद्वयापत्तिः, इष्टत्वात्,

द्वेवेत्यर्थः, 'प्रतिपाद्ययोः' अर्थयोः, तथाच यथा नानापुरुषस्य एकदा नानार्थानुभवस्तथा एकस्यापि अन्यथा लाघवात् एकदा नानार्थाननुभावकत्वव्युत्पत्त्या नानापुरुषस्यापि स न स्यादिति भावः । 'आनयनस्य' आनयनप्रतिपादकपदस्य,[2] 'उभयपरत्वे' उभयव्यक्तिपरत्वग्रहे । नन्वेवं भिन्नवाक्यताव्यवहारो न स्यादित्यत आह, 'वाक्येति वाक्यभेदव्यवहारस्त्वित्यर्थः, 'अर्थभेदा'दिति, न तु ज्ञानभेदादिति भावः । 'वृत्तिद्वयापत्ति' वृत्तिद्वयज्ञानस्य शाब्दबोधजनकत्वापत्तिः, 'इष्टत्वा'दिति मुख्यार्थानुभवसामग्री-लक्ष्यार्थानुभवसामग्र्योः समुच्चितपक्षवत् परस्परविरोधित्वे मानाभावादिति भावः । नन्वेवं यष्टीः प्रवेशयेत्यादौ मुख्यार्थान्वयानुपपत्तिविरहस्थले लक्ष्यार्थशाब्दबुद्धि-

(१) तिष्ठतीत्यत्रेति ख० ।

(२) आनयनस्येत्यत्र आनयनपदस्येति पाठः पुस्तकत्रये वर्त्तते ।

तात्पर्य्याद्धि वृत्तिः, न तु वृत्त्यनुरोधात् तात्पर्य्यं, गौण-लाक्षणिकयोरुच्छेदापत्तेः तात्पर्य्यनिर्व्वाहार्थं वृत्तित्वेन

दशायां नियमतोमुख्यार्थशाब्दबोधापत्तिः लक्षणायाः शक्यसम्बन्धात्मकत्वेन लक्षणा-लक्ष्यार्थयोरुपस्थितिकाले शक्ति-शक्यार्थयोरवश्यमुपस्थितेरित्यत आह, 'तात्पर्य्याद्धीति तात्पर्य्यज्ञानसहकाराद्धीत्यर्थः, 'वृत्तिरिति, शाब्दबोधोपधायिकेति शेषः, तथाच मुख्यार्थे तात्पर्य्यज्ञानाभावदशायामेव लक्ष्यार्थमात्रशाब्दबोध इति भावः। ननु वृत्तिज्ञानार्थमेव तत्पर्य्यज्ञानस्यापेक्षितत्वादन्यतः सिद्धे वृत्तिज्ञाने तात्पर्य्यज्ञानसत्त्वमकिञ्चित्करमित्यत आह, 'न त्विति, 'वृत्त्यनुरोधात्' वृत्तिज्ञानानुरोधात्, 'तात्पर्य्यं' तात्पर्य्यज्ञानं अपेक्षितमिति शेषः किन्तु शाब्दबोधहेतुतयेति भावः। शाब्दबोधहेतुत्वे युक्तिमाह, 'गौण-लाक्षणिकयोरिति चन्द्रं पश्य यष्टीः प्रवेशयेत्यादौ मुख्यार्थान्वयानुपपत्तिविरहस्थले गौण-लाक्षणिकार्थशाब्दबोधयोरित्यर्थः, मुख्यार्थानुभवसामग्री-लक्ष्यार्थानुभवसामग्र्योः सत्प्रतिपक्षवत् परस्परविरोधित्ववादिमतेनेति शेषः, 'उच्छेदापत्तेरिति तात्पर्य्यज्ञानस्य शाब्दबोधाहेतुतया मुख्यार्थे तात्पर्य्यासत्त्वेऽप्युभयानुभवसामग्रीसत्त्वादिति भावः। ननु न भवत्येव तत्र लाक्षणिकार्थशाब्दबोधः किन्तु गङ्गायां घोष इत्यादौ यत्र मुख्यार्थान्वयानुपपत्तिज्ञानं तत्रैव लाक्षणिकार्थबोध इत्यत आह, 'तात्पर्य्यनिर्व्वाहार्थमिति मुख्यार्थबाधस्थले तात्पर्य्यविषयलक्ष्यार्थान्वयबोधार्थमित्यर्थः, 'वृत्तित्वेन' शाब्दबोधकारणीभूतज्ञानविषयसम्बन्धत्वेन, 'तयोः,

तयोः कल्पनात् । मुख्य-लाक्षणिकयोरेकैकमात्रपरत्वे तु युगपद्वृत्तिद्वयविरोधः । अनेकान्वयबोधपरत्वे वृत्ति-द्वयविरोधस्य दोषत्वे परिभाषापत्तेः, यत्र मुख्यार्थे शीघ्र-त्वेन प्रथममन्वयबोधः अनन्तरं लाक्षणिकान्वयबोधः तत्रावृत्तिरेव तस्मात् युगपत्तात्पर्य्यग्रहे सति नावृत्तिः किन्त्वनेकार्थपरत्वे सत्येव यत्र तात्पर्य्यग्रहक्रमादन्वय-बोधक्रमः तत्रावृत्तिः प्रथमोच्चारणस्य पर्य्यवसितत्वादि-ति । एवञ्च लोके क्लृप्तत्वात् वेदेऽपीदं तात्पर्य्यमिति तस्य पौरुषेयत्वं ।

गौणी-तदितरलक्षणयोः । 'एकैकमात्रपरत्वे तु' एकैकमात्रपरत्वग्रहे तु, 'वृत्तिद्वयविरोधः' वृत्तिद्वयज्ञानस्य शाब्दबोधजनकत्वाभावः, 'परत्वे' परत्वग्रहे, 'वृत्तिद्वयविरोधस्य' विरोधिवृत्तिद्वयज्ञानस्य, 'दोषत्वे' परस्परफलप्रतिबन्धकत्वाभिधाने, 'परिभाषापत्तेरिति तद-भिधानस्य स्वशास्त्रमात्रपरिभाषापत्तेरित्यर्थः, 'शीघ्रत्वेन' प्रथमोपस्थि-तत्वेन, 'तत्रावृत्तिरेवेति, प्राथमिकपदज्ञानस्य नष्टत्वादिति भावः । 'तात्पर्य्यग्रहक्रमादिति शाब्दधामव्यवहारस्याप्युपलक्षणं, 'प्रथमोच्चार-णस्य' प्राथमिकपदज्ञानस्य, 'पर्य्यवसितत्वादिति नष्टत्वादित्यर्थः, 'इदं तात्पर्य्यमिति वक्तुरिच्छागर्भतात्पर्य्यमित्यर्थः, शाब्दप्रयोजकमिति शेषः, 'तस्य' वेदस्य, 'पौरुषेयत्वमिति पुरुषप्रणीतत्वमित्यर्थः, तच्च पुरुषकण्ठादिजन्यत्वं पुरुषप्रयत्नजन्यत्वं वेति भावः ।

नन्वस्तु तात्पर्य्यानुरोधाद्वेदस्य पुरुषप्रणीतत्वं तथापि नित्यशा-

अथ मीमांसकाः यथोच्चारणपूर्व्वकत्वात् उच्चारणं वेदे परतन्त्रं तथा तात्पर्य्यमपि तात्पर्य्यपूर्व्वकमेवेति

नादिमत्प्रणीतत्वन्तु[1] कुतः पूर्व्वपूर्व्वाध्यापकपरम्पराप्रणीतत्वेनैव तदुपपत्तेरित्यभिप्रायेण शङ्कते, 'अथेति, 'मीमांसकाः' ईश्वरस्य वेदकर्तृत्वानभ्युपगन्तृमीमांसकाः, 'उच्चारणपूर्व्वकत्वादिति सजातीयोच्चारणसापेक्षत्वादित्यर्थः, साजात्यञ्च समानानुपूर्व्वीकत्वं, उच्चारणं ज्ञानं, तत्सापेक्षत्वञ्च तज्जन्यवाक्यार्थज्ञानस्य साक्षात्परम्परया वा प्रयोज्यत्वं, 'उच्चारणं वेद इति करणापाटवाद्यजन्यं वेदस्योच्चारणमात्रमित्यर्थः, उच्चारणञ्च तदनुकूलकण्ठाद्यभिघातः तदनुकूलप्रयत्नो वा, 'परतन्त्रमिति सजातीयोच्चारणानपेक्षं यत्तदन्यमित्यर्थः, अन्यथा साध्याविशेषापत्तेः, अयञ्च मीमांसकस्य स्वमते दृष्टान्तः, नैयायिकमते ईश्वरीयवेदोच्चारणस्यैव सजातीयोच्चारणसापेक्षत्वाभावाद्वाक्यार्थज्ञानं ततो वाक्यार्थप्रतीतीच्छा ततो वाक्यार्थप्रतीतिरूपेष्टसाधनताज्ञानाद्वाक्येच्छा ततो वाक्यरूपेष्टसाधनताज्ञानात् कण्ठाद्यभिघातादौ प्रयत्नस्ततः कण्ठाद्यभिघात इति क्रमेणेश्वरीयकण्ठाद्यभिघातादेः तत्प्रयत्नस्य वा तज्जन्यवाक्यार्थज्ञानप्रयोज्यत्वाभावात्। न च परमतेऽपि वाक्यार्थस्मरणाधीनवेदोच्चारणस्य गुरुकीयवेदोच्चारणस्य च न यथोक्तक्रमेण सजातीयोच्चारणजन्यवाक्यार्थज्ञानप्रयोज्यत्वमिति वाच्यं। स्मृतिस्थलेऽपि स्मरणस्यैवावश्यं साक्षात्परम्परया सजातीयोच्चारण-

(१) ईश्वरप्रणीतत्वन्त्विति ख०।

परतन्त्रं न तु कस्यापि प्रथमं तात्पर्य्यं अनादित्वात् पूर्वपूर्ववाक्यार्थज्ञानेच्छयोच्चारणमुपजीव्याग्रिमाग्रिमस्य तदिच्छयोच्चारणात् तदिच्छया तदुच्चारणमेव हि तत्परत्वं लोक-वेदसाधारणं, सा चेच्छा स्वतन्त्रा परतन्त्रा

अन्यवाक्यार्थानुभवाधीनत्वेन परम्परया प्रयोज्यत्वसम्भवात् शुकस्यानुपूर्वीज्ञानानुपूर्वीगोचरेच्छादिक्रमेण वेदोच्चारणं आनुपूर्वीज्ञानवत् शिक्षकस्यानुपूर्वीप्रयोगाधीनं, तस्यानुपूर्वीप्रयोगश्चावश्यं साक्षात्परम्परया सजातीयोच्चारणजन्यवाक्यार्थज्ञानाधीन इति तथापि परम्परया प्रयोज्यत्वसम्भवादिति भावः। तात्पर्य्यमपीति वेदगोचरतात्पर्य्यमपीत्यर्थः, 'तात्पर्य्यपूर्व्वकमिति सजातीयगोचरवक्तृतात्पर्य्यज्ञानसापेक्षमित्यर्थः, सापेक्षत्वञ्च पूर्व्ववक्तृतज्जन्यवाक्यार्थज्ञानस्य साक्षात्परम्परया प्रयोज्यत्वं, 'परतन्त्रमिति सजातीयगोचरवक्तृतात्पर्य्यज्ञानापेक्षं यत्तदन्यदित्यर्थः, 'कस्यापि' वेदवक्तुः, 'प्रथममिति सजातीयगोचरवक्तृतात्पर्य्यज्ञाननिरपेक्षमित्यर्थः,। ननु सर्गाद्यकालीनवेदवक्तृतात्पर्य्यस्य सजातीयगोचरवक्तृतात्पर्य्यज्ञानसापेक्षत्वमनुपपन्नमित्यत आह, 'अनादित्वादिति सर्गविच्छेदरहितत्वादित्यर्थः,[१] 'पूर्व्वपूर्व्वेति पूर्व्वपूर्व्वाध्यापकस्येत्यर्थः, 'उपजीव्येति वाक्यार्थज्ञानद्वारा उपजीव्येत्यर्थः। ननु स्वतन्त्रतदिच्छयोच्चारणमेव तत्परत्वं कथमध्यापकतात्पर्य्येण निर्वाह्यमित्यत आह, 'तदिच्छयेति, 'लोक-वेद-

---

(१) सर्गविच्छेदविरहादिति घ० ।

वेति न कश्चिद्विशेषः, तदवधारणञ्चानादिमीमांसापरिशोधितन्यायादिदं इत्युभयवादिसिद्धं, अतस्तात्पर्य्यानुरोधेन वेदस्य न पौरुषेयत्वं। नन्वर्थज्ञानं विनोच्चरितवेदात् कथमर्थधीः वाक्यार्थज्ञानं विना तदिच्छयोच्चारणाभावात्, प्रतिपुरुषमुच्चारणभेदादिति चेत्, तर्हि पठ्यमानभारतादपि तथाभूतादर्थधीर्न स्यात् व्यासेन यत्प्रतीतीच्छया उच्चारणं कृतं तज्जातीयत्वात् अर्थज्ञानं विनापि पठ्यमानभारतादर्थधीरिति चेत्, तर्हि वेदेऽपि तुल्यं, तस्मात्पर्य्यकजातीयत्वस्य निया-

---

साधारणमिति, शाब्दप्रमाप्रयोजकमिति शेषः, लाघवादिति भावः। 'स्वतन्त्रेति सजातीयगोचरवक्तृतात्पर्य्यज्ञाननिरपेक्षेत्यर्थः, 'परतन्त्रेति तत्सापेक्षेत्यर्थः, 'अनादिमीमांसा' लाघवादिज्ञानात्मकतर्कः, 'परिशोधितेति सहकृतेत्यर्थः, 'न्यायः' अनुमानं, 'पौरुषेयत्वमिति नित्यज्ञानादिमत्प्रणीतत्वमित्यर्थः। यद्यपि तन्मतेऽप्रसिद्धिस्तथापि वेदवक्तृतात्पर्य्यस्य न नित्यत्वमित्यर्थः। 'अर्थज्ञानं विनेति शुकाद्युच्चरितादित्यर्थः, 'अर्थधीरिति विशेषदर्शिनोऽर्थधीरित्यर्थः, 'तदिच्छया' वाक्यार्थज्ञानेच्छया। ननु पुरुषान्तरस्य तद्वाक्यार्थप्रतीतीच्छा वर्त्तत एव तदिच्छयैवोच्चरितोऽयं वेद इत्यत आह, 'प्रतिपुरुषमिति, 'उच्चारणभेदात्' वाक्यभेदात्, 'तथाभूतात्' अर्थज्ञानं विनोच्चरितात्, 'तज्जातीयत्वादिति, सजातीयमानुपूर्व्या विवक्षितं, 'वेदे' तथा-

मकत्वात् अन्यथा पठ्यमानवेदात्तवाप्यर्थधीर्न स्यात् ईश्वराप्रणीतत्वात् । अथ वेदः पौरुषेयः वाक्यत्वात् भारतादिवत् इति चेत्, को वेदः, अनुगतधर्म्माभावेन तस्य शाखासु नानार्थत्वात्, तथाहि न मुख्यवेदपद-प्रयोगविषयोवेदः मुख्यार्थाकथनात् । नापि शाखा-समुदायः, तस्य वेदनिरूप्यत्वात् समुदायस्याप्रति-पादकत्वेन वाक्यत्वासिद्धेश्च । नापि स्वर्गकामादिवाक्यं,

---

भूतवेदे, 'पठ्यमानवेदादिति शुक-मूर्खादिपठ्यमानवेदादित्यर्थः, 'तव' नैयायिकस्य । ननु मम ईश्वरीयवाक्यार्थप्रतीतीच्छामादाय तत्रोप-पत्तिरित्यत आह, 'ईश्वरेति, प्रतिपुरुषं वाक्यभेदादिति भावः । उच्चारणस्य स्वातन्त्र्ये सिद्धे अर्थसिद्धमेव तात्पर्य्यस्यापि स्वातन्त्र्यं स्वतन्त्रोच्चारणव्यक्तिमूलभूतवाक्यार्थप्रतीतीच्छाव्यक्तेरेव स्वतन्त्रत्वादि-त्यभिप्रेत्योच्चारणस्य स्वातन्त्र्यमेव साधयितुं शङ्कते, 'अथेति, 'कोवेदः' किं वेदत्वं, 'मुख्येति, 'प्रयोगः' वृत्तिः, तथाच मुख्या या वेदपदवृत्तिस्तदाश्रय इत्यर्थः, वेदपदशक्यत्वमिति तु फलितार्थः, शक्यतावच्छेदकज्ञानं विना शक्यशक्तिज्ञानं न सम्भवतीत्यभिप्रायेणाह, 'मुख्यार्थेति अनुगतशक्यतावच्छेदकज्ञानाभावादित्यर्थः, । 'नापीति, सर्व्वत्र 'वेद इत्यनुषज्यते, 'तस्येति, वेदैकदेशस्य शाखात्वादिति भावः । अन्वयानुभवोपधायकत्वं वाक्यत्वमित्यभिप्रायेणाह, 'समुदायस्येति, 'अप्रतिपादकत्वेन' अन्वयानुभवानुपधायकत्वेन, 'असिद्धेश्चेति अनुप-धायकव्यक्तौ भागासिद्धेरित्यर्थः, यद्वा व्याप्यवृत्त्यधिकरणताकाभाव-

स्मृति-भारतादेरपि तथात्वात्। नापि सन्दिग्धकर्तृकवाक्यं, वादिनोर्निश्चयात्। वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशय इति चेत्, तर्ह्यनुमानाभ्यां तस्य संशयो-मध्यस्थसंशयप्रश्नानन्तरञ्चानुमानमित्यन्योन्याश्रयः। नापि विवादाध्यासितं वाक्यं, अनुगतधर्मं विना विवादस्याप्यभावात् भारतादावपि तत्सम्भवाच्च। नापि

मभ्युपेत्येदं, तथाच स्वरूपासिद्धमित्येवार्थः। 'स्वर्गकामादीति शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयार्थकवाक्यमित्यर्थः। 'सन्दिग्धेति सन्दिग्धपौरुषेयत्वकमित्यर्थः, 'निश्चयात्' अन्यतरकोटिनिश्चयात्, 'वाद्यनुमानयोरिति पौरुषेयत्वापौरुषेयत्वसाधकवाद्यनुमानयोरित्यर्थः, 'तुल्यत्वेनेति, अप्रामाण्यसंशयादिति शेषः, 'मध्यस्थस्य संशय इति तज्जन्यकोटिद्वयस्मृत्या मध्यस्थस्य मानसः संशय इत्यर्थः, 'अनुमानाभ्यामिति, कोटिद्वयस्मृत्येति शेषः, 'संशयप्रश्नानन्तरमिति प्रश्नोत्तरसंशयानन्तरमित्यर्थः, पक्षतावच्छेदकज्ञानं विना अनुमानासम्भवादिति भावः। इदमुपलक्षणं भारतादावपि[१] कदाचित् तादृशसंशयसम्भवेनांशतः सिद्धसाधनापत्तिरित्यपि बोध्यं। 'विवादेति मीमांसकानामपौरुषेयत्वप्रतिपत्तिविशेष्यत्वमित्यर्थः, 'अनुगतधर्मं विनेति अनुगतधर्मं विशेष्यतावच्छेदकं विनेत्यर्थः, 'विवादस्येति अपौरुषेयत्वप्रतिपत्तिविशेष्यत्वस्यापीत्यर्थः, 'अभावात्' अनुगतत्वा-

---

(१) तावतापीति ग०।

महाजनानां वेदाकारानुगतव्यवहारात् वेदत्वं जातिः; देवदत्तीयत्वाद्यनुमापकशब्दवृत्तिजातिभिः सङ्करप्रसङ्गात्। किञ्च पौरुषेयत्वं न तदर्थधीजन्यत्वं तदुच्चारणधीप्रभवत्वं वा, अध्यापक-तदुभयधीजन्यत्वेन सिद्धसाधनात्। नाप्युच्चारणस्य सादित्वं, प्रत्युच्चारणस्य सादित्वात्। नापि स्वतन्त्रपुरुषप्रणीतत्वं, पठ्यमानवेद-

---

भावात्, तत्तद्व्यक्तित्वस्य विशेष्यतावच्छेदकत्वेऽपि विशेष्यतावच्छेदकधर्म्मभेदेन विशेष्यताभेदादिति भावः। ननु तादृशप्रतिपत्तिविशेष्यतात्वेनानुगम इत्यत आह, 'भारतेति', 'देवदत्तीयत्वाद्येति, इदमापाततः तादृशजातीनां कार्य्यतावच्छेदकतया नानात्वेऽपि क्षतिविरहात्। वस्तुतस्तु वेदत्वं जातिः प्रत्येकवर्णपरिसमाप्ता व्यासज्यवृत्तिर्वा, आद्ये प्रत्येकवर्णग्रहेऽपि तत्प्रत्ययापत्तेः। न च पूर्व्वपूर्व्ववर्णानुभवजसंस्कारसहकृतेन्द्रियवेद्या चरमवर्णवृत्तिरिति वाच्यं। चरमवर्णातिरिक्तसकलवर्णग्रहेऽपि तदग्रहात् कत्वादिना साङ्कर्य्यस्य दुर्व्वारत्वाच्च। न च कत्व-खत्वादिव्याप्यं नानेति वाच्यं। अनुगतत्वानुपपत्तेः। न द्वितीयः, जातेरतथात्वादित्येव तत्त्वं। साध्यं विकल्पयति, 'किञ्चेति, 'तदर्थेति वेदार्थेत्यर्थः, 'तदुच्चारणेति वेदानुपूर्व्वीविशेषेत्यर्थः, 'सादित्वमिति तथाच साद्युच्चारणजन्यत्वं साध्यमित्यर्थः, 'सादित्वं' प्रागभावप्रतियोगित्वं, उच्चारणं कण्ठाद्यभिघातः, 'प्रत्युच्चारणस्येति उच्चारणमात्रस्यैवेत्यर्थः, तथाच सिद्धसाधनमिति भावः। 'स्वतन्त्रेति सजातीयोच्चारणानपेक्षवक्तृप्रयत्नजन्यत्वमित्यर्थः, अतः 'नापीत्यादिना

भारतयोस्तदभावात्। तज्जातीयः स्वतन्त्रपुरुषप्रणीत इति चेत्, तर्हि पठ्यमानभारतं व्यासस्य न ममेति कथं स्यात्, स्वातन्त्र्यञ्च यद्युच्चारणव्यक्तौ तदा ममाप्युच्चारणसामान्ये न व्यासस्यापि। किञ्च स्वतन्त्रपु-

---

अप्रेतनेन न पौनरुक्त्यं, 'पठ्यमानेति, तथाचांशतोबाध-व्यभिचाराविति भावः। 'तज्जातीय इति, तथाच स्वतन्त्रपुरुषप्रणीतजातीयत्वं साध्यमिति भावः। 'तर्हीति पठ्यमानभारतस्य स्वतन्त्रपुरुषप्रणीतजातीयत्वं वदता तत् स्वतन्त्रपुरुषप्रणीतं न भवतीत्युक्तं भवति, तथाच पठ्यमानभारतं व्यासस्येति व्यवहारो न स्यात् तदीयत्वव्यवहारं प्रति सजातीयोच्चारणानपेक्षतदीयप्रयत्नजन्यत्वस्य नियामकत्वात् अथ(१) साक्षात्परम्परया तदीयप्रयत्नप्रयोज्यत्वमेव तदीयत्वव्यवहारनियामकं तदा न ममेति व्यवहारः कथं स्यादित्यर्थः। साजात्यं तत्तद्व्यक्तित्वेन विवक्षितं शब्दत्वेन वेति विकल्प्य दूषणान्तरमाह, 'स्वातन्त्र्यञ्चेति स्वातन्त्र्यघटकसाजात्यनिरूपकत्वञ्चेत्यर्थः, 'उच्चारणव्यक्ताविति तद्व्यक्तित्वे इत्यर्थः, 'ममापीति ममापि वेदानुकूलप्रयत्नः सजातीयोच्चारणानपेक्ष इत्यर्थः, तथाचास्मदादिप्रयत्नमादाय सिद्धसाधनमिति भावः। 'उच्चारणसामान्य इति शब्दत्वे इत्यर्थः, 'न व्यासस्यापीति न व्यासस्यापि भारतानुकूलप्रयत्नः सजातीयोच्चारणानपेक्षः वेदोच्चारणसापेक्षत्वादित्यर्थः, तथाच व्यभिचार इति भावः। ननु साजात्यमानुपूर्व्या विवक्षितमित्यरुचेराह, 'किञ्चेति, 'स्वतो

---

(१) अथेत्यस्य यदीत्यर्थः।

रुषप्रणीतजातीयत्वं यदि साध्यते तदाद्यभारते स्मृतौ च वाक्यत्वमनैकान्तिकं, न हि तज्जातीयं स्वतन्त्रपुरुषप्रणीतमस्ति । अथ स्वतन्त्रकृतसजातीयं स्वतन्त्रपुरुषप्रणीतमिति साध्यमनिर्धारितविशेषं(१) श्रौती काचिदस्तीति वदिति चेत् । न । पठ्यमानभारते व्यभिचारात् । अर्थं प्रतीत्य तदर्थपरतया प्रतिसन्धीयमानपदत्वं पौरुषेयत्वं तस्य प्रथममावश्यकत्वात्, अत-

---

चेति आद्यस्मृतौ चेत्यर्थः, 'न हि तज्जातीयमिति, तत्पूर्वमिति शेषः, तथाच तज्जातीयत्वस्य भेदघटितत्वात् कप्रत्ययस्य चातीतार्थकत्वाद्व्यभिचार इति भावः । ननु वेदजातीयं पक्षः स्वतन्त्रपुरुषप्रणीतत्वं साध्यं पक्षतावच्छेदकसामानाधिकरण्येन च साध्यसिद्धिरुद्देश्या अतः पठ्यमानवेदे अंशतोबाध इत्याशङ्कते, 'अथेति, 'स्वतन्त्रकृतसजातीयमिति वेदसजातीयमित्यर्थः, 'इति साध्यमिति इति पक्षतावच्छेदकसामानाधिकरण्येनानुमेयमित्यर्थः । ननु सर्गाद्यकालीनोवेदः पक्ष इदानीन्तनोवा, आद्ये आश्रयासिद्धिः चरमे बाध इत्यत उक्तं 'अनिर्द्धारितविशेषमिति अनिश्चयीकृतपक्षनिष्ठविशेषमित्यर्थः, वेदत्वेनैव पक्षत्वादिति भावः । अत्र च साधनक्रियाविशेषणत्वात् द्वितीया, 'पठ्यमानेति, अंशतोबाधाभावेऽपि व्यभिचार इति भावः । 'अर्थेति, 'अर्थं प्रतीत्येति स्वरूपकथनं, 'तदर्थपरतयेति स्वार्थप्रतीतीच्छयेत्यर्थः, 'तस्येति स्वार्थप्रतीतीच्छारूपस्य तत्परत्वस्येत्यर्थः,

---

(१) इत्यनिर्द्धारितविशेषं साध्यमिति क०, ख०, ग० ।

एवानुच्चारितोऽपि मौनिश्लोकः पौरुषेय इति चेत्। न। अर्थज्ञानवताध्यापकेन सिद्धसाधनात्, अन्यथा पठ्यमानवेद-भारताभ्यां व्यभिचारात्। अतएव वेदत्वं स्वतन्त्रपुरुषप्रणीतवृत्ति वाक्यवृत्तिधर्म्मत्वात् भारतत्ववदिति निरस्तं। स्वतन्त्रप्रणीतत्वं हि वाक्यार्थगोचरयथार्थज्ञानचिख्यापयिषयोच्चारणं तथाच तथाविधाध्यापकेन सिद्धसाधनं। एतेन वक्तृत्वानुवक्तृ-

---

'अतएवेति उच्चरितत्वमुपेक्ष्य प्रतिसन्धीयमानत्वोपादनादेवेत्यर्थः। ननु सजातीयोच्चारणानपेक्षत्वरूपेण स्वातन्त्र्येण प्रतीतीच्छा विशेषणीयेत्यत आह, 'अन्यथेति स्वातन्त्र्यविशेषणाप्रक्षेपे इत्यर्थः, 'पठ्यमानवेदेति, इदञ्च पक्षसमेऽपि व्यभिचारस्य सन्दिग्धानैकान्तिकतया दोषत्वनये, 'अतएव' सिद्धसाधन-व्यभिचाराभ्यामेव. 'वाक्येति योग्यताविशिष्टवाक्येत्यर्थः[१], तेन साध्यस्य यथार्थत्वघटितत्वेऽप्ययोग्यवाक्यवृत्तिधर्म्मे न व्यभिचारः। 'चिख्यापयिषया' जननेच्छया,[२] 'तथाविधेति अर्थज्ञानवतेत्यर्थः, उक्तरूपेण स्वातन्त्र्येणेच्छाविशेषणे तु पठ्यमानवेदादिवृत्तितदेदव्यक्तित्वादौ व्यभिचार इति भावः। 'एतेनेति पठ्यमानवेद-भारतयोर्व्यभिचारेणेत्यर्थः, 'वक्तृत्वानुवक्तृत्वयोरिति, सजातीयध्वंसाव्याप्योच्चारणकर्तृत्वं वक्तृत्वं, तद्व्याप्योच्चारणकर्तृत्वमनु-

---

(१) योग्यतादिघटितवाक्येत्यर्थ इति ख०।

(२) वाक्यार्थज्ञानजननेच्छयेति क०।

त्वयोर्भेदस्य लोकसिद्धत्वात् सवक्तृकत्वं साध्यमिति निरस्तं। नापि सजातीयोच्चारणानपेक्षोच्चारणं पौरुषेयत्वं पठ्यमानवेदे बाधात् भारते व्यभिचाराच्च। उच्यते, शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्य-

---

वक्तृत्वमिति भावः। 'भेदस्य लोकसिद्धत्वादिति, तथाच साध्यापातेन सिद्धसाधनं तस्य वक्तृत्वाभावादिति भावः। 'सजातीयेति सजातीयस्य यदुच्चारणं ज्ञानं तदनपेक्षं तदप्रयोज्यं यदुच्चारणं कण्ठाद्यभिघातस्तज्जन्यत्वमित्यर्थः, पूर्व्वं तादृशप्रयत्नजन्यत्वं साध्यमिह च तादृशकण्ठाद्यभिघातजन्यत्वमिति भेदान्न पौनरुक्त्यं, सजात्यमानुपूर्व्या विवक्षितं, प्रयोज्यत्वञ्च स्वजन्यवाक्यार्थज्ञान-तदिच्छादिद्वारा पूर्व्वोक्तक्रमेण बोध्यं, 'पठ्यमानवेद इति, पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वे च यत्रास्मदादीनां वेदसमानानुपूर्व्वीकं वाक्यं करणापाटवादिना दैववशसम्पन्नं तत्रांशतः सिद्धसाधनमिति भावः। किं वेदत्वमिति पक्षतावच्छेदकप्रश्ने समाधत्ते, 'शब्देति शब्दातिरिक्तं शब्दोपजीविप्रमाणातिरिक्तञ्च यत्प्रमाणं तज्जन्यप्रमितिविषयार्थको यस्तदन्यत्वे सति शब्दजन्यवाक्यार्थज्ञानेनाजन्योयः प्रमाणशब्दस्तत्त्वमित्यर्थः, तथाचेदमेव पक्षतावच्छेदकमिति भावः। अत्र व्यासादिचाक्षुषादिप्रत्यक्षजन्ये दृष्टार्थकभारतादौ दृष्टार्थकायुर्व्वेदादौ चातिव्याप्तिवारणाय सत्यन्तं, इत्यञ्च तदुभयातिरिक्तं प्रमाणं चक्षुरादिरेव तज्जन्यप्रमितिविषयार्थकतया तयोर्नातिव्याप्तिः। न च दृष्टार्थक-

वेदस्य सत्यतया कथं तत्रातिव्याप्तिरिति वाच्यं। परैस्तस्य वेदत्वा-
नभ्युपगमेन तस्यासत्यत्वादन्यथा तत्र सत्यत्वप्रतीकाभावेनाव्याप्त्यापत्तेः
तस्य वेदत्वाभावेऽपि पुराण-वेदव्याख्यानादेरिवाध्ययननिषेधोवास-
निकः शूद्रादीनां।

यत्तु गेहे घटोऽस्तीत्यादिप्रत्यक्षजन्ये गेहे घटोऽस्तीत्यादिलौकिक-
वाक्येऽतिव्याप्तिवारणाय सत्यन्तमिति, तन्न, वह्निमणयुक्त्या अदृष्ट-
जनकाध्ययनविषयत्वे सतीत्यनेनापि विशेषणीयतया तत्रातिव्याप्ति-
विरहात्।

प्रमित्यविषयार्थकत्वमात्रोक्तावसम्भव इति जन्यान्तं प्रमितिविशे-
षणं, शब्दोपजीव्यतिरिक्तत्वमात्रस्य प्रमाणविशेषणत्वेऽप्यसम्भवः शब्दो-
पजीव्यतिरिक्तेन प्रमाणेन वेदाद्यात्मकशब्देन वेदार्थस्य प्रमापणादतः
शब्दातिरिक्तत्वमपि प्रमाणविशेषणं, शब्दपदञ्च शब्दज्ञानपरं, अन्यथा
शब्द-तदुपजीव्यतिरिक्तप्रमाणेन वेदाद्यात्मकशब्दज्ञानेन वेदार्थस्य
प्रमापणादसम्भवतादवस्थ्यात् शब्दस्य चाप्रमाणत्वाच्च तमादायास-
म्भवः, शब्दज्ञानातिरिक्तत्वमात्रोक्तावप्यसम्भवः शब्दज्ञानातिरिक्त-
प्रमाणेनानुमानेन वेदार्थस्य प्रमापणादतस्तदुभयातिरिक्तत्वमुपात्तं,
इत्यञ्चानुमानेन साध्यादिप्रसिद्ध्यर्थं वेदस्यापेक्षणाच्चासम्भवः। नन्वत्र
शब्दोपजीवित्वं न शब्दजन्यत्वं व्याप्तिज्ञानादेरप्यतथात्वेनासम्भवापत्तेः।
नापि तन्मूलकत्वं, तथापि चक्षुरादेर्दीपदानादिप्रयत्नादिमूलका-
दृष्टद्वारा विधिवाक्यमूलकतया तज्जन्योपनीतभानमादायासम्भवाभा-
वेऽपि श्रवणेन्द्रियजन्योपनीतभानविषयार्थकत्वादव्याप्त्यापत्तेः श्रवणस्य
नित्यतया अदृष्टद्वारापि शब्दामूलकत्वात् आत्म-मनःप्रभृतिनित्य-

प्रमाणजन्यानुमित्यादिविषयार्थकतया असम्भवापत्तेश्च । अथ द्वितीय-
प्रमाणपदमसाधारणप्रमाणपरं तेनात्म-मनःप्रभृतिप्रमाणमादाय ना-
सम्भवः, प्रमित्यविषयार्थकेत्यत्र प्रमितिश्च उभयत्रादिसिद्धत्वेन स्वज-
न्यज्ञानसामान्याकारत्वेन च विशेषणीया, स्वपदमन्यत्वप्रतियोगि-
वाक्यपरं तेन श्रवणजन्योपनीतभानमादाय नाव्याप्तिः, न वा आत्मा
इच्छानामात्मत्वादित्याद्यनुमितिविषययत्किञ्चिदर्थके स्वर्गकामो य-
जेतेत्यादिवेदेऽव्याप्तिः, न वा अभिधेयं प्रमेयत्वात् अभिधेयत्वादि-
त्यादिसामान्यप्रत्यासत्तिजज्ञानमूलकानुमितिविषयार्थकत्वात्[1] अस-
म्भवः । न च तथासत्यदृष्टस्य जन्यमात्रहेतुतया चक्षुरादेर्जन्यप्रमाण-
मात्रस्यैवादृष्टद्वारा विधिवाक्यमूलकत्वेन श्रवणस्यैव शब्दमूलक-
प्रमाणातिरिक्तासाधारणप्रमाणत्वात् श्रवणायोग्यार्थकदृष्टार्थकभार-
तादावतिव्याप्त्यापत्तिरिति वाच्यं । अदृष्टाद्वारकशब्दमूलकत्वस्य
विवक्षितत्वेन चक्षुरादेरपि तादृशप्रमाणातिरिक्तासाधारणप्रमाणतया
तज्जन्यप्रमितिविषयार्थकत्वेन तत्रातिव्याप्तिविरहात्, अदृष्टाद्वारक-
शब्दमूलकप्रमाणस्य विशेषणज्ञानादिविधया शब्दजन्यपदार्थोपस्थिति-
वाक्यार्थानुभवप्रयोज्यानुमानव्यक्तिरेव प्रसिद्धा । न चैवं भेर्य्यादिकं
शब्दजनकमित्यादिदृष्टार्थके भारतादौ तादृशवेदे चातिव्याप्तिः
शब्दज्ञानातिरिक्ततादृशशब्दमूलकप्रमाणातिरिक्तासाधारणप्रमाणज-

---

(१) सामान्यलक्षणाजन्यानुमानजन्यानुमितिविषयार्थकत्वादित्यर्थः, शब्द-
मूलकत्वव्यावर्त्तनाय सामान्यलक्षणाजन्येति अभिधेयत्वप्रमेयत्वादि-
सामान्यलक्षणाजन्येत्यर्थः ।

न्यस्वजन्यज्ञानसमानाकारतदर्थविषयकोभयवादिसिद्धप्रमितेरप्रसिद्धेः शब्दस्य च चक्षुराद्ययोग्यत्वाद्भेर्य्यादिषु श्रवणायोग्यत्वात् मनःप्रभृतेषु साधारणत्वात् अनुमानादेर्विशेषणज्ञानविधया शब्दज्ञानजन्यत्वेनादृष्टाद्वारकशब्दमूलकत्वादिति वाच्यं। शब्दमूलकत्वपदेन शब्दवृत्तिज्ञानप्रयोज्यताविशेषस्य विवक्षितत्वात् तथाचानुमानजन्यप्रमितिविषयार्थकत्वादेव न तत्रातिव्याप्तिरिति चेत्। न। तादृशप्रमाणातिरिक्तासाधारणप्रमाणेन वेदनिष्ठाकाङ्क्षादिज्ञानेन वेदार्थस्य शाब्दबोधजननादसम्भवापत्तेः, आकाङ्क्षादिज्ञानस्याकाङ्क्षादिलिङ्गकानुमितिकरणत्वेन त्रिक्षणावस्थतया धारावाहिकद्वितीयशाब्दबोधकारणत्वेन चासाधारणप्रमाणत्वात्, शाब्दबोधान्यत्वेन प्रमितिविशेषणे शब्दज्ञानातिरिक्तत्यस्य वैयर्थ्यप्रसङ्गात्। अथ यज्जन्यस्वजन्यज्ञानसमानाकारज्ञानसामान्यं साक्षात्परम्परयातिपरम्परया अदृष्टाद्वारकशब्दज्ञानजन्यज्ञानप्रयोज्यं तत्त्वं शब्दोपजीविप्रमाणत्वं. स्वपदमन्यत्वप्रतियोगिवाक्यपरं, स्वजन्यज्ञानसमानाकारत्वञ्च स्वजन्यज्ञानं यत्र यत्र येन येन रूपेण यद्यद्विषयीकरोति तत्र तत्र तेन तेन रूपेण तत्तदवगाहित्वं, इत्थञ्च मनसोऽपि न वेदस्थले तदतिरिक्तप्रमाणत्वं मनसा वेदार्थगोचरानुभवजननेऽवश्यं साक्षात्परम्परया अतिपरम्परया वा वेदज्ञानजन्यवेदार्थज्ञानापेक्षणात्, एवं वेदनिष्ठाकाङ्क्षादिज्ञानमपि न तदतिरिक्तप्रमाणं तेनापि वेदार्थगोचरशाब्दबोधजननेऽवश्यं शब्दज्ञानजन्यपदार्थोपस्थितेरपेक्षणात् एवं क्रमेणात्ममनोयोगशरीरादेरपि न वेदस्थले तदतिरिक्तप्रमाणत्वं, लौकिकवाक्य-दृष्टार्थकभारतादिस्थले लौकिकवाक्य-भारतादिज्ञानं तज्जन्य-

पदार्थोपस्थितिवाक्यार्थानुभवमूलकानुमानस्यापि तादृशं प्रमाणं(१) प्रसिद्धं, चक्षुरादिना कदाचित् दृष्टार्थकभारतादिजन्यज्ञानसमानाकारज्ञानजनने विशेषणज्ञानविधया ज्ञानलक्षणप्रत्यासत्तिविधया वा तादृशभारतादिज्ञानजन्यज्ञानापेक्षणात् तादृशभारतादावतिव्याप्तिरतः सामान्यपदोपादानं,(२) चक्षुरादिजन्यज्ञानसामान्यस्य शब्दज्ञानप्रयोज्यत्वाभावात् चक्षुरादेरपि तदतिरिक्तप्रमाणतया चक्षुरादिजन्योपनीतभानसामान्यप्रत्यासत्तिजज्ञानविषयत्वस्य आत्म-मनः-शरीरादेरपि तथात्वेन तज्जन्यानुमित्यादिविषयत्वस्य च वेदार्थे सत्त्वादसम्भव इति स्वजन्यज्ञानसमानाकारत्वं ज्ञानविशेषणं, इत्थञ्च चक्षुरादिना आत्मादिना वा वेदसमानाकारज्ञानजननेऽवश्यं साक्षात्परम्परया वेदज्ञानजन्यवेदार्थज्ञानापेक्षणाद्वेदस्थले तेषामपि तदतिरिक्तत्वाभावान्नासम्भवः। न च तथापि सार्वज्ञ्यान्यथानुपपत्त्या योगजधर्मस्यापि निर्विकल्पकजनकतया योगजधर्मजन्यवेदार्थगोचरज्ञानात्मकोपनयसहकारेण चक्षुरादिजन्यवेदजज्ञानसमानाकारज्ञानस्य सामान्यान्तर्गतस्य शब्दज्ञानजन्यज्ञानोपयोगित्वाभावेन(२) वेदस्थलेऽपि

---

(१) शब्द-तदुपजीविप्रमाणमित्यर्थः ।

(२) चक्षुरादिजन्यकादाचित्कज्ञानस्य विशेषणविधया शब्दज्ञानजन्यज्ञानप्रयोज्यत्वेऽपि विशेषणज्ञानस्य शब्दवृत्तिज्ञानजन्यज्ञानत्वेन प्रयोजकत्वविरहात् ज्ञानलक्षणप्रत्यासत्तिविधया शब्दज्ञानजन्यज्ञानप्रयोज्यत्वेऽपि उभयवादिसिद्धज्ञानाप्रयोज्यत्वविरहात् शब्दज्ञानजन्यवाक्यार्थानुभवरूपज्ञानलक्षणप्रयोज्यत्वेऽपि ज्ञानलक्षणप्रत्यासत्तिलक्षणालौकिकसन्निकर्षस्य परैरनभ्युपगमात् सामान्यपदं व्यर्थमिति ध्येयं ।

(२) शब्दज्ञानजन्यज्ञानप्रयोज्यत्वाभावेनेति ख०, ग० ।

चक्षुरादेर्न निरुक्तशब्दोपजीविप्रमाणत्वमिति वाच्यं। उभयवाद्यसिद्ध-ज्ञानाप्रयोज्यत्वेन तादृशज्ञानसामान्यस्य विशेषणीयत्वात्। शब्दा-नुभवजनितस्मृतिपरम्पराधीनानुमितिविषयतया वेदार्थस्यासम्भव-इत्यतः परम्परयातिपरम्परया वेति, अदृष्टस्य कार्य्यमात्रहेतुत्वेन चक्षुरादिना गेहे घटोऽस्तीत्यादौ लौकिकवाक्यार्थविषयकज्ञानजनने-ऽपि नियमतोऽदृष्टद्वारा विधिजन्यज्ञानापेक्षणात् तादृशप्रमाणाति-रिक्तप्रमाणजन्यप्रमितिविषयार्थकस्याप्रसिद्धा असम्भव इत्यतोऽदृष्टा-द्वारेति, शब्दज्ञानप्रयोज्यत्वमात्रोक्तौ भेर्य्यादिकं शब्दजनकमित्या-दिशब्दघटितदृष्टार्थकभारतादौ तादृशवेदे चातिव्याप्तिः प्रमाणमा-त्रेणैव तदर्थगोचरज्ञानजननेऽवश्यं शब्दज्ञानापेक्षणादतः शब्दज्ञान-जन्यज्ञानेति। न चैवमपि तदतिव्याप्तिस्तदवस्था प्रमाणमात्रेणैव तदर्थगोचरज्ञानजनने शब्दज्ञानजन्यस्य शब्द-शब्दत्वविशिष्टज्ञानस्य नियमतोऽपेक्षणादिति वाच्यं। वृत्त्या शब्दज्ञानजन्यज्ञानस्य विव-क्षितत्वात्। न चैवं शब्दातिरिक्तविशेषणत्ववैयर्थ्यं वेदाद्यात्मकशब्देन वेदार्थगोचरज्ञानजनने(१) अवश्यं शब्दज्ञानजन्यपदार्थोपस्थितेरपेक्ष-णात् शब्दोपजीविप्रमाणातिरिक्तत्वविशेषणेनैव तस्यापि वारणात् शब्दज्ञानजन्यवाक्यार्थानुभवप्रयोज्यमित्युक्तौ च वेदगतपदजन्यपदार्थ-स्मृतिजन्यानुमानेन वेदार्थस्य प्रमापणादसम्भवापत्तेरिति वाच्यं। यज्जन्यपदेन शब्दज्ञानाजन्यज्ञानद्वारा यज्जन्यत्वस्य विवक्षितत्वात् वेदार्थगोचरशाब्दबोधस्य शब्दज्ञानाजन्यज्ञानद्वारा न वेदाद्यात्मक-

---

(१) वेदार्थगोचरानुभवजनन इति ख०।

शब्दजन्य इति तद्बहिर्भावः । अखण्डभेदप्रतियोगिघटकतया जन्यत्वविशेषस्य संसर्गत्वपरिचायकतया वा अतिव्याप्त्यावारकत्वेऽपि न शब्दज्ञानाजन्यज्ञानद्वारेत्यस्य वैयर्थ्यं, सोपादेयस्यैव वा शब्दातिरिक्तत्वं विशेषणं, मूले च शब्द-शब्दोपजीवीत्यत्र द्वितीयशब्द-पदस्य ज्ञानपरतया शब्दज्ञानोपजीवीति समुदायार्थः । न चात्मा शब्दजन्यज्ञानवानित्यादिशब्दे शाब्दबोधघटितदृष्टार्थकभारतादौ तादृशवेदे चातिव्याप्तिः प्रमाणमात्रेणैव तदर्थगोचरज्ञानजननेऽवश्यं शब्दज्ञानजन्यतात्पर्यार्थज्ञानस्य साक्षात् परम्परया वा अपेक्षणात् ज्ञानज्ञाने(१) साक्षात्परम्परया वा विषयतया ज्ञानस्य प्रयोजकत्वादिति वाच्यं । अतः प्रमाणान्तरजन्यज्ञाने शब्दजन्यत्वस्यमात्तथैव सामान्यलक्षणप्रत्यासत्त्या शब्दजन्यज्ञानस्य ज्ञानं ततस्तज्ज्ञानसहकारेणैवानुमानादात्मनिष्ठशब्दजन्यज्ञानप्रत्यक्षत्वेन तदनुमानजन्यतदर्थविषयकज्ञानस्य शब्दज्ञानजन्यज्ञानप्रयोज्यत्वाभावात्तस्यान्यप्रमितिविषयार्थकत्वेनातिव्याप्तिविरहात् । द्वितीयप्रमाणपदस्य स्वरूपकथनं, प्रमितिविषयार्थकत्वाच्च प्रमितिपदं स्वजन्यज्ञानसमानाकारानुभवमात्रपरं तादृशज्ञानमात्रपरं वा, प्रमात्वपर्य्यन्तप्रवेशे प्रयोजनविरहात्, स्वजन्यज्ञानसमानाकारेति विशेषणात् प्रमेयत्वाभिधेयत्वादिसामान्यलक्षणप्रत्यासत्तिजज्ञानमादायैनेन प्रमेयमभिधेयवदित्यनुमित्यात्मकज्ञानेन सर्व्वस्यैव वेदार्थस्य विषयीकरणेऽपि नासम्भव इति । नैवं । आत्मा शब्दवानित्यादिशब्दत्वविशिष्टघटित-

---

(१) ज्ञानजनन इति ख० ।

दृष्टार्थकभारतादौ तादृशवेदे चातिव्याप्तेः प्रमाणमात्रेणैव तदर्थविषयकज्ञानजननेऽवश्यं शाब्दत्वजातेर्ज्ञानमपेक्ष्यते तज्ज्ञाने च[1] साक्षात्परम्परया वा शाब्दबोधस्य ज्ञानं प्रयोजकं जातिग्रहस्य व्यक्तिग्रहप्रयोज्यत्वनियमात्, शाब्दबोधविषयकज्ञाने च साक्षात्परम्परया वा विषयविधया शाब्दज्ञानं प्रयोजकमिति तथापि लिङ्गशब्दोपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकान्यत्वादिति। उच्यते। शाब्दज्ञानं परम्परया अतिपरम्परया वा शब्दज्ञानप्रयोज्यस्य यज्ज्ञानं तदतिरिक्तज्ञानविषयार्थकान्यत्वे सतीति सत्यन्तार्थः, प्रमाण-तज्जन्यत्वादिप्रवेशे प्रयोजनविरहात्, परम्परया अतिपरम्परया वा शाब्दज्ञानप्रयोज्यातिरिक्तेन वेदात्मकशब्दजन्यशाब्दबोधेन वेदार्थस्य विषयीकरणादसम्भववारणाय शाब्दज्ञानातिरिक्तेति ज्ञानविशेषणं, शाब्दज्ञानातिरिक्तज्ञानेनानुमित्यादिना वेदार्थस्य विषयीकरणादसम्भव इति परम्परया अतिपरम्परया वा शब्दज्ञानप्रयोज्यातिरिक्तेति ज्ञानविशेषणं, इत्थञ्चानुमित्यादेः साध्यप्रसिद्ध्यादिद्वारा परम्परया वेदज्ञानप्रयोज्यत्वान्नासम्भवः। शब्दज्ञानप्रयोज्येत्यत्र स्वजन्यज्ञानसमानाकारकज्ञानजनकत्वेन शब्दो विशेषणीयः स्वपदमनन्यत्वप्रतियोगिवाक्यपरं, तेनादृष्टस्य कार्य्यमात्रे हेतुतया ज्ञानमात्रस्यैवादृष्टद्वारा परम्परया गङ्गास्नानादिबोधकविधिवाक्यज्ञानप्रयोज्यत्वेऽपि न तादृशज्ञानान्यज्ञानाप्रसिद्धिः, गङ्गास्नानादिबोधकविधिवाक्यस्य गेहे घटोऽस्तीति

(१) तज्ज्ञाने चेति ख० ।

लौकिकवाक्यसमानार्थकत्वाभावात्, न वा आत्मा शाब्दवानित्यादावतिव्याप्तिः आत्मा शाब्दवानित्यादिमानसलौकिकप्रत्यक्षानुमित्यादेरपि स्वसमानार्थकशब्दज्ञानप्रयोज्यातिरिक्ततया शाब्दज्ञानातिरिक्ततया च तद्विषयार्थकत्वात् आत्मा शाब्दवादित्यादिमानसप्रत्यक्षादेः स्वविषयशाब्दबोधजनकीभूतशब्दज्ञानप्रयोज्यत्वेऽपि तस्य शब्दस्यात्मा शाब्दवानिति वाक्यासमानार्थकत्वात् । नापि वेदगतप्रत्येकपदजन्यप्रत्येकपदार्थोपस्थितिप्रयोज्यानुमितिविषयार्थकतया असम्भवः प्रत्येकपदस्यापि वेदजन्यज्ञानसमानाकारकज्ञानजनकतया पदार्थोपस्थितिमूलकानुमितेरपि तादृशशब्दज्ञानप्रयोज्यत्वात् । अत एव शब्दघटितदृष्टार्थकभारतादौ[1] तादृशदृष्टार्थकवेदे च नातिव्याप्तिः तदर्थविषयकज्ञानमात्रस्य शब्दज्ञानप्रयोज्यत्वेऽपि[2] स्वजन्यज्ञानसमानाकारज्ञानजनकशब्दज्ञानाप्रयोज्यत्वात् । न च तथापि आत्मा शब्दप्रत्यक्षसमवायीत्यादिरूपशब्दघटितदृष्टार्थकभारतादौ तादृशदृष्टार्थकवेदे चातिव्याप्तिः आत्मा शब्दप्रत्यक्षसमवायीति शब्दस्यापि तदर्थान्तर्गतत्वेन[3] तदर्थविषयकज्ञानमात्रस्यैव स्वजन्यज्ञानसमानाका-

---

(१) मैत्र्यादिकं शब्दजनकमित्यादिदृष्टार्थकभारतादावित्यर्थः ।

(२) विशेषणज्ञानादिविधया साक्षात्कारणीभूतशब्दज्ञानप्रयोज्यत्वस्य तत्र स्वीकारे व्यापारद्वारा कारणीभूतशब्दज्ञानप्रयोज्यत्वस्य निखिलवेदार्थविषयकशाब्दबोधे न्याय्यत्वात् चरमव्याख्याने शब्दातिरिक्तपदं व्यर्थमेवेति ध्येयं यदि तत्र न स्वीक्रियते तदा अत्रापि अस्वीकारादत एवेत्यादिकमसङ्गतमित्यपि ध्येयं ।

(३) आत्मेत्यादिवाक्यार्थान्तर्गतत्वेनेत्यर्थः ।

रज्ञानजनकशब्दज्ञानप्रयोज्यत्वादिति वाच्यं। शब्दज्ञानप्रयोज्यपदेन शब्दवृत्तिज्ञानप्रयोज्यताविशेषस्य विवक्षितत्वात्। न च तथाप्यात्मा शाब्दवानित्यादावतिव्याप्तिरस्मदवस्था आत्मा शाब्दवानितिवाक्य-जन्यशाब्दबोधस्य आत्मा शाब्दवानितिवाक्यार्थतया तदर्थविषयक-ज्ञानमात्रस्यैव शाब्दबोधद्वारा(१) आत्मा शाब्दवानितिवाक्यवृत्ति-ज्ञानप्रयोज्यत्वादिति वाच्यं। यथायं घट इत्यादियत्किञ्चिच्छाब्दे शाब्दत्वं गृहीत्वा तथैव सामान्यलक्षणप्रत्यासत्त्या निखिलशाब्दबोधस्य ज्ञानं ततस्तेनैव ज्ञानेनात्मा शाब्दवानिति निखिलशाब्दबोधप्रका-रिकानुमितिस्तत्रैव तदनुमितिव्यक्तेस्तदर्थविषयिकाया आत्मा शाब्दवानितिवाक्यवृत्तिज्ञानाप्रयोज्यत्वात् सामान्यलक्षणाजन्यज्ञाने विषयस्याहेतुत्वात् सामान्यलक्षणाजन्यज्ञानस्योभयवादिसिद्धत्वात्त्वेऽपि तदनुमितिव्यक्तेरुभयवादिसिद्धत्वात् परमते शाब्दत्वप्रकारक-यत्किञ्चिच्छाब्दज्ञानादेव निखिलशाब्दबोधप्रकारकतदनुमितिव्यक्ते-रुत्पत्तेः। न च तथापि शब्दवृत्तिज्ञानाप्रयोज्यया सुखत्वं दुःखा-सम्भिन्नवृत्ति सुखमात्रवृत्तिधर्मत्वादित्यनुमित्या विषयीकृतार्थक-वेदेऽव्याप्तिः किं बहुना प्रमेयत्वाभिधेयत्वादिसामान्यलक्षणप्रत्या-सत्तिजज्ञानाधीनेन प्रमेयमभिधेयवदित्यनुमित्यात्मकज्ञानेन सर्व्व-स्यैव वेदार्थस्य विषयीकरणादसम्भव एवेति वाच्यं। तदन्यज्ञानस्य(२) स्वजन्यज्ञानसमानाकारत्वेन विशेषणीयत्वात्, स्वजन्यज्ञानसमानाका-

---

(१) विषयविधया शाब्दबोधद्वारेत्यर्थः।

(२) शब्दवृत्तिज्ञानप्रयोज्यातिरिक्तज्ञानस्येति शे०।

रत्वञ्च स्वजन्यज्ञानविषयितातिरिक्तविषयिताशून्यत्वं, स्वजन्यज्ञानं यत्र यत्र येन येन रूपेण यद्यद्विषयीकरोति तत्र तत्र तेन तेन रूपेण तत्तदवगाहित्वं वा, स्वपदमन्यत्वप्रतियोगिवाक्यपरं, अतएव वेदस्यापि यत्किञ्चिदर्थस्य यागादेरिच्छानुमित्यादिविषयत्वेऽपि नाव्याप्तिः, अतएव च वेदैकदेशो न वेदः यद्विशिष्टभागस्य तादृशज्ञानाविषयार्थकत्वं तस्यैव तत्त्वात् । न च तथापि सार्व्वज्ञ्यान्यथानुपपत्त्या योगजधर्म्मस्यापि निर्व्विकल्पकजनकतया योगजधर्म्मजन्यस्वजन्यज्ञानसमानाकारप्रत्यक्षविषयार्थकत्वाद्वेदस्यासम्भवः मोक्षहेतुश्रवणाप्रयोज्यत्वेन तदन्यज्ञानस्य विशेषणेऽपि सुखत्वसामान्यलक्षणप्रत्यासत्तिजस्वर्गीयसुखज्ञानजन्येन सुखं दुःखासम्भिन्नं सुखत्वादित्यादिकूटलिङ्गकानुमानेन "यन्न दुःखेनेत्यादिवेदार्थस्य विषयीकरणादव्याप्तिः तादृशेश्वरज्ञानविषयार्थकत्वादसम्भवश्चेति वाच्यं । उभयत्वादिसिद्धत्वेनापि तदन्यज्ञानस्य विशेषणीयत्वात् योगजधर्म्मप्रत्यक्ष-कूटलिङ्गकानुमितेर्भगवज्ज्ञानस्य च प्रामाकरासिद्धत्वात् । न च तथापि वेदार्थस्य योगजधर्म्ममूलकानुमानविषयत्वादसम्भव इति वाच्यं । कारणबाधेन तदनुमितिव्यक्तेः प्रामाकरासिद्धत्वात्, मोक्षहेतुश्रवणाप्रयोज्यत्वेन वा तदन्यज्ञानं विशेषणीयं । अथ तथापि प्रमेयत्वादिसामान्यलक्षणप्रत्यासत्त्या वेदगतपदार्थ-वेदगतपदार्थतावच्छेदकानां ज्ञानं ततः प्रमेयत्वादिरूपेण वेदगतपदार्थेषु प्रमेयत्वादिरूपेण वेदगतपदार्थतावच्छेदकानां प्रमेयत्वादिहेतुना अनुमितिस्ततः प्रमेयत्वादिमोषेण केवलपदार्थतावच्छेदकप्रकारेण केवलपदार्थानां स्मरणं ततस्तत्स्मरणसहकारेणानुमानादेदन्यज्ञानसमा-

साकारज्ञानमिति क्रमेण वेदार्थस्य तादृशज्ञानविषयत्वादसम्भवः। न च तादृशानुमानजन्यवेदजन्यज्ञानसमानाकारज्ञानं कारणबाधेन न प्राभाकरसिद्धं तेन सामान्यलक्षणानभ्युपगमादिति वाच्यं। तेन सामान्यलक्षणानभ्युपगमेऽपि पक्षतावच्छेदक-साध्यतावच्छेदकादिप्रकारेण यत्किञ्चिद्व्याप्तिज्ञानादेव पक्षतावच्छेदकाश्रये यावति साध्यतावच्छेदकाश्रयाणां यावतामनुमित्यभ्युपगमात् कारणबाधाभावादिति चेत्, न, मोक्षस्य बहुधा निवारितत्वात् प्राचामसम्मतत्वाच्च। न च तथापि सुखत्वादिसामान्यलक्षणया खण्डशः सुखादेरुपस्थित्या सुखं दुःखासम्भिन्नमित्यादिप्रत्यक्ष-तन्मूलकानुमित्यादिसम्भवेन तद्विषयार्थकत्वादसम्भव इति वाच्यं। तज्ज्ञानातिरिक्तत्वेनापि ज्ञानस्य विशेषणीयत्वादिति सत्यन्तदलनिष्कर्षः।

वह्निना सिञ्चतीत्याद्ययोग्यवाक्यजन्यज्ञानसमानाकारज्ञानस्य भ्रमत्वनियमेन उभयवाद्यसिद्धतया तत्रातिव्याप्तिः, एवं हुंफडित्यादिस्तोत्रेऽप्यतिव्याप्तिः तस्य निरर्थकत्वेन सत्यन्तदलस्य तत्रापि सत्त्वात् मन्त्र-ब्राह्मणयोर्वेदत्वमित्यभियुक्तस्य स्मरणात्तस्याऽलक्ष्यत्वादतः प्रमाणशब्दत्वमिति, स्तोत्रस्य च निरर्थकतया न प्रमाणशब्दत्वं तस्य वेदत्वाभावेऽप्यध्ययननिषेधो वाचनिक एव शूद्रादीनामिति भावः। प्रमाणशब्दत्वञ्च प्रमितिजनकतया नैयायिकसिद्धशब्दत्वं तेन परनये क्षितेः सकर्तृकत्वबोधकवेदे[1]नाव्याप्तिः। न चैवं तन्नयेऽप्रमाणीभूत-क्षितिःसकर्तृकेत्यादिवाक्येऽतिव्याप्तिः[2] तस्य शब्दाप्रयोज्यक्षितिः-

(१) यतो वा इमानि भूतानि जायन्ते इत्याद्याकारवेदे इत्यर्थः।

(२) भारतादिवाक्येऽतिव्याप्तिरिति ख०।

सकर्तृकेत्याद्यनुमितिविषयार्थकत्वेऽपि तादृशानुमितेरीश्वरविशेषि-प्रभाकरासिद्धत्वात् तेनासत्ख्यातेरनङ्गीकारादिति[१] वाच्यं। स्वज-न्यान्तदलेनैव[२] तस्य निरसनीयत्वात् तस्यानुपदमेव स्फुटीभवि-ष्यति। स्वर्गसाधनत्वाद्यनुमापकाश्वमेधादौ आत्म-मन.प्रभृतिनित्य-प्रमाणवर्गेषु चातिव्याप्तिवारणाय शब्दत्वोपादानं, मन्वादिस्मृति-भारतादावतिव्याप्तिवारणाय जन्यान्तं, तस्य वेदजन्यवाक्यार्थज्ञान-जन्यत्वात् वेदादर्थं प्रतीत्य स्मृत्यादिप्रणयनात्, शब्दपदं वाक्यार्थ-पदस्यात्र स्वरूपकथनं, अन्यज्ञानाजन्येत्येव विवक्षितं तयोर्निवेशे प्रयोजनविरहात्, न्यायनये वेदस्यापीश्वरीयज्ञानजन्यत्वादसम्भववार-णाय जन्यपदं, जन्यज्ञानजन्यता च फलोपधानरूपा ग्राह्या तेन वेदज्ञानं प्रत्यपि जन्यज्ञानस्य स्वरूपयोग्यत्वेऽपि नासम्भवः।

यत्तु शब्दजन्यवाक्यार्थज्ञानेतरस्य शाब्दज्ञानेत्यर्थः, इति तन्न, भारतार्थस्मरणजन्यभारतेऽतिव्याप्तेः तस्य स्मरणजन्यत्वेन शाब्दज्ञाना-जन्यत्वात्, शाब्दज्ञानाजन्यत्वपदेन शाब्दज्ञानाप्रयोज्यत्वविवक्षणेऽपि भारतगतप्रत्येकपदजन्यप्रत्येकपदार्थस्मृतिसहकारेण मनसा अनुमा-नादिना वा विशिष्टभारतार्थं प्रतीत्य प्रयुक्ते भारतेऽतिव्याप्तेः। न च अन्यज्ञानाजन्येत्युक्तौ सत्यन्तविशेषणं प्रमाणशब्दत्वमित्यत्र प्रमाण-विशेषणस्य व्यर्थमिति वाच्यं। दृष्टार्थकवेदे अतिव्याप्तिवारणाय सत्यन्तस्य डिम्फडित्यादिस्तोत्रे अतिव्याप्तिवारणाय प्रमाणत्वविशेष-णस्योपादानात्।

---

(१) अन्यथाख्यातेरनङ्गीकारादितीति ख०।

(२) शब्दजन्यवाक्यार्थज्ञानाजन्यदलेनेत्यर्थः।

अथ परमते ईश्वरानभ्युपगमात् अन्यज्ञानाजन्यत्वं न क्वापि वेदइत्यसम्भवः । न च तन्मते वेदस्य नित्यत्वात् नासम्भव इति वाच्यं । तथा सति वर्णानां नित्यत्वं विना तद्घटितवेदानुपूर्व्या नित्यत्वासम्भवेन शब्दमात्रस्यैव नित्यतया भारतादेरपि नित्यत्वाद्भारतादावतिव्याप्तितादवस्थ्यादिति चेत्, न, अन्यज्ञानाजन्यत्वपदेन अन्यज्ञानजन्यत्वेन यन्नैयायिकसिद्धं तदन्यत्वस्य विवक्षितत्वात् । अतएव तन्मतेऽपि अन्यपदानुपादानेऽसम्भव इति अन्यपदं सार्थकं, अखण्डाभावघटकत्वाच्च न स्वमते नैयायिकसिद्धेत्यस्य वैयर्थ्यं, स्वमतमात्रसाधारणलक्षणपक्षे तु तद्देयमेव, श्रुत्याद्युक्तवेदसमानार्थकस्मृत्यादेरपि तावत्पदविषयकजन्यज्ञानजन्यत्वान्नातिव्याप्तिः, एवं यन्त्रादिस्थले वर्णाद्यभिव्यक्तिनये यन्त्रोत्थितस्मृत्यादावपि नातिव्याप्तिः तस्यापि वादकजन्यज्ञानजन्यत्वात्, वाय्वाद्यभिघातजस्मृत्यादौ मानाभावः वाय्वाद्यभिघातस्य वर्णोत्पादकत्वे मानाभावात्, तत्पूर्व्वमवश्यं कस्यचित् अन्यज्ञानसत्त्वेन तस्यैव फलोपधानात्मकजन्यतायास्तत्र सत्त्वाच्च ज्ञानत्वेन वर्णत्वेन कार्य्यत्वेन च कार्य्य-कारणभावात् । न च तथापि भगवदुच्चरितमनुस्मृत्यादावतिव्याप्तिरिति वाच्यं । तस्य भगवदुच्चरितत्वे मानाभावात्, भगवद्गीता च वेद एव तत्रैव "भगवद्गीतासूपनिषत्स्विति श्रवणादिति न तत्रातिव्याप्तिः, अस्तु वा तदन्यत्वमपि विशेषणं वेदातिरिक्ते शब्दोपजीविप्रमाणमात्रगम्यार्थके भगवदुक्तवाक्यान्तरे मानाभावात् ।

अथ मास्त्वतिव्याप्तिस्तथाप्याधुनिकोक्तवेदे स्मृति-भारतादेरर्थं प्रतीत्य प्रयुक्ते दैववशसम्पन्ने वेदे चाव्याप्तिः तस्य न्यायमते अन्य-

प्रमित्यविषयार्थकत्वे सति शब्दजन्यवाक्यार्थज्ञानाजन्य-प्रमाणशब्दत्वं वेदत्वम्, ईश्वरीयप्रमायाः(1) अजन्यत्वात्,

---

ज्ञानजन्यत्वादिति चेत्, न, प्रमाणशब्दत्वपदेन एतादृशप्रमाणशब्द-जातीयत्वस्य विवक्षितत्वात् साजात्यञ्चानुपूर्व्या तेन नातिप्रसङ्गः, तथा साजात्यत्वाभावेव च शब्दत्वपदं इत्यञ्चादिवेदमादायैव सर्व्वत्र लक्षणसङ्गतिः नित्यानुमेयवेदस्योभयवाद्यसिद्धतया न लक्ष्यः तेन तच्चानुपूर्व्वीविरहेणोक्तजातीयत्वाभावेऽपि न क्षतिः । न च भगव-दुक्तवेदव्याख्याने वेदैकदेशे चातिव्याप्तिरिति वाच्यं । अदृष्टजन-काध्ययनविषयतावच्छेदकावच्छिन्नत्वे सतीत्यनेनापि विशेषणीयत्वात् वेदव्याख्यानाध्ययनं हि नादृष्टजनकमिति ।

उक्तानान्तु वेदत्वमखण्डोपाधिः तच्च यावद्वर्णवृत्ति वेदव्यवहारः प्रमाणसिद्धस्तावत्सु व्यासज्यवृत्ति तेन प्रत्येकवर्णवृत्ति न तत्प्रत्यक्षं, यद्वा शक्तिविशेषसम्बन्धेन पदवत्त्वं तत्(2) यथा धातुत्वाख्यातत्वादि, विशेषपदोपादानाच्च वेदसंज्ञकशरीरादावतिव्याप्तिः सत्त्वानानु-गमस्याऽदोषतया शक्यतावच्छेदकभेदेन शक्तिरूपस्य सम्बन्धस्य नाना-त्वेऽपि न क्षतिः । ग्रन्थस्तु प्रकृतोपयिकपक्षतावच्छेदकमात्रनिर्वचन-पर इति प्राञ्चरिति संक्षेपः ।

नन्विदं कुतो वेदत्वं वेदानामीश्वरीयवाक्यार्थज्ञानजन्यत्वमास-न्यान्तदसिद्धस्यासम्भवितत्वादित्यत आह, 'ईश्वरीयप्रमाया' इति ईश्व-

---

(1) ईश्वरप्रमाया इति क०, ख० ।

(2) वेदपदवत्त्वमेव वेदत्वमिति ख० ।

वेदार्थस्यानुमानादिविषयत्वेऽपि अनुमानादेर्वेदोपजीवकत्वात्। स्मृतीनां भारतादिभागस्य च वेदसमानार्थकत्वेऽपि शब्दजन्यधीजन्यत्वात् वेदार्थं प्रतीत्य तत्प्रणयनात्। सजातीयोच्चारणानपेक्षोच्चरितजाती-

---

रीयवाक्यार्थज्ञानस्येत्यर्थः, तथाच शब्दजन्यत्वविशेषणेनैव तद्वारणमिति भावः। शब्दोपजीव्यतिरिक्तत्वदलस्य व्यावृत्तिं कुर्वन्तो दर्शयति, 'वेदार्थस्येति, 'अनुमानादीति अनुमित्यादीत्यर्थः, आदिपदादुपमितिपरिग्रहः "यन्न दुःखेनेत्यादिस्वर्गपदादिशक्तिग्राहकवेदार्थस्योपमितिविषयत्वादिति भावः। 'अनुमानादेः' अनुमित्यादेः। अजन्यान्तदलस्य व्यावृत्तिं कुर्वन्तो दर्शयति, 'स्मृतीनामिति, 'भारतादिभागस्य' भारतादेर्भागविशेषस्य दृष्टार्थकेतरभारताद्येकदेशस्येति यावत्, 'वेदसमानार्थकत्वेऽपि' तादृशप्रमित्यविषयार्थकत्वेऽपि। किञ्च पौरुषेयत्वमिति साध्यप्रश्ने समाधत्ते, 'सजातीयेति स्वसमानजातीयवाक्यस्य यदुच्चारणं ज्ञानं तदनपेक्षं तदप्रयोज्ययदुच्चारणं कण्ठाद्यभिघातः प्रयत्नो वा तज्जन्यजातीयत्वमित्यर्थः, स्वसमानजातीयत्वं तज्जन्यजातीयत्वञ्चानुपूर्व्या विवक्षितं, इत्यञ्चाध्यापकोच्चारणमादाय न सिद्धसाधनं; पूर्वाध्यापकोच्चरितवेदज्ञानाद्वेदार्थज्ञानं ततो वेदार्थप्रतीतिरूपेष्टसाधनताज्ञानाद्वेदे इच्छा ततो वेदरूपेष्टसाधनताज्ञानात् तत्तदनुकूलकण्ठाद्यभिघातादौ प्रयत्नस्ततः कण्ठाद्यभिघात इति क्रमेणाध्यापकोच्चारणस्य पूर्वाध्यापकोक्तस्वसमानानुपूर्वीकवाक्यज्ञानप्रयोज्यत्वनियमादिति भावः। वेदाद्भारतार्थं

यत्वं पौरुषेयत्वं, आद्यभारतेऽपि तज्जातीयत्वान्न व्यभिचारः । अथवा वेदत्वं सजातीयोच्चारणानपेक्षो-

---

प्रतीत्यैवाद्यभारतप्रणयनाद्भारते व्यभिचारवारणाय स्वसमानजा-तीयेति, एवञ्च तस्य विजातीयवेदज्ञानप्रयोज्यत्वेऽपि स्वसमानजा-तीयभारतज्ञानाप्रयोज्यत्वान्न व्यभिचारः, पद्यमानवेद-भारतयो-र्बाध-व्यभिचारवारणाय सजातीयत्वमिति अतएव वेदसमानानु-पूर्व्वीकभारत-स्मृत्याद्योरपि न व्यभिचारः, तत्राप्याद्यवेदमादाय तज्जातीयत्वसत्त्वात् प्रयोज्यत्वपदेन स्वजन्यवाक्यार्थज्ञानद्वारा प्रयो-ज्यत्वमेव विवक्षितं अन्यथा भारते व्यभिचारापत्तेः आद्यभारतो-च्चारणस्यापि भारतनिष्ठभारतार्थप्रतीतिरूपेष्टसाधनताज्ञानात्मकस्य भारतज्ञानस्य प्रयोज्यत्वात् । न चास्मदादीनां वेदसमानानुपूर्व्वीकं वाक्यं करणापाटवादिना दैववशसम्पन्नं तच्च तद्वेदवाक्ये तादृश-तद्वाक्योच्चारणजन्यत्वसत्त्वेन तद्वाक्यमादायांशत. सिद्धसाधनं एवं घुणाक्षरन्यायेनोच्चरितस्मृत्यादितोवाक्यार्थं प्रतीत्य दैववशादस्य वेदसमानानुपूर्व्वीकं वाक्यमुच्चरितं तच्च तादृशोच्चारणजन्यत्वसत्त्वेन तद्वाक्यमादायांशतः सिद्धसाधनं इति वाच्यं । पक्षतावच्छेदकाव-च्छेदेन साध्यसिद्धेरुद्देश्यत्वात्, अतएव निखिलवेदानामेकधर्म्मावच्छे-देन पक्षत्वे ग्रन्थकृतो निर्भर इति[१] दिक् । 'तज्जातीयत्वादिति, तज्जातीयत्वस्य भेदाघटितत्वात् निष्प्रत्ययार्थातीतत्वस्य चाविव-क्षितत्वादिति भावः । 'सजातीयोच्चारणेति सजातीयोच्चारणानपे-

---

(१) निर्भर इतीति ख० ।

चरितवृत्ति प्रमाणतावच्छेदकवाक्यवृत्तिधर्म्मत्वात् स्मृतित्ववत्। यद्वा वेदाः शब्दाजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याः प्रमाणशब्दत्वात् भारतवत्। न च पठ्यमाने वेदे बाधः भारते मन्वादिस्मृतौ च व्यभिचारः तेषां द्विकर्तृकत्वात्, तादृशज्ञानजन्यजातीयत्वं वा साध्यं, तत्राप्येतदभावादेव वेदेऽपौरुषेयत्वव्यवहारः।

चोच्चरितजातीयमात्रवृत्तित्वं, तेन देववशमम्पन्नवेदमादाय न सिद्धसाधनं, द्वितीयमुच्चारणं वा पूर्व्ववत् अर्थज्ञानविशिष्टत्वेन विशेषणीयं, 'प्रमाणेति, अचेदानीन्तनवेदादिमात्रवृत्तितत्तद्व्यक्तित्वेदानीन्तनवेदत्वादिधर्म्मे व्यभिचारवारणाय 'प्रमाणतावच्छेदकेति, प्रमाणतावच्छेदकत्वं अध्ययनानुष्ठानान्यतरविधिविषयतावच्छेदकत्वं, भवति च "स्वाध्यायोऽध्येतव्यः" "स्मृतिरध्यातव्येत्यादिविधिविषयतावच्छेदकं वेदत्व-स्मृतित्वादि, उच्चरितत्वस्य शब्दधर्म्मत्वादश्वमेधत्वादौ व्यभिचारवारणाय[१] 'वाक्यवृत्तीति, अश्वमेधत्वादेरपि "अश्वमेधेन यजेतेत्याद्यनुष्ठानविधिविषयतावच्छेदकत्वात्। वस्तुतस्तु प्रमाणतावच्छेदकत्वमध्ययनविधिविषयतावच्छेदकत्वं, 'वाक्यवृत्तीति च स्वरूपकथनमिति ध्येयम्। 'शब्दाजन्येति शब्दज्ञानाप्रयोज्येत्यर्थः, तेन न तादृशस्मृत्यादिजन्यत्वमादायांशतः सिद्धसाधनमर्थान्तरं वा, आनुपूर्वीयथार्थज्ञानजन्यतयांशतः सिद्धसाधनस्यार्थान्तरस्य वार-

---

(१) शब्दधर्म्मत्वादश्वमेधत्वादावर्थवृत्तिधर्म्मे व्यभिचारवारणायेति ग०।

नन्वप्रयोजकमिदं वाक्यार्थगोचरयथार्थज्ञानपूर्व्वकत्वमेव शब्दप्रामाण्ये तन्त्रं न तु तादृशज्ञानस्य शब्दाजन्यत्वमपि गौरवात्, अन्यथा वेदेऽपि तव द्विकर्तृकत्वेन प्रामाण्यं स्यात् लोके तथा दर्शनात्, एवञ्च अनादिमीमांसासिद्धन्यायेनावगततात्पर्य्यात् वेदादर्थं प्रतीत्य पूर्व्वपूर्व्वाध्यापकेन उच्चरिताद्वेदादुत्तरोत्तरस्याप्यध्ययनतदर्थप्रतीतिरित्यनादितैवातः किं स्वतन्त्रपुरुषेण तत्प्रयोजनस्य परतन्त्रादेव सिद्धेः । किञ्च

णाय 'वाक्यार्थेति स्ववाक्यार्थेत्यर्थ इति द्रष्टव्यं। 'तादृशेति, अत्र स्वसजातीयेति शब्दविशेषणं देयं तेन स्मृतौ भारते च न व्यभिचारतादवस्थ्यं, 'एतदभावादिति स्वसमानजातीयोच्चारणानपेक्षोच्चरितजातीयत्व-शब्दाजन्यवाक्यार्थज्ञानजन्यजातीयत्वयोरभावादित्यर्थः, 'अन्यथेति प्रत्यक्षादिना गृहीतार्थकलौकिकवाक्ये तथा दर्शनेन तत्कल्पने इत्यर्थः, 'लोके' लौकिकवाक्ये। 'मीमांसासिद्धेति लाघवादिज्ञानसहकृतेत्यर्थः, 'न्यायः' अनुमानं, 'अध्ययनतदर्थप्रतीतिरिति अध्ययने सति तदर्थप्रतीतिरित्यर्थः, ततो वेदप्रयोग इति शेषः। 'स्वतन्त्रपुरुषेणेति सजातीयोच्चारणानपेक्षवेदोच्चारयितृपुरुषेणेत्यर्थः, 'परतन्त्रादेवेति तादृशोच्चारणसापेक्षवेदोच्चारयितृपुरुषादेवेत्यर्थः। ननु सर्गाद्यकालीनवेदप्रयोगस्य वेदजन्यवाक्यार्थज्ञानप्रयोज्यत्वं न सम्भवति प्रलये वेदोच्छेदादतो भगवत्सिद्धिरित्यत आह, 'किञ्चेति, 'पूर्वकाल इति हेतुतावच्छेदकावच्छिन्नभिन्नस्यैव

पूर्व्वकालो न वेदशून्यः कालत्वात् वर्त्तमानकालवत् । न चांशे बाधः अंशे चाश्रयासिद्धिः, अंशत्वेनानुपादानात्, पूर्व्वकालो न वेदशून्य इत्युद्देश्यप्रतीतेरसिद्धेः नांशतः सिद्धसाधनं, तथा पूर्व्वकालीनं वेदाध्ययनं गुर्व्वध्ययनपूर्व्वकं अध्ययनत्वात् इदानीन्तनाध्ययनवत् । न च लिप्यनुमितवेदाध्ययनेन व्यभिचारः, लिपेरध्ययनपूर्व्वकत्वात् । न चैवं भारताध्ययनमपि तथा स्यात्, तस्य भारतादावेव व्यासादिकर्तृकत्वेन कथनादिति । उच्यते । वेदप्रामाण्याधीनं तत्प्रामाण्यमित्या-

---

पक्षतावच्छेदकत्वात् पूर्व्वेति एतत्पूर्वकाल इत्यर्थः, 'न वेदशून्य इति, यद्यपि वेदवानित्येव वक्तुमुचितं तथापि पराभिमतवेदशून्यत्वाभीवत्वप्रकारकसिद्ध्यर्थमित्थमभिधानं, 'अंशे' प्रलयरूपे, 'अंशे चेति सर्गकाले चेत्यर्थः, 'आश्रयासिद्धिः' सिद्धसाधनात् पक्षत्वाभावः, 'अंशत्वेन' विशिष्य प्रलयत्वादिना, 'उद्देश्यप्रतीतेरिति पक्षतावच्छेदकावच्छेदेन प्रतीतेरित्यर्थः, 'गुर्वध्ययनेति, 'पूर्वकत्वं' प्रयोज्यत्वं, अन्यथा पूर्वसर्गीयाध्ययनपूर्वकत्वेन सिद्धसाधनात्, 'गुर्विति स्वरूपकथनमिति मन्तव्यं, 'अध्ययनत्वात्' वेदाध्ययनत्वात्, अतो न व्यभिचारः । 'लिपेरपीति, वाचानुपरम्परासाधारणप्रयोज्यत्वमाचष्य प्रवेशादिति भावः । 'न चैवमिति, भारताध्ययनं भारताध्ययनपूर्वकं भारताध्ययनत्वादित्यनुमानसम्भवादिति भावः । 'तस्येति, तथाच बाधाच

त्माश्रयः । न च पूर्व्ववेदप्रामाण्याधीनमुत्तरवेदप्रामाण्यमिति व्यक्तिभेदमादाय नात्माश्रय इति वाच्यं । एवं तत्पूर्व्वस्यापि तत्पूर्व्वप्रामाण्यात् प्रामाण्यमित्यनवस्थानात् । अनादित्वादयमदोष इति चेत् । न । मूलभूतप्रमाणान्तराभावात् अन्धपरम्परापातात् । स्वतः प्रमाणं वेद एव सर्व्वत्र वेदे मूलमिति चेत् । न । सर्व्वेषामेव परवेदापेक्षत्वेन स्वतः प्रमाणत्वाभावात् । अत एव आचारात् स्मृतिः स्मृतेराचार इत्यत्र विश्वासबीजपरानपेक्षमूलभूतप्रमाणाभावादन्धपरम्पराभयेन तत्र

सिद्धिरिति भावः । 'आत्माश्रय इति वाक्यार्थयथार्थज्ञानपूर्व्वकत्वेन वेदप्रामाण्यं तज्ज्ञानप्रामाण्यञ्च प्रमाणीभूतवेदजन्यत्वाधीनमिति परम्परया वेदजन्यप्रामाण्याधीनं वेदप्रामाण्यमित्यात्माश्रय इत्यर्थः, 'मूलभूतेति, वेदजन्यप्रमाया मित्यादौ पूरणीयं, 'प्रमाणान्तराभावादिति स्वतः प्रामाण्याभावादित्यर्थः, 'अन्धपरम्परेति प्रमासामान्यस्य स्वतः प्रमाणमूलकत्वव्याप्तिभङ्गप्रसङ्गादित्यर्थः, स्वतस्त्वञ्च स्वेतरप्रामाण्याधीनप्रामाण्यकेतरत्वमित्यर्थः, 'वेदे' वेदजन्यज्ञाने, 'परवेदापेक्षत्वेनेति परवेदप्रामाण्याधीनप्रामाण्यकत्वेनेत्यर्थः, 'विश्वासबीजेति प्रमासामान्यव्यापकेत्यर्थः, 'परानपेक्षेति स्वेतरप्रामाण्याधीनप्रामाण्यकेतरेत्यर्थः, 'अन्धपरम्परेति स्मृतिजन्यज्ञानस्याप्रमात्वप्रसङ्गभयेनेत्यर्थः । ननु वेदप्रामाण्यमप्यपरवेदप्रामाण्याधीनं महाजनपरिग्रहादेव

वेदमूलकत्वकल्पना। अनादिमहाजनपरिग्रहादनादि-वेदप्रवाहप्रामाण्यावधारणेऽपि तन्निर्वाहकेतरानपेक्ष-मूलभूतप्रमाणाभावेनानाश्वास एव अन्यथा स्मृत्याचा-रयोरप्येवं प्रामाण्यावधारणे प्रमाणमूलकत्वकल्पना[1] न स्यात्। तस्मादाश्वासबीजपरानपेक्षेश्वरप्रत्यक्षमूल-कत्वादेव वेदस्य प्रामाण्यं महाजनपरिग्रहादवधा-र्यते। एतेनानुमानमपि निरस्तं। मूलभूतप्रत्यक्षं विना वेदप्रामाण्यानुपपत्त्या साध्याभावसिद्धौ बाधात्।

तत्प्रामाण्यावधारणादित्यत आह, 'अनादीति, 'परिग्रहादिति महाजनपरिग्रहादित्यर्थः, 'परिग्रहः' अध्ययनाध्यापन-तदर्थानुष्ठानादि, 'तन्निर्वाहकेति महाजनपरिग्रहनिर्वाहकं यन्महाजनानां ज्ञानजनकं प्रमाणं तद्रूपेतरप्रामाण्याधीनप्रामाण्यकेतरमूलभूतप्रमाणकत्वाभावेनेत्यर्थः, 'अनाश्वास एवेति वेदजन्यप्रमायां अप्रमात्वप्रसङ्ग एवेत्यर्थः, 'एवमिति महाजनपरिग्रहेणेत्यर्थः,' 'प्रमाणमूलकत्वेति वेदमूलकत्वेत्यर्थः, 'आश्वासबीजेति प्रामाण्यबीजेत्यर्थः, 'परानपेक्षेति नित्येत्यर्थः, 'ईश्वरप्रत्यक्षेति ईश्वरीयोपादानप्रत्यक्षेत्यर्थः, 'अनुमानमपीति अध्ययनपक्षकानुमानमपीत्यर्थः, 'प्रत्यक्षं विना' नित्यप्रत्यक्षमूलकत्वं विना,' 'प्रामाण्यानुपपत्त्या' स्वतः प्रामाण्यानुप-

---

(१) प्रमाणान्तरमूलकल्पनेति ख०, ग०।

ननु वेदो न पौरुषेयः अस्मर्य्यमाणकर्तृकत्वादिति बाधकमस्त्विति चेत् । न । कपिल-कणाद-गौतमैस्त-च्छिष्यैश्चाद्यपर्य्यन्तं वेदे सकर्तृकत्वस्मरणस्य प्रतीयमान-त्वात् । न च मूलभूतानुभवाभावात् स्मरणानुपपत्तिः, पौरुषेयत्वानुमानादेवानुभवात् । अस्मरणमेव तत्र बाधकमिति चेत् । न । एवं सत्यस्मरणाननुभवयोर-

---

पत्त्या । सत्प्रतिपक्षमाशङ्कते, 'नन्विति, वेदत्वं न पौरुषेयवृत्ति अध्ययनविधिविषयतावच्छेदकत्वे सति स्मर्य्यमाणकर्तृकावृत्तित्वात् व्यतिरेकेण भारतत्वं दृष्टान्त इत्यत्र तात्पर्य्यं, यथाश्रुते "मा ते भवत्वित्यादौ व्यभिचारादिति मन्तव्यं, स्मर्य्यमाणकर्तृकत्वं स्मृति-बोधितपौरुषेयत्वकत्वं, तादृशस्मृतेरप्रचरद्रूपत्वेऽपि कपिलादीनां दर्शनकर्तृणां तादृशस्मृतिज्ञानसत्त्वाद्धेतुः स्वरूपासिद्ध इति समा-धत्ते, 'कपिलेति, 'सकर्तृकत्वस्मरणस्येति पौरुषेयत्वबोधकस्मृतेरि-त्यर्थः । 'मूलभूतेति स्मृतिकर्तुर्वेदे पौरुषेयत्वानुभवाभावादित्यर्थः, तद्बोधकमूलभूतश्रुतिविरहादिति भावः । 'स्मरणानुपपत्तिः' स्मृति-प्रणयनानुपपत्तिः, 'अनुभवादिति स्मृतिकर्तुर्वेदे पौरुषेयत्वानुभवा-दित्यर्थः, तथाचानुमानाद्वेदे पौरुषेयत्वमवधार्य्य स्मृतिप्रणयनमिति भावः । 'अस्मरणमेवेति अत्र स्मरणपदं स्मरणायेकज्ञानपरं, स्मृति-कर्तुर्वेदे पौरुषेयत्वविषयकस्मरणाभाव एवेत्यर्थः, 'तत्र बाधकमिति वेदगोचरपौरुषेयत्वानुभवादिबाधकमित्यर्थः, स्मृतिकर्तुस्तद्गोचर-स्मरणाभावेन तद्गोचरानुभवाभावः साधनीय इति भावः । 'अस्म-

व्योम्न्याश्रयात्। अग्रे तदर्थस्मरणाभावेऽपि प्रमाणस्यानुभावकत्वात्। न हि भाविस्मरणमपेक्ष्य प्रमाणमनुभावकं। "तस्मात्तपस्तेपानाच्चत्वारो वेदा अजायन्त ऋचः सामानि जज्ञिरे" इति कर्तृश्रवणात् "प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते" इत्यादिकर्तृस्मरणाच्च। पौरुषेयत्वे बाधकं विना अर्थवादमात्रत्वस्य वक्तुमशक्यत्वात्। "स्वयम्भूरेष भगवान् वेदो गीत-

---

रणाननुभवयोरिति अस्मरणाननुभवसिद्धोरित्यर्थः। स्मरणाभाविनानुभवाभावसाधने व्यभिचारमपाह, 'अग्रे इति, उपेक्षात्मकज्ञानस्थले इति शेषः, अप्रयोजकत्वमपाह, 'न हीति, भगवतो वेदकर्तृत्वे वेदस्य पौरुषेयत्वानुमानं प्रमाणमुक्त्वा श्रुतिं स्मृतिमपि[१] प्रमाणयति, 'तस्मादिति, 'तपस्तेपानात्' परमेश्वरात्, 'ऋक्' वेदभागविशेषः, सामापि तथा, 'कर्तृश्रवणात्' भगवतो वेदकर्तृत्वबोधकश्रुतेः, 'अन्येति विभिन्नानुपूर्वीकेत्यर्थः, इति सम्प्रदायः, विभिन्नव्यक्तिकेति तु परमार्थः, आनुपूर्वीभेदकल्पनायां गौरवात्, 'कर्तृस्मरणादिति भगवतो वेदकर्तृत्वबोधकस्मृतेरित्यर्थः। 'अर्थवादमात्रत्वस्य' स्तुतिमात्रत्वस्य। ननु वेदस्य नित्यत्वबोधकभारतादेः वेदस्य पौरुषेयत्वे बाधकमिति तदंशाशङ्कामपाह, 'स्वयम्भूरिति नित्य इत्यर्थः, 'एष-

---

(१) श्रुति-स्मृती अपीति ख०।

स्त्वया पुरा । शिवाद्या ऋषिपर्य्यन्ताः "स्मर्त्तारोऽस्य न कारकाः" इति महाभागवतपुराणीयवाक्यस्य श्रुति-विरोधेनान्यत्र तात्पर्य्यात् । न च कार्य्यपरमेव प्रमाणं, कर्त्तृस्मरणस्य सर्व्वथाविध्यर्थत्वात् सकर्त्तृकत्वार्थवादस्य स्वर्ग-नरकार्थवादस्येव "ईश्वरमुपासीत" इति विधि-शेषत्वाच्च । साधयिष्यते च सिद्धार्थस्य प्रामाण्यं । न चैवमानन्दोऽपीश्वरे स्यादिति वाच्यं । तत्र मानान्तर-विरोधात् । पुरुषस्य भ्रम-प्रमादादिभूयिष्ठत्वेन वेदे

भगवानित्यपि वेदस्य विशेषणं । 'कार्य्यपरमेवेति विधिसमभिव्याहृतमेवेत्यर्थः, 'तस्मादित्यादिविध्यसमभिव्याहृतत्वात् न प्रमाण-मिति भावः । 'कर्त्तृस्मरणस्येति कर्त्तृत्वबोधकस्मृतेरित्यर्थः, 'अविध्य-र्थत्वादिति विध्यसमभिव्याहृतत्वादित्यर्थः, तथाच भारतादेरपि व्यासादिकर्त्तृकता न स्यादिति भावः । 'सकर्त्तृकत्वार्थवादस्येति "तस्मादित्यादिविध्यसमभिव्याहृतवाक्यस्येत्यर्थः, 'स्वर्गेति "यन्न दुःखेनेत्याद्यर्थवादस्येत्यर्थः, 'विधिशेषत्वाच्चेति, अर्थवादस्याप्रामाण्य-वादिनापि विधिशेषीभूतार्थवादस्य प्रामाण्याभ्युपगमादिति भावः । 'सिद्धार्थस्येति विध्यसमभिव्याहृतवाक्यस्येत्यर्थः । 'न चैवमिति, "नित्यं विज्ञानमानन्दं ब्रह्मेत्याद्यर्थवादसत्त्वादिति भावः । 'तत्रेति, सुख-त्वावच्छेदेन पुष्कअन्यत्वकल्पनात् तत्रानन्दपदेन दुःखाभावाभिधा-नादिति भावः । 'भूयिष्ठत्वेनेति बहुतरदोषाश्रयत्वेनेत्यर्थः, 'वेदे'

नाश्वास इति चेत्। न। धर्म्मिग्राहकमानेन नित्य-सर्व्वज्ञत्वेन सिद्धे तत्र दोषाभावादिति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे तात्पर्य्यवादः॥

क्वचिद्वेदे, 'अनाश्वासः' अप्रामाण्यप्रसङ्गः, कर्त्तुर्भ्रमादिदोषजन्यत्व-सम्भवादिति भावः।

इति श्रीमथुरानाथ तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये तात्पर्य्यवादरहस्यम्॥

अथ शब्दानित्यतावादः।

ननु तथाप्यप्रयोजकं पौरुषेयत्वानुमानं नित्य-

अथ शब्दानित्यतावादरहस्यम्।

'नित्येति नित्यत्वेन यन्निर्दोषत्वं तेनैव प्रामाण्योपपत्तेरित्यर्थः। न च निर्दोषत्वं न प्रामाण्यप्रयोजकं तेषां वर्णानामस्यैव नित्यतया विप्रलम्भादिवाक्यमात्रेऽपि तत्सत्त्वादिति वाच्यं। निर्दोषत्वपदेन दोषाजन्यानुपूर्वीकत्वस्य विवक्षितत्वात्, आनुपूर्वी च तन्मते शब्दसमवेतपदार्थान्तरं सा च वेदे नित्या अन्यत्र त्वनित्या, अन्यथा वर्णानां सर्वत्र नित्यत्वेन नित्यानित्यविभागो न स्यात्। न चैवं नित्यत्वं न निर्दोषत्वप्रयोजकं सदोषवाक्येऽपि तत्सत्त्वादिति वाच्यं। नित्यत्वपदेनापि नित्यानुपूर्वीकत्वस्य विवक्षितत्वादिति।

केचित्तु नित्यत्वेन निर्दोषत्वेन चेति प्रयोजकद्वयपरतया[1] व्याचख्युः[2]। तदसत्। नित्यत्वं यदि यथाश्रुतं तदा विप्रलम्भादिवाक्यमात्रेऽतिव्याप्तिः आनुपूर्वीविशिष्टानां वर्णानां सर्वत्र नित्यत्वात्, यदि च नित्यानुपूर्वीविशिष्टत्वं तदा लौकिकवाक्यमात्र एवा-

(१) प्रयोजकत्वपरतयेति ख०।

(२) व्याचक्रुरिति ख०।

वर्णस्य प्रत्यक्षमिति, तन्न, घज्ञानानन्तरज्ञानविषयत्वं टस्यानन्तर्य्यं तयोरानुपूर्व्वी सा च मनसैव गृह्यते घट-पटज्ञानयोरिव। तदुपनीता च श्रोत्रविषयः। ननु स एवायं गकार इति प्रत्यभिज्ञाबाधितमिदमित्येकैका एव गकारादिव्यक्तयः। यद्यपि प्रत्यभिज्ञाया नित्यत्वं न विषयस्तथापि नाशकत्वाभिमतशब्दान्तरादीनां

म्बितोच्चरिते नातिप्रसङ्गः, 'प्रत्यक्षमिति आनुपूर्व्वीप्रत्यक्षादेव सिद्धमित्यर्थः[१], 'घज्ञानेति, अन्यथा मौनिश्लोकाव्याप्तेरिति भावः। न चेश्वरोक्तस्थले ज्ञानानन्तर्य्यासम्भवादव्याप्तिरिति वाच्यं। घज्ञानानन्तरमव्यवधानेन टज्ञानं भवत्वित्यभिप्रायविषयत्वे तात्पर्य्यात्, यत्र च शुकादिवाक्ये न तथाभिप्रायसम्भवस्तत्रापीश्वरमादायैव तत्सम्भवः। नन्वेवं सा श्रोत्रग्राह्या न स्यादित्यत आह, 'सा चेति. 'घट-पटज्ञानयोरिवेति घट-पटज्ञानयोरानन्तर्य्यमिवेत्यर्थः, 'तदुपनीता' मानसोपनीता,[२] पदं शृणोमीत्यनुव्यवसाये लौकिकविषयतानुभवो विशेष्यमात्र एवेति हृदयं। 'इदमिति अनित्यत्वानुमानमित्यर्थः, 'एकैकाएवेति एकैका नित्या एवेत्यर्थः, 'शब्दान्तरादीनामिति, 'आदिना तदुत्तरोत्पन्नपदार्थान्तरपरिग्रहः,

---

(१) एतेन टस्योत्पत्तिमत्वं सिद्धं एवं वर्णान्तरस्यापीत्यर्थः।

(२) तथाच मानसोपनयेनैव श्रावणं तज्ज्ञानमिति भावः।

अन्तरासम्भवेऽपि तावत्कालीनतां गकारस्य प्रत्ये-तीति "तावत्कालं स्थिरश्चैनं कः पश्चान्नाशयिष्यतीति पराभिमताशुविनाशित्वव्यतिरेकान्नित्यतायामेव पर्य्यवस्यति। न च धर्म्मिणो गकारस्य भेदेऽपि एकजातीयत्वेन प्रत्यभिज्ञा, तथा सति तज्जातीयोपमितिः स्यान्न तु स एवायमिति। अथ तारत्व-मन्दत्व-विरुद्धधर्म्माध्यस्तविषयत्वेन सा न प्रमाणं। न च तारत्वादीनां स्वाभाविकत्वं विरुद्धत्वञ्चासिद्धं, मन्दस्तारो गकारस्ताराम्मन्दोऽन्य इत्यनन्यथासिद्धप्रत्यक्षात् तत्सिद्धेः। न ह्यपां शैत्य-द्रवत्वे स्वाभाविके इत्यत्र प्रत्यक्षादन्यत् प्रमाणं। तत् किं यो यद्गतत्वेन भासते

'तावत्कालीनतां' चिरकालीनगकाराभिन्नतां, 'आशुविनाशित्वव्यतिरेकादिति, विलम्बविनाशित्वाभ्युपगमादिति शेषः, विलम्बविनाशित्वाभावस्योभयसम्मतत्वादिति भावः। 'पर्य्यवस्यतीति वर्णः पर्य्यवस्यतीत्यर्थः, तथाच वर्णो नित्यः विलम्बविनाशित्वाभावे सत्याशुविनाशित्वाभावादित्यनुमेयमिति भावः। 'सा' अभेदप्रत्यभिज्ञा, 'स्वाभाविकत्वं' वर्णवृत्तित्वं, स्वाभाविकत्वे हेतुमाह, 'मन्द इति मन्दो गकारस्तारो गकार इत्यर्थः, विरुद्धत्वे हेतुमाह, 'तारादिति, मन्दत्वावच्छेदेन तारभेदग्रहादिति भावः। 'तत्सिद्धेरिति तयोः शब्दवृत्तित्व-विरुद्धत्वयोः सिद्धेरित्यर्थः। आशङ्कते, 'तत् किमिति,

स तद्धर्म्म एव तथा सति रक्तः पटः लोहितः स्फटिक-इत्यादावपि तथा स्यादविशेषात्, न, रक्तत्वादीनामन्यधर्म्मत्वस्थितौ स्फटिकादीनाञ्च तद्विरुद्धधर्म्मत्वे स्थिते जवाकुसुमादेरन्वय-व्यतिरेकानुविधानाद्बाधेन तत्र भ्रान्तत्वात्। न चेह तारत्वादेरन्यधर्म्मत्वेनोपस्थितिः। नापि गकारादीनां तद्विरुद्धधर्म्मवत्त्वं, नाप्यन्यस्य तारत्वादिधर्म्मिणोऽनुविधानं। न चावश्यं स्वीकृतवायोरेव धर्म्मास्तारत्वादयोगकारादिगतत्वेन भासन्ते इति वाच्यं। स्पर्शाग्रहे त्वचो व्यापाराभावेन त्वचा तदग्रहात्। न च श्रवणा तद्ग्रहः, अवायवीयत्वेन वायुमात्रधर्म्माग्राहकत्वाच्चक्षुर्वत्। तारत्वादयो

'तथा स्यात्' रक्तत्वादेः स्फटिकादिधर्म्मत्वं स्यात्, 'अन्यधर्म्मत्वेति स्फटिकादीतरधर्म्मत्वव्यवस्थितावित्यर्थः, प्रमाणान्तरमाह, 'स्फटिकेति, हेत्वन्तरमाह, 'जवेति, 'अन्वयेति, स्फटिकादौ रक्तत्वप्रत्यये इत्यादिः, 'बाधेन' रक्तत्वाभावस्य प्रमाणसिद्धत्वेन, 'अनुविधानमिति, तारत्वादिप्रत्यय इति शेषः। 'न चावश्यमिति भवतामपि तार-मन्दशब्दोत्पत्तौ विजातीयवायुसंयोगस्य नियामकत्वादिति भावः। 'स्पर्शाग्रहे' स्पर्शविषयकसाक्षात्कारे, 'व्यापाराभावेन' अन्यत्वाभावेन, 'अवायवीयत्वेन' अवायवीयवहिरिन्द्रियत्वेन, तेन मनसि न व्यभि-

वा न वायुधर्म्माः श्रावणत्वात् कादिवत्, वायुर्वा न श्रवणमात्रग्राह्यधर्म्मामूर्त्तत्वात् पटवत्, अतएव न तारत्वादयो वायुधर्म्मा ध्वनिधर्म्माः वायुधर्म्मस्य ध्वनेरग्रहात्। न च ध्वनिरूपः शब्दो नभोवृत्तिरेव तथा सति तद्धर्म्मतारत्वादिग्रहः श्रवसेति वाच्यं। तारोऽयं गकार इत्यत्र ध्वनीनामस्फुरणात् तत्कारणाभावाच्च। न च व्यक्त्या विना जातिस्फुरणं, तस्या व्यक्तिसमानसंवित्संवेद्यत्वात्। न च स्मर्य्यमाणतारत्वाद्यारोपः,

चारः,[1] मात्रपदं सत्ता द्रव्यत्ववारणाय, एवमुत्तरत्र सर्व्वत्र यथायोग्यं मात्रपदमध्याहार्य्यं। 'अतएवेति, वक्ष्यमाणध्वनेरग्रहादिति-दोषादेवेत्यर्थः, 'अग्रहादिति श्रवणमात्रग्राह्यासम्भवादित्यर्थः, तथाच व्यक्तिग्रहं विना कथं जातिग्रह इति भावः। ननु तारत्वादिनैव ध्वनेः स्फुरणमभ्युपगम्यतामत आह, 'तत्कारणेति गकाराद्युत्पत्ति-समये ध्वनिकारणीभूतस्य शङ्खादेरभावादित्यर्थः। ननु तारत्वादिकं जातिविशेषस्तस्य शब्दवृत्तित्वेऽपि तन्नियामकतया वायुनिष्ठं वैजात्यमावश्यकं तथाच लाघवात् तदेवास्तु किं शब्दवैजात्यान्तरे-

(1) न चाग्राहकत्वं लौकिकप्रत्यक्षाजनकत्वमेव तच्च मनसो व्यावृत्तमिति व्यर्थं विशेषणमिति वाच्यं। ज्ञानमात्रस्यैव मनोजन्यत्वात्, अत्र च लौकिकविषयितासम्बन्धावच्छिन्नजनकताप्रवेशे व्यभिचाराभावेनाग्राहकविशेषण-वैयर्थ्यं बोध्यं।

चितत्वात्। ननु तथापि तारबुभुत्साविरहविशिष्टमन्दबुभुत्साप्रयुक्तमन्दशब्दसाक्षात्कारत्वेन तारशब्दग्रहं प्रति प्रतिबन्धकत्वात् मन्दत्वेऽतिप्रसङ्गः। न च मन्दशब्दज्ञानं जायतां मन्दशब्दानुभवो जायतामित्यादिभेदेन तच्छब्दसाक्षात्कारो जायतां तत्पुरुषोक्तशब्दसाक्षात्कारो जायतामित्यादिभेदेन च मन्दबुभुत्साया अननुगमात् कथमेकरूपेण हेतुत्वं[१] मन्दशब्दसाक्षात्कारेच्छात्वेनानुगमे प्रमेयं जायतामित्यादेरपि सङ्ग्राहकत्वेरिति वाच्यं। तत्तदिच्छान्यमन्दसाक्षात्कारेच्छात्वेनानुगमादिति चेत्, न, तत्तदिच्छान्यमन्दबुभुत्सावैशिष्ट्यानवच्छिन्नत्वेन प्रतिबन्धकतायां विशेषणीयत्वात्।

साम्प्रदायिकास्तु तारबुभुत्साविरहविशिष्टमन्दबुभुत्सात्वेन मन्दबुभुत्सैव सामानाधिकरण्यप्रत्यासत्त्या तारशब्दग्रहप्रतिबन्धिका न तु मन्दसाक्षात्कारत्वस्यापि तत्र प्रवेश इत्याहुः। तदसत्। मन्दशब्दासत्त्वेऽपि तादृशेच्छायां तारशब्दाग्रहप्रसङ्गादिष्टापत्तौ चानुभवविरोधात्।

प्राञ्चस्तु प्रतिबन्धकतावच्छेदकत्वं प्रतिबन्धकतावच्छेदकत्वपर्य्याप्त्यधिकरणस्वाश्रयसाक्षात्कारत्वकत्वं, मन्दशब्दसाक्षात्कारत्वञ्च न तथा बुभुत्साविरहवैशिष्ट्यादेरपि तत्र प्रवेशात्। न चैवं तारत्वेऽप्यसम्भवः तत्रापि बुभुत्साविरहवैशिष्ट्यस्य प्रवेशादिति वाच्यं। मन्दबुभुत्साविरहविशिष्टतारशब्दसाक्षात्कारत्वेन हि न प्रतिबन्धकत्वं किन्तु तारशब्दग्रहकालीनमन्दशब्दग्रहे मन्दबुभुत्सा हेतुः, कार्य्यतावच्छे-

---

[१] कथमनेन रूपेण हेतुत्वमिति ख०।

गमः, तदप्रतिसन्धानेऽपि तारत्वानुगतप्रत्ययात्। तारत्व-मन्दत्वे च न शब्दवृत्तिजाती सप्रतियोगिकत्वात्।

दकश्च न तारशब्दग्रहकालीनमन्दशब्दसाक्षात्कारत्वं तथा सति तारशब्दासत्त्वेऽपि मन्दबुभुत्सासत्त्वे तारशब्दग्रहकालीनमन्दशब्दसाक्षात्कारापत्तेः किन्तु मन्दबुभुत्सोत्तरमन्दशब्दसाक्षात्कारत्वं,[१] इत्थञ्च तारशब्दग्रहकाले सामान्यसामग्रीमर्य्यादया मन्दसाक्षात्कारवारणाय तदकालीनमन्दसाक्षात्कारे केवलं तारशब्दसाक्षात्कारत्वेनैव प्रतिबन्धकत्वमिति तारशब्दसाक्षात्कारत्वस्य तत्पर्य्याप्त्यधिकरणत्वादित्याहुः। तदसत्। कार्य्य-कारणभावद्वयकल्पने गौरवात् मानाभावाच्च। न च तत्रापि विशेषण-विशेष्यभावेन विनिगमनाविरहात् कार्य्य-कारणभावद्वयमिति[२] वाच्यं। तथापि तत्रापि कार्य्य-कारणभावचतुष्टयात्[३] तत्तदिच्छान्यमन्दबुभुत्सोत्तरत्वस्य कार्य्यतावच्छेदकघटकतया कार्य्यतावच्छेदकगौरवं पुनरधिकमिति दिक्।

'तदप्रतिसन्धानेऽपि' तादृशावच्छेदकत्वाप्रतिसन्धानेऽपि, तादृशप्रत्ययस्य कदाचिदपलापसम्भवादाह, 'तारत्व-मन्दत्वे चेति. 'न शब्द-

(१) मन्दबुभुत्साविशिष्टमन्दशब्दसाक्षात्कारत्वमिति ख०।

(२) विशेषण-विशेष्यभावभेदेन कार्य्य-कारणभावद्वयमितीति ख०।

(३) मन्दबुभुत्सोत्तरत्व-मन्दसाक्षात्कारत्वयोस्तारानुत्तरत्व-मन्दसाक्षात्कारत्वयोश्च विशेषण-विशेष्यभावभेदात् इत्यर्थः। न चोत्तरत्वावच्छिन्नं प्रत्येव हेतुत्वान्न विशेष्यप्रवेश इति वाच्यं। अनुत्तरत्वेऽपि तथा सम्भवात् प्रकृतासङ्गतेरिति ध्येयम्।

नापि तारत्व-मन्दत्वयोर्विरोधः, य एव गकारस्तार-आसीत् स एवेदानीं मन्द इति समयभेदेन वक्तृभेदेन च तयोरेकत्वप्रतीतेः। तारोऽयं न तारतरस्तारा-न्मन्दोऽन्य इति भेदप्रतीतिरस्तीति चेत्, न, धर्म्मिणो-ऽभेदे भासमाने विशिष्टधर्म्मिभेदप्रतीतेर्धर्म्मभेदविषय-त्वात्। एकत्र घटे लोहितोऽयं न श्याम इदानीमिति प्रतीतिवत्। न च तीव्रेण गकारेण मन्दगकाराभि-

---

वृत्तीति, तथाच शब्दवृत्तिजातितया नानुगमसम्भव इति भावः। 'शब्दवृत्तीति स्वरूपकथनं तेन तन्मते नाप्रसिद्धिः,[१] 'सप्रतियोगि-कत्वादिति सावधिकत्वादित्यर्थः, अयमस्मात्तारः अयमस्मान्मन्द-इत्येव प्रत्ययादिति भावः। रसादिवृत्त्युत्कर्षापकर्षजातेस्तन्मतेऽभावान्न व्यभिचार इति भावः। शब्दवृत्तिजातित्वमभ्युपेत्याह, 'नापीति, 'आसीदिति उपलक्ष इत्यर्थः, अन्यथातीतत्वानन्वयात्। 'वक्तृभेदेन चेति, य एव देवदत्तेन तार उच्चरितः स एव चैत्रेण मन्द-उच्चरित इति वक्तृभेदेन चेत्यर्थः, 'तयोः' तारत्व-मन्दत्वयोः, तारो-ऽयं न तारतर इति दृष्टान्तार्थं, 'अस्तीति, अधिकरणाभेदप्रत्यभिज्ञा बाधिकेति शेषः। 'भासमान इति प्रमाणसिद्ध इत्यर्थः, 'धर्म्मीति तारत्वादिधर्म्मभेदविषयत्वादित्यर्थः, 'तीव्रेणेति तीव्रगकारसाक्षा-त्कारेणेत्यर्थः, मन्दबुभुत्साविरहसहकृतेनेति शेषः, 'अभिभवादिति

---

(१) तन्मते गुणगतजात्यनङ्गीकारादिति भावः।

भवात् तयोर्भेदः न हि तदेव तदभिभावकं, तस्यैव तेनैव तदैव ग्रहणाग्रहणयोर्विरोधात् इति वाच्यं। तारत्वव्यञ्जकवाय्वोर्बलवत्त्वेन मन्दत्वव्यञ्जकवाय्वभिभवात् मन्दत्वस्याग्रहणात्। सन्तु वा तार-मन्दरूपाद्योऽभिन्ना एव गकारास्तत्प्रत्यभिज्ञाने बाधकाभावात्। तस्मात् वायुधर्म्मा एव तारत्वादयः शब्दगतत्वेन

साक्षात्कारप्रतिबन्धादित्यर्थः, 'अभिभावकमिति साक्षात्कारप्रतिबन्धकसाक्षात्कारविषयतावच्छेदकमित्यर्थः, 'तस्यैव' गकारस्यैव, 'तदैव' तस्मिन्नेव काले, 'तेनैव' पुरुषेणैव। 'बलवत्त्वेन' प्रतिबन्धकत्वेन, 'वाय्वभिभवादिति वायोस्तेन सह सामानाधिकरण्यादित्यर्थः, तथाच तीव्रगकारसाक्षात्कारो न प्रतिबन्धकः किन्तु श्रोत्रावच्छेदेन विजातीयवायुसम्बन्ध एव प्रतिबन्धक इति भावः। 'अभिन्ना एवेति पाठः तारूपा गकाराः सर्व्वेऽभिन्नाः मन्दरूपागकाराः सर्व्वेऽभिन्ना इत्यर्थः, न तु तार-मन्दयोरभेद इति भावः। 'प्रत्यभिज्ञान इति स एवायं तारः स एवायं मन्द इति पूर्व्वापरतारयोः पूर्व्वापरमन्दयोश्चाभेदप्रत्यभिज्ञायाः प्रमात्वे बाधकाभावादित्यर्थः, 'नापीत्यादेरभ्युपगमवादेनैव उक्तत्वात्। स्वमतमुपसंहरति, 'तस्मादिति, 'वायुधर्म्माः' वायुसमवेतास्तत्तदौपाधिकरूपाः, शब्दसमवेतत्वे गत्वादिना साङ्कर्यप्रसङ्गात्[1] साक्षात्कारोपगमे गकार-

---

(१) तन्मते साङ्कर्य्यस्याप्रयोजकस्यापि बाधकत्वमिति भावः।

भासन्ते दर्पणधर्म्मा इव मुखादौ तद्ग्रहणञ्च स्पर्शपुरस्कारेण कर्णशष्कुलीत्वगिन्द्रियेण तार-मन्दजनकवायूनां त्वयाप्युत्कर्षापकर्षस्योद्भूतस्पर्शस्य च स्वीकारात् श्रोत्रेणैव वा। चक्षुरादेर्यन्न वायुधर्म्मग्रहस्तत्रायोग्यत्वमुपाधिः, अन्यथा श्रोत्रेण स्वगुणो न गृह्येत इन्द्रिये

ककारसाधारणताराकारानुगतप्रत्ययानुपपत्तिप्रसङ्गादिति भावः। न चैवं गत्वादिकमपि वायुधर्म्मोऽस्तु तारत्वादिवत् वर्णस्त्वेक एवास्तु लाघवादिति वाच्यं। य एव गकारस्तार आसीत् स एवेदानीं मन्द इतिवत् ककारादौ गकारादित्वेन प्रत्यभिज्ञाविरहात् प्रत्युत ककाराद्गकारोऽन्य इत्यादिप्रतीतेरिति हृदयं। 'स्पर्शपुरस्कारेणेति स्पर्शं विषयीकृत्यैवेत्यर्थः, 'कर्णेति कर्णशष्कुल्यवच्छेदेन त्वगिन्द्रियसन्निकर्षेणेत्यर्थः, यथा चक्षुर्गोलकावच्छिन्नत्वगिन्द्रियसन्निकर्षस्यैव धूमस्पर्शग्राहकत्वं तथा कर्णशष्कुल्यवच्छिन्नत्वगिन्द्रियसन्निकर्षस्यैव तादृशस्पर्शग्राहकत्वमिति भावः। अत एवान्यावच्छेदेन त्वगिन्द्रियसन्निकर्षेण न तद्ग्रहणमिति। 'उत्कर्षेति, अन्यथा कार्य्यवैजात्यं न स्यादिति भावः। 'उद्भूतस्पर्शस्येति, त्वच इवानुद्भूतस्पर्शस्य वायोः शब्दाजनकत्वादिति भावः। नन्वेवं कुष्ठाद्युपहतत्वचा तन्न गृह्येत(१) तारं शृणोमीत्यनुव्यवसायापत्तिश्चेत्यत आह, 'श्रोत्रेणैवेति, 'तद्ग्रहणमित्यनुषज्यते, 'अन्यथेति सहचारदर्शनमात्रात् कल्पने इत्यर्थः,

---

(१) कर्णावच्छिन्नकुष्ठाद्युपहतत्वचा ग्राह्यत्वं न स्यादिति ख०।

तथा दर्शनात्, चक्षुर्वा न पार्थिवरूपग्राहकं अपार्थिवेन्द्रियत्वात् रसनवत् इत्याद्यपि स्यात्। अथ योग्यो-योग्येन गृह्यते स्वगुणः परगुणो वा, योग्यता च फलबलेन कल्प्यते, तर्हि श्रोत्रस्यापि वायुधर्म्मग्रहे तुल्यं। न च तारो गकार इत्यत्र वायोरप्रतीतिः, वायुत्वेनाप्रतीतावपि तारत्वादिनैव तत्प्रतीतेः, यथा अग्नित्वेनाप्रतीतावपि अयोगोलके लोहित इति प्रतीतिः। ननु वायु-शब्दयोस्त्वचा श्रोत्रेण वा ग्रहे केन तारोऽयं गकारइत्यारोप इति चेत्, न, उभयेन्द्रियग्राह्ययोरसंसर्गाग्रहात् संसर्गव्यवहारः। अस्तु वा त्वगिन्द्रियोप-

'तथा दर्शनादिति स्वगुणाग्राहकत्वदर्शनादित्यर्थः, 'न पार्थिवरूपेति, रसनादेः पृथिवीसमवेतगन्धाग्राहकतया व्यभिचारवारणाय रूपपदं, तच्च रसेतरगुणपरं, अतएव घ्राणे व्यभिचारवारणाय हेतावपार्थिवेति, त्वचः पक्षसमतया[१] व्यभिचारो न दोषाय, त्वग्ग्राह्यत्वेनापि वा गुणो विशेषणीयः। 'न चेति, त्वक् च वायुग्रहं विना न तद्वृत्तिजातिग्रहसमर्थेति भावः। त्वचा तारत्वग्रहपक्षे इदं,[२] "वायुत्वेनेति, वायुत्वस्य तन्मते त्वचो योग्यत्वेऽपि दोषादग्रहइति भावः। त्वचा तारत्वग्रहपक्षे शङ्कते, 'नन्विति, परमतेनाह, 'अस्तु वेति,

(१) प्रतिबन्दिमुद्रया तत्रापि तस्य साध्यत्वमिति भावः।

(२) अन्यथा वायुग्रहापेक्षा न स्यात्।

नीतस्य श्रोत्रेणारोपः श्रोत्रेणैव वा तारत्वग्रहोऽपीत्युक्तं उत्पत्तिमत्त्वञ्चासिद्धं तत्प्रतीतेः श्रुतपूर्व्वोऽयं गकार इति प्रत्यभिज्ञाबाधितत्वात्। ननु प्रत्यभिज्ञैव तया बाधिता गत्वजात्यौपाधिकोऽभेदप्रत्ययो गकारे सम्भवतीत्युक्तमिति चेत्, न, गत्वजातेरसिद्धेः भेदे भासमाने ह्यभेदप्रतीतिर्जातिमालम्बते। न च गकारभेदप्रतीतिरस्ति, तारत्व-मन्दत्वे अपि न भेदहेतू य एव तारः स एवेदानीं मन्द इति प्रत्यभिज्ञानात्, गकारानित्यत्वेऽपि तथा सम्भवतीति चेत्, तर्हि नित्यत्वेऽपि कथं-

---

ख्यमतेऽन्यथाख्यातेरभावात्। 'तयेति उत्पत्तिप्रतीत्येत्यर्थः, 'बाधितेति व्यक्त्यभेदविषयत्वेन बाधितेत्यर्थः, न व्यक्त्यभेदविषयेति यावत्, किन्तर्हि तस्या विषय इत्यत आह, 'गत्वेति, 'गत्वजातेरिति गकारस्यैकत्वेनैकव्यक्तिमात्रवृत्तित्वादिति भावः। ननु जातेरसिद्धावप्यनुगतधर्म्मान्तरमभेदप्रत्यभिज्ञाविषयः स्यात् यदग्रहे कोलाहलधीरित्यतो दोषान्तरमाह, 'भेद इति, 'भासमाने' अनुभवसिद्धे, अन्यथा घटादिव्यक्त्यभेदप्रत्यभिज्ञानमपि दत्तजलाञ्जलि(१) स्यादिति भावः। ननु तारत्वादिविरुद्धधर्म्मेण भेदोऽनुमेय इत्यत आह, 'तारत्वेति, 'भेदहेतू' भेदानुमापकौ, क्वचित् तथैव पाठः, 'य एवेति, तथाच विरुद्धत्वाभावान्न भेदलिङ्गत्वमिति भावः। 'गकारानित्यत्वेऽपि' गकारस्योत्पत्तिमत्त्वेऽपि, 'तथेति व्यक्त्यभेदप्रत्यभिज्ञेत्यर्थः,

---

(१) घटादिव्यक्त्यभेदप्रत्यभिज्ञानेऽपि दत्तजलाञ्जलिरिति ख०।

शष्कुलीत्वगिन्द्रियोपनीतवायुधर्म्मोत्पत्त्युपाधित्वं सम्भवति। न च वायोरप्रतीतिः, उत्पन्नत्वेनैव तत्प्रतीतेः लोहितत्वेनेव जवाकुसुमस्य स्फटिके। अस्तु वा प्रागनुपलभ्यमानत्वे सति उपलभ्यमानत्वेन उत्पन्नस्य सादृश्येन स्मृतोत्पत्तिमत्त्वारोपः। न चैवं घटादावपि नोत्पत्तिः सिद्ध्येदिति वाच्यम्। कुलालव्यापारानन्तरमनुभूयमानघटस्य तद्व्यापारात् प्रागनुभूयमानेन घटेन नाभेदोभासते किन्तु भेद एवेति तत्र प्रागसत्त्वे सत्त्वं सिध्यति, गकारे तूत्पत्तिप्रतीत्यनन्तरं कण्ठताल्वादिव्यापारात् पूर्व्वमनुभूयमानगकारेणाभेदप्रत्ययात्[1] दीपवत् स व्यञ्जक एव। अथ शब्द उत्पद्यते

आरोपकल्पत्वादिति भावः। तर्हि तुल्ययुक्त्या वायोरुत्पत्तिमत्त्वप्रत्ययस्यापि भ्रमत्वं सम्भवतीत्याह, 'नहीति, 'उपाधित्वमिति आरोपकत्वमित्यर्थः, तथाच विनिगमकाभावादुत्पत्तिमत्त्वं सन्दिग्धमिति भावः[2]। अनुभूयमानारोपं निषेधति, 'न चेति, 'स्फटिक इति, तादात्म्येनेति शेषः। ननु तदानीं नियमतो वायोर्भास्वरत्वेनानुभवकल्पने वायुत्वानुभवप्रतिबन्धकदोषकल्पने च मानाभावो गौरवञ्चेत्यत आह, 'अस्तु वेति, सादृश्यग्रहं विना तादृशधीरसिद्धेरिति भावः। 'सः' कण्ठताल्वादिव्यापारः, 'व्यञ्जक एव' शब्दस्य व्यञ्जक एव, 'उत्कर्षेति

(१) अभेदप्रत्यभिज्ञानादिति ख०, ग०।

(२) सन्दिग्धासिद्धमिति भाव इति ख०।

उत्कर्षवत्त्वे सति अपकर्षवत्त्वात् माधुर्य्यवत् अतएवा-

परममहत्त्वे व्यभिचारवारणाय विशेष्यं, परमाणुपरिमाणे महत्त्वापेक्षयापकृष्टे व्यभिचारवारणाय सत्यन्तं। न च तथापि परमाणोरणुत्वस्य द्व्यणुकाणुत्वापेक्षयोत्कृष्टत्वात्तद्दोषतादवस्थ्यमिति वाच्यं। अपकर्षपदेन स्वाश्रयसजातीयप्रतियोगिकापकर्षस्य विवक्षितत्वात् स्वपदमपकर्षपरं, साजात्यञ्च गुणत्वव्याप्यव्याप्यजात्या[1]। न चैवं सत्यन्तवैयर्थ्यमिति वाच्यम्। अग्निस्पर्शापेक्षयाऽत्यन्तापकृष्टे शीतोष्णाद्यारम्भकपरमाणुगतोष्णस्पर्शे व्यभिचारवारकत्वात्। स्वाश्रयसमानाधिकरणद्रव्यविभाजकोपाधिमद्वृत्तित्वेन सजातीयं विशेषणीयं तेन शर्करारसाद्यपेक्षयापकृष्टे तण्डुलादिरसाद्यपेक्षया चोत्कृष्टे जलपरमाणुरसादौ न व्यभिचारः जलरसापेक्षया तत्रापकर्षविरहात्, स्वपदमपकर्षपरं। यदि च परमाणुपरिमाणे द्व्यणुकपरिमाणापेक्षयापि नोत्कर्षोऽस्ति किन्त्वपकर्ष एव तस्यात्यन्तापकृष्टत्वेन सुप्रसिद्धत्वात् अधिकदेशव्यापकत्वेनैव परिमाणस्योत्कृष्टत्वमिति गुणकिरणावल्यामाचार्य्यैरभिहितत्वाच्च. तदा तु सजातीयेत्यनुपादाय तादृशोपाधिमद्वृत्तिप्रतियोगिकत्वेनापकर्ष एव विशेषणीयः।

केचित्तु प्रत्यक्षत्वे सतीत्यनेन विशेषणान्न परमाणुपरिमाणादौ व्यभिचारः। न च सत्यन्तवैयर्थ्यं, हेतुद्वये तात्पर्य्यात्. किन्तूत्कर्षवत्त्वघटितहेतौ प्रत्यक्षं बहिरिन्द्रियजत्वेन विशेषणीयमत आत्मपरिमाणस्य प्रत्यक्षत्वेन न तत्र व्यभिचार इति प्राहुः।

---

(१) महत्त्वस्य परिमाणत्वेन सजातीयत्वेऽपि तद्व्याप्याणुत्वादिजात्या न तथात्वं तच्च द्व्यणुक एवेति तदपेक्षयापकर्षस्तत्रेति भावः।

नित्यत्वमिति चेत्। न। तारत्व-मन्दत्वयोरुत्कर्षापकर्ष-योर्गकारे पूर्व्वन्यायेनासिद्धेः सिद्धौ वा जातिसङ्करभये-नोत्कर्षापकर्षयोर्जात्योः रसत्व-शब्दत्वव्याप्ययोर्नानात्वेन रसशब्दसाधारण्याभावात्। अतएव सजातीयसा-क्षात्कारप्रतिबन्धकतावच्छेदकसामान्यमुत्कर्षः तत्प्रति-बध्यसाक्षात्कारविषयतावच्छेदकसामान्यमपकर्ष इति साधारणो हेतुरपास्तः। तारत्वादेर्गकारजातित्वा-सिद्धेः। साधनावच्छिन्नसाध्यव्यापकमूर्त्तगुणत्वस्याश्रो-

---

अनुमितानुमाने गौरवादाह, 'अत एवेति, 'अनित्यत्वमिति, शब्दे साधनीयमिति शेषः। 'साधारण्येति, तथाच शब्दवृत्त्युत्कर्षा-पकर्षघटितव्याप्तिरेवासिद्धेति भावः। 'सजातीयेति, अत्र हेतुद्वये तात्पर्य्यं, गगन-परमाणुपरिमाणवृत्तिजात्योर्निरूक्तप्रतिबन्धकतावच्छे-दकत्व-प्रतिबध्यतावच्छेदकत्वयोरसत्वेन व्यभिचाराभावाद्भयनिवेशे प्रयोजनविरहादिति ध्येयं। 'अमूर्त्तमात्रवृत्तित्वादौ[१] साध्या-व्यापकतया 'साधनावच्छिन्नेति, इदञ्च सन्निहितहेतुद्वयापेक्षया अन्यथा सुखादौ कर्म्मणि च साध्याव्यापकत्वापातात्, 'गुणादञ्च समवायेन मूर्त्तवृत्तितालाभाय, ध्वनिश्च वायुधर्म्म इति मतेनेद-मिति न ध्वनौ साध्याव्यापकता, 'अश्रोत्रेति श्रोत्राग्राह्यगुणत्वस्ये-त्यर्थः, नातः श्रोत्रसंयोगादौ व्यभिचारः. ध्वनिभिन्नभावत्वावच्छिन्न-

---

(१) अवृत्तिमात्रवृत्तित्वादाविति ख० ।

त्वस्य चोपाधित्वात् अप्रयोजकत्वाच्च। न हि का-
णाधीन एव उत्कर्षोऽपकर्षश्च, परममहति परमा-
च परिमाणे प्रत्येकं सत्त्वात्। न चोभयस्यैकत्र स-
कारणप्रयोज्यं, एकैकवद्द्वयोरपि प्रत्येकमेकत्वात्। स्या-
देतत् श्रोत्रव्यापारानन्तरमिदानीं श्रुतपूर्व्वो गकारो
नास्ति विनष्टः कोलाहल इति प्रतीतेः प्रत्यक्षमेव
शब्दानित्यत्वं विनाशिभावत्वेनोत्पत्तिमत्त्वानुमानाद्वा
प्रत्यक्षप्रतियोगिकाभावत्वेन हि प्रत्यक्षत्वं ध्वंसस्य घट-

साध्यव्यापकत्वं[1] बोध्यं तेन ध्वनि-तद्ध्वंसयोर्न साध्याव्यापकता, अस्म-
न्मते शब्दत्वादिमत्यते ध्वनेः षडिन्द्रियवेद्यकालस्य च व्यावर्त्तनाय
पक्षेतरत्वं, उत्कर्षवत्त्वे सतीति पूर्व्वोक्तहेतौ दोषान्तरमाह, 'अप्रयो-
जकत्वाच्चेति। 'सजातीयेत्यादिहेतुपरत्वे 'परममहतीत्याद्यग्रिमग्रन्थ-
विरोधात् अनुकूलतर्कमाशङ्क्य निराकरोति, 'न हीति। 'प्रत्येक-
मेकत्वादिति, तथाच प्रत्येकसत्तानियामकादेव एकत्रोभयसत्त्वोप-
पत्तेर्न तत्र सकारणकत्वं प्रयोजकमिति भावः। 'श्रोत्रव्यापारा-
नन्तरमिति श्रोत्र-मनःसंयोगानन्तरमित्यर्थः। ननूत्पत्तिमत्त्वमेवा-
नित्यत्वं तच्च न प्रत्यक्षसिद्धमित्यत आह, 'विनाशिभावत्वेनेति,
'उत्पत्तिमत्त्वानुमानाद्वेति, 'शब्दानित्यत्वमित्यनुषज्यते, 'अभावत्वेन'
ध्वंसत्वेन, तेन न मूर्त्तसामान्याभावे व्यभिचारः, 'ध्वंसस्य' शब्द-

---

(१) ध्वनिभिन्नतारत्वावच्छिन्नसाध्यव्यापकत्वमिति ख०।

ध्वंसवत् न तु विनाशग्रहे प्रतियोगिसमवायिप्रत्यक्षत्वं तन्त्रं धर्म्माभावस्य प्रत्यक्षत्वापत्तेः। तदिन्द्रियाग्राह्येऽपि प्रतियोगिसमवायिनि गन्ध-रसाभावयोर्ग्रहणाच्च। नोभयं गौरवात् स्मृतघटसंयोगध्वंसाप्रत्यक्षत्वापाताच्च। न च प्रतियोगियोग्यत्वस्य तन्त्रत्वे वायुस्पर्शध्वंसोऽपि प्रत्यक्षः स्यात् इति वाच्यम्। आश्रयनाशजन्यस्य तस्य

ध्वंसस्य, 'विनाशग्रहे' विनाशप्रत्यक्षे, 'धर्म्माभावेति धर्म्मध्वंसेत्यर्थः। ननु स्वग्राहकेन्द्रियग्राह्यप्रतियोगिसमवायिवृत्तिनाशत्वं[१] ध्वंसप्रत्यक्ष-तन्त्रमित्यत आह, 'तदिन्द्रियेति, 'गन्ध-रसाभावयोः' गन्ध-रस-ध्वंसयोः। ननु तदिन्द्रियग्राह्यप्रतियोगिकध्वंसत्वं प्रतियोगिसम-वायिनो लौकिकप्रत्यक्षत्वञ्च इदं नाशप्रत्यक्षे तन्त्रमित्यत आह, 'नोभयमिति, 'स्मृतघटेति स्मृतघटयोर्यत्संयोगध्वंसप्रत्यक्षं भूतलादौ तस्याभावप्रसङ्गादित्यर्थः, तदानीं प्रतियोगि-समवायिनोर्लौकिक-प्रत्यक्षविरहादिति भावः। यदा कदाचित् प्रत्यक्षविषयप्रतियोगि-समवायिकनाशत्वस्य प्रयोजकत्वे च मानाभाव इति हृदयं[२]। 'प्रत्यक्षः स्यादिति वायौ प्रत्यक्षः स्यादित्यर्थः, अन्यथा काशादौ तत्प्रत्यक्षा-भ्युपगमादिष्टापत्तेः सम्भवात्। 'ग्राहकेति, वायुघटितेन्द्रियसन्निकर्ष-विरहादिति भावः। नन्वेतावता शब्दध्वंसप्रत्यक्षसम्भवेऽपीदानीं श्रोत्रे

---

(१) स्वं प्रतियोगि तद्ग्राहकेन्द्रियग्राह्यो यस्तत्समवायी तद्वृत्तीत्यर्थः।

(२) तथाच गौरवादेव तदपि न वाच्यमिति भावः।

ग्राहकेन्द्रियसन्निकर्षाभावात्। किञ्च यस्य सत्त्वं यत्र नुपलब्धिविरोधि तस्याभावस्तत्र गृह्यते इति योग्य

श्रुतपूर्व्वो गकारो नास्तीत्यत्यन्ताभावप्रत्यक्षासम्भवः अधिकरणतद्देशिष्ट्यावगाह्यभावप्रत्यक्षे(१) तद्योग्यताविशिष्टप्रतियोगिसत्त्वानुपलब्धिरूपाया योग्यानुपलब्धेर्हेतुत्वात् अन्यथा जलपरमाणौ पृथिवी नास्तीत्यपि प्रत्यक्षापत्तेः। न च महदुद्भूतरूपवदिन्द्रियसम्बद्धविषयताया एव पृथिवीत्वाद्यभावग्राहकत्वात्तदभावादेव न तादृश प्रत्यक्षमिति वाच्यं। तथापि स्थूलजले पृथिवीत्वाभावसन्निकर्षदशाया मुपनीतजलपरमाणुप्रकारेण तादृशलौकिकप्रत्यक्षस्य दुर्व्वारत्वात् न च तदानीं तादृशप्रत्यक्षे इष्टापत्तिरेव "जलपरमाणौ पृथिवीत्वाभावसाक्षात्कारो न भवतीति प्रामाणिकप्रवादस्य च जलपरमाणुघटितसन्निकर्षेण पृथिवीत्वाभावसाक्षात्कारो न भवतीत्यर्थ इति वाच्यं। जलपरमाणुसन्निकर्षदशायां पृथिवीत्वशून्ययोग्यवस्त्वन्तरसन्निकर्षस्यावश्यकतया पृथिवीत्वाभावलौकिकसाक्षात्कारस्यावश्यकत्वेन तत्र जलपरमाणुघटितसन्निकर्षजन्यत्वाभावस्य प्रपथनिर्णयत्वापत्तेरित्यतोऽत्यन्ताभावग्रहमप्युपपादयति, 'किञ्चेति, 'यस्य सत्त्वमिति प्रतियोगितावच्छेदकसम्बन्धेन यद्धर्म्मावच्छिन्नस्य सत्त्वमित्यर्थः, 'यत्र' अधिकरणे, 'अनुपलब्धिविरोधि' स्वावच्छिन्नवैशिष्ट्यावगाहिलौकिकप्रत्यक्षाभावाभावापादकं स्वावच्छिन्नवैशिष्ट्यावगाहिलौकिकप्रत्यक्षापादकमितियावत्, 'तस्याभावः' तद्धर्म्मावच्छिन्नात्यन्ताभावः,

---

(१) बहिरिन्द्रियेण स्वायोग्यमुख्यविशेष्यकज्ञानाजननात् सर्व्वसाधारण्यायेदम्।

नुपलब्ध्यर्थः। अतएव पृथिवीत्वाभावो जलीयपरमाणौ न प्रत्यक्षः प्रत्यक्षश्च वायौ रूपाभावः(१)। अस्ति च

'तत्र गृह्यते' आधाराधेयभावसम्बन्धेन तद्विशिष्टतया साक्षात्क्रियते। अत्र भूतलादौ समवायादिना घटसत्त्वेन समवायादिना घटोपलम्भस्यापादनसम्भवादतीन्द्रियसंयोगादिना घटाभावप्रत्यक्षापत्तिवारणाय प्रतियोगितावच्छेदकसम्बन्धेनेत्युक्तं, यद्धर्मावच्छिन्नेत्युपादानात्तमनपि महत्त्वसमानाधिकरणोद्भूतरूपाभावस्याचाक्षुषोनोद्भूतरूपत्वावच्छिन्नाभाव इत्यवधेयं। 'पृथिवीत्वाभाव इति जलपरमाणौ पृथिवीत्वं नास्तीति न साक्षात्कार इत्यर्थः, जलपरमाणुर्यदि पृथिवीत्ववान् स्यात् पृथिवीत्ववैशिष्ट्यावगाहिलौकिकचाक्षुषविषयः स्यादित्यापादनस्य जलपरमाण्वादौ व्यभिचारेणासम्भवादिति भावः। 'वायौ रूपाभाव इति वायावुद्भूतरूपाभाव इत्यर्थः,(२) वायुर्यदि महत्त्वे सति चक्षुःसन्निकर्षादिमत्त्वे च सत्युद्भूतरूपवान् स्यात्तदोद्भूतरूपवैशिष्ट्यावगाहिलौकिकचाक्षुषविषयः स्यादित्यापादनसम्भवादिति भावः। यद्यप्येवं जलपरमाणावपि पृथिवीत्वाभावसाक्षात्कारो दुर्वारः जलपरमाणुर्यदि महदुद्भूतरूपवत्त्वे सति चक्षुःसन्निकर्षादिमत्त्वे च सति पृथिवीत्ववान् स्यात्तदा पृथिवीत्ववत्तयोपलभ्येतेत्यापादनस्य सुकरत्वात्। न च पर्याप्तिधर्माविशेषितेन यद्धर्मावच्छिन्नसत्त्वेनेति विवक्षितमिति वाच्यं। एवमपि जलपरमाणुर्यदि

(१) मध्ये इति वायौ रूपाभाव इति क०।
(२) मध्ये इति वायावुद्भूतरूपाभाव इत्यर्थ इति ख०।

तथा शब्दे तस्य सत्त्वे समवधाने च प्रतीतिप्रसङ्गात् निरधिकरणाभावप्रतीतिर्नास्तीति चेत्, न, इदेदानीं

गन्धवदणुभिन्नत्वे(१) सत्युद्भूतरूपवत्त्वे सति चक्षुःसन्निकर्षादिमत्त्वे सति पृथिवीत्ववान् स्यात्तदा पृथिवीत्ववत्तयोपलभ्येतेत्यापादनसम्भवेन तत्र पृथिवीत्वाभावचाक्षुषस्य दुर्वारत्वात्, तथापि पत्रारम्भिधर्म्मेण प्रतियोगिव्याप्यकातिरिक्तेन चाविशेषितेन यद्धर्म्मावच्छिन्नसत्त्वेनेति विवक्षितं गन्धवदणुभिन्नत्वादिकञ्च(२) प्रतियोगिव्याप्यकातिरिक्तमेवेति नातिप्रसङ्ग इत्यभिमानः। न चैतस्य योग्यानुपलब्ध्यर्थत्वे(३) घटवति भूतले घटाभावलौकिकप्रत्यक्षभ्रमासम्भवः तत्र वास्तवघटसत्त्वेनापादनासम्भवादिति वाच्यं। अस्या अभावलौकिकप्रत्यक्षप्रमोपयोगित्वादिति दिक्। विस्तरस्त्वस्मत्कृतानुमानरहस्ये व्यतिरेकिग्रन्थेऽनुसन्धेयः। प्रकृते योजयति, 'अस्ति चेति, 'तस्य सत्त्वे' समवायेन शब्दस्य सत्त्वे, 'समवधाने च' मनःसंयोगे च, 'प्रतीतिप्रसङ्गादिति शब्दप्रत्यक्षापादनसम्भवादित्यर्थः, यदि मनःसंयुक्तत्वे सति शब्दवान् स्यात्तदा शब्दवत्तयोपलभ्येतेत्यापादनस्य निरुपद्रवत्वादिति भावः(४)। 'निरधिकरणेति अधिकरणानवगाहिनीत्यर्थः, अधिकरणस्य प्रकृते भानं न सम्भवति श्रोत्रस्याधिकरणस्य श्रोत्रा-

---

(१) गन्धवद्भिन्नत्व इति ख० ।

(२) गन्धवद्भिन्नत्वादिकञ्चेति ख० ।

(३) योग्यानुपलम्भपदार्थत्व इति ख० ।

(४) यदि मनःसंयुक्तत्वे सति शब्दवत् स्यात् तदा श्रावणसाक्षात्कारविषयः स्यादित्यापादानस्य निरुपद्रवत्वादिति भाव इति ख० ।

शब्दो नास्तीति प्रतीतेः । तस्मात् यत्राधिकरणे देशे समये वा प्रतियोग्यत्र वर्त्तते तत्र तदभावो निरूप्यते । अतएव सद्भ्यामभावो निरूप्यते इत्युक्तं, शब्दाभावस्य च स्वतएवेन्द्रियसन्निकृष्टत्वात् नाश्रये सन्निकर्षापेक्षा । इन्द्रियविशेषणतया नाभावग्रहणमिति चेत् । न ।

योग्यत्वादित्याशयः, 'इति प्रतीतेरिति इत्युपनीतश्रोत्रादिविषयक-प्रतीतेरित्यर्थः । नन्वेवं योग्यप्रतियोगिकध्वंसस्य कुत्रचिदधिकरणे प्रत्यक्षं भवति कुत्रचिन्नेत्यत्र किं नियामकं अधिकरणयोग्यत्वस्य तत्र नियामकत्वानभ्युपगमादित्यत आह, 'तस्मादिति, 'यत्र' यत्रैव,(१) 'देशे' दिगुपाधौ, 'प्रतियोगी वर्त्तत इति प्रतियोगी प्रतियोगि-सत्त्वोपलम्भमापादयितुं शक्नोतीत्यर्थः, 'तत्र तदभाव इति तत्रैव तदभावो निरूप्यत इत्यर्थः, न तु तस्यापि योग्यत्वं तन्त्रमिति भावः । 'अतएवेति यत एव अधिकरणयोग्यत्वं न शब्दाभाव-प्रत्यक्षे तन्त्रं अतएव, 'सद्भ्यां' प्रामाणिकाभ्यामधिकरण-प्रतियोगिभ्यां अभावो निरूप्यत इत्येवोक्तं न तु योग्याभ्यामधिकरण-प्रतियोगि-भ्यामित्युक्तमित्यर्थः । ननु श्रोत्रस्य श्रोत्रासम्बद्धतया शब्दाभावे इन्द्रियसम्बद्धविशेषणत्वाभावात् कथं प्रत्यक्षत्वमित्यत आह, 'शब्दा-भावस्येति, 'स्वतएव' साक्षादेव, 'आश्रये' श्रोत्रे, 'इन्द्रियेति, तथाच शब्दाभावो नाध्यक्षः अभावत्वे सति साक्षात्कारकारणेन्द्रियसम्बद्ध-

---

(१) तन्त्रोवमित्यादिः यत्रैवेत्यन्तः पाठः कपुस्तके नास्ति ।

अयोग्यत्वस्योपाधित्वात्। अन्यथा गुणस्य संयुक्तसमवायेन ग्रहणादर्शनात् न समवायेन शब्दग्रहः स्यादिति। नैवं। सत एव हि शब्दस्य व्यञ्जकविरहादनुपलब्धिमात्रं न तु ध्वंसः, तत्तद्व्याप्येतरसकलतदुप-

---

विशेषणतारहितत्वादित्यनुमेयमिति भावः। 'अयोग्यत्वस्येति अयोग्यत्वं विषयतया साक्षात्काराजनकत्वं योग्यानुपलब्धिरहितत्वं वा। 'अन्यथेति सहचारदर्शनमात्रेण कल्पने इत्यर्थः। 'स्यादेतदिति शङ्कायां समाधत्ते, 'नैवमिति, 'अनुपलब्धिमात्रमिति कदाचिदनुपलब्धिमात्रमित्यर्थः। ननु गकारादेः सर्व्वदा सत्त्वे लोके इदानीं श्रुतपूर्व्वो गकारो नास्तीति प्रत्ययानुपपत्तिरित्यत आह, 'तत्तद्व्याप्येति प्रतियोगि-प्रतियोगिव्याप्येतरप्रतियोग्युपलम्भकयावत्कारणविशिष्टप्रतियोगिसत्त्वानुपलब्धिरूपाया योग्यानुपलब्धेरभावादित्यर्थः, श्रुतपूर्व्वो गकारो नास्तीति प्रत्ययासिद्धेरिति शेषः, अत्र प्रतियोगिसत्त्वानुपलब्धिमात्रोपादाने अन्धकारदशायां निमीलितनयनदशायां सुषुप्त्यादिदशायाञ्चाभावप्रत्ययापत्तिरतीन्द्रियमात्रप्रतियोगिकात्यन्ताभावप्रत्ययापत्तिश्चातो विशिष्टान्तं, अतीन्द्रियमात्रप्रतियोगिकात्यन्ताभावस्थले च प्रतियोग्युपलम्भाप्रसिद्ध्या नातिप्रसङ्गः, प्रतियोग्युपलम्भपदस्य तदिन्द्रियजन्यप्रतियोगिलौकिकप्रत्ययपरत्वात्, यावदित्युक्ते अन्धकारादावपि घटाद्यभावप्रत्ययापत्तिः चक्षुःसंयोगादिलक्षणप्रतियोगिग्राहकयत्किञ्चित्कारणसत्त्वादतस्तदुपादानं, अभावप्रत्ययदशायां प्रतियोगि-तदिन्द्रियसन्निकर्षादेः प्रतियोगि-

ग्राहकसमवधाने तदनुपलब्धिरूपयोग्यानुपलब्धेरभावात्। प्रतियोग्युपलम्भकव्यञ्जकवायोरभावात्, विनष्ट-

---

ग्राहकयावदन्तर्गतस्य सर्व्वथासम्भवाद्व्यभिचारवारणायेतरान्तं यावत्-कारणविशेषणं, प्रतियोगीन्द्रियसन्निकर्षस्य प्रतियोगिव्याप्य एव । न चैवमतीतानागतचक्षुरादिव्यक्तीनामपि तादृशघटादिग्राहकत्वात् यावत्प्रतियोग्युपलम्भकसमवधानं न क्वापीत्यसम्भव इति वाच्यम् । प्रतियोगि-तद्व्याप्येतरनिष्ठानि तदिन्द्रियजन्यलौकिकप्रत्यक्षनिरूपितानि यावन्ति कारणतावच्छेदकानि स्वाश्रयसम्बन्धेन तद्वैशिष्ट्यस्य विवक्षितत्वात् । ननु तथाप्यत्र व्याप्यतायां व्याप्यदिशि प्रतियोग्युपलम्भकतावच्छेदकसम्बन्धः प्रतियोगिदिशि च तादात्म्यं घटकं तेनातीतानागतघटाद्यभावप्रत्यक्षे प्रतियोगिनिष्ठमहत्त्वोद्भूतरूपादेर्व्यवच्छेदः इत्यस्य प्रतियोगीन्द्रियसन्निकर्षादेर्न व्यवच्छेदः तस्यातीतेऽपि सत्त्वेन प्रतियोग्यव्याप्यत्वात् प्रतियोग्युपलम्भकतज्ज्ञानस्थितित्वावच्छिन्नानामपि प्रतियोगिव्याप्येतरतया असम्भवापत्तेः स्वाश्रयनाशजन्य संयोगनाशस्य प्रत्यक्षे व्यभिचाराच्च व्यासज्यवृत्तिगुणप्रत्यक्षहेतोर्यावदाश्रयसन्निकर्षस्य तादृशप्रतियोग्युपलम्भकयावदन्तर्गतस्याभावात्, अतएव कालिकसम्बन्धेन प्रतियोगिव्याप्यत्वाभिधानेऽपि न निस्तारः प्रतियोगीन्द्रियसन्निकर्षादेः प्रतियोगिविनाशक्षणेऽपि सत्त्वेन तस्यापि कालिकसम्बन्धेन प्रतियोग्यव्याप्यत्वात् आलोकादेर्घटत्वादिव्याप्यतयाऽन्धकारेऽपि घटत्वाद्यभावप्रत्यक्षापत्तेश्चेति चेत्, न, प्रतियोगि-तद्व्याप्यपदेन प्रतियोग्युपलम्भासाधारणकारणस्य विवक्षितत्वात् प्रतियोग्युपलम्भासाधारणकारणत्वस्य यादृशप्रतियोगिग्राहकेऽसत्यपि

प्रतीतिरपि त्वगिन्द्रियोपनीतव्यञ्जकवायुस्पर्शध्वंसोपाधिकैव। वायुर्नोत्पादकः किन्तु व्यञ्जकः इत्यत्र किं विनिगमकमिति चेत्। न। इदानीं श्रुतपूर्वो गकारो नास्ति विनष्टः कोलाहलइति प्रतीत्यनन्तरं पुनः श्रवणे श्रुतपूर्वोऽयं गकारः पुनः स एवायं कोलाहल-इति प्रत्यभिज्ञानमेव, घटध्वंसप्रतीत्यनन्तरञ्च स एवायं घट इति न प्रत्यभिज्ञानमिति तत्र विनष्टप्रतीत्या

चाक्षुषाभावप्रत्यक्षं तत्तद्ग्राहकत्वमेव वाच्यमिदञ्च संसर्गाभावप्रत्यक्षे चेत्तुः अतीन्द्रियान्योन्याभावप्रत्यक्षस्थले प्रतियोग्युपलम्भकाप्रसिद्धेः उपलम्भपदस्य लौकिकप्रत्यक्षपरत्वादिति दिक्। ननु तथापि विनष्टः कोलाहल इति प्रतीत्या शब्दस्य ध्वंससिद्धिरित्यत आह, 'विनष्ट-प्रतीतिरपीति, 'वायुस्पर्शध्वंसेति, न्यायनये वायोरतीन्द्रियतया वायुध्वंसमपहाय वायुस्पर्शानुधावनं। न च वायुस्पर्शध्वंसोऽपि कथं त्वगिन्द्रियोपनीतः आश्रयनाशजन्यस्य तस्य ग्राहकेन्द्रियसन्निकर्षाभावादिति वाच्यं। कालस्य षडिन्द्रियग्राह्यतया[१] कालघटित-सन्निकर्षेण काले तस्य त्वचा प्रत्यक्षसम्भवादिति भावः। वायोर-व्यञ्जकत्वे योग्यानुपलब्धिः सम्भवत्येवेत्यभिप्रायेणाशङ्कते, 'वायुरिति, 'किं विनिगमकं' किं प्रमाणं। 'प्रत्यभिज्ञानमेवेति, 'विनिगमक-मित्यनुषज्यते। नन्वेवं घटादेरपि बाधकाभावान्नित्यत्वमस्तु विनष्टप्रती-

---

(१) इदञ्च नवमतानुसारेणोक्तं, वस्तुतो न्यायमतेऽपि तथा कथने काल-स्यातीन्द्रियत्वेऽपि न क्षतिस्तथैवाऽऽलम्बनात् ।

ध्वंस एव सिध्यति। अतएव तारत्व-तारतरत्व-मन्दत्व-मन्दतरत्वप्रतीतीनां भ्रमत्वकल्पनाद्वरं प्रत्यभिज्ञानमात्रस्य भ्रमत्वकल्पनमित्यपास्तम्। एतासु सतीष्वप्यभेदप्रत्यभिज्ञानात्। स्यादेतत् शब्दः प्रयत्नसाध्यः तदनभिव्यङ्ग्यत्वे सति तदनन्तरमुपलभ्यमान-

---

त्वेऽन्यदीयध्वंसविषयत्वेनैवोपपत्तेरित्यत आह, 'घटध्वंसेति। 'अतएवेति, 'अपास्तमित्यनेनान्वयः। 'एतासु सतीष्विति तारत्व-तारतरत्वादिप्रतीतीनां यथार्थत्वेऽपीत्यर्थः, 'अभेदप्रत्यभिज्ञानादिति यथार्थाभेदप्रत्यभिज्ञानसम्भवादित्यर्थः, तत्प्रतीतीनां स्वाश्रयव्यञ्जकत्वात्मकपरम्परासम्बन्धेन[1] वायुनिष्ठतारत्वाद्यवगाहित्वादिति भावः। 'तदनभिव्यङ्ग्यत्व इति, प्रतिबन्धकविधूननद्वारा प्रयत्नव्यङ्ग्ये घटत्वादौ व्यभिचारवारणाय सत्यन्तं प्रयत्नजन्यलौकिकसाक्षात्काराविषयत्वपरं, कालादौ व्यभिचारवारणाय 'तदनन्तरमुपलभ्यमानत्वादिति तदन्वय-व्यतिरेकानुविधायिलौकिकप्रत्यक्षविषयत्वादित्यर्थः, यो यज्जन्यलौकिकसाक्षात्काराविषयत्वे सति यदन्वय-व्यतिरेकानुविधायिलौकिकसाक्षात्कारविषयो भवति स तज्जन्य इति सामान्यमुखी व्याप्तिर्नातो जन्यमात्रस्य प्रयत्नजन्यतया यदन्वय-व्यतिरेकानुविधायित्वार्थकस्य तदनन्तरपदस्य वैयर्थ्यं, दण्डाद्यनभिव्यङ्ग्ये घटादौ दण्डादिजन्यत्वाभावेन सामान्यतो व्याप्तौ व्यभिचारवारणाय तदु-

---

(१) स्वाश्रयजन्यत्वात्मकपरम्परासम्बन्धेनेति ख०।

त्वात् पटवत्, अभिव्यञ्जकत्वं हि इन्द्रियसम्बन्धप्रतिबन्धकापनायकत्वादिन्द्रियसन्निधापकत्वाद्वा[१] कुड्योत्सारणेनेव पटादीनां, तदुभयमपि शब्दे न सम्भवति नित्यसमवेतत्वेनावरणापनयन-सन्निधापनयोरभावात् ।

पादानात् । न च प्रयत्नानभिव्यङ्ग्यायामपूर्व्वदेवदत्तत्वादिजातौ व्यभिचार इति वाच्यम् । जातिमत्त्वे सतीति विशेषणात्, इत्थञ्च सामान्यतोव्याप्तौ चक्षुरादिमादाय घटादिवृत्तिरूपादौ व्यभिचारवारणाय सत्यन्तं । न च शब्दस्यापि बुभुत्सावशात् कर्णशष्कुल्यवच्छिन्नमनःसंयोगद्वारा प्रयत्नव्यङ्ग्यत्वादसिद्धिरिति वाच्यं । तद्भिन्नशब्दस्य पक्षीकरणादिति भावः । सामान्यतोव्याप्त्यभिप्रायेण दृष्टान्तः पटवदिति, तत्र प्रतिबन्धकविधुननद्वारा प्रयत्नव्यङ्ग्यत्वेऽपि तन्तुसंयोगादिमादाय साध्य-हेतुसत्त्वादिति भावः[२] । सत्यन्तविशेषणस्य स्वरूपासिद्धिं निराकरोति, 'अभिव्यञ्जकत्वं हीति, प्रयत्नस्येति शेषः । 'इन्द्रियसम्बन्धेति विषयेन्द्रियसम्बन्धेत्यर्थः, 'इन्द्रियसन्निधापकत्वादिति विषयस्येन्द्रियनिकटदेशानयनद्वारा इन्द्रियसन्निकर्षजननाद्वेत्यर्थः, 'कुड्योत्सारणेनेवेति पूर्व्ववद्दृष्टान्तः, 'नित्यसमवेतत्वेनेति श्रोत्रसमवायरूपेन्द्रियसन्निकर्षस्य नित्यत्वेनेत्यर्थः, 'आवरणापनयनेति इन्द्रियसन्निकर्षस्य प्रतिबन्धकापनयनेत्यर्थः, 'सन्निधापनेति विषयस्येन्द्रियसन्निकृष्टदेशानयनद्वारेन्द्रियसन्निकर्ष-

---

(१) इन्द्रियसन्निकर्षाधायकत्वाद्वेति क० ।

(२) पटप्रत्यक्षे तन्तुसंयोगस्याहेतुत्वेऽपि तत्सत्त्व एव पटप्रत्यक्षादिति भावः ।

नापि श्रोत्रसंस्कारात्, इन्द्रियसंस्कारस्य उन्मीलना-लोकादेः सकृदिन्द्रियसम्बन्धयोग्यसर्व्वार्थोपलब्ध्यनुकूल-संस्कारजनकत्वं दृष्टं तद्वद्वायुरपि सकृदेव सर्व्वशब्दो-पलब्ध्यनुकूलं श्रोत्रे संस्कारमादध्यात्, तथाच सर्व्व-शब्दोपलब्धिः स्यात्। तदुक्तं "सकृच्च संस्कृतं श्रोत्रं सर्व्व-शब्दान् प्रकाशयेत् । घटायोन्मीलितं चक्षुः पटं न हि

ग्रहणेत्यर्थः, 'श्रोत्रसंस्कारादिति श्रोत्रसंस्कारद्वारेत्यर्थः, प्रथमस्य शब्दव्यञ्जकत्वमिति शेषः । संस्कारश्च परमते पदार्थविशेषः, अस्म-न्मते च वायुसंयोगादिरूपसहकारिणा समवधानं, 'इन्द्रियसंस्कारस्य' इन्द्रियसंस्कारकस्य, क्वचित्तथैव पाठः, 'सकृदिति युगपदित्यर्थः, 'इन्द्रियसम्बन्धेति इन्द्रियसम्बद्धो योग्यो यावानर्थस्तदुपलब्धीत्यर्थः, 'तद्वत्' उन्मीलनादिवत्, 'वायुरपीति, 'अपिना प्रयत्नसङ्ग्रहः, तेन न प्रकृतासङ्गतिः,[१] 'सकृदेव' युगपदेव, 'सर्व्वशब्देति भवन्मते शब्दानां नित्यैकतया सर्व्वेषामेव शब्दानामिन्द्रियसन्निकृष्टत्वादिति भावः । 'तथाचेति, युगपदेवेति शेषः, 'सकृच्चेति युगपदेवेत्यर्थः, शब्दानां नित्यैकत्वे इत्यादिः । ननु यज्जिज्ञासया संस्कार उत्पा-दितस्तदेव बोधयतीत्यत आह, 'घटायेति घटजिज्ञासयेत्यर्थः, 'न बुध्यत इति न बोधयतीत्यर्थः, युगपत् सर्व्वशब्दोपलब्धिं निरा-

---

(१) तेन प्रकृतसङ्गतिरिति ख० ।

न दृश्यते"। यथान्वय-व्यतिरेकाभ्यां कार्ये प्रतिनियत-जनकजन्यत्वं कखादेऽपि प्रतिनियतव्यञ्जकव्यङ्ग्यत्वमि-ति चेत्। न। वर्णा हि न प्रतिनियतव्यञ्जकव्यङ्ग्याः

कर्तुमाशङ्कते, 'यथेति, 'प्रतिनियतजनकेति परस्पराजनकेत्यर्थः, 'कखादेऽपि' ककारादिष्वपि, 'प्रतिनियतेति परस्पराव्यञ्जकव्यङ्ग्यत्व-मित्यर्थः, 'वर्णा हीति, 'न प्रतिनियतव्यञ्जकव्यङ्ग्याः' परस्परा-व्यञ्जकव्यङ्ग्या इत्यर्थः, व्यञ्जकत्वं तद्विषयकसाक्षात्कारजनकत्वं, व्यङ्ग्यत्वं तज्जन्यसाक्षात्कारविषयत्वं। ननु परस्परपदार्थस्य दुर्वच-त्वात्कथमिदमनुमानं। न च तद्वर्णे एतद्वर्णाव्यञ्जकव्यङ्ग्यत्वाभावः, एतद्वर्णे तद्वर्णाव्यञ्जकव्यङ्ग्यत्वाभाव एव परस्पराव्यञ्जकाव्यङ्ग्यत्वं तथाचैवं प्रयोगः ककारः खकाराव्यञ्जकव्यङ्ग्यत्वाभाववान् खकारसमानदेशत्वे सति तत्समानेन्द्रियग्राह्यत्वात्[1] एवं खकारं पक्षीकृत्य ककारा-व्यञ्जकव्यङ्ग्यत्वाभावः साध्यः सामान्यमुखी व्याप्तिरिति वाच्यं। तद्घटैकत्वसमानदेशसमानेन्द्रियग्राह्य-तद्घटैकपृथक्त्वे[2] व्यभिचा-रात् पृथक्त्वस्य एकत्वाव्यञ्जकावधिज्ञानव्यङ्ग्यत्वात्। न च पृथक्त्व-

---

(१) तत्साक्षात्कारत्वावच्छिन्नविजातीयवायुसंयोगत्वेन हेतुत्वं एवमन्यत्र एवञ्च तादृशव्यङ्ग्यत्वमेव ककारादाविति न तदभाव इति मीमांसक-मतं, नैयायिकमते च वायुसंयोगानां वर्णोत्पादकत्वमेव न व्यञ्जकत्वं तथाच व्यञ्जकत्वाभावात् सिद्धिः।

(२) एकमात्रावधिकपृथक्त्वमेकपृथक्त्वं, उभयमात्रावधिकपृथक्त्वं द्वि-पृथक्त्वं एवमग्रेऽपि।

एकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात्

व्यञ्जकमनधिष्ठानमेकत्वाव्यञ्जकमेव न पृथक्त्वसाक्षात्कारस्य नियमत एकत्वसाक्षात्काररूपत्वादिति वाच्यं । तदव्यञ्जकव्यञ्जकत्वाभावो हि न तद्विषयकसाक्षात्काराजनकअन्यसाक्षात्कारविषयत्वाभावः, सिद्धसाधनापत्तेः(१) ककारव्यञ्जकविलक्षणवायुसंयोगस्यापि ककारखकारोभयविषयकसमूहालम्बनसाक्षात्कारजनकत्वेन खकारसाक्षात्कारजननस्वरूपयोग्यत्वात्,(२) किन्तु तत्साक्षात्कारत्वावच्छिन्नाजनकअन्यसाक्षात्कारविषयत्वाभावो वक्तव्यः, तथाच व्यभिचार एव । भवति ह्येकत्वसाक्षात्कारत्वावच्छिन्नाजनकावधिष्ठानअन्यसाक्षात्कारविषय एकपृथक्त्वं । न च तद्विषयकसाक्षात्कारानुपधायकअन्यसाक्षात्कारविषयत्वाभावस्तदर्थः, तथाच न सिद्धसाधनं तन्मते खकारविषयकसाक्षात्कारानुपधायकवायुसंयोगस्यापि ककारसाक्षात्कारजनकत्वादिति(३) वाच्यं । तथापि तद्घटैकपृथक्त्वसमानदेशसमानेन्द्रियग्राह्ये तद्घटैकत्वे व्यभिचारात्, एकत्वस्य पृथक्त्वसाक्षात्कारानुपधायकस्यावधिष्ठानविरहकालीनालोकसंयोगस्य व्यञ्जकत्वादिति, नैवं, एकवर्णस्य यावद्व्यञ्जकव्यङ्ग्यापरवर्णाव्यञ्जकव्यङ्ग्यभिन्नत्व-

---

(१) मीमांसकमतेऽपि साध्यसत्त्वे निर्व्विवादादिति भावः ।

(२) खकारसाक्षात्कारजनकत्वादिति क० । तथाच तन्मतेऽपि कारे-[illegible]कतया तद्व्यञ्जकवायुसंयोगस्यापि तद्विषयकसमूहालम्बनात्मकस्वविषयकयत्किञ्चित्साक्षात्कारजनकत्वेन तदवच्छिन्नभेदासत्त्वादिति भावः ।

(३) तथाच यदवधिष्ठानस्याप्येकत्वसाक्षात्कारोपधायकत्वान्न व्यभिचारः ।

घटैकत्वपरिमाणवत्। न चावयवसंयोग-बहुत्वव्यञ्जका-

मेव हि परत्वाद्यव्यञ्जकाव्यञ्जकत्वं, तथाचैवं प्रयोगः, ककारः स्वाव्यञ्जकव्यञ्जकखकारकत्वे सति खकाराव्यञ्जकव्यञ्जकं यद्यत्तद्भिन्नः खकारसमानदेशत्वे सति खकारग्राहकेन्द्रियग्राह्यत्वात् यद्यत् समानदेशत्वे सति यद्ग्राहकेन्द्रियग्राह्यं तत् स्वाव्यञ्जकव्यञ्जकतत्कत्वे सति तदव्यञ्जकव्यञ्जकं यद्यत्तदन्यदिति सामान्यतो व्याप्तिः, इत्यत्र नोक्त-व्यभिचारः एकत्वस्य पृथक्त्वाव्यञ्जकव्यञ्जकत्वाभावात्। स्वाव्यञ्जक-व्यञ्जकत्वञ्च स्वसाक्षात्कारत्वावच्छिन्नाजनकवृत्तिकारणताप्रतियोगिक-कार्य्यतायाः(१) लौकिकसाक्षात्कारविषयताया अवच्छेदकत्वं, यथा-श्रुते सिद्धसाधनापत्तेः। खकारव्यञ्जकवायुसंयोगविशेषस्यापि खकार-ककारोभयविषयकसमूहालम्बनसाक्षात्कारजनकत्वेन ककारसाक्षा-त्कारजनकत्वात् तन्मतेऽपि खकारे ककाराव्यञ्जकव्यञ्जकत्वाभावेन स्वाव्यञ्जकव्यञ्जकखकारकत्वे सति खकाराव्यञ्जकव्यञ्जकत्वस्य ककारेऽभावसत्त्वात्। न च सिद्धसाधनवारणाय स्वसाक्षात्कारत्वावच्छि-न्नाजनकजन्यसाक्षात्कारविषयत्वमेव तदस्त्विति वाच्यं। तद्घटैकत्व-समानदेश-समानेन्द्रियग्राह्ये तद्घटैकपृथक्त्वे व्यभिचारात्। भवति हि पृथक्त्वसाक्षात्कारत्वावच्छिन्नाजनकात्म-मनःसंयोगादिजन्यसाक्षा-त्कारविषय एकत्वं एकत्वाव्यञ्जकावधिज्ञानव्यञ्जकमप्येकपृथक्त्वमिति कारणता स्वेतरभाववृत्तित्वेन विशेषणीया, स्वपदञ्च तच्छब्दवाच्य-परं, अन्यथा तद्घटैकत्वसमानदेश-समानेन्द्रियग्राह्ये तद्घटैकपृथक्त्वे

(१) स्वसाक्षात्कारत्वावच्छिन्नजनकावृत्तिकारणताप्रतियोगिककार्य्यताया-इति ख॰।

तद्व्यभिचारितादवस्थ्यात् एकत्वस्यापि पृथक्त्वसाक्षात्कारत्वावच्छि-न्नाजनकयोः स्वसाक्षात्कारमात्रप्रतिबन्धकदोषविशेषाभावयोर्व्यञ्ज-त्वात्, एकत्वत्वेनैकत्वसाक्षात्कारत्वेन न कार्य्य-कारणभावः किन्तु तत्तद्व्यक्तित्वेन तत्तद्व्यक्तिसाक्षात्कारत्वेन, अतएव एकत्वान्तरवृत्तिकार-णताप्रतियोगिककार्य्यतावच्छेदकतया तद्घटैकत्वस्य न व्यभिचारः, एवं तद्व्यञ्जकव्यक्तित्वमपि तत्साक्षात्कारत्वावच्छिन्नाजनकवृत्तिका-रणताप्रतियोगिककार्य्यतायाः लौकिकसाक्षात्कारविषयतया अवच्छे-दकत्वं, अन्यथा भवन्मतेऽपि(१) ककारव्यञ्जकवायुसंयोगविशेषस्यापि ककार-खकारोभयविषयकसमूहालम्बनसाक्षात्कारजनकत्वेन खकार-व्यञ्जकत्वात् ककारे खकाराव्यञ्जकव्यक्तिभिन्नत्वसत्त्वेन सिद्धसाधना-पत्तेः । न च सिद्धसाधनवारणाय तत्साक्षात्कारत्वावच्छिन्नाजनक-जन्यसाक्षात्कारविषयत्वमेव तदस्तु तन्मते ककारस्य खकारसाक्षात्-कारत्वावच्छिन्नाजनकः ककारव्यञ्जकवायुसंयोगविशेष एव तज्जन्य-साक्षात्कारविषयत्वेन तद्भिन्नत्वाभावात् सिद्धसाधनाभावादिति वाच्यं । तथा सति तद्घटैकपृथक्त्वसमानदेश-समानेन्द्रियग्राह्ये तद्घटैकत्वे व्यभिचारात् । भवति ह्येकत्वाव्यञ्जकावधिज्ञानव्यक्त्य-नेकपृथक्त्वनेकपृथक्त्वसाक्षात्कारत्वावच्छिन्नाजनकात्ममनःसंयोगा-दिजन्यसाक्षात्कारविषयोऽप्येकत्वमिति, इत्थञ्च एकत्वस्यापि साक्षा-त्कारविषयतया आत्म-मनःसंयोगादिजन्यतानवच्छेदकत्वान्न व्यभि-चारः, यद्यपि कारणता स्वेतरभाववृत्तित्वेन विशेषणीया तथापि साध्यीभूतान्योन्याभावप्रतियोगिपरं, अन्यथा तद्घटैकपृथक्त्वसमान-

(१) तन्मतेऽपीति ख० ।

देश-समानेन्द्रियग्राह्यतद्घटैकत्वे उक्तव्यभिचारतादवस्थ्यात् । भवति ह्येकत्वसाक्षात्कारत्वावच्छिन्नजनकावधिज्ञानवृत्तिकारणताप्रतियोगिककार्य्यतायाः साक्षात्कारविषयतया अवच्छेदकमेकपृथक्त्वं एकपृथक्त्वसाक्षात्कारत्वावच्छिन्नजनकैकत्व-तत्साक्षात्कारमात्रप्रतिबन्धकदोषविशेषाभावयोः साक्षात्कारविषयतया अवच्छेदकञ्चैकत्वमिति[1] ।

पित्रचरणास्तु तद्व्यञ्जकव्यञ्जकत्व-स्वाव्यञ्जकव्यञ्जकतत्त्वोभयाभाव एव परम्पराव्यञ्जकव्यञ्जकत्वाभावः । तथा चायं प्रयोगः, ककारः खकाराव्यञ्जकव्यञ्जकत्व-स्वाव्यञ्जकाव्यञ्जकखकारकत्वोभयाभाववान् खकारसमानदेशत्वे सति खकारग्राहकेन्द्रियग्राह्यत्वात्, यद्यत्समानदेशत्वे सति यद्ग्राहकेन्द्रियग्राह्यं तत्तद्व्यञ्जकव्यञ्जकत्व-स्वाव्यञ्जकव्यञ्जकतत्कत्वोभयाभाववद्भवतीति सामान्यतो व्याप्तिः । प्रथमदलाभावमात्रस्य साध्यत्वे तद्घटैकत्वसमानदेश-समानेन्द्रियग्राह्ये तद्घटैकपृथक्त्वे व्यभिचारः एकपृथक्त्वस्यैकत्वाव्यञ्जकावधिज्ञानव्यञ्जकत्वात्, इत्थञ्च स्वाव्यञ्जकव्यञ्जकैकत्वकत्वाभावेन[2] उभयाभावसत्त्वान्न व्यभिचारः । चरमदलाभावमात्रस्य साध्यत्वेऽपि एतद्घटैकपृथक्त्वसमानदेश-समानेन्द्रियग्राह्यैतद्घटैकत्वे व्यभिचारः, एकत्वस्य स्वाव्यञ्जकावधिज्ञानव्यञ्जकपृथक्त्वकत्वात्, इत्थञ्च पृथक्त्वाव्यञ्जकव्यञ्जकत्वाभावेनोभयाभावसत्त्वान्न व्यभिचार इति प्राहुः । अत्रापि तद्व्यञ्जकव्यञ्जकत्वादिकं पूर्ववद्बोध्यं ।

---

(१) कार्य्यतावच्छेदकञ्चैकत्वमितीति ख० ।

(२) स्वाव्यञ्जकव्यञ्जकतत्कत्वाभावेनेति ख० ।

'एकावच्छेदेनेति, तेन सममेकावच्छेदेन[1] सत्समानदेशत्वे सति सत्समानेन्द्रियग्राह्यत्वादित्यर्थः, इदञ्च व्याप्यवृत्तेरप्यवच्छेदकत्वाभ्युपगमेनान्यथा परेषां शब्दस्य नित्यैकतया कालिकदैशिकाव्याप्यवृत्तित्वयोरभावेन स्वरूपासिद्ध्यापत्तेः। अत्र स्व-स्वावधिज्ञानमात्रव्यङ्ग्ययोर्व्यधिकरणपृथक्त्वयोर्विभिन्नसंस्थानविशेषधीव्यङ्ग्ययोश्च गोत्वाश्वत्वयोर्व्यभिचारवारणाय 'समानदेशत्वे सतीति सम-नियतदेशत्वे सतीत्यर्थः, अन्यथा समानाधिकरणयोरपि परस्पराभावसमानाधिकरणयोर्मठावधिकघट-पटवृत्तिद्विपृथक्त्व-पटावधिकघट-मठवृत्तिद्विपृथक्त्वयोः स्व-स्वावधिज्ञानमात्रव्यङ्ग्ययोर्व्यभिचारापत्तेः[2] विभिन्नसंस्थानविशेषधीव्यङ्ग्ययोः पाषाणत्वव्याप्यघटत्व-पाषाणत्वयोर्व्यभिचारापत्तेश्च[3]। न चैवमपि भिन्नभिन्नावधिनिरूपितसमनियतैकपृथक्त्वद्वये व्यभिचार इति वाच्यं। अवधिभेदेनैकपृथक्त्वभेदाभावात्। समनियतदेशत्वञ्च समवायेन विवक्षितं[4] तेनाभावसाक्षात्कारं प्रति प्रतियोगिज्ञानस्य हेतुत्वेऽपि घट-पटत्वयोरन्योन्याभावात्यन्ताभावयोर्न व्यभिचारः। एकस्यैव वस्त्रखण्डादेरग्र-मूलावच्छिन्नवृत्तिसंयोगयोः स्वस्वावच्छेदकपदव्यङ्ग्ययोर्व्यभिचारवारणाय एकावच्छेदेनेति[5]। न चावच्छेदकादिग्रहो न संयो-

(१) तेन समानाकाशावच्छेदेनेति ख०।

(२) इमौ द्वौ अस्मात् पृथक् इत्यादिप्रतीतिसिद्धं द्विपृथक्त्वादिकं द्वित्ववदुभयवृत्तीति बोध्यं।

(३) एतेन तद्व्याप्यदेशत्वमपि निरस्तं।

(४) एतेन तदसमवाय्यसमवेतत्वे सति तत्समवायिसमवेतत्वं फलितं।

(५) समवायावच्छिन्नाधेयतायां एकदेशावच्छिन्नत्वं बोध्यं।

नादित्ववद्धेतुः किन्त्वावश्यकत्वादवच्छेदकावच्छेदेनेन्द्रियसन्निकर्ष एव हेतु[illegible]तं[1] कथं व्यभिचार इति वाच्यं । तद्धेतुत्वाभिमानेनैतद्विशेषणोपादानात् । नन्वेवमेकदेशावच्छिन्नत्वोक्तावप्येकशाखावच्छेदेन चरणद्वयावच्छिन्नाभ्यां श्येनेन सह वृक्षसंयोगाभ्यां स्वस्वावच्छेदकचरणप्रत्यक्षाभ्यां व्यभिचारो दुर्वारः तयोः श्येनचरणद्वयावच्छिन्नत्वेऽप्येकशाखावच्छिन्नत्वस्य सत्त्वात् एकदेशावच्छिन्नत्वपदेनान्यूनानतिरिक्तदेशावच्छिन्नत्वविवक्षणे समानदेशत्वविशेषणवैयर्थ्यादिति चेत्, न, चरणद्वयावच्छिन्नयोः श्येन-वृक्षसंयोगयोर्या संयोगव्यक्तिर्यद्देशव्यापिनी तत्र परम्परया तद्देशभागोऽवच्छेदको न तु सम्पूर्णा शाखोभयत्रावच्छेदिकेति यथाश्रुतेनैव तत्र व्यभिचारनिरास इत्यभिप्रायात् । वस्तुतस्तु[2] अभावसाक्षात्कारं प्रति प्रतियोगिज्ञानस्य हेतुतया घटत्वात्यन्ताभाव-घटान्योन्याभावयोर्व्यभिचारवारणाय समानदेशत्वपदं समवायसम्बन्धेन वृत्तिमत्त्वार्थकं, स्व-स्वावभिज्ञानसाक्षात्कृत्योः समानकालीन-व्यधिकरणपृथक्त्वयोर्विभिन्नसंस्थानविशेषधीप्रत्यक्षयोर्गोत्वाश्वत्वयोर्व्यभिचारवारणाय तेन सममेकावच्छेदेनेति तेन सममन्यूनानतिरिक्तावच्छेदकावच्छेद्यत्वे सतीत्यर्थकं, न तु तदवच्छेदकावच्छेद्यत्वे सतीत्यर्थकं[3] अतो व्यधिकरणपृथक्त्वयोरपि

---

(1) तथाच समवायस्यैक्याद्विशिष्टस्यापि नाव्यञ्जकत्वं विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमात् ।

(2) सम्पूर्णशाखाया एकावच्छेदकत्वानुभवात् व्याप्यवृत्तेरवच्छेदकत्वस्य विश्रान्तिविरहत्वाच्च वस्तुतश्चेति ।

(3) न तु तदवच्छेद्यत्वे सतीत्यर्थकमिति ख० ।

कालरूपैकावच्छेदकावच्छेद्यत्वसत्त्वात्त तद्दोषतादवस्थ्यं तयोः काले स्वकाश्रयरूपविभिन्नावच्छेदकावच्छेद्यत्वात् । न च तत्र कालरूपैकावच्छेदकमादाय व्यभिचारतादवस्थ्यवारणाय एकदेशावच्छेद्यत्वमेव विवक्ष्यतां किमन्यूनानतिरिक्तत्वप्रवेशेनेति वाच्यं । तथापि परस्पराभावसमानाधिकरणयोरथ च समानाधिकरणयोर्मठावधिकघट-पटवृत्तिद्विपृथक्त्व-पटावधिकघट-मठवृत्तिद्विपृथक्त्वयोः स्वस्वावधिसमानव्यक्त्योर्व्यभिचारापत्तेः विभिन्नसंस्थानविशेषधीव्यक्त्योः पाषाणत्वव्याप्यघटत्व-पाषाणत्वयोर्व्यभिचारापत्तेश्च तेषां यत्किञ्चिदाश्रयमादाय काले एकदेशावच्छेद्यत्वात् । न चैकदेशावच्छेदेन समवायसम्बन्धेन वृत्तिमत्त्वमर्थोऽस्त्विति वाच्यं । परनये वर्णानामेकतया समवायसम्बन्धेनाव्याप्यवृत्तित्वाभावात् समवायसम्बन्धेन वृत्त्यवच्छेदकविरहेण स्वरूपासिद्ध्यापत्तेः व्याप्यवृत्तेरवच्छेदके मानाभावात्, एकविवक्षायान्तु वर्णानां समवायसम्बन्धेन व्याप्यवृत्तित्वेऽपि काले कालिकसम्बन्धेनाव्याप्यवृत्तित्वादाश्रयरूपावच्छेदकमादायैव हेतुसम्भवः । न चैवं न्यायनये भागासिद्धिः सर्व्वेषां वर्णानामन्यूनानतिरिक्तावच्छेदकावच्छेद्यत्वाभावादिति[1] वाच्यं । एकसाक्षात्कारविषयीभूतानां वर्णानां पक्षत्वात्, एवञ्च स्वकारसाक्षात्कारविषयः ककार इत्यादिकमेव पक्षता, अन्यूनानतिरिक्तावच्छेदकावच्छेद्यत्वञ्च स्वानवच्छेदकानवच्छेद्यतत्कत्वे सति तदनवच्छेदकानवच्छेद्यत्वं । न च परनये शब्दस्यावच्छेदकाप्रसिद्ध्या अनवच्छेदकत्वमप्रसिद्धमिति वाच्यं । परनयेऽपि शब्दस्य कालिकसम्बन्धेन काले वृत्तावाश्रय-

(१) विभिन्नकालोत्पत्तिकानामतथात्वमिति भावः ।

तावच्छेदकत्वेन तदवच्छेदकमपि सिद्धेरित्येव तत्त्वं[१]। तत्पुरुषीया-पेक्षाबुद्धिजन्यद्वित्वादिसाक्षात्कारत्वावच्छिन्नं प्रति तदीयापेक्षाबुद्धि-जन्यद्वित्वादिना हेतुत्वाभ्युपगमात् विभिन्नपुरुषीयापेक्षाबुद्धि-जन्यद्वित्वाद्योर्व्यभिचारवारणाय तत्समानेन्द्रियग्राह्यत्वादिति तदर्थश्च तद्ग्राहकबहिरिन्द्रियव्यक्तिग्राह्यत्वमतो नोक्तव्यभिचारः; यदपेक्षा-बुद्धिजन्यं यत् द्वित्वं तत् तत्पुरुषेन्द्रियस्यैव ग्राह्यमित्येकेन्द्रियग्राह्य-त्वाभावात् ग्राह्यत्व-ग्राहकत्वयोः पक्षोपधानगर्भत्वात् तद्विषयकलौ-किकसाक्षात्कारविषयत्वं वा तदर्थः। न च परस्पराव्यञ्जकविभि-न्नावधिज्ञानव्यङ्ग्ययोर्विभिन्नावधिकदीर्घत्वैकपृथक्त्वयोर्व्यभिचार इति वाच्यं। स्वरूपेण परिमाणग्रहे नावधिज्ञानापेक्षा किन्तु हस्त-वित-स्त्याद्यवच्छिन्नत्वग्रहे[२] इति मतानुयायित्वात्। साध्ये च कारणता भावच्छिन्नत्वेन विशेषिता तेन परस्पराव्यञ्जकपित्तदूरत्वादिदोषा-भावजन्ययोः साक्षात्कारविषयतया अनवच्छेदकयोः श्वैत्य-परिमाणयो-र्न व्यभिचार इति।

पितृचरणास्तु प्रकारान्तरेणाप्यनुमानं परिष्कुर्वन्ति, तथाहि साध्ये परस्पराव्यञ्जकाव्यङ्ग्यत्वं परस्पराविषयकसाक्षात्काराविषयत्वं तद्विषयकसाक्षात्कारविषयत्व-स्वाविषयकसाक्षात्कारविषयतत्कत्वो-

---

(१) तदनाश्रयस्यैव तदनवच्छेदकत्वमिति भावः।

(२) हस्ताद्यवयविकत्वग्रहे इत्यर्थः, तथाच यथा अवधिज्ञानं विनापि स्वरूपतः पृथक्त्वत्वेन न ग्रहः तथा न परिमाणत्वेन दीर्घत्वेन वा परिमाणग्रहः अवधिज्ञानं विनापि दीर्घं इत्यादि व्यवहारात् किन्तु हस्तादीर्घं इत्याकारेणैव तदपेक्षोऽनुभवादिति भावः।

भयाभाव इति यावत्, तद्विषयकसाक्षात्कारविषयत्व-विषयिता-सम्बन्धेनतत्साक्षात्कारनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वोभयाभाव इति तु निष्कर्षः। तदयं निर्गलितप्रयोगः ककारः खकाराविषयकसाक्षात्कारविषयत्व-विषयितासम्बन्धेनखकारविषयकसाक्षात्कारनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वोभयाभाववान् खकारेण सहैकावच्छेदेन समानदेशत्वे सति समानेन्द्रियग्राह्यत्वात् इति पूर्ववत् सामान्यमुखी व्याप्तिः, साध्ये उभयदलप्रयोजनन्तु पूर्ववत् तद्घटैकत्वैकपृथक्त्वयोर्यथायथं बोध्यं, उभयत्रैव साक्षात्कारो लौकिको बोध्यः अन्यथा अलौकिकप्रत्यक्षमादाय तद्घटैकत्वैकपृथक्त्वयोर्व्यभिचारापत्तेः अलौकिकं प्रत्यक्षमादाय बाधापत्तेश्च। अथ न्यायनये बाधः एकैकशोऽपि वर्णसाक्षात्काराभ्युपगमात्। न चैकावच्छेदेन वर्त्तमानानामेव वर्णानां पक्षत्वमिति[१] वाच्यं। वर्णानां क्रमिकोत्पन्नत्वेनैकावच्छेदेन वर्त्तमानानामप्येकैकशः साक्षात्कारादिति चेत्, न, एकसाक्षात्कारविषयीभूतानां वर्णानां पक्षत्वात्, एवञ्च खकारसाक्षात्कारविषयीभूतः ककार इत्यादिक्रमेण पक्षत्वं[२]। न चैवं सिद्धसाधनमिति वाच्यं। परनये ककार-खकारादीनामेकैकत्वेन तेषामेव प्रत्येकमभिव्यक्तेः, हेतौ च यत्नद्वयं सामान्यतोव्याप्तौ समनियतदेश-कालयोरेकपुरुषचक्षुर्मात्रग्राह्ययोर्ध्वंसविशेषयोर्व्यभिचारवारणाय समानदेशत्वे सतीति समवायसम्बन्धेन वृत्तिमत्त्वे सतीत्यर्थकं, भूतायावच्छिन्नयोः समनियतेन्द्रियग्राह्यतत्पुरुषीयसंयोगयोः संयो-

(१) पक्षत्वसिद्धिरिति ख०।

(२) पक्षत्वं बोध्यमिति ख०।

गन्धाश्रयभेदज्ञानव्यञ्जकतया तादृशवृक्ष-तद्‌वयवदृक्षसंयोगयोरेकत्वा-वच्छेदेन परस्परावच्छिन्नयोः क्षेत्र-वृक्षसंयोगयोर्विभिन्नकाले एकपुरुषमात्रप्रतीतयोश्च व्यभिचारवारणाय तेन सममेकावच्छेदेनेति तेन सममन्यूनानतिरिक्तावच्छेदकावच्छेद्यत्वे सतीत्यर्थकं, अतः कालरूपैकावच्छेदकमादाय शाखारूपैकावच्छेदकमादाय च न न-ष्टोपत्तादवस्थ्यं अन्यूनानतिरिक्तावच्छेदकावच्छेद्यत्वञ्च पूर्व्ववद्बोध्यं। अथैवं समनियतेन्द्रियग्राह्य-समनियतकालव्यधिकरणरूपद्वयादिषु व्यभिचारः। न च तेषां विभिन्नावयवावच्छेद्यत्वात् न व्यभिचार इति वाच्यं। रूपादीनां दैशिकाव्याप्यवृत्तित्वविरहेण तेषामन्यथा-वच्छेद्यत्वे मानाभावात् एकत्र धर्म्मिणि भावाभावयोर्विरोधेनैवावच्छेदकभेदाभ्युपगमादिति चेत्, न, व्यधिकरणरूपादीनां काले कालिकसम्बन्धेन वृत्तौ परस्परभिन्नानां स्वस्वाश्रयाणामवच्छेदकत्वेन व्यभिचाराभावात्। समनियतरूप-रसाद्योर्व्यभिचारवारणाय विशेष्यं, तदर्थश्च परस्परग्राहकेन्द्रियव्यक्त्यग्राह्यत्वं स्वग्राहकेन्द्रियव्यक्त्यग्राह्यत्वे सति तद्‌ग्राहकेन्द्रियव्यक्त्यग्राह्यत्वमिति यावत्, न तु तद्‌ग्राहकभिन्नेन्द्रियव्यक्तिग्राह्यत्वं, तद्विषयकलौकिकसाक्षात्कारविषयत्वं वा, त्वाचैकपृथक्त्वसाक्षात्कारविषयस्पर्शैकपृथक्त्वयोर्व्यभिचारापत्तेः अवधिज्ञानविरहदशायां विना पृथक्त्वं त्वचा स्पर्शस्य विना स्पर्शञ्च चक्षुषैकपृथक्त्वस्य ग्रहात्। इन्द्रियस्य व्यक्तिभेदोपादानादिभिन्नपुरुषीयापेक्षाबुद्धिजन्यसमनियतद्वित्वयोस्तादृशपरत्वाद्योश्च न व्यभिचारः ग्राह्यत्व-ग्राहकत्वयोः फलोपधानघटितत्वात्। न च तथापि कैकपदार्थप्रतिबन्धकदोषवशेन कदाचित् परस्पराविषयकसाक्षा-

व्यङ्ग्येनावयविनोत्पन्नत्वव्यञ्जकदीपाव्यङ्ग्येन तन्नौभिन्ना घटवृत्तिपृथक्त्वाव्यञ्जकाव्यङ्ग्येनैकत्वेन वा व्यभिचारः ।

त्कारविषययोः समनियतेन्द्रियग्राह्ययोः समनियतस्नेह-द्रवत्वव्यक्ति-विशेषयोर्व्यभिचार इति वाच्यं । दोषविरहदशायां परस्पराविषयकसाक्षात्कारविषयत्वस्य साध्यत्वादिति सङ्क्षेपः ।

एकवर्णस्यापरवर्णाव्यञ्जकव्यङ्ग्यत्वाभाव एव(१) प्रतिनियतव्यञ्जक-व्यङ्ग्यत्वाभावः स एव च साध्य इति भ्रमेण यस्याञ्च सामान्यतो व्याप्ताववयविनमादायावयववृत्तिसंयोग-वक्रत्वयोरुत्पन्नवृत्तिनौकारूपमादायोत्पन्नत्वे एकत्वमादाय चैकपृथक्त्वे क्रमेण व्यभिचारमाशङ्कते, 'न चेत्यादिना 'व्यभिचार इत्यन्तेन, 'अवयवसंयोगेति अवयवसंयोग-वक्रत्वयोर्व्यञ्जकस्याश्रयभेदग्रहस्य। व्यङ्ग्येनावयविना करणभूतेनेत्यर्थः, अवयवसंयोग-वक्रत्वयोरिति(२) शेषः, 'व्यभिचार इत्यग्रेतनेन सम्बन्धः, तयोरवयवव्यञ्जकस्याश्रयभेदग्रहव्यङ्ग्यत्वादिति भावः । अव्यासज्यवृत्तित्वे सतीत्यनेन(३) हेतोर्विशेषणाद्व्येतद्व्यभिचारासम्भवादाह, 'उत्पन्नत्वेति, 'तन्नौभिन्नेति उत्पन्ननौभिन्ना करणभूतेनेत्यर्थः, उत्पन्नत्व इति शेषः, 'व्यभिचार इत्यग्रेतनेन सम्बन्धः, दीपो नोत्पन्ननौभिन्नव्यञ्जकः

---

(१) एवकारेण सम्यन्तदव्यवच्छेदः ।

(२) अवयविनमादायावयवद्वयसंयोगेऽवयवानां सङ्ख्ये चेत्यर्थः ।

(३) अत्र चाव्यासज्यवृत्तित्वं नैकमात्रवृत्तिधर्माविच्छिन्नपर्याप्तिकत्वं संयोगे तदभावात् परन्तु यावदाश्रयभेदग्रहसापेक्षग्रहविषयत्वादिकमित्यभिप्रायः ।

अवयवसंयोगाऽवयविनोर्नीलत्वोत्पन्नत्वयोश्चाव्याप्य-व्याप्यवृत्तिनोरुत्पन्नत्वस्य[१] चाधिकवृत्तित्वेनैकावच्छे-

---

प्रत्युत तत्प्रत्यक्षे दोषरूपतया प्रतिबन्धकः[२] तथाचोक्तं "प्रदीपैर्व्यज्यते जातिर्न तु नीरजनीलिमेति, जातिरुत्पन्नत्वादि नीरजमनुत्पन्नमिति मतेनेदं। ननु तद्व्यञ्जकव्यङ्ग्यत्वं तत्साक्षात्कारत्वावच्छिन्नाजनकवृत्तिकारणताप्रतियोगिककार्य्यतायाः साक्षात्कारविषयतयावच्छेदकत्वमतो नायं व्यभिचार उत्पन्नत्वसाक्षात्कारत्वस्य दीपकार्य्यतानवच्छेदकत्वादित्यत आह, 'घटवृत्तीति घटवृत्तिपृथक्त्वव्यञ्जकस्य तत्तदवधिज्ञानसाचिव्येन घटैकत्वेन करणभूतेनेत्यर्थः, घटैकपृथक्त्व इति शेषः। हेत्वभावादेवावयव्युत्पन्नत्वनीलमादायावयवसंयोगोत्पन्नत्वयोर्न व्यभिचार इत्याह, 'अवयवसंयोगावयविनोरिति, 'अव्याप्यव्याप्यवृत्तिनोरित्यग्रेतनमत्रैव सम्बध्यते, 'एकावच्छेदेन वृत्त्यभावादिति एकदेशावच्छेदेनान्यूनानतिरिक्तदेशवृत्तित्वाभावादित्यर्थः,[३] यद्यप्यवयवसंयोगावयविनोरेकदेशावच्छेद्यत्वमन्यूनानतिरिक्तदेशवृत्तित्वञ्चास्त्येव, न ह्येकदेशावच्छेद्यत्वमन्यूनानतिरिक्तदेशावच्छेद्यत्वं, समानदेशत्वविशेषणवैयर्थ्यापत्तेः, तथाप्यवयवसंयोगव्याप्तिर्यद्देशव्यापिनी परम्परया तद्देशभाग एव तत्रावच्छेदको न तु सम्पूर्ण

---

(१) व्याप्याव्याप्यवृत्तित्वेनोत्पन्नत्वस्येति घ०।

(२) रूपाविषयकलौकिकप्रत्यक्षानङ्गीकारात् रूपान्तरविषयकत्वं तस्यावश्यकमिति बोध्यं।

(३) एकावच्छेदेनान्यूनानतिरिक्तदेशवृत्तित्वाभावादित्यर्थ इति ख०।

देन वृत्त्यभावात्। बहुत्व-पृथक्त्वव्यञ्जकव्यङ्ग्यत्वञ्च अवयव्येकत्वयोरिति न परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वं, अतएव नीला बलाकेत्यत्र रूप-परिमाणयोरर्द्धनिखात-

---

कपालिका अवयविनि तु कपालिकैव साक्षादवच्छेदिकेति भावः । इदमुपलक्षणं साध्यस्य परस्परगर्भतया साध्यसत्त्वादपि न तत्र व्यभिचारः। अवयव्युत्पन्ननीलिम्नोर्निरुक्तावयवसंयोगोत्पन्नत्वाव्यञ्जकव्यङ्ग्यत्वाभावादित्यपि बोध्यं। अवयविनमादायावयवबहुत्वे घटैकत्वमादाय घटैकपृथक्त्वे च व्यभिचारं परस्परघटितसाध्यसत्त्वेनोद्धरति, 'बहुत्वेति बहुत्व-पृथक्त्वव्यञ्जकव्यङ्ग्यत्वं बहुत्व-पृथक्त्वाव्यञ्जकाव्यङ्ग्यत्वं तदुभयसाक्षात्कारत्वावच्छिन्नाजनकवृत्तिकारणताप्रतियोगिककार्य्यतायाः साक्षात्कारविषयतयावच्छेदकत्वाभाव इति यावत्(१) 'न परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वमिति न निरुक्तपरस्पराव्यञ्जकव्यङ्ग्यत्वमित्यर्थः. 'अतएवेति भाववृत्तिकारणताघटितनिरुक्तपरस्पराव्यञ्जकव्यङ्ग्यत्वरूपसाध्यसत्त्वादेवेत्यर्थः, 'नीला बलाकेति, 'बलाका' बकपंक्तिः, तत्रास्व मेघसन्निधानरूपदोषवशात् शुक्लग्रहेऽपि परिमाणग्रहः कदाचिच्चक्षुषा दूरत्वादिदोषवशात्(२) परिमाणाग्रहेऽपि शुक्लग्रह इति परस्पराव्यञ्जकतत्तद्दोषाभावव्यङ्ग्यत्वाद्व्यभिचारसम्भवो ध्येयः। 'अर्द्धनिखातेति अर्द्धनिखातवंशोऽर्द्धनिखननरूपदोषवशात् परिमाणाग्रहेऽपि

---

(१) तथाच विवक्षितसत्यन्तदलाभावात् साध्यसत्त्वमिति भावः ।

(२) कदाचिदर्द्धनिखातादिदोषवशादिति क०, ईदृशपाठस्य अर्द्धनिखातादिदोषवशादित्यर्थः, आदिना दूरत्वादिपरिग्रहः ।

वंशसङ्ख्या-परिमाणयोर्वा न व्यभिचार इति । मैवं ।

सङ्ख्यायाः दोषविशेषान्तरवशाच्च सङ्ख्याया अग्रहेऽपि परिमाणग्रह इति परस्पराव्यञ्जकतत्तद्दोषाभावव्यङ्ग्यत्वाद्व्यभिचारसम्भव इति भावः ।

पितृचरणानां मते त्वेकवर्णस्यापरवर्णाविषयकसाक्षात्कारविषयत्वाभाव एव प्रतिनियतव्यञ्जकव्यङ्ग्यत्वाभाव इति भ्रमेण यत्सङ्ख्या सामान्यतो व्याप्तावयवनिष्ठसंयोगबहुत्वमादायावयविनि[1] उत्पन्नवृत्तिनीलमादायोत्पन्नत्वे घटवृत्त्येकपृथक्त्वमादाय च तदेकत्वे व्यभिचारमाशङ्कते, 'न चेत्यादिना, 'अवयवसंयोग-बहुत्वव्यञ्जकाव्यङ्ग्येनेति अवयवसंयोग-बहुत्वाविषयकसाक्षात्कारविषयेणेत्यर्थः, संयोग-बहुत्वयोर्भेदे आश्रयभेदग्रहस्यापि हेतुतया तेन विनाप्यवयविनो ग्रहादिति भावः । 'उत्पन्नत्वेति, नीलरूपाविषयकदीपजन्योत्पन्नसाक्षात्कारविषयेणोत्पन्नत्वेनेति व्युत्क्रमेण[2] योजना, 'पृथक्त्वाव्यञ्जकव्यङ्ग्येनेति पृथक्त्वादिविषयकसाक्षात्कारविषयेणेत्यर्थः, परस्परानवच्छेदकानवच्छेद्यरूपहेतुविशेषणाभावादेवावयवसंयोगोत्पन्ननीलमादायावयव्युत्पन्नत्वयोर्न व्यभिचार इति समाधत्ते, 'अवयवसंयोगेति, 'अव्याप्यवृत्तिनोरित्युभयत्रैव सम्बध्यते, नीलस्योत्पत्तिकालावच्छेदेनाव्याप्यवृत्तित्वात्, व्याप्यवृत्तित्वस्यावयविनो दैशिकं उत्पन्नत्वस्य कालिकं प्रकृते विवक्षितं एतेनावयवसंयोगनीलरूपयोरवयव्युत्पन्नत्वानवच्छेदकानवच्छेद्यत्वं नास्तीत्यभिहितं, अवयवसंयोगस्यावयव्यनवच्छेदकदेशावच्छेद्य-

---

(१) पूर्वकल्पे संयोगादावेव व्यभिचार इति तद्वैपरीत्यमिति ।

(२) व्युत्क्रमश्च नीलिमपदोत्तरतृतीयाया उत्पन्नत्वपदोत्तरमनुसन्धानं ।

त्वात् नीलस्य चोत्पलत्वानवच्छेदककालावच्छेद्यत्वात् उत्पलत्वस्य नित्यतया कालस्य तदनवच्छेदकत्वात्। इदमुपलक्षणं अवयवसंयोगेऽवयव्यनवच्छेदकावयव्युत्पत्तिप्राक्कालावच्छेद्यत्वमपि बोध्यं। उत्पलत्वेऽपि नीलरूपानवच्छेदकानवच्छेद्यत्वं नास्तीत्याह, 'उत्पलत्वस्य चेति उत्पलत्वस्य नीलरूपानाश्रयेऽपि वर्त्तमानत्वेनेत्यर्थः, तथा चोत्पलत्वस्य काले नीलरूपानवच्छेदकनीलेतरस्वाश्रयावच्छेद्यत्वात् न नीलानवच्छेदकानवच्छेद्यत्वमिति भावः। 'एकावच्छेदेन वृत्त्यभावादिति परस्परानवच्छेदकानवच्छेद्यत्वाभावादित्यर्थः, इदमुपलक्षणं उत्पलत्वे परस्परग्राहकेन्द्रियग्राह्यत्वरूपहेतुविशेष्यदलाभावात्(१) साध्यस्य परस्परगर्भतया साध्यसत्त्वाच्च न नीलरूपमादाय व्यभिचारः उत्पलवृत्तिनीलरूपस्योत्पलत्वाविषयकसाक्षात्कारविषयत्वाभावादित्यपि बोध्यं। अवयवबहुत्वमादायावयविनि(२) घटैकपृथक्त्वमादाय घटैकत्वे व्यभिचारं परस्परघटितसाध्यसत्त्वेनोद्धरति, 'बहुत्वेति बहुत्व-पृथक्त्वविषयकसाक्षात्कारमात्रस्यैव विषयत्वस्येत्यर्थः, तथा च बहुत्व-पृथक्त्वयोरवयव्येकत्वाविषयकसाक्षात्कारविषयत्वाभावेनोभयाभावरूपसाध्यसत्त्वमिति भावः। 'परस्परव्यभिचारिव्यञ्जकव्यङ्ग्यत्वं' परस्पराविषयकसाक्षात्कारविषयत्वं, 'अतएवेति दोषाभावगर्भसाध्यसत्त्वादेवेत्यर्थः, 'रूप-परिमाणयोरिति, अत्र 'परिमाणपदं बलाकानिष्ठशुक्लरूपग्राहकेन्द्रियमात्रग्राह्यबलाकापरिमाणव्यक्तिपरं, अन्यत्र जिघृक्षमाणेन्द्रियग्राह्यत्वाभावादेव व्यभिचारस्यासम्भवादिति दिक्।

---

(१) उत्पलत्वस्य नीलरूपाग्राहकत्वगिन्द्रियग्राह्यत्वादिति भावः।

(२) अवयवबहुत्वमादाय तत्समनियतकालेऽवयविनीति ख०।

वर्णाः प्रतिनियतव्यञ्जकव्यङ्ग्याः आश्रयेण सह समानेन्द्रियग्राह्यत्वात् गन्धवत् इत्यापाततः सत्प्रतिपक्षत्वात् ।

'वर्णा इति, पूर्वोपवर्णितसाध्यस्य प्रतियोग्येवात्र साध्यं, पक्षोऽपि पूर्ववदेव, ककारत्वाद्यवच्छेदेन साध्यसिद्धेरुद्देश्यत्वं तेन न्यायनये नांशतः सिद्धसाधनं, 'आश्रयेणेति स्वकाराद्याश्रयग्राहकेन्द्रियग्राह्यत्वादिति यथाश्रुतोऽर्थः, यद्यदाश्रयग्राहकेन्द्रियग्राह्यं तत्तेन समं नियतप्रतिनियतव्यञ्जकव्यङ्ग्यं यथा रसेन गन्ध इति सामान्यतो व्याप्तिः । यद्यप्यत्राप्यतीन्द्रियद्व्यणुकादौ घटादिवृत्तिरूपादिकमादाय व्यभिचारः उपनीतभानमादाय सिद्धसाधनापत्त्या प्रतिनियतव्यञ्जकव्यङ्ग्यत्वस्य साध्यस्य लौकिकसाक्षात्कारविषयत्वघटितत्वेन तत्र साध्याभावात्, तथापि तन्न्यत्वासेन लौकिकसाक्षात्कारविषयतदाश्रयग्राहकेन्द्रियग्राह्यत्वं हेत्वर्थो विवक्षितः, इत्यञ्च द्व्यणुकादौ[1] ग्राह्यत्वाभावादेव न व्यभिचारः । घटादिवृत्तिगुरुत्वादिकमादाय तद्वृत्तिगन्धादौ व्यभिचारवारणाय लौकिकसाक्षात्कारविषयेति तदित्यस्य विशेषणं । न च तथापि स्वकाराद्याश्रयस्य गगनस्य ग्राहकासिद्ध्या पक्षे हेत्वसिद्धिरिति वाच्यं । परनये गगनस्यापि स्वकाराद्याश्रयस्य चाक्षुषतया ग्राहकप्रसिद्धिसम्भवात्, अग्राहकेन्द्रियाग्राह्ये लौकिकसाक्षात्कारविषयतदाश्रयकत्वं वा विवक्षणीयं लौकिकसाक्षात्कारविषयेति च तदित्यस्य विशेषणमिति दिक् । अत्र

(१) अतीन्द्रियादाविति ख० ।

वस्तुतस्तु अनन्यथासिद्धप्रत्यभिज्ञानबलेनाभेदसिद्धौ प्रतिनियतव्यञ्जकव्यङ्ग्यत्वसाधकस्यैव बलवत्त्वं, शब्दस्य शब्दजनकत्वञ्च शब्दनाशकत्वं वीचीतरङ्गन्यायेनोत्पत्तिकल्पनञ्च कल्पनमेव शब्दस्य शब्दाऽजनकत्वादनाशकत्वाच्च अन्त्याद्यशब्दवत् । एतेन सामान्यवत्त्वे

समूहालम्बनसाक्षात्कारमात्रविषययोर्गन्धयोः प्रामाणिकत्वे च तत्र व्यभिचारो दुर्वार इति ध्येयं । 'आपाततः सत्प्रतिपक्षत्वादिति वक्ष्यमाणयुक्त्या अन्याधिकबलत्वेन समानबलत्वाभावाच्च सत्प्रतिपक्षत्वमित्यत उक्तं 'आपातत इति ।

'अनन्यथासिद्धेति अभेदं विनानुपपद्यमानेत्यर्थः । ननु शब्दस्य नित्यत्वे शब्दस्य शब्दजनकत्वादिकं कथमुपपद्यत इत्यत आह, 'शब्दस्येति, 'वीचीतरङ्गन्यायेनेति कदम्बगोलकन्यायेन शब्दोत्पादस्य गौरवपराहतत्वात्तत्परित्यागः, 'कल्पनमेवेति मानाभावादिति भावः । साधकाभावमुक्त्वा बाधकमप्याह, 'शब्दस्येति, 'अन्त्याद्येति वर्णात्मकः शब्दो न शब्दजनको न वा शब्दनाशकः वर्णत्वादन्त्यशब्दवदाद्यशब्दवच्चेत्यर्थः, परनये प्रतियोगिप्रसिद्धिर्ध्वनिजनके तन्नाशके च, अन्त्यत्वं शब्दाजनकत्वं, आद्यत्वं शब्दानाशकत्वं, न्यायनये शब्दमात्रस्य दृष्टान्तत्वासम्भवादुभयोपादानं । तन्मते च वर्णमात्रमेव दृष्टान्तः, 'इत्यपास्तमिति इति वर्णानित्यत्वसाधनमपास्तमित्यर्थः । अत्र जातौ ध्वंसे च व्यभिचारवारणाय सत्यन्तं, परमाण्वादौ व्यभिचारवारणाय विशेष्यदलं, अलौकिकप्रत्यक्षमादाय तद्दोषतादवस्थ्यवारणाय

सत्यस्मदादिबहिरिन्द्रियप्रत्यक्षत्वात् इत्यपास्तं, प्रत्य-भिज्ञानबाधात् शब्दत्व-गत्वादेरसिद्धेश्च, तस्माच्छब्दो नित्यः व्योमैकगुणत्वात् तत्परिमाणवत्, श्रोत्रग्राह्य-त्वात् शब्दत्ववत्, विशेषगुणान्तरासमानाधिकरणैक-

---

लौकिकत्वलाभार्थं 'अस्मदादीति, आत्मनि व्यभिचारवारणाय 'बहिरितीति ध्येयं । 'एतेनेत्येव विवृणोति, 'प्रत्यभिज्ञेति, 'असि-द्धेश्चेति जातित्वासिद्धेश्चेत्यर्थः, 'आदिपदात् सत्ता-गुणत्वादिपरि-ग्रहः, तथाच सत्यन्तविशेषणस्य स्वरूपासिद्धिरिति भावः । मीमांसकः स्वमतमुपसंहरति, 'तस्मादिति, 'व्योमैकगुणत्वादिति व्योममात्रगुणत्वादित्यर्थः, व्योमीयसंयोगादौ व्यभिचारवारणाय मात्रपदं व्योमान्यासमवेतार्थकं, अतस्तन्मते समवायस्यानित्यतया घटादिसमवायेऽस्मन्मते च प्रागभावे व्यभिचारवारणाय गुणपदं समवेतार्थकं, व्योमत्वञ्चाष्टद्रव्यान्यद्रव्यत्वं न तु शब्दाश्रयत्वं, तथा सति तादात्म्येन शब्दस्यैव हेतुत्वसम्भवादितरांशवैयर्थ्यापत्तेः, ध्वनेश्च वायवीय इति न तत्र व्यभिचारः, व्याप्यवृत्तित्वे सतीत्यनेन वा विशेषणीयं, ध्वनेश्चाव्याप्यवृत्तिः वर्णात्मकशब्दस्य च प्रत्यभिज्ञा-बलेन व्याप्यवृत्तित्वमिति न कोऽपि दोषः । 'श्रोत्रग्राह्यत्वादिति, ध्वनेश्च कर्णशष्कुल्यवच्छिन्नत्वगिन्द्रियग्राह्य इति न तत्र व्यभिचारः, 'शब्दत्ववदिति न्यायनये दृष्टान्तः, परनये शब्दत्वस्योपाधितया श्रोत्रग्राह्यत्वाभावेन हेतोरसिद्धेस्तन्मते च षडिन्द्रियवेद्यः कालो दृष्टान्तः, 'विशेषगुणेति, अत्र घटादिनिष्ठगन्धादौ व्यभिचारवार-

वृत्तिगुणत्वात् समयपरिमाणवत्, पृथिवीतरनित्यभूत-विशेषगुणत्वात् अपाकजत्वे सति नित्यैकसमवेतत्वात्

णाय 'असमानाधिकरणान्तं शब्दभिन्नविशेषगुणासमानाधिकरणार्थकं, शब्दस्यापि शब्दात्मकविशेषगुणसमानाधिकरणत्वात् स्वरूपासिद्धिवारणाय शब्दभिन्नेति, अखण्डाभावघटकत्वाच्च न वैयर्थ्यं.[१] 'विशेषपदमपि स्वरूपासिद्धिवारकं, वायुस्पर्शस्य तादृशासमानाधिकरण इति न तत्र व्यभिचारः, कालाकाशनिष्ठद्वित्वादौ व्यभिचारवारणाय 'एकवृत्तीति, एकवृत्तित्वं एकमात्रवृत्तित्वमुभयासमवेतत्वमिति यावत्, समवाये[२] व्यभिचारवारणाय 'गुणपदं समवेतार्थकं । न च मनोनिष्ठकर्म-वेग-परत्वापरत्वेषु व्यभिचार इति वाच्यं । तन्मये मनसो विभुतया तत्र तेषामनभ्युपगमात्, मनसो विभुत्वाभावे तु गुणपदं विभुसमवेतपरमिति न काप्यनुपपत्तिः । 'समयपरिमाणवदिति महाकालपरिमाणवदित्यर्थः, 'पृथिवीतरेति, परमाणुगन्धादौ व्यभिचारवारणाय 'पृथिवीतरेति भूतविशेषणं, जलावयविरूपादौ व्यभिचारवारणाय 'नित्येति भूतविशेषणं, भूतपदं ज्ञानादावनैकान्तिकत्ववारणाय, भूतत्वमात्मभिन्नत्वमात्र, नभो-घटसंयोगादौ व्यभिचारवारणाय 'विशेषेति, ध्वनिश्च यदि वायु-परमाणुगुणोऽपि तदा तदन्यत्वेनापि विशेषणीयं, 'अपाकजत्वेति,

---

(१) अन्यथा शब्दभिन्नत्वस्य व्यभिचारावारकविशेषणतया वैयर्थ्यसम्भव इति तात्पर्यं ।

(२) तन्मते तस्य नानात्वादनित्यत्वाच्चेति भावः ।

जलपरमाणुरूपवत्, अव्यासज्यवृत्तित्वे सति अनात्म-विभुगुणत्वात् कालपरिमाणवत्, विपक्षे बाधकञ्च प्रत्यभिज्ञानमेवेति ।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शब्दानित्यतावादपूर्व्वपक्षः ।

परमाणुगन्धादौ व्यभिचारवारणाय सत्यन्तं तेजःसंयोगासमवायि-कारणकान्यत्वार्थकं । न च तैजसशरीर-कण्ठाद्यभिघातजन्यवर्णेषु न्यायनये भागासिद्धिरिति वाच्यं । तदतिरिक्तस्य पक्षत्वात्, जला-वयविरूपादौ व्यभिचारवारणाय 'नित्येति भूतविशेषणं, भूतपदस्य ज्ञानादावनैकान्तिकत्ववारणाय,[१] भूतपदशून्यपाठे तु अपाकजत्व-मेव सामान्यतः संयोगासमवायिकारणकान्यत्वं वाच्यमतो ज्ञानादौ न व्यभिचारः । आद्यशब्देतरशब्दस्य पक्षत्वाच्च न न्यायनये भागा-सिद्धिः, नभो-घटसंयोगादौ व्यभिचारवारणाय 'एकेति, 'एकसम-वेतत्वमव्यासज्यवृत्तिगुणत्वं तेन जलपरमाणुद्वयसंयोगे परमाणुकर्म्मणि च न व्यभिचारः, वेगस्य गतिसन्तानः, परत्वापरत्वमपि संयुक्त-संयोगभूयस्त्वाल्पीयस्त्वमेव अतः परमाणुनिष्ठेषु तेषु न व्यभिचारः, तदन्यत्वेन वा विशेषणीयमिति भावः । 'अव्यासज्येति, संयोगादौ व्यभिचारवारणाय सत्यन्तं, ज्ञानादौ व्यभिचारवारणाय 'अनात्मेति,

---

(१) 'नित्यभूतैकसमवेतत्वादिति मूलपाठमनुसृत्य भूतपदस्य व्यावृत्तिदानं सङ्गतं ।

घटादिध्वंसे व्यभिचारवारणाय 'विभ्विति, तथापि घटादिसमवाये व्यभिचारवारणाय गुणपदं समवेतार्थकमिति दिक्। तदयं शब्दानित्यत्वपूर्व्वपक्षनिष्कर्षः। लाघवात् ककारादयो वर्णा नित्या एकैका एव, विनष्टः ककारः उत्पन्नः ककार इत्यादिप्रत्ययस्तु प्रागुपलब्ध्यानुपलभ्यमानत्वरूपदोषवशाद्भ्रमः। न च वर्णानां नित्यत्वे घटपदत्वादिकं दुर्व्वचं अव्यवहितोत्तरत्वसम्बन्धेन घवट्टत्वादेस्तत्त्वात् अव्यवहितोत्तरत्वस्य नित्यत्वेऽसम्भवादिति वाच्यं। शब्दानामन्तरमव्यवधानेन ज्ञानं भवत्वित्यभिप्रायविषयत्वसम्बन्धेन घवट्टत्वस्यैव तत्त्वात्, शुकाद्युक्ते च शिक्षकस्येश्वरस्य वाभिप्रायमादाय तत्सम्भवः। अथ सर्व्वेषां ककारादीनामेकत्वे तार-तारतर-मन्द-मन्दतरादिविलक्षणप्रत्ययानुपपत्तिः। न चैकस्यामेव ककारादिव्यक्तौ तारत्व-तारतरत्व-मन्दत्व-मन्दतरत्वादिनानाधर्माभ्युपगमान्न तादृशप्रत्ययानुपपत्तिरिति वाच्यं। तारत्वादेस्तुल्यव्यक्तिवृत्तित्वे जातिरूपत्वानुपपत्तेः। न च भवन्मतेऽपि तारत्वादेर्जातित्वमसिद्धं कत्व गत्वादिना सङ्करप्रसङ्गादिति वाच्यं। कत्व-गत्वादिव्याप्यनानातारत्वादिस्वीकारात्। न च तारत्वादिकं वा नाना कत्व-गत्वादिकं वेत्यत्र विनिगमनाविरह इति वाच्यं। कत्व-खत्वादेर्नानात्वे तार-मन्दसाधारण-कः-खः-इत्याद्याकारानुगतप्रत्ययानुपपत्तेः[1] अधिकजातिकल्पनापत्तेश्च[2]। न च मयापि तार-तारतर-मन्द-मन्दतरककारादिव्यक्तीनां परस्परभेदोऽभ्युपेयत एव परन्तु समानजातीय-

(१) तार-मन्दसाधारणककार-खकारानुगतप्रत्ययानुपपत्तेरिति क०।

(२) अयं पाठः खपुस्तके नास्ति।

ककारादिव्यक्तीनामेव नाभेदोऽभ्युपेयत इति वाच्यं। तथापि तारत्व-तारतरत्वादेर्जातिरूपत्वानुपपत्तिः तारत्वादेः ककार-खकारादिभेदेन विभिन्नत्वाभ्युपगमे एकव्यक्तिवृत्तित्वात् अन्यथा कत्व-खत्वादिना सङ्करादिति चेत्, न, तारत्वादेः कत्वादिव्याप्यनानाजातित्वे ककार-खकारादिसाधारणताराद्याकारानुगतप्रत्ययानुपपत्तेः। न च तदसिद्धिः, अनुभवापलापात्। तस्मात्तारत्व-तारतरत्वादिकमनुगतत्वाल्लाघवाच्च ककार-खकारादिसर्व्वसाधारणमेकमेवाखण्डोपाधिः, तच्च सर्व्वमेकस्यामेव ककारादिव्यक्तौ वर्त्तत इति न तादृशप्रत्ययानुपपत्तिः। अत एव य एव ककारस्तार आसीत् स एवेदानीं मन्द इति प्रतीतिरपि साधु सङ्गच्छते। विलक्षणवाय्वोर्व्यञ्जकतया च स सर्व्वदा तारत्वादिसर्व्वधर्म्मग्रस्तः तार-मन्द्राद्युत्पत्तिनियमार्थं वायुनिष्ठवैलक्षण्यस्य त्वयाप्यभ्युपगमात्। न चैवं तारोऽयं न तारतरस्तारान्मन्दोऽन्य इत्यादिप्रत्ययानुपपत्तिरिति वाच्यं। घटो विनष्ट इत्यादिप्रतीतिवद्विशेषणाभेदप्रतियोगित्वस्यैव विशिष्टे तेनावगाहनात्। न च तारककारादिसाक्षात्कारस्य कार्य्यसहभावेन मन्दककारादिसाक्षात्कारप्रतिबन्धकत्वात् तयोर्भेदसिद्धिरिति वाच्यं। तारत्वप्रकारक-ककारादिसाक्षात्कारस्य मन्द्रत्वप्रकारकसाक्षात्कारप्रतिबन्धकत्वेनाभेदेऽपि तदुपपत्तेः। अस्तु वा तारत्व-तारतरत्वादिकं वायुनिष्ठैव आतिरिक्तदोषविशेषवशाच्छब्दनिष्ठतया[१] भासते दर्पणनिष्ठतया मुखादिरिव, तार-तारतराद्युत्पत्तिनियमार्थं वायुनिष्ठवैलक्षण्यस्य तवाप्यावश्यकतया तस्यैव लाघवेन तारत्व-तारतरत्वादि-

(१) तत्तद्दोषवशाच्छब्दनिष्ठतयेति ख०।

रूपत्वस्योचितत्वात् । न च तस्य वायुधर्मत्वे श्रवणा कथं तद्रूपः कर्णशष्कुल्यवच्छिन्नत्वगिन्द्रियोपनीतस्य तस्य श्रवणोपनीतभानाभ्युपगमे तारत्वं स्पृशामीत्यनुव्यवसायापत्तेः शृणोमीत्यनुव्यवसायानुपपत्तेश्चेति वाच्यं । वायुनिष्ठधर्मान्तरस्य श्रवणायोग्यत्वेऽपि तारत्वादेस्तद्योग्यत्वाभ्युपगमात् योग्यतायाः फलबलकल्प्यत्वात् । न च श्रवणा वायुनिष्ठतारत्वादिग्रहाभ्युपगमे श्रोत्रसंयुक्तसमवायस्यातिरिक्तप्रत्यासत्तित्वकल्पनापत्तिरिति वाच्यं । अप्रत्यासन्नस्यैव तारत्वादेः श्रवणा ग्रहात्[१] वक्ष्यमाणक्रमेण विलक्षणवायुसंयोगस्य तारत्वादिव्यञ्जकत्वादेवातिप्रसङ्गविरहात् । एतेन एकस्मिन्नेव ककारे तारत्व-मन्दत्वादिसकलधर्मास्त्वीकारेऽस्मात् ककारादयं ककारस्तार इति प्रत्ययानुपपत्तिः स्वप्रतियोगिकतारत्वस्य स्वस्मिन्नसम्भवात् स्वप्रतियोगिकतारत्वस्यापि स्वस्मिन्नभ्युपगमे तारत्वेनोपलभ्यमानककारव्यक्तावपि स्वापेक्षया तारत्वप्रत्ययप्रसङ्गात । न च तत्रापि तारत्वादेर्जातिरूपतया सप्रतियोगिकत्वप्रत्ययानुपपत्तिर्जातेः सप्रतियोगिकत्वाभावनियमादिति वाच्यं । जात्यन्तरस्य मानाभावेन सप्रतियोगिकत्वविरहेऽपि तारत्वादिजातेः सप्रतियोगिकत्वे बाधकाभावादित्यपि परास्तं । वायुनिष्ठतारत्वादेरेव ककारादिप्रतियोगिकतया ककारादौ भ्रमोपपत्तेः । यदि च ककारादौ तारत्वादिप्रत्ययस्य तारोऽयं न तारतरस्तारान्मन्दोऽन्य इत्यादिप्रत्ययस्य च प्रमात्वमप्यनुभवसिद्धं तदा सन्तु तार-तारतर-मन्द-मन्द-

(१) प्रत्यक्षविषयतायाः सन्निकर्षप्रयोज्यत्वे मानाभावादिति भावः ।

सरादिव्यञ्जय एवैकैकाः तार-मन्दादयस्तु परस्परविभिन्ना एव[१] । ननु तथापि ककार-गकारादीनां नित्यत्वे ककाराद्येकशब्दसाक्षात्कारदशायां गकारादिसर्व्वशब्दसाक्षात्कारापत्तिः सर्व्वेषामेव शब्दानां सर्व्वदा कर्णशष्कुल्यवच्छेदेन सत्त्वादिति चेत्, न, न्यायनये ककाराद्युत्पादकतत्तद्विलक्षणवायुसंयोगस्यैवास्मन्मते ककारादिसाक्षात्कारजनकतया तद्विरहादेव युगपत् सर्व्वशब्दोपलब्ध्यसम्भवात् कण्ठाद्यभिघातस्य तत्तद्विलक्षणवायुक्रियासम्पादकतया परम्परयोपयुज्यते । ननु न्यायनये यत्रावच्छेदकतासम्बन्धेन ककाराद्युत्पत्तिस्तत्र समवायसम्बन्धेन तत्तद्विलक्षणवायुसंयोग इति सामानाधिकरण्यप्रत्यासत्त्या वायुसंयोगानां ककारादिहेतुत्वमतो न कर्णान्तरे वायुसंयोगात् कर्णान्तरे ककाराद्युत्पत्तिः तत्पुरुषीयशब्दलौकिकसाक्षात्कारं प्रति तत्पुरुषीयश्रोत्रसमवायस्यावच्छिन्नत्वसम्बन्धेन तत्पुरुषीयकर्णविवरस्य वा विषयनिष्ठतया हेतुत्वमते न पुरुषान्तरीयकर्णावच्छेदेनोत्पन्नशब्दस्य पुरुषान्तरेण ग्रहणं, भवन्नये च तत्तद्विलक्षणवायुसंयोगानां ककारादिसाक्षात्कारं प्रति कया प्रत्यासत्त्या हेतुत्वं अव्यवहितपूर्व्ववर्त्तितामात्रेण हेतुत्वे युगपत् सर्व्वशब्दोपलब्धेर्दुर्व्वारत्वात् सर्व्वदैवावश्यं यत्किञ्चित्कर्णावच्छेदेन तत्तद्विलक्षणवायुसंयोगसत्त्वात् कर्णस्य ज्ञानानवच्छेदकतया यत्कर्णावच्छेदेन ककारादिसाक्षात्कारस्तत्र विलक्षणवायुसंयोग इति क्रमेण हेतुत्वस्य वक्तुमशक्यत्वात् स्वीयकर्णावच्छिन्नविलक्षणवायुसंयोगत्वेन हेतुत्वे प्रति-

(१) तथाच ताराकारानुगतव्यवहारस्य घटादिव्यवहारवदुपपादनीय- इति भावः ।

कर्णे तत्तत्पुरुषभेदेनानन्तकार्य्य-कारणभावापत्तेः। न च तत्तद्विलक्षण-वायुसंयोगः समवायघटितसामानाधिकरण्यप्रत्यासत्त्यात्मनिष्ठ एव ककारादिसाक्षात्कारहेतुः विलक्षणवायुसंयोगस्य फलबलकल्प्यतया ककारादिसाक्षात्कारदशायामेव तस्यात्मनि सत्त्वान्नातिप्रसङ्ग इति वाच्यं। आत्मनो विभुत्वात् एकस्य पुरुषस्य कर्णावच्छेदेन विलक्षणवायोः संयोगदशायां सर्व्वेषामेव पुरुषाणामात्मनि तदवच्छेदेन विलक्षण-वायोः संयोगस्यावश्यकत्वादतिप्रसङ्गतादवस्थ्यात्। न हि संयोग-निष्ठं वैलक्षण्यं जनकतावच्छेदकं, कर्म्मजन्यतावच्छेदक-संयोगजन्यताव-च्छेदकजात्योर्नानात्वापत्तेरपि तु वायुनिष्ठमेवेति चेत्, न, ममापि तत्र तत्तद्विलक्षणवायुसंयोगानां शरीरनिष्ठतया ककारादिसाक्षा-त्कारहेतुत्वात्। न चैवं हस्ताद्यवच्छेदेन विलक्षणवायोः संयोगस्यापि[1] ककारादिसाक्षात्कारजनकत्वापत्तिरिति वाच्यं। कर्णावच्छिन्न-विलक्षणवायुसंयोगत्वेन हेतुत्वात् पुरुषान्तरीयकर्णस्य च पुरुषान्त-रीयशरीरनिष्ठसंयोगानवच्छेदकः विलक्षणवायोः संयोगस्य फलबल-कल्प्यतया ककारादिसाक्षात्कारदशायामेव तस्य शरीरे सत्त्वेन हस्ताद्यवच्छिन्नविलक्षणवायुसंयोगस्य हेतुत्वेऽपि क्षतिविरहाच्च। इत्थञ्च श्रोत्रसमवायादेरपि न प्रत्यासत्तित्वं तत्तद्विलक्षणवायुसंयो-गानां व्यञ्जकत्वस्यावश्यकतया तत एवातिप्रसङ्गभङ्गात्। न च तथापि न्यायमते विलक्षणवायुसंयोगानां कत्वादिकमेव समवायसम्बन्धेन कार्य्यतावच्छेदकं भवन्मते तु कसाक्षात्कारत्वादिकं[2] अतो गौरवं

(१) विलक्षणवायोः संयोगस्य सत्त्वेऽपीति ख०।

(२) तव तु ककारसाक्षात्कारत्वादिकमिति ख०।

न्यायनयेऽनन्तककारादिव्यक्तिकल्पनं तत्पुरुषीयशब्दलौकिकसाक्षात्कारं प्रति तत्पुरुषीयश्रोत्रसमवायादेर्हेतुत्वकल्पनञ्च फलमुखमिति वाच्यं। ममापि लौकिकविषयतासम्बन्धेन ककारादिव्यक्तेरेवावच्छेदकत्वात् ककारादिव्यक्तेरेकैकतया ककार-कत्वयोरविशेषात्। न च तथापि लौकिकविषयत्वस्य स्वरूपसम्बन्धार्थकस्याननुगततया कार्य्यतावच्छेदकतानियामकसम्बन्धगौरवमिति वाच्यं। समवायवत् लौकिकविषयत्वस्याप्येकस्यैवानुगतस्य लाघवेनाभ्युपगमात् तथापि समवायस्यैकत्वेन समवायसम्बन्धावच्छिन्नकत्वाधारत्वस्यैव प्रतिव्यक्तिभिन्नस्वरूपसम्बन्धात्मकस्य कार्य्यतावच्छेदकतानियामकसम्बन्धत्वेन सम्बन्धाननुगमनिबन्धनगौरवस्य तुल्यत्वाच्च। न च तथापि तत्र कत्वादिरूपेण कादिव्यक्तिरवच्छेदिका न्यायनये तु स्वरूपतः कत्वादिव्यक्तिरिति लाघवमिति वाच्यं। ममापि स्वरूपतः ककारादिव्यक्तेरवच्छेदकत्वात्। न च जात्यतिरिक्तपदार्थस्य किञ्चिद्धर्मप्रकारेणैव भाननियमात् कथं कादिव्यक्तेः स्वरूपतोऽवच्छेदकत्वमिति वाच्यं। स्वरूपतोऽवच्छेदकत्वेऽपि कार्य्य-कारणभावग्रहे कत्वादिरूपेणैव भानात्। न हि जात्यतिरिक्तपदार्थस्य किञ्चिद्धर्मप्रकारेण भाननियमवत् किञ्चिद्धर्मप्रकारेणावच्छेदकत्वमित्यपि नियमः, मानाभावात्। अथ तथापि लौकिकविषयतया कव्यक्तिरवच्छेदिका लौकिकविषयतया कत्वं वेत्यत्र विनिगमकाभावात् तत्र कार्य्य-कारणभावद्वयापत्तिः। न च कत्वस्यावच्छेदकत्वेऽपि विलक्षणवायुसंयोगाभावदशायां ककारसाक्षात्कारापत्तेर्वारणाय ककारव्यक्तेरवच्छेदकत्वावश्यकत्वमेव विनिगमकमिति वाच्यं। एवं

सति चिन्तयणवायुसंयोगाभावदशायां कत्वसाक्षात्कारापत्तेर्वारणाय कत्वस्य अवच्छेदकत्वावश्यकत्वादिति चेत्, न, ककारादिविषयक-कत्वसाक्षात्कारस्वीकतया ककारसाक्षात्कारसामग्रीविरहादेव त-दानीं कत्वसाक्षात्काराभावसम्भवेन कत्वस्यावच्छेदकत्वानावश्यकत्वात्, कोलाहलस्थले कत्वाविषयकस्यापि साक्षात्कारस्य सत्त्वेन कव्यक्तेरव-च्छेदकत्वस्य चावश्यकत्वादिति सङ्क्षेपः।

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये शब्दानित्यतावादपूर्व्वपक्षरहस्यम् ॥

अथ शब्दानित्यतावादसिद्धान्तः ।

अत्रोच्यते । गकारादिव्यक्तयोनैकैकाः, अस्ति च शुक-सारिका-मनुष्यप्रभवेषु स्त्री-पुंसतद्विशेषप्रभवेषु च गकारादिषु स्फुटतरवैलक्षण्यात् स्वरूपतोभेदप्रथ इक्षुक्षीरादिमाधुर्य्यवत् । न चेयमौपाधिकी भेदप्रतीतिः, न हि विदितकुङ्कुमस्य कुङ्कुमारुणा तरुणीति-

---

अथ शब्दानित्यतावादसिद्धान्तरहस्यं ।

'अस्ति चेति चोहेतो अस्ति हीत्यर्थः, 'तद्विशेषेति स्त्री-विशेष-पुरुषविशेषेत्यर्थः, 'स्फुटतरवैलक्षण्यादिति अनुभवसिद्धवैलक्षण्येन हेतुनेत्यर्थः, 'स्वरूपतोभेदप्रथेति अन्योन्याभावस्वरूपपरस्पर-भेदप्रतीतिरित्यर्थः, 'इक्षुक्षीरादिमाधुर्य्यवदिति इक्षुमाधुर्य्य-क्षीर-माधुर्य्यादिवदित्यर्थः, सप्तम्यन्ताद्वतिः, 'माधुर्य्यं' मधुरोरसः, तथाच तत्र प्रथावैलक्षण्येन हेतुना परस्परभेदप्रतीतिरित्यर्थः, 'औपाधि-कीति परम्परयान्यनिष्ठवैधर्म्यविषयेत्यर्थः, 'भेदप्रतीतिः' यथोक्त-गकारादिषु वैलक्षण्यानुभवः, अन्यनिष्ठवैधर्म्यविषयत्वं दूषयति, 'न हीति, 'कुङ्कुमारुणा तरुणीतिवदिति कुङ्कुमारुणा तरुणीति-प्रत्यये कुङ्कुमारुणवदित्यर्थः, 'स्त्री-पुंसादिप्रभेदत्वमिति स्त्री-पुं-

यत् स्त्री-पुंसप्रभवत्वमानुभविकमुपाधिः,[1] इन्द्रिया-सन्निकर्षेण स्त्री-पुंसादिभेदमविदुषोऽपि शब्दभेद-प्रत्ययात्, यतोऽनुमापयन्ति शुकशब्दोऽयं स्त्रीशब्दो-ऽयमित्यादि अन्यथान्योन्याश्रयात्, तत्प्रभवत्वे ज्ञाते भेदप्रत्ययस्तस्माच्च तदनुमानमिति। न च कृपा-णान्वय-व्यतिरेकानुविधानात् कृपाणे मुखदीर्घत्ववत् औपपत्तिकमौपाधिकत्वं, अन्वयानुविधानाभावात्। अथ

सादिनिष्ठं वैलक्षण्यमित्यर्थः, स्त्री-पुंसप्रभवत्वमितिपाठेऽप्ययमेवार्थः, 'आनुभविकं' अनुभवसिद्धं, 'उपाधिरि'तिकर्मव्युत्पत्त्या परम्परया आरोपप्रकारीभूतमित्यर्थः, 'इन्द्रियासन्निकर्षेण' इन्द्रियसन्निकर्षा-दिविरहेण, 'शब्दभेदे'ति, 'भेदः' वैलक्षण्यं, तदज्ञानेऽपि भेदप्रत्यय-इत्यत्र मानमाह, 'यत इति, तेनैव हेतुनेति शेषः। 'अन्यथा' तज्ज्ञानानन्तरमेव शब्दभेदप्रत्यये, 'तत्प्रभवत्वे' स्त्री-पुंसादिनिष्ठ-वैलक्षण्ये, 'भेदप्रत्ययः' शब्दनिष्ठवैलक्षण्यप्रत्ययः, 'तस्माच्च' शब्द-निष्ठवैलक्षण्यज्ञानाच्च, 'अनुमान'मिति स्त्री-पुंसादिनिष्ठवैलक्षण्यानु-मानमित्यर्थः, 'कृपाणान्वये'ति यदा कृपाणे अर्थप्रतीतिस्तदैव मुखे दीर्घत्वारोपो न पुनरादर्शादौ तत्प्रत्ययदशायामित्यन्वय-व्यतिरे-कानुविधानादित्यर्थः, 'कृपाणे मुखदीर्घत्ववदि'ति कृपाणनिष्ठतया भासमानस्य मुखस्य दीर्घत्वप्रत्ययवदित्यर्थः, 'औपपत्तिक'मिति

---

(१) स्त्री-पुंसादिप्रभेदत्वमानुभविकमुपाधिरिति पाठान्तरं।

व्यञ्जकवायोरेव वैलक्षण्यं शुकादिगकारगतत्वेन भासते वायोरुपलब्धिस्तेनैव रूपेणेति चेत्। न। गकारगतत्वे बाधकाभावात्। न चाभेदप्रत्यभिज्ञानं बाधकं, न हि य एव शुकशब्दः स एव स्त्रीशब्द इति प्रत्यभिज्ञानं, अन्यथा तेषु भेदज्ञानाभावेन वक्तृविशेषानुमानं न स्यात्। न चाभिव्यञ्जकवायोरेव वैलक्षण्यं शुकाद्यनुमापकं, तस्य गकाराद्यवृत्तित्वात् तच्च

अन्यान्वय-व्यतिरेकान्यथानुपपत्त्यादिसिद्धमित्यर्थः, 'औपाधिकत्वमिति, शब्दनिष्ठवैलक्षण्यप्रत्ययस्य यथाकथञ्चित् स्मर्य्यमाणारोपरूपत्वमित्यर्थः। न च कृपाणे मुखदीर्घत्वारोपस्यानुभूयमानारोपरूपत्वमेव न तु स्मर्य्यमाणारोपरूपत्वमिति कथं दृष्टान्तत्वमिति वाच्यं। यादृशं दीर्घत्वं कृपाणे तादृशदीर्घत्वस्य मुखे आरोपाभावेन तस्यापि स्मर्य्यमाणदीर्घत्वान्तरारोपरूपत्वमित्यभिप्रायात्। 'व्यञ्जकवायोरिति, वायुनिष्ठवैलक्षण्यस्य तत्राप्यावश्यकत्वादिति भावः। 'गकारगतत्वेन भासत इति, प्रतीतिस्तु परम्परासम्बन्धेन प्रमारूपा साक्षात्सम्बन्धेन भ्रमरूपैव वेत्यन्यदेतदिति भावः। व्यक्त्या विना कथं जातिग्रह इत्यत आह, 'वायोरिति, वायुत्वन्तु दोषान्न भासत इति भावः। ननु शब्दस्य ध्वंसादिकल्पनागौरवमेव बाधकमित्यत आह, 'अन्यथेति, 'अन्यथा' तादृशप्रत्यभिज्ञाने, 'भेदज्ञानाभावेन' ज्ञायमानवैलक्षण्याभावेन, 'तस्येति, तथाच गकारं पक्षीकृत्य शुकाद्युच्चरितत्वे साध्ये वायुनिष्ठवैलक्षण्यस्य न पक्षधर्मत्वमिति भावः।

षारोपे अनुमितेर्भ्रान्तत्वापातात् । तस्मात् यथा कृष्णा गौः शुक्ला गौरिति भेदे भासमाने गकारानुगतप्रतीतिर्गोत्वमालम्बते तथा शुकादिगकारेषु भेदे भासमानेऽयं गकारोऽयमपि गकार इति बुद्धिर्गत्वमा-

---

ननु पक्षधर्मताज्ञानमुपयुज्यते तच्चारोपरूपमेवाविकलमित्यत आह ,'तच्च चेति गकारादिषु वायुनिष्ठवैलक्षण्यस्य पक्षधर्मतारोप इत्यर्थः, 'अनुमितेः' अनुमित्यनुव्यवसायस्य, 'भ्रान्तत्वापातादिति भ्रमजन्येऽन्यथाख्यात्यभावेन पक्षधर्मतानिश्चयाभावादनुमित्युत्पादासम्भवादिति भावः । न च परम्परासम्बन्धेन वायुवृत्तिवैलक्षण्यं लिङ्गमिति वाच्यं । परम्परासम्बन्धस्य व्याप्यतानवच्छेदकत्वादिति भावः[1] । 'अनुमितेरिति यथाश्रुतन्तु न सङ्गच्छते विषयाबाधेन कूटलिङ्गकानुमितेरपि प्रमात्वसम्भवात् । ननु शुक-शारिकादिगकारादीनां परस्परभिन्नत्वेऽयङ्गकारोऽयमपि गकार इत्यादिप्रत्यभिज्ञानुपपत्तिः[2] व्यक्त्यभेदस्य तद्विषयत्वादित्याशङ्कामुपसंहारव्याजेन निराकरोति, 'तस्मादिति, 'भेदे भासमान इति इत्यनुभवसिद्धेन वैलक्षण्येन भेदे सिद्ध इत्यर्थः, 'गोत्वमालम्बत इति न तु व्यक्त्यभेदमित्यर्थः, 'भासमाने' सिद्धे, गकार इति बुद्धिर्गत्वमालम्बते न तु व्यक्त्यभेदमित्यर्थः । ननु परम्परासम्बन्धस्यापि व्याप्यतावच्छेदकतया वायुनिष्ठ-

---

(१) इति हृदयमिति ख० ।

(२) प्रत्यक्षानुपपत्तिरिति क० ।

गम्यते इति प्रत्यभिज्ञा च भेदप्रथा चोपपद्यते। किञ्च गत्वादिकं यदि न जातिस्तदा कोलाहलप्रत्ययो न स्यात् तथा हि नगरादौ बहुभिर्वर्णानामेकदोच्चारणे दूरस्थेनानभिव्यक्तगकारादिवर्णविभागं कोलाहलमात्रं श्रूयते। न च तत्र वर्णान्यस्य ध्वनिरूपस्य शब्दस्य श्रुतिः

वैलक्षण्येनापि परम्परया शुकाद्युच्चरितत्वानुमानसम्भवः। अस्तु वा वायुं पक्षीकृत्य शुककण्ठाद्यभिहितत्व[१] साध्यीकृत्य शुकीयत्वानुमानमित्यस्वरसात् ककारादेरेकैकत्वे कत्व-खत्वादिजात्यनुपपत्त्या तेषां भेदं साधयति, 'किञ्चेति, 'गत्वादिकमिति, गत्वादिजातेरावश्यकत्वे व्यक्तिभेदोऽप्यावश्यक इति गूढाभिसन्धिः, 'कोलाहलप्रत्यय-इति कोलाहलव्यवहार इत्यर्थः, 'बहुभिः' जनैः, 'वर्णानां' बहूनां वर्णानां, 'दूरस्थेनेति, दूरस्थत्वं हस्ताद्यपेक्षया न तु ग्राह्यशब्दापेक्षया स्वकर्णावच्छिन्नस्यैव शब्दस्य ग्रहादिति ध्येयं। 'अनभिव्यक्तेति अनभिव्यक्तकत्वादिजातिकमित्यर्थः, 'कोलाहलमात्रं' शब्दसमूहमात्रं, 'श्रूयते' यत् श्रूयते, तदेव कोलाहलव्यवहारविषय इति शेषः[२]। तथाच वर्णत्वावान्तरकत्वादिजातिमत्तया अप्रतीयमानशब्दसमूहत्वमेव कोलाहलत्वं तच्च गत्वादिजात्यभावे न सम्भवतीति भावः। नन्वप्रतीतध्वनित्वावान्तरजातिकध्वनिव्यक्तिसमूह एव कोलाहलव्यवहारविषय इत्यत आह, 'न चेति, 'तत्र' कोलाहलव्यवहार-

---

(१) शुककण्ठाद्युच्चरितत्वमिति ख०।

(२) इति भाव इति क०।

सन्निधावपि तथा प्रत्ययप्रसङ्गाच्च। गकारादिग्रहेऽपि तेषां परस्परभेदाग्रहात् कोलाहलधीरिति चेत्, न, तेषु वैधर्म्याभावात् तदभावेऽन्योन्याभावस्याभावात् स्वरूपग्रहणात् समीपे बहुगकारेषु भेदाभावेन तद्ग्रहे कोलाहलधीप्रसङ्गाच्च। अनेकवर्णोच्चारणस्य तद्धेतुत्वे दूरेऽपि तद्प्रत्ययापत्तेः। तस्मादवश्यं गत्वादिजातिरूपेया यद्ग्रहे गकारादिग्रहेऽपि कोलाहलबुद्धि-

---

व्यवहारविषय इत्याशङ्कते, 'गकारादी'ति, 'परस्परभेदाग्रहा'दिति परस्परनिष्ठो यो भेदस्तस्याग्रहादित्यर्थः, वैधर्म्यान्योन्याभावस्वरूपान् भेदान् क्रमेण विकल्प्य दूषयति, 'तेष्वि'ति, गत्वादिजातेस्त्वयानभ्युपगमादिति भावः। 'तदभावे' वैधर्म्याभावे, 'अन्योन्याभावस्याभावा'दिति अन्योन्याभावस्य वैधर्म्याव्याप्यत्वादिति भावः। ननु वैधर्म्यान्तराभावेऽपि स्वरूपमेव तादात्म्येन वैधर्म्यमस्तु स्वरूपमेव वा भेदो वाच्यः तस्य भेदत्वेनाग्रहात् कोलाहलप्रत्ययः स्यादित्यस्वरसादविद्यमानभेदाग्रहो नियामको विद्यमानभेदाग्रहो वेति विकल्प्य आद्ये दोषमाह, 'समीप इ'ति, 'बहुगकारेषु' बहुभिरुच्चरितेषु गकारेषु, 'तद्ग्रह इ'ति. तद्ग्रहे च तवान्यथाख्यात्यापत्तिरिति भावः। द्वितीये दोषमाह, 'अनेके'ति, 'तद्धेतुत्वे' कोलाहलधीहेतुत्वे, 'दूरेऽपी'ति, बहुभिरेकदा गकारोच्चारणेऽपीति शेषः, 'अवश्यं गत्वादिजातिरि'ति, गत्वादिजात्यभ्युपगमेऽनेकगकारादिव्यक्तिरगत्या विषयतीति भावः। ननु सन्तु कोलाहलबुद्धि-व्यपदेशाव्य-

सम्भवति, तदभिव्यञ्जकभेरीताडनादेरभावात्। न च वर्णाभिव्यञ्जका एव ध्वनिव्यञ्जकाः, सन्निधानेऽपि श्रूयमाणे वर्णे तच्छ्रवणाप्रसङ्गात्। न च वर्णाभिव्यञ्जकवायुभिरेव दूरे ध्वनिमात्रमभिव्यज्यते, कव्यञ्जकस्य गव्यञ्जन इव वर्णव्यञ्जकस्य ध्वनिव्यञ्जनेऽसामर्थ्यात् तत्समर्थशङ्खादेरभावाच्च। न च तत्र शब्दत्वमेव प्रतीयते न शब्दः, व्यक्त्यग्रहे जात्यग्रहात्। न चाभिव्यञ्जको वायुरेव कोलाहलत्वेन प्रतीयते, शब्दत्वेन प्रत्ययात्

स्थले, 'तदभिव्यञ्जकेति ध्वन्युत्पादकेत्यर्थः, ध्वनीनामनित्यतया(१) यथाश्रुतासङ्गतेः। 'ध्वनिव्यञ्जकाः' ध्वन्युत्पादकाः। 'दूरे इति दूरत्वसहकारादित्यर्थः, तथाच सन्निधानेऽपि ध्वनिर्जायत एव व्यञ्जकाभावात् न श्रूयत इति भावः। ननु फलबलाद्दूरत्वोपहितानां वर्णव्यञ्जकानामेव तत्र सामर्थ्यं स्यादित्यत आह, 'तत्समर्थेति ध्वनिजनकेत्यर्थः, तथाच कॢप्तकारणं विना कथं तत्र ध्वनिः स्यात्। न चात्र ध्वनौ शङ्खादेर्न कारणत्वं किन्तु एतद्विजातीयध्वनावेवेति वाच्यं। गौरवात् मानाभावाच्चेति भावः। अगृह्यमाणव्यक्तिकशब्दत्वमेव कोलाहलत्वं स्यादित्याशङ्क्य निराचष्टे, *'न चेति*। 'अभिव्यञ्जकेति ककारादिव्यञ्जकेत्यर्थः, अगृह्यमाणान्योन्यभेदिकाः परस्परविभिन्नाः गकारादिव्यक्तय एव कोलाहल-

---

(१) ध्वनीनामनित्यत्वोपगमादिति ख०।

व्यपदेशौ । अस्ति च शब्दस्य कोऽपि च जातिविशेषः श्रोत्रग्राह्यः यस्मात् प्राच्यादिदिग्देशविशिष्टशङ्खप्रभवत्वमनुमीयते, अव्यपदेश्यत्वेऽपि इक्षुक्षीरादिमाधुर्य्यावान्तरवत्तत्सत्त्वात् । अन्यथा दिग्देशविशिष्टशङ्खादीनां ग्रहे श्रोत्रस्यासामर्थ्यात् तत्प्रतीतिर्न स्यादेव । तथापि गत्वादिना परापरभावानुपपत्त्या शुकादि-

---

थानुपपत्त्या गत्वादिका जातयः एवमपि शुकादिप्रभवा एकैका एव सन्तु ककारादिव्यक्तय इत्यत आह, 'अस्ति चेति, 'यस्मात्' जातिविशेषाद्धेतोः, 'प्राच्यादीति, तथाच शुककककारत्वस्यापि तत्तद्देशप्रभवत्वरूपवैजात्यभेदाद्भेद इति भावः । ननु प्राचीप्रभवत्वादेर्जातिरूपत्व एव तदाश्रयककारादीनां नानात्वं तदेव कुत इति चेत्, न, प्राच्यादिप्रभवशुकीयाद्यैकैकककारादिविषयकत्वेनैव तादृशव्यक्तिग्रहेऽपि प्राच्यादिप्रभवत्व-तदप्रभवत्वसन्देहात् प्राच्यादिप्रभवत्वादेर्गत्वादिव्याप्यजातिविशेषत्वावश्यकत्वात् जातिविशेषास्वीकारे च दोषवशात् तादृशजात्यग्रहकाले एव तादृशसंशयोपपत्तेः, इत्थञ्च कदम्बगोलकन्यायेन शब्दोत्पत्तौ अन्यथा एकव्यक्तौ प्राचीभवत्वादेरसम्भवात् वीचि-तरङ्गन्यायेनोत्पत्तौ च देशान्तरेऽपि तादृशशब्दजन्य-शब्दोत्पत्त्या देशान्तरजन्यतावच्छेदकजात्या सङ्करप्रसङ्गाच्च, 'मधुरेति दृष्टान्तार्थं, शुकादिकमपि बोध्यं । 'अव्यपदेश्यत्वेऽपि' कस्यचित् पदस्य प्रवृत्तिनिमित्तत्वाभाववत्त्वेऽपि, 'तत्सत्त्वात्' प्राच्यादिप्रभवत्वजाति-सत्त्वात् । 'अन्यथा' तादृशवैजात्यास्वीकारे, 'परापरभावानुपपत्त्येति'

गकारादिषु न जातिविशेषा इति चेत्, शुकककका-रादिषु कत्वादिव्याप्या नानाजातिभिन्ना तया प्रत्येकं शुककककारादिषु शुकादिप्रभवत्वमनुमाय तद्व्यवहारः, न तु शुककककारादिषु एका जातिरस्ति शुकप्रभवत्वा-द्यनुमापिका तद्व्यवहारकारिका वा, गत्वादिना सङ्कर-प्रसङ्गात्, गत्वन्तु न नाना अननुगतत्वेन ततोऽनु-गतव्यवहारानुपपत्तेः । अतएव तारत्वमपि गत्वादि-

---

व्याप्य-व्यापकभावानुपपत्त्येत्यर्थः, गत्वशून्येऽपि खकारादौ शुकादि-प्रभवत्वजातिसत्त्वात् शुकादिप्रभवत्वशून्येऽप्यन्यप्रभवगकारादौ गत्वा-दीनां सत्त्वादिति भावः । 'तया' गत्वव्याप्यनानाजात्या, शुकादि-प्रभवत्वं शुकादिप्रयोज्यत्वं, एवं देशप्रभवत्वमपि देशप्रयोज्यत्वं, अन्यथा कर्णशष्कुल्यवच्छिन्ने शब्दजन्यशब्दे तज्जन्यत्वाभावादलक्ष्यक-तापत्तेः, शुकप्रयोज्यवृत्तिश्च जातिविशेषः शुक-तद्देशजन्यताव-च्छेदकजातिव्यापक एव, तादृशजातेः शुक-तद्देशजन्यतावच्छेदक-जात्यानुमानञ्च व्यतिरेकिणैवान्वयसहचाराभावात्, तादृशजन्यता-वच्छेदकजात्यनुमानञ्च तदन्यदेशाप्रभवत्वेऽपि सति तद्देशप्रभवत्वा-दिना व्यतिरेकिणैव । 'तद्व्यवहारः' शुकादिप्रभवोऽयं गकार इति व्यवहारः, 'सङ्करप्रसङ्गा'दिति गत्वाभाववति खकारे शुकप्रभवत्वस्य तदभाववति चान्यप्रभवगकारे गत्वस्य च सत्त्वात् शुकप्रभवगकारे तयोः समावेशाच्चेति भावः । 'नाना' शुकप्रभवत्वादिव्याप्य-विरुद्ध-भेदेन नाना, अनुगततद्व्यवहारानुपपत्तेरिति भावः । अथवि

व्याप्यं नाना न तु गत्वं, तन्निश्चयेऽपि गत्वसन्देहस्य व्याप्यतावच्छेदकरूपानिश्चयात् । न चानुगतव्यवहारानुपपत्तिः, सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकत्वेनानुगतेन नानातारत्वेष्वनुगतव्यवहारसम्भवात्, तदज्ञाने व्यवहारासिद्धेः । तारत्व-मन्दत्वे न जाती सप्रतियोगिकत्वात् इति चेत्, न, तारत्व-तारतरत्वाद्य-उत्कर्षादिरूपा जातिविशेषा एव ते चाश्रये गृह्यमाण एव गृह्यन्ते न तूत्कर्षावध्यपेक्षाः यथा मधुर-

---

ककार-खकारसाधारणशुक्लप्रभवत्वप्रकारकानुगतव्यवहारानुपपत्तेस्त-त्रापि साम्यमेव तथापि तादृशानुगतबुद्धिरप्रामाणिकीत्यभि-प्रेत्येत्युक्तमिति भावः । 'अत एव' गकारानुगतव्यवहारानुप-पत्तेरेव, 'न तु गत्वमिति', नानेति शेषः । ननु तारत्वादेर्ग-त्वादिव्याप्यत्वे तन्निश्चयो न स्यादित्यत आह, 'तन्निश्चयेऽपी-ति तारत्वादिनिश्चयेऽपीत्यर्थः, 'व्याप्यतावच्छेदकेति तारत्वादि-निष्ठगत्वादिव्याप्यतावच्छेदकरूपाभावादित्यर्थः, तारत्वादेर्वायुधर्म-त्वेनाव्याप्यत्वादिति भावः । इदन्तु पररीत्या परं प्रत्युत्तरं, स्वमते तु व्याप्यत्वेनाज्ञानदशायामेतादृशनिश्चयेऽपि संशयोपपत्तिर्बोध्या । 'अनुगतव्यवहारानुपपत्तिः' ककार-गकारादिसाधारणतार-इत्या-कारकानुगतव्यवहारानुपपत्तिः । 'सप्रतियोगिकत्वात्' अवधिनिरूप-णाधीननिरूपणकत्वात् । 'न तूत्कर्षावध्यपेक्षाः' न तूत्कर्षावधि-

तारत्वादय उत्कर्षव्यवहारं इतरसापेक्षाः कुर्व्वन्ति तथा मन्दाद्यपेक्षया तारत्वादिव्यवहारं, उत्कर्षस्तु जातिरूपादन्योऽसम्भावित एव, गकारे तु नैवं, अनन्यथासिद्धभेदप्रत्ययबलेन वक्तृविशेषानुमानबलेन च तत्सिद्धेर्गत्व-कत्वव्याप्यतन्नानात्वस्वीकारात् । तथापि

विषयित्वेव तत्प्रतीतिः । 'तारत्वादिव्यवहारमिति, तारत्वादिजातयः कुर्व्वन्तीति शेषः । अतः तारत्वादीनां जातित्वे सिद्धे व्यवहारार्थमवध्यपेचायां न दोषः। एवं विलक्षणप्रतीतिबलात्तुल्यव्यक्तिकत्वेऽपि तारत्वं मन्दत्वञ्च जातिद्वयं घटत्व-कलसत्वादौ माना-भाव इति न तेनादृशजातिद्वयमिति सम्प्रदायः । ननु नाना-गकारेषु उपाधिनैव गकारानुगतमतिरस्तु तत्कथमनुगतव्यवहारा-न्यथानुपपत्त्या व्यापकजातित्वं गत्वस्येत्यत आह, 'गकारे तु नैवमिति, 'नैवं' न व्यापकजातिकल्पकाभावः, अत्र हेतुमाह, 'अनन्यथेति अनुगतधर्मावगाहिप्रत्ययबलेनेत्यर्थः, ककार-खकारादिसाधारण-शुकीय इत्याकारकानुगतप्रतीतिस्त्वसिद्धेति भावः । ननु देवदत्त-प्रभवत्वाद्युपाधिनैवानुगतबुद्ध्युपपत्तौ किन्तत्प्रभवत्वजात्येत्यत आह, 'वक्त्रिति वक्त्रादिविशेषो देवदत्तप्रभवत्वादिः, तथाच वक्तृविशेषरूपोपाधिरपि न जातिविशेषं विना सिद्ध्यतीति तत्स्वीकार आवश्यक इति भावः। 'तन्नानात्वेति शुकीयत्वादेर्गत्व-कत्वव्याप्यनानाजातित्व-स्वीकारादित्यर्थः ।

केचित्तु 'गकारे तु नैवमित्यस्य यथा कत्व-खत्वादिव्याप्यनाना-

वायुवृत्तित्वे शुकादिककार-गकारादिव्यञ्जकवायूनां विजातीयत्वं वाच्यं तथाच ककारव्यञ्जकवायुत्वव्याप्यं[१] यदि शुकवर्णाभिव्यञ्जकवायुत्वं तदा शुकगकारव्यञ्जकवायौ[२] न स्यात्, अथ व्यापकं तदा सर्व्वे एव कव्यञ्जकवायवः शुकवर्णाभिव्यञ्जकवायवः

जात्या शुकप्रभवत्वमनुमाय शुकीयककार-खकारादिसाधारणेषु शुकीयत्वव्यवहारस्तथा शुकीये गकारे गत्वव्याप्यजात्या शुकीयत्वमनुमाय न तद्व्यवहारोऽपि तु गत्वव्याप्यैकजात्यैवेत्यर्थः, शुकीयत्वव्याप्यतायां किं प्रमाणमत-आह, 'अनन्यथासिद्धेत्यादि, तथाचानुगतप्रतीतिनिर्व्वाहाय गत्वादिप्रतीतिनिर्व्वाहाय च गत्वजातेः शुकतदन्यगकारसाधारणत्वेऽनायत्या तद्व्याप्यत्वमिति भाव इत्याहुः।

अपरे तु यत्र एक एव शुकीयो गकारस्तत्रैकव्यक्तिवृत्तितया शुकीयत्वस्य जातित्वाभावाज्जात्या शुकप्रभवत्वमनुमाय शुकीयत्वव्यवहारो नेत्याह, 'गकारे तु नैवमिति, एतन्मते च गत्वादेः शुकीयत्वजातिव्यापकत्वे किं मानमिति शङ्कायां समाधत्ते, 'अनन्यथेत्यादि पूर्व्वोक्तार्थकमित्याहुः।

'तत्रापीति, 'वायुवृत्तित्वे' शुकीयत्वादिजातीनां वायुवृत्तित्वे, 'विजातीयत्वं' गकारव्यञ्जकवायुविजातीयत्वं, 'न स्यादित्यस्य शुक-

---

(१) ककारादिव्यञ्जकवायुत्वव्याप्यमिति क० ।

(२) शुकककारव्यञ्जकवायाविति क० ।

स्युस्तस्माद्वायुवृत्तित्वेऽपि तासां नानात्वमावश्यकं । अथास्तु स्त्री-पुंसादिगकारभेदस्तथापि यावद्वक्तृभेद-मनन्ता एव नित्या वर्णाः प्रत्यभिज्ञानादिति चेत्, अस्त्युत्पाद-विनाशप्रतीतौ सत्यामपि स एवायं गकार-इति प्रत्यभिज्ञा, अस्ति हि तदनन्तरमप्युत्पाद-वि-नाशप्रथा । न चोत्पादप्रतीत्यभेदप्रत्यभिज्ञयोरन्यत-रस्य परस्परं विहायान्यद्बाधकमस्ति, न वानयोः परस्परं बाध्य-बाधकभावे विनिगमकं येनैकभ्रान्त-त्वेनाविरोधः स्यात् । कथं वा भेदाभेदज्ञानयोरन्य-

---

वर्णाभिव्यञ्जकवायुत्वमित्यादिः, 'तासां' शुक्लीयत्वजातीनां, उत्पा-दादिप्रत्यय-प्रत्यभिज्ञयोः परस्परप्रतिबन्धेन प्रत्यभिज्ञाया व्यक्त्यभे-दावगाहित्वासम्भवेनानायत्या तज्जातीयाभेदावगाहनाच्छब्दस्य नि-त्यतायां न प्रमाणत्वमिति समवधत्ते, 'अस्त्युत्पादे'त्यादिना 'प्रमाण-यितुं न शक्यत इत्यन्तेन । ननु यदि व्यक्तिभेदज्ञानाज्ञाने प्रत्यभिज्ञा तदैवाविरोधाय प्रत्यभिज्ञाया विषयभेदकल्पना युज्यते तदेव न, परन्तु यदोत्पत्त्यभेदव्याप्यतया तज्ज्ञानकाले कदाचिद्व्यक्तिभेदग्रह-एव प्रथमतो जातस्तदा तत्प्रतिबन्धकवशात् प्रत्यभिज्ञा न जायत-एवेति विनिगमनाविरहेणोभयोरेव प्रमाणतया प्रत्यभिज्ञाया-मित्यत्वे प्रमाणत्वमक्षुण्णमेवेत्यत आह, 'कथं वेति, तथाच तादृश-भेदग्रहेऽपि तदुत्तरक्षणेऽनुभवसिद्धां प्रत्यभिज्ञाविषयभेदकल्पनां

चावधारितं परस्परप्रतिबन्धकत्वं परिभूय प्रथमं तयो-रेकसत्त्वेऽप्यपरोत्पत्तिप्रसङ्ग इति सङ्कटप्रविष्टत्वेन प्रत्य-भिज्ञानं शब्दनित्यत्वे प्रमाणयितुं न शक्यते। नन्वे-वमुत्पत्तिमत्त्वादिनाप्यनित्यत्वसिद्धिः कथं, इत्थं, उत्पा-दादिबुद्धि-प्रत्यभिज्ञयोरप्यवश्यं विषयभेदः, एकविष-यत्वे विरोधेनैकानन्तरमपरानुत्पत्तिप्रसङ्गात्। एवञ्च भेदे भासमाने प्रत्यभिज्ञायाः सजातीयत्वं विषयो न व्यक्त्यभेदः। न चैवं तज्जातीयोऽयमिति स्यात् न तु सोऽयमिति वाच्यं। तज्जातीयत्वप्रतीतेरपि सोऽय-मित्याकारदर्शनात् यथा सैवेयं गाथा तदेवेदमौषधं बहुभिः कृतं मयापि प्रत्यहं क्रियमाणमस्तीत्यादौ। न

विना कथं स्यादित्यर्थः, 'इति सङ्कटेति, तथाच प्रत्यभिज्ञा तज्जा-तीयाभेदावलम्बनेति भावः। ननूत्पादादिप्रत्ययानामेव विषयभेदः कल्प्यतां विनिगमकाभावात् इत्यस्तु कथं तेषां शब्दानित्यत्वे प्रमाण-त्वमित्याशङ्कते, 'नन्विति, सिद्धान्तयति, 'इत्थमिति, प्रत्यभिज्ञायाः सजातीयत्वावगाहने साधकमाह, 'एवञ्चेति, 'व्यक्त्यभेदः' तद्व्यक्तित्वा-वच्छिन्नप्रतियोगिताकभेदाभावः, 'इति स्यात्' इत्यभिलापः स्यात्। ननु गाथावृत्तितद्व्यक्तित्वमानुपूर्व्येव इत्यस्तु तावद्वर्णसमूहस्यानुपूर्व्यास्त तस्य च नित्यैकतया तद्व्यक्त्यवच्छिन्नाभेदविषयत्वेनैवोपपत्तौ तत्प्रत्यभि-ज्ञायास्तज्जातीयत्वावलम्बनमसम्भवदुक्तिकमेवेत्यत आनुपूर्व्या नाना-

ह्नि तावद्वर्णमात्रमानुपूर्व्वी, जरा-राज-नदी-दीना-दिषु तन्नानात्वात्, किन्तु तदुच्चारणानन्तरमुच्चारणं तज्ज्ञानानन्तरं ज्ञानं वा तच्च नानेति तद्वती गाथापि नानैव। नचाभेदे भासमाने उत्पादादिबुद्धिरेवान्य-स्योत्पादादिकमवगाहते, गकारगतत्वप्रतीतेर्भ्रान्तत्व-प्रसङ्गात्। न चेष्टापत्तिः, अभेदे भासमाने तद्विरुद्ध-धर्म्मवत्त्वभ्रमानुदयात् विनिगमकाभावेनोभयस्यापि

त्वमेव साधयति, 'न हीति, 'तच्च नानेति, तथाच तादृशानुपूर्व्या-त्मकतत्तद्व्यक्तित्वावच्छिन्नभेदाभावस्य तादृशानुपूर्व्वीरूपेदन्त्वविशिष्ट-वैशिष्ट्यावगाहित्वं न सम्भवति तादृशानुपूर्व्या इदानीमसत्त्वेन विशेषणविषयकतज्ज्ञानासम्भवात् अतस्तादृशानुपूर्व्वीसमानजातीयानु-पूर्व्व्यवच्छिन्नभेदाभाव एव विषयो वाच्यः, तथाच तदेव तज्जातीय-त्वावगाहनमिति भावः। 'इति' इतिहेतोः, 'तद्वती' तादृशानु-पूर्व्वीमती, 'गकारगतत्वप्रतीतेः' पूर्व्वानुभूतगकाराद्भिन्नोऽयं गकार-इति प्रतीतेः, 'अभेदे भासमाने' प्रथमं भेदाभावरूपविशेषदर्शने विरोधिनि सति, 'तद्विरुद्धधर्म्मवत्त्वभ्रमानुदयात्' तद्विपरीतज्ञानानु-दयात्, 'विनिगमनाविरहेणेति,[१] उभयोर्यथार्थ्येन उत्पादादि-प्रत्ययस्य तदीयोपादानादिविषयकत्वे प्रत्यभिज्ञायाश्च तज्जातीयत्वा-

---

(१) विनिगमकाभावेनेत्यत्र विनिगमनाविरहेणेति कस्यचिन्मूलपुस्तकस्य पाठः।

यथार्थत्वाच, कुतस्तर्हि तस्या अभेदो विषयः, यत्र प्रथमं न भेदप्रथा अतएव भेदसत्त्वे तदग्रहणात् क्वचित् सा भ्रान्ता, तस्माद् यत्र भेदप्रतीतिस्तदितरबाधकाबाध्या तत्र प्रत्यभिज्ञैव न भवति भवन्ती वा तज्जातीयत्वमालम्बते, न तु भ्रान्ता, विशेषदर्शने भ्रमानुदयात्। अपि च यथा शङ्खादिध्वनीनां उत्पत्ति-विनाशप्रत्ययात्

यथार्थत्व एव सिद्ध्यतीति तथात्वमावश्यकमिति भावः। 'तस्याः' प्रत्यभिज्ञायाः, 'यत्र भेदप्रतीतिरिति, 'तदितरबाधकाबाध्या' 'तदितरेण' प्रत्यभिज्ञेतरेण, 'बाधकेन' अप्रामाण्यज्ञानादिना, 'अबाध्या' आस्कन्दिता न भवतीत्यर्थः,। ननु वर्णानामुत्पादविनाशकल्पनापेक्षयोत्पादादिप्रत्ययानां भ्रमत्वकल्पनैव युक्तेत्यत आह, 'अपि चेति।

ननु गत्वाद्युतिविषयकप्रत्यक्षविषयवर्णस्तोमत्वं न कोलाहलत्वं तादृशोपाध्यप्रतिसन्धानेऽपि कोलाहलप्रत्ययादन्यथा रूपत्वादिकमपि चक्षुर्मात्रग्राह्यगुणत्वाद्युपाधिरेव लक्ष्यतेऽपि स्यात् किन्तु शब्दत्वभिन्नाखण्डधर्मान्तरं कोलाहलत्वमत एव कत्वाद्यविषयकप्रत्यक्षविषयस्तोमपनीतभानदशायामपि गृहीतभेदकवर्णस्तोमः कोलाहल इत्याकारको नानुभवः तच्च धर्मान्तरं दूरत्वादिदोषवशात् सन्निधाने च गृह्यते इत्यत आह, 'अस्ति चेति, 'शब्दस्य' वर्णस्य, 'गत्वादिदिशां गौड-वङ्गादिदेशानां, 'विशिष्टशङ्खादीनाञ्च, 'प्रभवत्वं' प्रयोज्यत्वं, यस्मादनुमीयत इत्यर्थः, तेन श्रूयमाणवर्णव्यक्तीनां तत्तद्दिगाद्यजन्यत्वेऽपि न व्यभिचारः। शङ्खे तैत्तिरीयं विलक्षणफुत्कारवर्त्तित्वं,

तारत्वादिविरुद्धधर्म्मसंसर्गाच्चानित्यत्वे सैवेयङ्गुर्जरीत्यादिप्रत्यभिज्ञा तज्जातीयत्वविषया तथा वर्णप्रत्यभिज्ञापि। अन्यथा ध्वनयोऽपि नित्याः स्युः उत्पत्ति-वि-

'आदिना विपञ्चीप्रभृतेरुपग्रहः, सहकारिविशेषवशात् यन्त्रादेरपि वर्णोत्पादकत्वमते चेदं। ननु दिग्देशप्रयोज्यधर्म्मस्यासाधारणपदशक्यतामवच्छेदकत्वाज्जातित्वानुपपत्तिरित्यत आह, 'अव्यपदेश्यत्वेऽपीति असाधारणपदशक्यतानवच्छेदकत्वेऽपीत्यर्थः, 'माधुर्य्यावान्तरवदिति, 'अन्यथा' दिगादिप्रयोज्यजातीनामसत्त्वे, 'न स्यादेवेति, तथाच तादृशजात्यनुरोधात् गकारव्यक्तीनां नानात्वादवश्यं गकाराद्यनुगतमत्यर्थं गत्वादिजातिरभ्युपेतव्येति तदवच्छिन्नाभेदविषयिण्येव प्रत्यभिज्ञा भविष्यतीति न्यायमतनिगर्भः। शङ्कते, 'तथापीति, 'परापरेति, शुकीयत्वादिकं कत्वसमानाधिकरणजातिभिन्नं अव्यभिचारिकत्वव्यभिचारित्वात् रूपत्वादिवद्घटत्वादिवदेति भावः। ककारगतशुकीयत्वस्य कत्वाव्यभिचारित्वादुक्तहेतोः स्वरूपासिद्धिरित्याशयेन परिहरति, 'शुकेति। ननु कत्वादिव्याप्यायाः शुकीयत्वजातेर्नानात्वे ककारादावनुगतः शुकीयत्वव्यवहारः कथं स्यादत आह, 'तया चेति[१] तादृशसामाजात्या चेत्यर्थः, 'शुकादिप्रभवत्वं' तत्प्रयोज्यत्वं, शङ्कते, 'न चेति,[२] निरस्यति, 'गत्वादिनेति, गत्वं विना शुकीयत्वं स्वकारे शुकीयत्वं विना च गत्वं स्त्रीगकारे वर्त्तमानं शुकीयगकारे मिथः सङ्कीर्णमिति भावः।

(१) 'तयेत्यत्र 'तया चेतिपाठः क्वचिन्मूलपुस्तके वर्त्तत इति।

(२) ईदृग्व्याख्याने 'न स्थित्यत्र 'न चेतिपाठो युज्यते।

ननु साङ्कर्यभिया गत्वादिकमेव शुकीयत्वादिव्याप्यं नाना कथं नोच्यते इत्यत आह, 'गत्वन्त्विति, 'अननुगतत्वेनेति,' यद्यपि नानाभिरेव गत्वजातिभिर्गकारेषु कण्ठावच्छेद्यविलक्षणप्रयत्नप्रभवत्वमनुमाय तेनैव गणेशग्राहकतावच्छेदकजातिमद्वर्णत्वेनैव वा[१] अनुगतगकारव्यवहारः सम्भवत्येव तादृशोपाध्यप्रतिसन्धानेऽपि गकारानुगतमत्या अनुगतत्वस्वीकारे तु शुकप्रभवत्वाद्युपाधेरप्रतिसन्धानेऽपि शुकोक्तगकारादिनानावर्णेष्वनुगतमत्यनुरोधात् तेष्वपि शुकप्रयोज्यजातिप्रसङ्गो दुर्व्वारः, तथापि शुकादितत्तत्प्राणिप्रयोज्यजातिर्यदि कत्वादिपञ्चाशज्जातिव्यापिका तदा प्राणिगतसमुच्चरितेषु ककारादिपञ्चाशद्वर्णेषु तत्तत्प्राणिप्रयोज्यजातिमत्त्वस्वीकारेऽतिरिक्तपञ्चाशज्जातिकल्पनागौरवं स्यात् कत्वादिपञ्चाशज्जातीनां तत्तत्प्राणिप्रयोज्यजातिव्यापकत्वे तु प्राणिगतसमुच्चरितेष्वपि कादिपञ्चाशद्वर्णेषु कत्वादयः पञ्चाशदेव जातयो न तु शतानि इत्येव गत्वादिजातेरनुगतत्वे मुख्ययुक्तिः, इदन्तु बोध्यं कत्वव्याप्यशुकप्रभव-तत्तद्देशप्रभवतारत्वमेकं एवं खकारादिवर्णान्तरेष्वपि जन्यतावच्छेदकजातेरनभ्युपगमेऽपि साङ्कर्याभावादन्यथा शुकीयत्व-तद्देशप्रभवत्व-तारत्वादीनां जातिसाङ्कर्यापत्तेः शुकप्रभवत्व-तद्देशप्रभवत्व-तारत्वजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकशब्दजातित्वाद्युपाधिभिरेव ककारादिष्विव गदेशीयककारादिष्वपि शुकीयत्वाद्यनुगतबुद्धेः सम्भवात् शुककत्वमेव सामान्यं तद्व्याप्यञ्च तारत्व-तद्देशप्रभवत्वमेकं शुकगकारस्य तद्देशप्रभवतारस्य च सत्त्वेन जातिद्वयस्वीकारे साङ्कर्यादित्यपि वदन्ति । 'अतएवेति

(१) गपदेन गणेशबोधनादिति भावः ।

कत्वादेरननुगतत्वादेवेत्यर्थः, ननु तारत्वस्य गत्वव्याप्यत्वे तन्निश्चयदशायां गत्वसन्देहो न स्यादिति विरोधिव्याप्यनिश्चयस्य सत्त्वादत आह, 'तन्निश्चय- इति, 'व्याप्यतावच्छेदकरूपाविनिश्चयादिति, तादृशरूपेण निश्चयस्यैव प्रतिबन्धकत्वात् इति भावः। व्याप्यसामानाधिकरण्यरूपव्याप्त्य- भिप्रायेणैव चायं ग्रन्थः। ननु तारत्वस्य नानात्वे ककार-गकारादिषु तार इत्यनुगतव्यवहारः कथं स्यादित्याशङ्कते, 'न चेति, परिहरति, 'जातीयेति, इत्यत्र तद्गकारादयं शब्दस्तार इत्यत्र पञ्चम्यर्थः तादृशी, तत्र शब्दसाक्षात्कारप्रतिबन्धकतावच्छेदकजातिमत्पर्यवसितस्य तार- पदार्थस्यैकदेशे शब्देऽन्वितं, तेन गकाराद्यात्मकशब्दसाक्षात्कारप्रतिब- न्धकतावच्छेदकजातिमानयं शब्द इत्याकारकस्तत्रान्वयबोधः। न च महत्त्वादिगतोत्कर्षस्येव तारत्वस्यापि सावधिकत्वे बाधकाभावाद- वधित्वमेव पञ्चम्यर्थ इति वाच्यम्। तथा सति तद्गकारापेक्षया मन्देऽपि वर्णे तद्गकारात्तारोऽयमिति प्रयोगापत्तेः तादृशवर्णगतो- त्कर्षस्यापि स्वापेक्षया मन्दशब्दान्तरसाक्षात्कारप्रतिबन्धकतावच्छेदक- त्वात् तद्गकारावधिकत्वाच्च अन्यथा तद्गकारादसौ मन्द इत्यपि प्रयोग- स्तत्र न स्यात्, यदेव हि वैजात्यात्मकापेक्षया तारत्वं तदेवान्यापे- क्षया मन्दत्वमित्यभ्युपगमात्, अतएव कुवलयमहत्त्वादुत्कृष्टं बिल्वमहत्त्वं इत्यत्रापि पञ्चम्या सावधित्वमर्थस्तथा सति बिल्वमहत्त्वादुत्कृष्टं कुव- लयमहत्त्वमित्यपि प्रयोगापत्तेः कुवलयनिष्ठस्य सर्षपाद्यपेक्षयोत्कर्षस्य बिल्वमहत्त्वावधिकत्वनियमादन्यथा बिल्वमहत्त्वादपकृष्टं कुवलयमहत्त्वं इत्यपि प्रयोगो न स्यादेकमहत्त्वापेक्षया उत्कर्षस्यैवापरमहत्त्वापेक्ष- यापकर्षरूपत्वात् किन्तु कुवलयमहत्त्वाद्बिल्वमहत्त्वमुत्कृष्टमित्यत्रापि

तादृशमेव पञ्चम्यर्थः, तच्च परिमाणसाक्षात्कारप्रतिबन्धकतावच्छेदकीभूतजातिपर्यवसितस्य उत्कर्षपदार्थस्य एकदेशे परिमाणेऽन्वितं, तेन कुवलयमहत्त्वात्मकपरिमाणगोचरसाक्षात्कारप्रतिबन्धकतावच्छेदकीभूतजात्याश्रयो बिल्वमहत्त्वमित्याकार एव तथान्वयबोधः, साश्रयाद्यन्निद्रव्यसमवेतत्वसम्बन्धेनोत्कृष्टमहत्त्वस्यापकृष्टमहत्त्वसाक्षात्कारप्रतिबन्धकत्वादिति मिश्राद्यनुयायिनः।

परे तु तुल्यव्यक्तिवृत्तिकमपि तारत्वं मन्दत्वञ्च नैकं किन्तु जातिद्वयमेव विलक्षणबुद्धिसिद्धत्वात् घटत्व-कलशत्वयोर्भेदे प्रमाणाविरहादैक्यमौकारात्तथा च गकारावधिकं यन्मन्दत्वं तदपि तद्गकारावधिकस्य तारत्वस्य विरहात्तद्गकारावधिकतारत्वाभावसमभिव्याहृतवधित्वमेव पञ्चम्यर्थः। न च तारत्वस्य सावधिकत्वे जातित्वं न स्यात्, अप्रयोजकत्वादन्यथा संयोगादेः सावधिकत्वे गुणत्वं न स्यादिति संयोगादयोऽपि निष्प्रतियोगिका एवेति किं न ब्रूयाः. एवञ्च कुवलयमहत्त्वादुत्कृष्टं बिल्वमहत्त्वमित्यत्रापि नोत्कर्षेणान्वयबोधः कथितदिशा उत्कृष्टमहत्त्वस्यापकृष्टमहत्त्वसाक्षात्कारप्रतिबन्धकत्वे प्रमाणाभावात् सन्निकर्षविरहादेव महत्त्वादेस्तस्य क्षुद्रस्य परिमाणाग्रहसम्भवात् अन्यथा तदाप्यप्रतीकारात् घटमहत्त्वादुत्कृष्टं गगनमहत्त्वमैहिकसुखादुत्कृष्टं स्वर्गसुखमित्यादौ तादृशबुद्ध्यसम्भवात् गगनमहत्त्वादेर्घटमहत्त्वसाक्षात्कारं प्रत्यविरोधित्वात् किन्तु तथाप्यवधित्वमेव पञ्चम्यर्थः, स चोत्कर्षपदवाच्यात्मक एवोत्कर्षपदस्यार्थेऽन्वितः, तथा च कुवलयमहत्त्वावधिकं यदुत्कर्षपदवाच्यं तद्बिल्वमहत्त्वमित्याकारक एव तत्रान्वयबोधः तत्तद्गुणाधिकपदोत्तरपञ्चम्यास्तत्तद्गुणान्वितस्वार्था-

अवधित्वस्य तद्गुणोत्कर्षभिन्नात्मकस्वरूपसम्बन्धेनैव उत्कर्षपदार्थे धर्मिणि अन्वयबोधं प्रति साकाङ्क्षत्वादेव विलक्षणत्वादुत्कृष्टं कुवलयमसम-मित्यादिप्रयोगस्यासम्भवादिति प्राञ्चः।

नव्यास्तु तारत्वमुत्कर्षत्वादिकमखण्डमेव धर्मान्तरं स्वीकुर्व्वाणास्तस्यैव सावधित्वमाश्रयन्तः कथितव्यवहारमुपपादयन्ति, तच्चिन्त्यं।

प्रकृते, 'तारत्वेति, 'सप्रतियोगिकत्वादिति स्वेतरज्ञानाधीन-प्रत्ययसामान्यकत्वादित्यर्थः, ब्राह्मणत्वादिजातौ व्यभिचारसत्त्वेऽपि स्वरूपासिद्धिं परिहरति, 'तारत्वेत्यादिना, 'उत्कर्षरूपा इति जातित्वे हेतुगर्भविशेषणं, अतएव वक्ष्यति, 'उत्कर्षस्त्वित्यादि, 'न त्विति उत्कर्षस्य योऽवधिस्तज्ज्ञानसापेक्षा गृह्यन्ते इति पूर्व्वेणान्वयः। नन्वेवमाश्रयगतोत्कर्षमेवायं [illegible] इत्यादिव्यवहारः स्यादत आह, 'उत्कर्षव्यवहारमिति उत्कर्षार्थकतर-तमादिप्रयोगमित्यर्थः, 'इतर-सापेक्षा इति स्वधर्म्मिकया सजातीयगोचरसाक्षात्कारप्रतिबन्धकता-वच्छेदकजातिमत्त्वलक्षणोत्कर्षत्व बुद्ध्या सहकृता इत्यर्थः, 'कुर्व्वन्तीत्यस्य मधुरादिशब्दोत्तरमिति शेषः, प्रकृतिशक्ययोर्गुण-कर्म्मणोरन्यतरस्यो-त्कर्ष एव तर-तमयोरनुशासनात् इति भावः। 'मन्दाद्यपेक्षयेति मन्दादिज्ञानमपेक्ष्येत्यर्थः, 'तारत्वादिव्यवहारमिति, 'तारत्व-तार-तरत्वादयः' 'कुर्व्वन्तीति च इयमनुषज्यते, तथाचाश्रयसन्निकर्षा-द्गृह्यमाणेऽपि तारत्वादौ शब्दसाक्षात्कारप्रतिबन्धकतावच्छेदकजाति-त्वलक्षणतारत्वं न गृहीतमतस्तदानीं न तारत्वव्यवहारस्ताद्रूप्येणैव तारत्वादीनां तारपदशक्यतावच्छेदकत्वादिति भावः। ननु गकार-स्योत्कर्षवत्त्वे मधुरतरो रस इत्यादिक इव गतरः शब्द इत्यपि

व्यवहारः स्यादत आह, 'गकारे तु नैवमिति गशब्दे तु न मधुरादि-
शब्द इवोत्कर्षार्थकतर-तमादिव्यवहार इत्यर्थः, गकारस्य गपदशक्यता-
नवच्छेदकतया सजातीयसाक्षात्कारप्रतिबन्धकतावच्छेदकजातिमत्त्व-
मात्रस्य तर-तमादिव्यवहारं प्रत्यकिञ्चित्करत्वादिति भावः। ननु
गकारो नोत्कर्षवान् तर-तमप्रत्ययाप्रकृतिशब्दत्वादन्यथा कत्वादिना
सङ्करप्रसङ्गादत आह, 'अनन्यथेति, 'भेदः' वैलक्षण्यं, 'वक्तृविशेषः' शुका-
दिः। ननु शुकीयत्वाद्युत्कर्षस्य शब्दवृत्तित्वे कत्वादिभिः साङ्कर्यभिया
नानात्वं वाच्यं तद्वरं व्यञ्जकवायुनिष्ठमेकैकं लाघवात् तत्कल्पनं
आश्रयव्यङ्ग्यत्वलक्षणपरम्परासम्बन्धेनैव तादृशैकजात्या गकारादिषु
शुकीयत्वव्यवहारसम्भवादत आह, 'तवापीति, शुकीयत्वादिजातेरिति
शेषः। 'तासां' शुकीयत्वादिजातीनां, शङ्कते, 'अथेति, 'अनन्ता एवेति,
नित्याभिरेव तत्तद्वर्णव्यक्तिभिस्तद्वदनुमानसम्भवादिति भावः। 'प्रत्य-
भिज्ञानादिति स एवायं शुकीयः ककार इत्यादिप्रत्यभिज्ञानादित्यर्थः,
निरस्यति, 'अस्ति चेत्यादिना 'न शक्यते' इत्यन्तेन, 'बाधकं' अप्रामा-
ण्यज्ञापकं, 'अनयोरिति स एवायं गकारो नायं तद्गकार इत्याकारक-
भेदाभेदज्ञानयोरित्यर्थः, 'भेदोऽत्र वैधर्म्यं, इदानीमुत्पन्नत्वादिकमि-
त्यपि कश्चित्। 'सङ्कटप्रविष्टत्वेनेति नित्यताग्राहकधर्म्मसाधकतया स-
न्दिग्धत्वेनेत्यर्थः। ननूक्तदिशोत्पत्तिसत्त्वज्ञानमपि सङ्कटप्रविष्टमेवेति
तदपि कथमनित्यत्वे प्रमाणीकर्त्तव्यमित्याशङ्कते, 'नन्वेवमिति, उत्तर-
यति, 'इत्थमिति, 'विरोधेनेति, पूर्व्वानुभूतव्यक्तिभेदस्येदानीमुत्पादस्य
च मिथो व्यावर्त्तकधर्म्मत्वेन परस्परग्रहविरोधित्वादिति भावः। वि-
षयभेदमाह, 'एवञ्चेति 'न व्यक्तिभेदः' न पूर्व्वानुभूततत्सद्व्यक्तिभाव-

च्छिन्नाभेदः, 'इति स्यात्' इत्याकाराभिलापः स्यात्, 'तज्जातीय-
त्वेति। न चैवं तज्जातीयोऽयं गकारः सोऽयं गकार इत्यनुभवयोर्वै-
लक्षण्यानुभवापलापप्रसङ्गः, प्रथमे तद्व्यक्तिगत्वजात्यवच्छिन्नस्य द्वितीये
तद्व्यक्तिगत्वावच्छिन्नस्याभेदः सन्निकृष्टगकारे भासत इत्येव स्फुटतरवै-
लक्षण्यसम्भवात्। यत्तु तज्जातीयोऽयं गकार इत्यत्र गत्वजात्यव-
च्छिन्नस्य स एवायं गकार इत्यत्र गत्वावच्छिन्नस्य चाभेदो भासते
इत्येव वैलक्षण्यमिति तत्तुच्छं, तथा सत्ययं घटो घट इत्यन्वेवायं
गकारो गकार इत्यन्वयस्य उद्देश्यविधेयतावच्छेदकयोरैक्येनासम्भवा-
पत्तेरिति ध्येयं। ननु आनुपूर्वीविशेषावच्छिन्नतत्तद्वर्णस्फोटपर्यव-
सितयोः पूर्वापरगाथाव्यक्त्योरेवाभेदसम्भवात् सैवेयं गाथा इत्यत्र
शब्दनित्यतावादिनां मते तज्जातीयत्वस्यावगाहनमसिद्धमत आह,
'न चेति, नैमित्तिकस्यानुपूर्वीं सम्पादयितुमाह, 'तज्ज्ञानेति,
व्याख्याततत्त्वमेतत्। ननु सन्निकृष्टगकारस्य प्रत्यभिज्ञायाः पूर्वा-
नुभूतव्यक्त्यभेदसिद्धावुत्पत्तिमत्त्वप्रतीतावन्यदीयोत्पत्तिर्भासते इत्येव
विषयभेदः किं न स्यादित्याशङ्कते, 'न चेति, निरस्यति, 'गकार-
गतत्वेति, 'अभेद इति पूर्वानुभूतव्यक्त्यभेदस्य निश्चयदशायां तद्व्य-
क्तेरिदानीमुत्पद्यमानत्वादिधर्मस्य भ्रमासम्भवादित्यर्थः, पूर्वानुभूत-
तद्व्यक्तित्वस्याधुनातनोत्पत्त्यभावावच्छेदकतया तद्व्यक्तित्वस्यैव व्यावर्त्तक-
धर्मदर्शनविधयाऽधुनातनोत्पत्तिमत्त्वभ्रमविरोधित्वादिति भावः। ननु
तद्व्यक्तित्वावच्छेदेनाधुनातनोत्पत्त्यभावस्यानिश्चयदशायामेवाधुनायमु-
त्पन्नो गकार इति भ्रमे बाधकाभाव इत्यत आह, 'विनिगमकेति,
'उभयेति स एवायमिदानीमुत्पन्नोऽयमिति ज्ञानद्वयस्येत्यर्थः।

नाश-तारत्वादिप्रतीतीनां प्रत्यभिज्ञानबलेनौपाधिक-त्वात्। न च वर्णेषु तारत्वेनैव भासमाना ध्वनय-उपाधयः सम्भवन्ति, न तु ध्वनिषु वर्णास्तज्जनककण्ठ-ताल्वाद्यभिघाताभावादिति वाच्यं। वर्णोच्चारणदशा-यामपि गुर्जरीकादिजनकानामभावात्। तस्मात् उत्पत्ति-विनाश-तारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तुल्यत्वे द्वयोरपि नित्यत्वमनित्यत्वं वा। न चोभयोरपि

पृच्छति, 'कुतस्तहींति, 'तस्याः' प्रत्यभिज्ञायाः, 'अभेदः' पूर्व्वानु-भूतव्यक्त्यभेदः, उत्तरं, 'यत्रेति, 'क्वचित्' शुक्त्यादौ, 'सा' तद्रजतमि-तिप्रभिज्ञा, 'तदितरेति प्रत्यभिज्ञेतरस्य बाधकप्रमाणस्य बाधा नेत्यर्थः। 'न तु भ्रान्तेत्यस्य व्यक्त्यभेदानवगाहितयेत्यादिः, 'विशेषस्य' व्यक्त्यभेदस्य, 'दर्शने' विरोधिनि सतीति शेषः। ननु गत्वादिकम-खण्डोपाधिरूपमेवास्त्वित्यतः प्रतिबन्धिमाह, 'अपि चेति[१]।

'प्रत्यभिज्ञानबलेनेति सैवेयं गुर्ज्जरीत्यादिप्रत्यभिज्ञाबलेनेत्यर्थः, 'औपाधिकत्वादिति साक्षात्परम्परया वान्यनिष्ठोत्पादादिविषयक-त्वादित्यर्थः। 'उपाधयः सम्भवन्तीति वर्णनिष्ठतया प्रतीयमानस्यो-त्पादादेराश्रयाः सम्भवन्तीत्यर्थः, 'तज्जनकेति ध्वन्युत्पादद्दशायां वर्णजनककण्ठाद्यभिघाताभावादित्यर्थः। न च तदानीं वर्णानुत्पादेऽपि स्मर्य्यमाणतन्निष्ठोत्पादादिरेव साक्षात् परम्परया ध्वनौ भासत इति वाच्यम्। तदानीं वर्णाभावे तत्सान्निध्यरूपदोषविरहात् आश्रयथा-

(१) ननु गत्वाद्यविषयकेत्यादिः प्रतिबन्धिमाह अपि चेतीत्यन्तः पाठः क्वचित् टीकापुस्तके वर्त्तते, परन्त्वयमेव पाठः समीचीनत्वेन प्रतिभाति।

नित्यत्वमेव, उक्तन्यायेन प्रत्यभिज्ञायास्तज्जातीयत्व-विषयत्वात्। किञ्च यदि व्यङ्ग्यः शब्दः स्यात् तदा वाय्वालोकाभावे घटस्येव व्यञ्जकाभावे शब्दस्यानुपलम्भात् तत्संशयः स्यात्, न त्विदेदानीं शब्दो नास्तीति

सन्निकर्षरूपपरम्परासम्बन्धविरहाच्च साक्षात् परम्परया वा न भानसम्भव-इत्यभिप्रायात्। 'वर्णोच्चारणेति, तथाच वर्णोच्चारणदशायामपि न ध्वनेरुत्पादनियम इति भावः। इदन्तु समाधिसौकर्य्यादुक्तं। वस्तु-तस्तु वर्णानुत्पादेऽपि वायुनिष्ठोत्पादादेस्तन्निष्ठतारत्वादिवैलक्षण्यस्य च ध्वनिनिष्ठोत्पाद-विनाश-तारत्वादिप्रतीतीनां साक्षात् परम्परया वा विषयत्वसम्भवादित्यपि बोध्यं। 'उभयोः' ध्वनि-वर्णयोः, 'उक्त-न्यायेनेति ध्वनौ साक्षात्सम्बन्धेनोत्पादादिप्रत्ययस्य भ्रमत्वप्रसङ्गेनेत्यर्थः, 'प्रत्यभिज्ञायाः' सैवेयं गुर्जरीत्यादिप्रत्यभिज्ञायाः, 'तज्जातीयत्वविष-यत्वादिति तज्जातीयत्वादिविषयकत्वस्यैव त्वयानुमतत्वादित्यर्थः, 'तज्जातीयत्वादिपदात् गुर्जरीत्वाद्यवच्छिन्नप्रतियोगिताकतत्तद्व्यक्ति-भेदपरिग्रहः। ननु लाघवाद्ध्वनेरपि नित्यत्वाभ्युपगमे साक्षात्सम्बन्धेनो-त्पादादिप्रत्ययस्य भ्रमत्वमेवोपेयत इत्यरुचेराह, 'किञ्चेति, 'वाय्वा-लोकाभाव इति वाय्वालोकस्य घटादिव्यञ्जकस्याभाव इत्यर्थः, 'व्यञ्जकाभाव इति विलक्षणवायुसंयोगरूपव्यञ्जकस्याभाव इत्यर्थः, 'तत्संशयः स्यादिति शब्दसंशयः स्यादित्यर्थः, 'निश्चयः' शाब्दत्वविशिष्टविषयकः, प्रतियोगि-सत्त्वसन्निकर्षादीतरसकलप्रतियोग्युपलम्भकसहकृततानुपलब्धेरभावग्राहिकाया अभावादिति भावः। इदमप्यापाततः

निश्चयः तस्माद्वर्णो न नित्योऽनित्यो वा सत्ये

शब्दाभावप्रत्यक्षस्थले प्रतियोगिसन्निकर्षादिमध्ये व्यञ्जकवायुसंयोगस्यापि प्रवेशेन तादृशानुपलब्धिसत्त्वात्[१] अभावभेदेन योग्यानुपलब्धिभेदात् शाब्दैक्यस्यानुपादेयत्वात्। वस्तुतस्तु घटादिप्रतिबन्धिरेव शब्दानित्यत्वे मानं तथाप्येकजातीयानां सर्व्वेषां घटानामेकत्वस्य नित्यत्वस्य च लाघवेनौचित्यात् अवयवसंयोगादीनां व्यञ्जकतयैवोपलम्भकादाचित्कत्वनिर्व्वाहात् उत्पादादिप्रत्ययस्यान्योत्पादादिमादायैव सम्भवात्। ननु तन्नाशत्वेन तत्समवेतनाशत्वेन च नाश्य-नाशकभावात् कपालनाशे घटनाशस्य दुर्व्वारतया घटस्य नित्यत्वासम्भवः। न च आत्मादिनाशवारणाय स्वप्रतियोगिजन्यत्वस्य नाशकतावच्छेदकसम्बन्धतया घटादेर्नित्यत्वेन प्रतियोगिजन्यत्वविरहादेव न नाश इति वाच्यम्। लाघवात् स्वप्रतियोगिसमवेतत्वस्यैव नाशकतावच्छेदकसम्बन्धत्वादनन्तघटादिकल्पनायाः फलमुखत्वात् सत्त्वेन ध्वंसत्वेन नाश्य-नाशकभावान्तरादेव आत्मादेरनाश्यत्वोपपत्तेः अनन्तप्रतियोगिजन्यत्वस्य नाशकतावच्छेदकसम्बन्धत्वकल्पनामपेक्ष्यातिरिक्तनाश्य-नाशकभावकल्पनाया लघुत्वादिति चेत्, न, तुल्ययुक्त्या कपाल-कपालिकादेरपि नित्यत्वस्य सुवचत्वात् तन्नाशेन घटादिनाशस्य दुर्व्वचत्वात्। किञ्चैवं सुखादिप्रतिबन्धिरपि तत्र मानं तत्रापि पूर्व्ववर्षानुभूतमेव सुखमस्मिन्नपि वर्षेऽनुभूयत इति प्रत्यभिज्ञासत्त्वादित्यास्तां विस्तरः। 'न नित्य इति न ध्वंसाप्रतियोगीत्यर्थः,

---

(१) तादृशानुपलब्धिसम्भवादिति ख०।

सत्युत्पत्तिमत्त्वात्, अस्मदादिवहिरिन्द्रियग्राह्यत्वे सति जातिमत्त्वात्, अस्मदादिप्रत्यक्षगुणत्वाद्वा, आत्मैकत्वप्रत्यक्षत्वपक्षे प्रत्यक्षविशेषगुणत्वात्, व्यापकसमवेत-

---

लाघवादाह, 'अनित्य इति ध्वंसप्रतियोगीत्यर्थः, 'सत्त्वे सतीति, सम्मतेनायं हेतुः, 'अस्मदादीति, नित्यगुणादौ व्यभिचारवारणाय प्रत्यक्षं मानसेतरलौकिकप्रत्यक्षविषयत्वार्थकं, आत्मनि व्यभिचारवारणाय मानसेतरेति, आद्यान्यभिन्नशब्दस्य पक्षत्वात् पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वाद्वा न भागासिद्धिदोषाय, सामान्यादौ व्यभिचारवारणाय 'जातिमत्त्वादिति, जातिपदं समवेतमात्रपरमिति भावः। लाघवादाह, 'अस्मदादीति लौकिकप्रत्यक्षविषयगुणत्वादित्यर्थः, आत्मनि जात्यादौ व्यभिचारवारणाय 'गुणेति, नित्यगुणे च व्यभिचारवारणाय विषयान्तं। नन्वात्मैकत्व-परिमाणयोर्व्यभिचार इत्यत आह, 'आत्मैकत्वेति, तत्परिमाणमपि बोध्यं, 'विशेषगुणत्वादिति, लौकिकप्रत्यक्षविषयेत्यत्रापि सम्बध्यते, 'व्यापकसमवेतेति विभुसमवेतेत्यर्थः। यद्यप्यत्र व्यापकसमवेतेति व्यर्थं, तथापि व्यापकसमवेतविशेषगुणत्वात् प्रत्यक्षविशेषगुणत्वादिति हेतुद्वये तात्पर्य्यं, प्रथमे व्यापकत्वं द्रव्यत्वव्याप्यजातिरहितत्वं, तेन भगवज्ज्ञानादौ न व्यभिचारः। न च द्वितीयहेतोः पूर्व्वाद्भेदः, अत्र विशेषपदस्य संख्या-परिमाणान्यपरत्वात् आत्मसमवेतान्यपरत्वाद्वा, तत्र विशेषगुणपदस्य परिभाषिकतत्परत्वात् अतएव गौरवात्तत्परित्यागेनान्यस्योपादानं। यद्वा विशेषपदं

प्रत्यक्षविशेषगुणत्वात्, अनात्मप्रत्यक्षगुणत्वात्, अव्याप्यवृत्तित्वात्, ईश्वरज्ञानञ्च न तथा, तत्प्रयोजककारणाभावात्, वहिरिन्द्रियव्यवस्थाहेतुगुणत्वात्, भूतप्रत्यक्ष-

---

प्रत्यक्षान्वितं तथाच प्रत्यक्षविशेषगुण इति षष्ठीसमासात् प्रत्यक्षविशेषविषयगुणत्वादित्यर्थः फलितः, प्रत्यक्षस्य विशेषोमानसेतरलौकिकत्वरूप इति । न च तन्मये नीलादेरेकैकतया नित्यतया च घटादिरूपे व्यभिचार इति वाच्यं। तस्यापि पक्षसमत्वादिति(१) न काप्यनुपपत्तिः । एक एव हेतुः परन्तु तन्मते रूपादेरेकैकतया नित्यतया च तत्र व्यभिचारवारणाय समवेतान्तं, प्रत्यक्षपदञ्चास्मन्मये भगवज्ज्ञानादौ व्यभिचारवारणायेत्यपि द्रष्टव्यं इति ऋजवः । 'अनात्मप्रत्यक्षगुणत्वादिति प्रत्यक्षत्वे सत्यात्मान्यगुणत्वादित्यर्थः, आत्मैकत्वादौ व्यभिचारवारणायात्मान्येति, 'प्रत्यक्षपदानन्तरं 'विशेषेतिपाठे प्रत्यक्षविशेषोलौकिकप्रत्यक्ष इत्यर्थः, 'अव्याप्यवृत्तित्वादिति समवायसम्बन्धेनावच्छिन्नवृत्तिकत्वादित्यर्थः, संयोगात्यन्ताभावादौ नित्यरूपादेरपि कालेऽवच्छिन्नवृत्तिकत्वात् नित्यरूपादौ व्यभिचारवारणाय समवायसम्बन्धेनेति । 'न तथा' नाव्याप्यवृत्ति, 'तत्प्रयोजकेति अव्याप्यवृत्तितासाधकेत्यर्थः, 'कारणाभावात्' प्रमाणाभावात्, परेषां ज्ञानस्याव्याप्यवृत्तित्वे विवादात् । हेत्वन्तरमाह, 'वहिरिति वहिरिन्द्रियग्राह्यगुणत्वादित्यर्थः, 'भूतप्रत्यक्षगुणत्वादिति प्रत्यक्षत्वे सति भूतगुणत्वादित्यर्थः, आत्मैकत्व-परिमाणयोर्व्यभिचारवारणाय 'भूतेति,

---

(१) तथाच पक्षे पक्षसमे व्यभिचारो न दोषायेति भावः ।

वेतत्वं उपाधिः, सर्व्वत्र वर्णात्मकशब्दपक्षीकारणे व्योमगुणेष्वनित्येषु ध्वनिषु साध्याव्यापकत्वात्स्पर्शवत्-पदस्य पक्षमात्रव्यावर्त्तकत्वेन पक्षेतरत्वाच्चेति। यदा च वर्णा एव न नित्यास्तदा कैव कथा पुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमुहरूपाणां पदानां, कुतस्तराञ्च तत्समूहरूपस्य वाक्यस्य कुतस्तमाञ्च तत्समूहस्य वेदस्येति।

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे शब्दानित्यतावादसिद्धान्तः॥

वेतत्वमिति, साधनव्यापकतापरिहाराय 'स्पर्शवदिति, 'सर्व्वत्रेति सर्व्वत्र साध्ये इत्यर्थः, 'वर्णात्मकेति, तथा च ध्वनेः पक्षवहिर्भूतत्वात्तत्र साध्याव्यापकत्वमिति भावः। ध्वनेरपि नित्यत्वमते वायवीयत्वमते च तत्र साध्याव्यापकत्वासम्भवादाह, 'स्पर्शवदिति, 'पक्षमात्रव्यावर्त्त-कत्वेनेति उक्तसाधनवतो मध्ये पक्षमात्रस्यैव व्यावर्त्तकत्वेनेत्यर्थः, यथाश्रुते अणुपरिमाणादेरपि व्यावर्त्तनादसङ्गतेः, 'पक्षेतरत्वादिति पक्षेतरत्वतुल्यत्वादित्यर्थः। ननु मास्तु वर्णो नित्यस्तथापि पद-वाक्यभेदास्तु नित्या एवेत्यत आह, 'यदा चेति, 'तत्समूहरूपस्य' पदसमूहरूपस्य, 'तत्समूहस्य' वाक्यसमूहस्य॥

इति श्रीमथुरानाथ-तर्कवागीशविरचिते तत्त्वचिन्तामणिरहस्ये शब्दाख्यतुरीयखण्डरहस्ये शब्दानित्यतावादसिद्धान्तरहस्यं॥

अथोच्छन्नप्रच्छन्नवादः।

तथापि परतन्त्रपुरुषपरम्पराधीनतया प्रवाहावि-

अथोच्छन्नप्रच्छन्नवादरहस्यं।

ननु तथाप्यप्रयोजकं स्वतन्त्रपुरुषप्रणीतत्वरूपपौरुषेयत्वाभावे वेदस्य ध्वंसाप्रतियोगित्वरूपनित्यत्वाभावेऽपि प्रवाहाविच्छेदरूपनित्यत्वादेव प्रामाण्योपपत्त्या प्रामाण्यान्यथानुपपत्तिरूपानुकूलतर्कविरहादित्यभिप्रायेण गुरुः शङ्कते, 'तथापीति वेदस्य ध्वंसाप्रतियोगित्वरूपनित्यत्वाभावेऽपीत्यर्थः, 'परतन्त्रेति स्वाश्रयोच्चारणानपेक्षोच्चारणकवृत्त्यानुपूर्व्वीभिन्नानुपूर्व्वीकतयेत्यर्थः, स्वपदं भेदप्रतियोग्यानुपूर्व्वीपरं। वस्तुतस्तु स्वाश्रयेतिस्थाने स्वसजातीयाश्रयेति वक्तव्यं तेन परनये वर्णानामनित्यत्वाभ्युपगमे वर्णानामिव तत्समवेतानुपूर्व्व्या अपि नाशात् वाक्यभेदेनानुपूर्व्वीभेदस्यावश्यकत्वेऽपि न क्षतिः इत्यस्य स्वनये प्रवाहाविच्छेदहेतुत्वं तेन न्यायनये तादृशानुपूर्व्वीभिन्नानुपूर्व्वीप्रसिद्धावपि न क्षतिः।

केचित्तु 'परतन्त्रेत्यादेः स्वसजातीयोच्चारणानपेक्षोच्चारणकान्यतयेत्यर्थः, स्वपदं भेदप्रतियोगिवाक्यपरं, इदञ्च न्यायनये घटादावेव

च्छेदमेव नित्यत्वं ब्रूमः इति चेत्, न, स्मृत्याचारानुमितानां शाखानामुच्छेददर्शनात्। स्यादेतत्, विवादपद-

---

प्रसिद्धमित्याहुः। तदसत्, पृथुकस्यापूर्वानुपूर्व्वीकवाक्यं श्रुत्वोच्चरिते तादृशानुपूर्व्वीकवाक्ये प्रवाहाविच्छेदव्यभिचारित्वादिति ध्येयं।

'प्रवाहाविच्छेदमेवेति, स्वसजातीयानधिकरणकालकान्यत्वं 'प्रवाहाविच्छेदः', स्वसजातीयत्वञ्च स्ववृत्तितत्तदानुपूर्व्याश्रयत्वं स्ववृत्त्यानुपूर्व्वीसजातीयानुपूर्व्व्याश्रयत्वं वा, तेन परमते वर्णानामनित्यत्वाभ्युपगमे वाक्यभेदानुपूर्व्वीभेदस्यावश्यकत्वेऽपि न क्षतिः, साजात्ये च तत्तदानुपूर्व्वीवृत्तिवैलक्षण्येन भेदकूटप्रवेशाच्च न प्रवाहाविच्छेदाननुगम इति भावः। 'शाखानामिति अष्टकाभङ्गलादिकर्त्तव्यताबोधकानामित्यर्थः, 'उच्छेददर्शनात्' सजातीयानधिकरणे तत्तत्कालेऽदर्शनात्, तथाच प्रवाहाविच्छेदोऽसिद्ध इति भावः। प्रत्यक्षसिद्धवेदजातीया अनित्या एव स्मृत्याचारानुमितवेदास्तु यावत्कालमनधीता अश्रुतानुमितस्वभावा नित्या एव नावच्छिन्ना इति मत्यन्तरमाशङ्कते, 'स्यादेतदिति. अत्र वेदत्वं अध्ययनविषयत्वव्याप्यं न वा. प्रत्यक्षविषयत्वव्याप्यं न वा, अनित्यत्वव्याप्यं न वेत्यादिविप्रतिपत्तिर्विधिकोटिर्नैयायिकानां निषेधकोटिर्मङ्गल-होलाकाद्याद्याचारानुमितवेदानां अष्टकादिबोधकस्मृत्यनुमितवेदानाञ्च अतीन्द्रियत्व-नित्यत्वस्वीकर्तॄणां गुरूणां, 'विवादपदमित्यादि प्रत्यक्षवेदमूलकस्मृतावंशतः सिद्धसाधनवारणाय, 'विवादपदमिति उच्छन्नमूलता विवादपदविषय इत्यर्थः, इदानीन्तनप्रत्यक्षविषयवेदप्रमाणविषयकेतरेति या-

अपूर्व्वबोधिका स्मृतिः स्मृत्यर्थानुभवजनकवेदमूला अविगीत-महाजनपरिगृहीतस्मृतित्वात् प्रत्यक्षवेद-

---

वत्, नातः प्रत्यक्षवेदमूलकेऽपि कदाचिद्विवादसम्भवात् स दोषस्तदवस्थः, लोभादिमूलकस्मृतिवारणाय 'अपूर्वबोधिकेति, 'अपूर्वबोधकत्वं' वेदलक्षणीयमत्यन्तदलं विवक्षितं, वेदप्रमाणार्थकत्वं वा, अतो न न्यायनयेऽसिद्धिः तन्मते स्मृतेरपूर्वबोधकत्वाभावात्। अस्मन्मते आद्यवेदे तन्मते नित्यानुमेयवेदे अंशतो बाधवारणाय 'स्मृतीति, स्मृतिर्वेदेतरवाक्यं। न च पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेन अंशतः सिद्धसाधनस्यादोषत्वाद्विवादपदत्वविशेषणवैयर्थ्यं तदवच्छेदेन साध्यसिद्धेरुद्देश्यत्वाभावे अंशतो बाधस्यादोषत्वादपूर्वबोधकत्वविशेषणवैयर्थ्यमिति वाच्यं। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वेऽपि अंशतः सिद्धसाधनं दोषायेति प्राचीननये 'विवादपदत्वविशेषणोपादानात्। वस्तुतस्तु 'विवादपदेत्यादि स्वरूपकथनमात्रं। पक्षता तु अष्टकाः कार्य्या इत्यादि विशिष्यैव। 'स्मृत्यर्थेति, भिन्नविषयवेदेन मार्थान्तरं युक्तं इति स्मृत्यर्थानुभवजनकेति वेदविशेषणं। न च नैयायिकैरप्यष्टकादिबोधकस्मृतिमूलभूतवेदाभ्युपगमात् सिद्धसाधनमिति वाच्यं। न हि वेदस्यानुभवविरोधः। न च कथमस्मादुच्छेदसिद्धिः स्मृत्युपपत्त्यनन्तरं वेदाद्युच्छेदेऽपि तत्साधनसम्भवात् इति वाच्यं। अस्मन्मये पक्षस्य समवायेन सत्त्वादिति ध्येयं। 'अविगीतेति, स्मृतित्वमात्रं लोभादिमूलकघटमानयेत्यादिवाक्यस्य व्यभिचारि तस्यापि वेदभिन्नवाक्यत्वरूपस्मृतित्वादतः 'अनिर्णीतेति, 'अविगी-

त्वं' अलौकिकत्वं, प्रत्यक्षादिमूलकेतरत्वमिति यावत्, प्रत्यक्षोपजीविप्रमाणमूलकभ्रान्तवाक्ये व्यभिचारवारणाय 'महाजनपरिगृहीतेति, 'महाजनत्वं' प्रमात्मकप्रवर्त्तकज्ञानवत्त्वं, 'परिगृहीतत्वं' तज्ज्ञाप्यमानार्थकत्वं। न चैवं मन्त्रपक्षकानुमानवत् समाधेयं। प्रत्यक्षवादिप्राभाकरमते आयुर्वेदस्य तन्मते तु नित्यानुमेयवेदस्य सिद्धत्वेन च तत्र व्यभिचारवारणाय 'स्मृतित्वादिति वेदभिन्नवाक्यत्वादित्यर्थः। ननु वेदमूलकत्वं वेदजन्यत्वं तथाच बाधः स्मृतिं प्रति वेदार्थज्ञानस्यैव हेतुत्वात् प्रत्यक्षवेदमूलकस्मृतावपि तदभावेन दृष्टान्तासिद्धिरित्यत आह, 'वेदेति,[१] 'जन्यत्वं' प्रयोज्यत्वं, अन्यथा स्मृतितः अर्थं

---

(१) 'तथापीति, न चैवं स्वतः प्रमाण्यपुरुषाविश्रामादन्धपरम्परापत्तिः, तेषामुपदेष्टॄन् वेदार्थदर्शितया स्वतः प्रामाण्यात् तथाच तदधीनमेव प्रामाण्यमस्तु किमीश्वरेणेति भावः। केचित्तु प्रवाहाविच्छिन्नत्वरूपं यन्नित्यत्वं तेन यन्निर्दोषत्वं तत एव प्रामाण्यमस्त्वित्यर्थः इत्याहुः। 'उच्छेदेति, तथाच प्रवाहाविच्छेदोऽसिद्ध इति भावः। स्मृत्याचारानुमितशाखानां स्वत एव प्रच्छिन्नवेदात् तदर्थज्ञापकत्वेनानुमितात् स्मृत्याद्युपपत्तिरित्याह, 'स्यादेतदिति, तत्र वेदत्वं अध्ययनविषयत्वव्याप्यं न वेति विप्रतिपत्तिः। प्रत्यक्षवेदमूलकस्मृतावंशतः सिद्धसाधनमित्यत आह, 'विवादेति, उच्छिन्नमूलत्वविवादेत्यर्थः, प्रत्यक्षवेदमूलान्येत्यत्र तात्पर्य्यम्। न्यायादिमूलकस्मृतावंशतो बाधादाह, 'अपूर्व्वबोधिकेति, अपूर्व्वप्रमापिकेत्यर्थः, वेदसमानार्थेत्यत्र तात्पर्य्यं, अपूर्व्वस्यैव वेदार्थत्वात् वेदस्यापि पक्षत्वेऽंशतो बाधादाह, 'स्मृतिरिति, साध्यप्रसिद्ध्यर्थं 'जनकेत्यन्तं, अन्यथा तस्यानुभावकत्वानुपपत्तेः। यत्तु उच्छिन्नवेदमूलत्वेनार्थान्तरादाह, 'जनकेत्यन्तं, उच्छिन्नस्यासत्त्वान्न जनकत्वं इति, तन्न, वेदमूलत्वपदेनैव तन्निराकरणात्, उच्छिन्नवेदस्यापि पूर्व्वं स्मृत्यर्थानुभव-

मूलकस्मृतिवत्, वेदमूलकत्वञ्च वेदजन्यानुभवजन्यत्वं ज्ञानद्वारा ज्ञायमानस्यैव वेदस्य स्मृतिहेतुतयानुमानं,

---

प्रतीत्य स्मृतौ व्यभिचारापत्तेः, तथाच वेदमूलत्वं वेदप्रयोज्यत्वं इति भावः। अस्तु वा जनकत्वमेव मूलत्वमित्यत आह, 'ज्ञानेति स्वजन्यानुभवेत्यर्थः, कारणे वा वाच्यः। ननु ज्ञानव्यवहितस्य कारणत्वं

जनकत्वाच्च। 'अविगीतेति, लोभमूलकस्मृतेर्विगीतत्वान्न्यायमूलकस्मृतेर्महाजनापरिगृहीतत्वाद्वेदस्यास्मृतित्वात् त्रितयमुपात्तं। महाजनस्यादृष्टार्थिपुरुष इत्यवधेयमित्याहुः। तच्चिन्त्यं, एवं हि महाजनपदेनैव लोभमूलकस्मृतिवारणे 'अविगीतपदवैयर्थ्यापत्तेः, न हि लोभमूलकस्मृतिरपि अदृष्टार्थिपुरुषपरिगृहीता, किन्तु लोभार्थिपरिगृहीतैव, भ्रमादिना तथा परिग्रहे न्यायमूलकस्मृतावपि तथा सम्भवे व्यभिचारतादवस्थ्यापत्तेः। अन्ये तु स्मृतित्वं शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकभिन्नत्वे सति शब्दजन्यवाक्यार्थज्ञानजन्यवाक्यत्वं, तेन लौकिकवाक्ये न्यायादिमूलकस्मृतौ वेदे च न व्यभिचारः, एवञ्च चैत्यं वन्देतेत्यादिबौद्धागममूलस्मृतौ व्यभिचारादाह, 'महाजनेति, श्येनेनाभिचरन् यजेतेत्यादिवेदमूलकस्मृतौ व्यभिचारः साध्ये वेदपदस्य विधिपरत्वेन तत्र साध्याभावादित्यत आह, 'अविगीतेति, विधित्वञ्च निषिद्धफलकादृष्टापादकत्वेदत्वमतो न कलञ्जं भक्षयेदित्यादिवेदमूलकस्मृतौ न व्यभिचार इति वदन्ति। केचित्तु अलौकिकाविगीतस्मृतित्वादिति हेत्वर्थः, न्यायप्रत्यक्षमूले तु लौकिक्यौ, यूपच्छित्तिस्मृतिर्विगीतेति, स्मृतित्वञ्च ऋषिप्रणीतशब्दत्वं, तेन वेदस्यास्मृतित्वं, पाणिनि-मन्वादिकन्तु स्मृतिरेवेत्याहुः। ननु वेदमूलत्वं वेदपरम्पराकारणतयापि निर्व्वहतीति उच्छिन्नवेदमूलत्वमर्थान्तरमत आह, 'वेदेति व्याख्यान्तरं।

कुविन्दस्येव ज्ञानादिव्यवहितस्य पटे, न तु कारणकारणता, वेदे सत्येव तत्प्रतिसन्धाने स्मृतिप्रणयनात्, वेदार्थस्मृतिता च प्रसिद्धिसिद्धा, स्मृत्यर्थश्च स्मृतित एव उपस्थितः। न च स्मृत्यर्थबोधकवेदानुमाने स्मृत्यर्थ-

---

न क्वापि दृष्टमित्यत आह, 'कुविन्दस्येवेति, 'आदिना चिकीर्षापरिग्रहः। पूर्वमतं व्यवच्छिनत्ति, 'न तु कारण-कारणतेति, वेदमूलत्वमिति शेषः। नन्वेवं स्मृतितोऽर्थं प्रतीत्य विरचितेदानीन्तनस्मृतौ व्यभिचार इत्यत आह, 'वेदे सत्येवेति, 'एवकारः 'तत्प्रतिसन्धाने' इत्यनन्तरं योज्यः, वेदसत्त्वे तत्प्रतिसन्धान एव स्मृतिप्रणयनादित्यर्थः, तथाच तादृशस्मृतेरेवासिद्धत्वेन न व्यभिचार इति भावः। इदमापाततः वेदजन्यवाक्यार्थानुभवं विनापि स्मृतितोऽर्थं प्रतीत्य स्मृतिप्रणयनस्यानुभविकत्वात्। अप्रयोजकत्वनिरासायाह, 'वेदार्थेति वेदसमानार्थस्मृतिता महाजनप्रसिद्धिसिद्धेत्यर्थः, तथाच यदीयं वेदजन्यानुभवजन्या न स्यात् तदा महाजनानां वेदसमानार्थकप्रसिद्धिसिद्धा न स्यात् इत्येवानुकूलतर्क इति भावः।

केचित्तु दृष्टान्ते साध्यवैकल्यपरिहारायाह, 'वेदार्थेति वेदमूलस्मृतिता चेत्यर्थः, दृष्टान्ते इति शेष इत्याहुः।

ननु स्मृत्यर्थस्य प्रागज्ञानात् तदर्थानुभावकत्वेन वेदस्यानुमानासम्भवात् कथं तेन रूपेणानुमितवेदात् सर्वत्र वाक्यार्थधीरित्यत आह, 'स्मृत्यर्थश्चेति। 'स्मृत्यर्थबोधकेति स्मृत्यर्थबोधकत्वेन वेदानु-

रूपवेदार्थस्य विषयत्वात् वेदोऽनुवादकः ज्ञानान्तरोपनीतस्य विशेषणत्वेन विशिष्टबुद्धिसम्भवात्, पाककृतौ मानसप्रत्यक्षायां पाकस्य संज्ञासंज्ञिज्ञाने संज्ञाया-

---

मान इत्यर्थः, 'अनुवादकइति, सर्वत्रानेन प्रकारेणानुमितवेदार्थप्रत्यय इत्यग्रे वक्ष्यमाणत्वादिति भावः। 'ज्ञानान्तरेति विशिष्याग्टहीतासंसर्गकस्य स्वाव्यवहितपूर्ववर्त्तिज्ञानान्तरोपनीतस्यैव विशेषणत्वेनेत्यर्थः, अनुमितेः स्वत्यर्थाविषयकत्वेऽपीति शेषः, 'विशिष्टबुद्धिसम्भवात्' तद्विशिष्टबुद्धिसम्भवात्, तद्विशेष्यकबुद्धेरेव तद्विशिष्टबुद्धित्वात्, अत एव विशेषणज्ञानानन्तरं तदग्टहीतासंसर्गकविशेष्यज्ञानं विशेषणाविषयकमपि विशिष्टबुद्धिः तथाचानुमितेः स्वत्यर्थविषयकत्वाभावान्नानुवादकत्वमिति भावः। न च तथापि तदेव ज्ञानान्तरमादायानुवादकत्वमिति वाच्यं। न हि यदा कदाचित् प्रतीतप्रत्यायकतामात्रेणानुवादकत्वं, तथा सति सर्वस्यैवानुवादकतापत्तेः, अपि तु समानकालीनानुभवान्तरविषयविषयकप्रतीतिजनकत्वं तत्, ज्ञानान्तरं वेदजन्यानुभवसमयवर्त्ति तत्समय एव तज्ज्ञानात्, 'विशिष्टबुद्धिविषयत्वासम्भवादिति क्वाचित्कः पाठस्तु प्रामादिकः। तदविषयत्वेऽपि तद्विशिष्टबुद्धित्वमित्यत्र तस्मात्तेनैव दृष्टान्तमाह, 'पाककृताविति, षष्ठ्यर्थे सप्तमी, 'मानसप्रत्यक्षायां' मानससाक्षात्कारे, 'पाकस्येति, अग्रिम इवशब्दोऽत्र सञ्ज्ञाया इत्यत्र च सम्बध्यते, पाककृतेर्मानसप्रत्यक्षे यथा पाकस्य विशिष्टबुद्धित्वमित्यर्थः, तत्रापि हि पाको न विषयः वह्निविषयकलौकिकप्रत्यक्षजनने मनसो

ज्ञानायथार्थत्वे तदनुव्यवसाये भ्रमविषयस्यैव, अन्यथा भ्रान्त-भ्रान्तिसङ्करापत्तिः न तु शब्दार्थोऽनुमानस्य विषयः तस्यासिद्धत्वेनाजनकतया स्मृत्यव्यापकत्वात्।

असामर्थ्यात् अलौकिकप्रत्यासत्तेर्गुरुभिरनङ्गीकारादिति भावः। न च पाककृतेर्मानसप्रत्यक्षं कथं पाकविशिष्टबुद्धिः तद्विशेषणकबुद्धेरेव तद्विशिष्टबुद्धित्वात् पाककृतेर्मानसप्रत्यक्षे पाको न विशेषणं स्वाव्यवहितपूर्ववर्त्तिज्ञानविषयस्यैव तन्मते विशेषणत्वात् पाकज्ञानस्य च पाककृतिकाले एव नाशादिति वाच्यं। कृत्यनन्तरं स्मृतिरूपपाकज्ञानसत्त्वात् कथमन्यथा नैयायिकनयेऽपि तत्र पाकभानं ज्ञानलक्षणप्रत्यासत्तेरभावात्। 'सञ्ज्ञेति नामविशिष्टनामिप्रत्यक्षे यथा नामविशिष्टबुद्धित्वमित्यर्थः, तत्रापि हि सञ्ज्ञा न नामिप्रत्यक्षविषयः सञ्ज्ञायाः शब्दरूपत्वेन चक्षुरादेरयोग्यत्वात् अलौकिकप्रत्यासत्तेर्गुरुभिरनङ्गीकारादिति भावः। 'ज्ञानायथार्थत्व इति ज्ञानायथार्थत्वमते, 'तदनुव्यवसाये' भ्रमानुव्यवसाये, 'भ्रमविषयस्यैवेति भ्रमविषयस्य रजतत्वादेर्यथा विशिष्टबुद्धित्वमित्यर्थः, ज्ञानायथार्थत्वे इत्यत्राह, 'अन्यथेति, 'अन्यथा' भ्रमानुव्यवसायेऽपि भ्रमविषयस्य रजतत्वादेरिदमंशे विशेषणतया भाने, 'सङ्करः' अभेदः भ्रमत्वेनेत्यर्थः, स्मृत्यर्थस्यानुमितिविषयत्वे बाधकमाह, 'न त्विति, 'तस्य' वेदार्थस्य, 'असिद्धत्वेनेति स्मृत्युत्पत्तिपूर्वमसत्त्वेन मानाभावेन चेत्यर्थः, 'अजनकतया' स्मृत्यजनकतया, 'स्मृत्यव्यापकत्वात्' स्मृत्यननुमेयत्वात्, कार्य्येण कारणानुमाने विधेयकोटौ कारणस्यैव विषयत्वमिति तत्सिद्धान्तात्,

स च वेदो नित्यमनुमेय एवानुमितादेवार्थमवधार्य स्मृतिप्रणयनसम्भवात्। नन्वासंसारमपठितस्य न वे-

---

अतएव गुरुनये कार्य्येण कारणानुमाने व्यापकतावच्छेदकमपि न भासते किन्तु व्यापकमात्रं तेन विनापि उक्तक्रमेण विशिष्टबुद्धेः सम्भवादिति भावः।

नव्यास्तु कार्य्येण कारणानुमाने विधेयकोटौ विधेयांशे साक्षाद्विशेषणत्वेनाकारणीभूतस्य न भानमित्येव तत्सिद्धान्तः, अतएव व्यापकतावच्छेदकस्य वह्नित्वादेरकारणत्वेऽपि न भानानुपपत्तिरिति प्राहुः।

नन्वेतावताष्टकाबोधकस्मृतिमूलभूतवेदसिद्धावपि तस्य कथमुच्छेदाभावसिद्धिः कथं वा तस्यानुच्छन्नत्वे इदानीं न प्रत्यक्षमित्यत आह, 'स च वेद इति, साध्यतारिति शेषः, 'नित्यमनुमेय एवेति नित्यमेवानुमेय एवेति योजना, 'नित्यमेवेत्यस्य सर्वकालमेवेत्यर्थः, क्रोशं कुटिला नदीत्यादिवत् व्याप्यकर्मणि द्वितीया, 'अनुमेय एवेत्येवकारेण ऐन्द्रियकत्वव्यवच्छेदः, तथाच साध्यतर्कसहकारादुक्तानुमानादेव तदुच्छेदाभावसिद्धिरतीन्द्रियत्वोपगमेन न प्रत्यक्षमिति भावः। ननु तस्यातीन्द्रियत्वे कथं ततोऽर्थं प्रतीत्य स्मृतिप्रणयनमित्यत आह, 'अनुमितादिति, स्मृतिधाराया अनादित्वेन स्मृत्यादिस्मृतेः पूर्वमपि स्मृत्यन्तरस्य सत्त्वेन प्रणयनसम्भवादिति भावः। न च स वेदो न पञ्चाशद्वर्णान्तर्गतः प्रत्येकं तेषामनित्यत्वसाधनेन नित्यत्वबाधात्तदतिरिक्तस्याभावादिति वाच्यं। तावद्वर्णान्तर्गत एव

इत्थं उत्पत्तितोऽभिव्यक्तितो मौलिस्थीकवदभिप्रायतो
वानुपूर्व्वीहीनवर्णमात्रस्य निरर्थकत्वात्। ज्ञानजनक-
समभिव्याहारस्यानेकत्वे विशेषानुमानाच्चेति चेत्।
न। स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य वेदस्य स्मृत्यर्थानुभा-

नित्योऽतीन्द्रियः कदापि केनाप्यनुच्चार्य्यमाणो यः कश्चिद्वर्ण एव त-
द्वित्यभ्युपगमात् श्रूयमाणवर्णैरेव वा नित्यत्वस्य प्रत्यक्षबाधितत्वात्।
वस्तुतस्तु तावद्वर्णातिरिक्त एव सः। न च तदतिरिक्तवर्णस्याभाव-
इति वाच्यं। एतदनुमानादेव तस्य सिद्धिरिति तन्मतनिष्कर्षः।
'उत्पत्तित इति उत्पत्तिघटितानुपूर्व्वीहीनस्येत्यर्थः, सा च एक-
वर्णोत्पत्त्यनन्तरमपरवर्णोत्पत्तिः, इदञ्च न्यायनये, 'अभिव्यक्तित इति
अभिव्यक्तिघटितेत्यर्थः, सा च एकवर्णज्ञानानन्तरमपरवर्णज्ञानं, इदञ्च
गुरुनये, 'अभिप्रायत इति अभिप्रायघटितेत्यर्थः, सा च एकपदोप-
स्थितेरनन्तरमपरपदोपस्थितौ तात्पर्य्यं, इदञ्च उभयमते, 'निरर्थक-
त्वात्' अन्वयबोधाजनकत्वात्। ननु आनुपूर्व्वीविशेषविशिष्ट एवा-
नुमेय इत्यत आह, 'ज्ञानजनकेति, 'अनेकत्व इति अष्टकाः कार्य्याः
कार्य्या अष्टका इत्याद्यनेकविधत्वसम्भवेन विशेषरूपेणानुमानासम्भ-
वादित्यर्थः, विशेषरूपेण व्याप्तिज्ञानाभावादिति भावः। 'स्मृत्यर्थेति,
अत्र स्मृत्यर्थत्वरूपेण स्मृत्यर्थज्ञापकत्वज्ञानं न कारणं किन्तु विशिष्य
तत्तदर्थज्ञापकत्वज्ञानं तत्तदर्थज्ञाध्यनुबुद्धेः हेतुः, अन्वयबोधप्रकारस्य
प्रत्येकतत्तदर्थज्ञापकत्वप्रकारकतज्ज्ञानात् प्रत्येकतत्तदर्थोपस्थितिः तद-
नन्तरं झटिति-वर्त्तमानत्वयोरेव एकपदोपस्थाप्यानामपि परस्परान्वय-

पकत्वात् । न हि शाब्दबोधे नियतपदानुपूर्वी हेतुः, व्यभिचारात् । पदस्य वर्णविशेषानुपूर्वीनियमेऽपि तत्तद्वर्णानुपूर्वीकपदविशेषत्वेन न हेतुत्वं हस्त-करादिपदानां प्रत्येकं व्यभिचारात्। किन्त्वव्यभिचारितदर्थज्ञापकत्वेन ज्ञातस्य लाघवादावश्यकत्वाच्च, तदर्थज्ञापकत्वज्ञानार्थमेव क्वचिद्वर्णक्रमस्वरविशेषाणामुपयोगः । अतएव वर्णलोपादौ कुशमानयेति सकारसन्देहे

बोधः । यद्वा मध्ये तत्तदर्थोपस्थितिं विनैव तत्तदर्थान्वयानुभवः विशेषणज्ञानस्य तत्रातेऽहेतुत्वादिति ध्येयं। ननु तथापि आनुपूर्व्यपि हेतुः तद्व्यतिरेके कथं शाब्दधीरित्यत आह, 'पदस्येति. 'तत्तद्वर्णेति घोत्तरटत्वादिनेत्यर्थः, 'हस्तेति पर्य्यायान्तरेण शाब्दबोधे तस्या अपि व्यभिचारादित्यर्थः, 'किन्त्वव्यभिचारीति, 'अव्यभिचारि' अनुगतं, सर्वसाधारणमिति यावत्, 'लाघवादिति व्यभिचारखण्डनाय विशेषरूपेणानुपूर्व्यादिना अनेककार्य्य-कारणभावकल्पने गौरवादित्यर्थः, 'आवश्यकत्वादिति, स्यादि-त्यादिवर्णलोपस्थले कुत्रवर्णविशेषाभिध्यात्तदर्थज्ञापकत्वज्ञानस्यैव हेतुत्वमनुसरणीयत्वादिति भावः । ननु यथानुपूर्वी न प्रयोजिका तदा यथा नदीशब्दश्रवणे नद्या अन्वयबोधः तथा दीनेतिश्रवणेऽपि तदन्वयबोधापत्तिरित्यत आह, 'तदर्थेति, प्रकृते च तद्विनापि तदर्थज्ञापकत्वग्रह इति न तदपेक्षेति भावः । 'स्वरविशेषाणामिति अवर्णादीत्यादिः, 'अतएवेति यत एव तदर्थज्ञापकत्वज्ञानमात्रं प्रयोजकमतएवेत्यर्थः, 'वर्णलोपादाविति

लिपावुच्चारणे वा वत्त-कारसन्देहेऽपि वाक्यार्थबोधः। ननु क्रमिकपदवत्त्वं वाक्यत्वं। न चात्र पदक्रमः, अनुच्चार्य्यमाणतयोच्चारणाधीनस्य युगपदनुमीयमानतया बुद्ध्यधीनस्य वा तस्याभावादिति चेत्, न हि क्रमिकपदवत्त्वं वाक्यत्वं, गौरश्व इत्यादावभावात् किन्तु विशिष्टार्थपरशब्दत्वं तच्चात्राप्यस्त्येव। अथानुच्चार्य्यमाणस्य न वाक्यत्वं न वा अर्थानुभावकत्वमिति चेत्, न,

---

स्वादि-त्यादावित्यर्थः, लुप्तवर्णविशेषानिश्चये इति शेषः, 'आदिपदात् वर्णविकारसङ्ग्रहः, 'वाक्यार्थबोध इति, तदर्थज्ञापकत्वस्य निश्चयादिति भावः। न च संशयसाधारणमानुपूर्व्वीज्ञानमात्रं हेतुरस्त्विति वाच्यं। सम्बन्धितावच्छेदकनिश्चया हि पदार्थमुपस्थापयन्तौ अन्वयबोधायोपयुज्यते। न च सम्बन्धितावच्छेदकसंशये सम्बन्धिनिश्चय इति। 'क्रमिकपदवत्त्वमिति क्रमवत्पदघटितत्वमित्यर्थः, 'उच्चारणाधीनस्येति एकपदोच्चारणविषयत्वरूपस्योच्चारणघटितस्येत्यर्थः, 'बुद्ध्यधीनस्येति एकपदज्ञानोत्तरज्ञानविषयत्वरूपस्य बुद्धिगतस्येत्यर्थः, 'तस्य' पदक्रमस्य, 'अभावात्' वाक्यत्वाभावात्, तथाचाव्याप्तिरिति भावः। 'विशिष्टार्थपरशब्दत्वमिति विशिष्टप्रतिपत्त्यनुकूलशक्तिमत्त्वमित्यर्थः, यथाश्रुते विशिष्टप्रतिपत्तौ अन्वयोच्चरितत्वरूपस्यापि तस्य नित्यानुमेयेऽसम्भवादिति ध्येयं। पूर्वापरभावेनोच्चार्य्यमाणपदकलापस्यैव वाक्यत्वमित्यभिप्रायेण शङ्कते, 'अथेति, 'अनुच्चार्य्यमाणस्य' पूर्वापरभावे-

लिप्यनुमितानामपि वाक्यत्वात् अर्थबोधकत्वाच्च, लि-पितुल्या च स्मृतिः । किञ्च वाक्यमुच्चार्य्यते न तूच्चार-णाद्वाक्यत्वं, अन्यथा वाक्यमुच्चारयेत्यत्रानन्वयापत्तिः, अनुच्चारितमौनिश्लोकस्य वाक्यं न स्यादुच्चारणद्वा-याच्च वाक्यत्वे वाक्यस्यासत्त्वमेव स्यात् एकदा तावत्प-

मानुच्चार्य्यमाणपदसमूहस्य, 'लिप्यनुमितानामपीति, कदाचिदपि केनाप्यनुच्चारितानां वाक्यानामिति शेषः । 'उच्चार्य्यमाणेत्यत्र वर्त्त-मानत्वस्य शानप्रत्ययार्थत्वात्। पूर्वापरभावेन स्वजनकवर्त्तमानोच्चारण-विषयपदसमूहत्वं वाक्यत्वव्यापकमभिमतं उच्चारणं कृतिरित्यभिप्रा-येण दूषणान्तरमाह, 'किञ्चेति, 'वाक्यमुच्चार्य्यते' वाक्यत्ववि-शिष्टमुच्चारणकर्म्म, 'न तु' न च, 'उच्चारणादिति, पूर्व्वमिति शेषः, पूर्व्वापरभावेन स्वजनकवर्त्तमानोच्चारणविषयपदसमूहत्वस्य वाक्यत्व-व्यापकतया व्यापकाभावेन व्याप्याभावात् तथाच विशिष्टस्य उच्चा-रणकर्म्मत्वानुपपत्तिः तेन रूपेण प्रागसत्त्वात् क्रियानिमित्तत्वरूप-कारकत्वासम्भवात्, अनन्मते संस्कारस्यानन्ततया वाक्यत्वविशिष्टं यथाकथञ्चिद्वाक्यं पूर्व्वमस्त्येवेति भावः । ननु विशिष्टस्य नोच्चारण-कर्म्मत्वमित्यत आह, 'अन्यथेति वाक्यत्वविशिष्टस्योच्चारणाकर्म्मत्वे इत्यर्थः, 'अनन्वयापत्तिः' द्वितीयार्थकर्म्मत्वे वाक्यत्वविशिष्टानन्वया-पत्तिः । ननु घटं जानातीत्यादाविवात्रापि द्वितीयार्थो न कर्म्मत्वं अन्यथा तद्वाक्यमुच्चारयेदित्यत्राप्यन्वयानुपपत्तिस्तत्रापि दुर्वारेत्यत्रचे-दाह, 'अनुच्चारितेति, कदाचिदपि केनापीत्यादिः, 'वाक्यञ्च'

द्दानां उच्चारणाभावात्। न च कृत-क्रियमाण-करिष्यमाणोच्चारणस्य वाक्यत्वं, समुदाये प्रत्येकस्याभावात्। तस्मादर्थविशेषज्ञापकत्वेनैव ज्ञातादर्थविशेषधीः। अत एवास्ति वह्निलिङ्गमितिशब्दात् प्रतीते धूमे वह्नि-

---

वाक्यत्वस्य। 'न च कृतेति कृत-क्रियमाण-करिष्यमाणोच्चारणविषय-पदसमूहस्येत्यर्थः, 'समुदाय इति कुत्रापि पदे उच्चारणविषयत्वं नास्तीत्यर्थः, सामान्यत उच्चारणविषयत्वव्याप्तिग्राहकमानाभाव इति भावः। ननु विशेषरूपेणाज्ञातं ज्ञायमानकरणं फलं न तु जनय-तीत्यत आह, 'अत एवेति यत एव विशेषरूपेणाज्ञातमपि ज्ञाय-मानकरणं फलं जनयति अतएवेत्यर्थः,[१] 'लिङ्ग' व्याप्यं,'अनुमान-

---

(१) ननु वेदार्थप्रमापकत्वं स्मृतित्वञ्च स्मृतेर्वेदानुमानात् प्रागनुपस्थिता-नुगतस्मृतिपदप्रवृत्तिनिमित्तापरिचयाच्च दुर्ज्ञेयमत आह, 'वेदार्थेति वेदा-र्थता स्मृतिता चेत्यर्थः, तथाच या वेदार्थरूपातृकार्थप्रमापकत्वेन स्मृतित्वेन च प्रसिद्धा तादृश्येव वेदमूलकत्वविवादविषयः पक्षः। न च विवादविषय-तावच्छेदकापरिचयः, उभयसिद्धान्यतरकोटिकान्यत्वस्यैव तत्त्वादिति भावः। साध्याप्रसिद्धिं परिहरति, 'स्वत्यर्थ इति, 'ज्ञानान्तरेति। न च तादृश-ज्ञानगोचरतयैव वेदार्थस्य वेदोऽनुवादक इति वाच्यं। न हि यथाकथञ्चि-दुपस्थितार्थबोधकतामात्रेणानुवादकता। मा भूदेकदा वेदार्थावगमे पुन-स्तेनैव तदर्थबोधजननात् तद्वेदस्यानुवादकता तद्भिन्नापि तेन कदाचिदर्थ-बोधात्, अपि त्ववश्यापेक्षणीयनिरपेक्षप्रमाणबोधितार्थप्रमापकतया, सं-शय-तर्कोद्भूतप्रत्यक्षादिबोधितार्थप्रमापकतावत् प्रत्यक्षवेदानां। न च स्मृति-

रनुमानं, न तु तदर्थज्ञापकत्वेन ज्ञातात् पदादर्थज्ञान-मात्रं स्यात् न तु संसर्गधीः, घटः कर्मत्वमानयनं भावना तद्बोधकमिति ज्ञानेऽपि घटमानयेतिवाक्या-

मिति, भवन्मते इत्यादिः, अन्यथा तन्मते व्याप्यतावच्छेदकज्ञान-स्यानुमितिहेतुत्वेन तत्रानुमितेरसिद्धेरसम्भकतापत्तेः। 'ज्ञानमात्रं' स्मरणमात्रं, 'तद्बोधकं' घट-कर्मत्वानयन-भावनादीनां बोधकं' तदर्थबोधकत्वस्यापि ज्ञानप्रदर्शनाय इदं, 'घटमानयेतीति व्यतिरे-कदृष्टान्तः, तत्राद्यथान्वयबोधस्तथान्वयबोधाभावादित्यर्थः, 'अन्वय-प्रकारेति अन्वयप्रतियोगीत्यर्थः, 'पदविशेषस्य' घटादिपदस्य, 'तदु-त्थापितेति तदुत्पदघटितेत्यर्थः, 'ज्ञापकत्वमात्रेण' तदर्थज्ञापकत्व-

निरपेक्षप्रमायां अवश्यापेक्षणीया वा, स्मृत्यर्थगोचराचारादप्यनुमानसम्भवेन तथानुमितवेदस्यापि तदर्थबोधकत्वादिति भावः। 'तस्येति, कार्य्येण कार-णानुमाने व्यापारत्वस्य न तद्विषयत्वमिति परसिद्धान्त इति प्रागेव कथना-दिति भावः। 'उत्पत्तित इति न्यायमते, 'अभिव्यक्तित इति गुरुमते, 'अभिप्रायत इति उभयमते। 'व्यभिचारादिति, घटमानयानय घटमि-त्युभाभ्यां वाक्याभ्यामन्वयधीदर्शनादिति भावः। 'अव्यभिचारीति अनुगते-त्यर्थः। ननु यद्यानुपूर्व्वी न प्रयोजिका तदा नदी-दीनेत्यादावविशेषापत्ति-रित्यत आह, 'तदर्थेति। उच्चारणगर्भं वाक्यत्वं मा भूदुच्चारणव्याप्यन्तु स्या-दित्याशङ्कते, 'अथेति। ननु लिप्यनुमितमपि कदाचिदुच्चार्य्यत एवेत्यत आह, 'किञ्चेति, उच्चार्य्यमाणत्वं वर्त्तमानोच्चारणविषयत्वमिति न तदर्थान्त-रमिति सूचनमिदं, न केवलं शब्दे रीतिरियमपि तु ज्ञायमानकरणमात्रस्यैव स्वार्थज्ञापकत्वमज्ञाने सामग्रीत्याह, 'अतएवेति, इति व्याख्यानतरम्।

दिवान्वयबोधाभावात्। एवञ्चान्वयप्रकारकर्म्मत्वाद्युपस्थापकविभक्त्यादिमत्पदविशेषस्य तदुत्थापिताकाङ्क्षादेश्च ज्ञानं वाक्यार्थधीहेतुरतो न तैर्विना ज्ञापकत्वमात्रेण ज्ञातादर्थधीः, हस्त-करादिसन्देहे कुशमानयेत्यादौ विभक्त्यादिज्ञानादेव वाक्यार्थानुभव इति, मैवं, न हि तत्तद्विभक्त्यादिमत्पदविशेषत्वेन वाक्यार्थधीहेतुत्वं, अननुगमात्, किन्तु घटः कर्म्मत्वमित्याद्यन्वयविरोधिपदाजन्यपदार्थोपस्थितिस्तथा सा चेहाप्यस्ति। वस्तुतस्तु नानापदात् पदार्थोपस्थित्यनन्तरं वाक्यार्थ-

---

मात्रेण, हस्त-करादिसन्देहस्य वर्णानुपूर्व्व्यां व्यभिचारेऽपि विभक्त्यादिज्ञानस्य न व्यभिचार इत्यत आह, 'हस्तेति, 'तत्तद्विभक्तीति अमादिविभक्तीत्यर्थः, 'पदविशेषत्वेनेति घटादिपदत्वेनेत्यर्थः, 'अननुगमादिति, कलशमानय घटावानय इत्यादितोऽप्यन्वयबोधादिति भावः। 'घटः कर्मत्वमित्यादीति, 'अन्वयविरोधीति पदविशेषणं। ननु अन्वयविरोधित्वं अन्वयानुकूलविभक्त्यादिशून्यत्वं वाच्यं तथाच विभक्त्यादिरहितनियानुमेयभेदात् कथमन्वयबोध इत्यस्वरसादाह, 'वस्तुतस्त्विति, 'तथैवेति तत्तद्विभक्त्यादिमत्तत्तत्पदविशेषज्ञानत्वेनैवेत्यर्थः, 'सामग्री', तत्तत्पदविशेषज्ञानस्य हेतुत्वं न शाब्दबोधमात्रे व्यभिचारात् अननुगमाच्च किन्तु तत्तदन्वयानुभवविशेषे, एवञ्च प्रकृतस्थले तदर्थज्ञापकत्वज्ञानमेव कारणं न तु तत्तत्पदविशेषज्ञान-

बोधे तथैव सामग्री अनुमितवेदादिवाक्यार्थानुभवे विलक्षणैव सा स्मृत्यर्थज्ञापकत्वेनैव ज्ञातस्य स्मृत्यर्थानुभावकत्वात् धर्म्मिग्राहकप्रमाणेन तस्य तथैव सिद्धत्वात् । तवेश्वरस्येवाशरीरस्य कर्त्तृत्वे । अतएव वर्णपद विभक्त्यादिविशेषघटितत्वेनाज्ञातस्याखण्डस्य सखण्डस्य वा वाक्यार्थानुभावकत्वात् पदार्थस्थानीयस्तस्य

मिति भावः । 'तथैव' स्मृत्यर्थानुभावकत्वेनैव, 'कर्त्तृत्व इति, धर्म्मिग्राहकमानेन सिद्धत्वमिति शेषः, यथा अन्यत्र कृप्तकारणशरीरविरहिणोऽपि ईश्वरस्य कर्त्तृत्वं धर्म्मिग्राहकमानसिद्धं तथान्यत्र कृप्तसामग्रीविरहिणोऽपि नित्यानुमेयवेदस्यानुभावकत्वं धर्म्मिग्राहकमानसिद्धमित्यर्थः, अन्यथा घटादिकार्य्यविशेषे विशिष्टस्यैव कर्त्तृत्वं दृष्टमित्यङ्कुरेऽपि कर्त्तृत्वं स्यात् कथमीश्वरस्य, 'अतएव' तथैव धर्म्मिग्राहकमानसिद्धत्वादेव, 'पदार्थस्थानीयस्तस्य वाक्यार्थः' इत्यन्तो नैकोऽन्वयः, 'अखण्डस्य' वर्णान्तराघटितशरीरस्य, 'सखण्डस्य' तद्घटितशरीरस्य, 'वाशब्द इवार्थ, अनेनैव वर्णात्मकस्य तस्य सिद्धेरिति ध्येयं । 'पदार्थस्थानीयः' पदार्थोपस्थितीयः, 'तस्य वाक्यार्थः' तज्जन्यवाक्यार्थः, यथा पदार्थोपस्थितौ न पदान्तरापेक्षा तथा तज्जन्ये शाब्दबोधेऽपीत्यर्थः ।

केचित्तु यस्मिन् क्षणे पदार्थस्मरणं तद्भिन्नेव क्षणे तज्जन्ये शाब्दबोधे न पदार्थस्मरणरूपव्यापारान्तरापेक्षेति भाव इत्याहुः ।

ननु तस्याखण्डत्वे वर्णसमूहत्वरूपं पदत्वं पदसमूहत्वरूपं वाक्यत्वञ्च

वाक्यार्थस्तत्र वर्णसमूहः पदं पदसमूहोवाक्यमित्य-
त्रापि ततो ग्रहः प्रमाणशब्दत्वमात्रेण तस्य सिद्धेः
अन्यथा क्लृप्तहेतुं विना सोऽनुभावक इत्यादौ तदसि-
द्धावाश्रयासिद्धिः सिद्धौ वा बाधः तेन विनैव सर्व्वा-
नुपपत्तिं परिभूय तदनुभावकत्वस्य धर्म्मिग्राहकमान-
सिद्धत्वात्। अतएव क्वचित् स्तुति-निन्दाभ्यां कल्पित-

कथं स्यादित्यत आह, 'तत्रेति नित्यानुमेयवेद इत्यर्थः, 'वर्णसमूहः पदमिति वर्णसमूहत्वरूपं पदत्वमित्यर्थः, 'पदसमूहो वाक्यमिति पदसमूहत्वरूपञ्च वाक्यत्वमित्यर्थः, अस्तीति शेषः, 'प्रमाणशब्दत्वमात्रेति, 'मात्रपदात् पदत्व वाक्यत्वयोर्व्यवच्छेदः, 'सिद्धेः' धर्म्मिग्राहकमानसिद्धेः, 'अन्यथा' शाब्दबोधमात्रे एव तत्तद्विभक्त्यादिसमभिव्याहततत्तत्पदविशेषस्य हेतुत्वे, 'सः' नित्यानुमेयोवेदः। विशदयति, 'तेनेति क्लृप्तहेतुनेत्यर्थः, क्लृप्तहेतोरपेक्षितत्वे तत्रानुभावकत्वस्यैवासम्भवाद्विशिष्टसमभिव्याहारविशेषस्यानुमातुमशक्यत्वादिति भावः। त्वयेदमवश्यं स्तुति-निन्दास्थले कल्पनीयमित्याह, 'अतएवेति यतएव शाब्दबोधमात्रे न तत्तद्विभक्त्यादिसमभिव्याहततत्तत्पदविशेषस्य हेतुत्वं अतएव, 'क्वचित्' तदर्थज्ञापकत्वज्ञानमात्रादप्यन्वयबोध-इत्यर्थः, 'स्तुतीति "तरति मृत्युं तरति ब्रह्महत्यां योऽश्वमेधेन यजेत" इति वाक्येत्यर्थः, 'निन्देति "यो ब्राह्मणायावगुरेत्तं शतेन यातयेदिति वाक्येत्यर्थः, अत्र विधिवाक्यस्याश्रवणादिति भावः। न

विधि-निषेधकवेदार्थमधिगत्य प्रवृत्ति-निवृत्ती। अन्यथा विधि-निषेधकानां नानाप्रकारकत्वेन विभक्त्यादिविशेषवत्पदस्यानुमातुमशक्यत्वात् न ततोऽर्थधीः स्यात्। तथापि वक्तृज्ञानानुमानानन्तरमिवानुमितानुमानादेव वाक्यार्थसिद्धेर्लौकिकवाक्यवद्वेदस्यानुवादकत्वं स्यादिति चेत्, न, धर्म्मिग्राहकमानेन स्मृत्यर्थज्ञापकतया ज्ञातात् सम्भूतसामग्रीकत्वेनानुपदमेव वाक्यार्थ-

---

च स्मृत्यर्थस्य स्मृतित एवोपस्थितेर्व्यर्थत्वात् कल्पितवेदार्थस्य च कुत उपस्थितिरिति वाच्यं। अन्यथात्वे अनुमानपरम्पराप्रयोज्यस्मृत्यधीनानुमानस्वीकारादिति न काप्यनुपपत्तिः। 'अशक्यत्वादिति,' विशिष्य व्याप्त्यादेरज्ञानादिति भावः। 'ततः' कल्पितविधि निषेधकवाक्यात्। प्रकृते, 'तथापीति, 'वक्तृज्ञानेति यथा लौकिकवाक्यस्थले अयं वक्ता एतद्वाक्यार्थगोचरयथार्थज्ञानवान् सतात्पर्य्यकाकाङ्क्षादिमदेतद्वाक्यप्रयोक्तृत्वादित्यनुमानानन्तरं एते पदार्थाः तात्पर्य्यविषयमिथःसंसर्गवन्तः एतत्पदार्थगोचर-पदार्थज्ञानवदुक्तपदस्मारितत्वादित्यनुमानात् शब्दबोधात् प्रागेव वाक्यार्थबोधस्तथेत्यर्थः, 'अनुमितेति स्मृतेर्वेदमूलकतानुमानानन्तरं एते स्मृत्यर्था मिथः संसर्गवन्तः वेदमूलकवाक्यार्थत्वात् इत्यनुमानादित्यर्थः, 'वाक्यार्थसिद्धेः,' शाब्दबोधात् प्रागेवेत्यादिः। 'सम्भूतसामग्रीकत्वेन' सकलसहकारिसम्पन्नत्वेन, 'अनुपदमेव' अनुमितानुमानात् प्रागेव, 'योग्य-

बोधोदयात् अपेक्षणीयान्तराभावात्, अनुमानस्य व्याप्त्यादिज्ञानापेक्षितत्वेन विलम्बितत्वात्। न च वेदस्यापि योग्यतादिज्ञानापेक्षिततया विलम्बः, तन्निरपेक्षबोधकस्यैव धर्म्मिग्राहकमानसिद्धत्वात् योग्यतादिविशिष्टस्यैवानुमानाद्वा, एवं मङ्गलाचारस्याविगीतशिष्टाचारत्वेन कर्त्तव्यतामनुमाय सा कर्त्तव्यता वेदबोधिता अलौकिकाविगीतशिष्टाचारकर्त्तव्यतात्वादिति तद्बोधकत्वेनानुमितवेदात् कर्त्तव्यताधीस्ततः प्रवृत्तिः।

तादिज्ञानेति, 'आदिपदात् तात्पर्य्यपरिग्रहः। ननु बोधकत्वमुक्तानुमानात् सिद्ध्यति न तु निरपेक्षबोधकत्वमित्यत आह, 'योग्यतादीति, 'योग्यता' अबाधितार्थकत्वं, स्मृतिस्थलीयं प्रकारमाचारेऽप्यतिदिशति, 'एवमिति, 'मङ्गलाचारस्य' आचारविषयमङ्गलस्य, क्वचित् मङ्गलस्येत्येव पाठः, 'कर्त्तव्यतामिति बलवदनिष्टाननुबन्धीष्टसाधनत्वसमानाधिकरणकृतिसाध्यत्वमित्यर्थः, हेतौ दृष्टसाधनतांशे भ्रमाजन्यत्वं शिष्टत्वं, अविगीतत्वं बलवदनिष्टाजनकत्वं एतद्द्वयमाचारविशेषणं, आचारत्वं आचारविषयत्वं, आचारः कृतिः, विवेचितमिदमस्माभिः प्रत्यक्षरहस्ये। 'सा कर्त्तव्यता' मङ्गलीयकर्त्तव्यता, 'अलौकिकेति कर्त्तव्यताविशेषणं, अलौकिकत्वं शब्द-तदुपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमित्यविषयत्वं, 'अविगीतत्वं' शिष्टाचारविशेषणं, 'आचारपदं आचारविषयपरं, 'कर्त्तव्यतात्वात्' तद्विषयकर्त्तव्यतात्वात्, 'कर्त्तव्यताधीः' मङ्गलकर्त्तव्यताधीः। अनुमानद्वयं

ननु स आचारो वेदबोधितकर्त्तव्यताकः तादृशाचारत्वादित्यनुमितवेदात् तत्कर्त्तव्यताधीः, विभक्त्यादिकं विनानुमितवेदात् तत्कर्त्तव्यताज्ञानाभावात् मङ्गलमाचरेदित्येवंरूपस्य च वेदस्य नानुमानं तथा व्याप्त्यभा-

---

व्यर्थं एकस्मादेव वक्ष्यमाणानुमानात् प्रकृतनिर्वाहादिति कस्यचिन्मतं दूषयति, 'नन्विति, 'स आचारः' आचारविषयो मङ्गलादिः, 'तादृशाचारत्वात्' अविगीतशिष्टाचारविषयत्वात्, हेतुमाह, 'विभक्त्यादिकमिति, 'अनुमितवेदात्' उक्तरूपेणानुमितवेदात्, 'तत्कर्त्तव्यतेति मङ्गलविषयककर्त्तव्यताज्ञानासम्भवादित्यर्थः। न चैवं स्मृते एव कथमनुमितवेदात् विभक्त्यादिकं विना मङ्गलकर्त्तव्यताबोधः स्मृतिस्थले एव वा कथं विभक्त्यादिकं विनानुमितवेदाद्वाक्यार्थबोध इति वाच्यं। असति विशेषबाधके पक्षतावच्छेदकेऽप्यनुमितिरिति नियमादस्मन्मते मङ्गलकर्त्तव्यतां पक्षयित्वा वेदबोधितत्वानुमाने मङ्गलेऽपि वेदबोधितत्वानुमानादुत्तरकाले वेदस्य मङ्गलबोधकत्वग्रहसम्भवात् विभक्त्यादिकं विनापि मङ्गलविषयककर्त्तव्यताबोधः अन्यमतस्यैव सामग्रीत्वात्तन्मते कर्त्तव्यताया वेदबोधितत्वग्रहेऽपि मङ्गले वेदबोधितत्वाग्रहात् वेदस्य मङ्गलबोधकत्वग्रहाभावेन विभक्त्यादिकं विना कर्त्तव्यतामात्रज्ञानसम्भवेऽपि मङ्गलविषयकबोधस्यासम्भवात् तज्ज्ञापकत्वेन ज्ञातस्यैव तदनुभावकत्वादिति भावः। ननु विभक्त्यादिसमभिव्याहृतवेद एव उक्तरूपेणानुमेय इत्यत आह, 'मङ्गलमिति, 'व्याप्त्यभावादिति, सामान्यधर्मस्य हेतुत्वादिति भावः।

वात्, तस्मात् तस्य कर्त्तव्यतामनुमाय तद्बोधकवेदा-
नुमानं, प्रथमं कर्त्तव्यताज्ञानेऽपि वेदानुमानं
अविनाभावात्। न च तत एव प्रत्यक्षवेदानुमानं,
प्रत्यक्षत्वे उच्छेदानुपपत्तेः शाखान्तरवत्।

'तस्य' मङ्गलस्य, 'तद्बोधकेति मङ्गलकर्त्तव्यताबोधकेत्यर्थः। नन्वेवं प्रथममेव प्रवर्त्तकज्ञानोत्पत्तौ कृतं वेदानुमानेनेत्यत आह, 'प्रथम-मिति, 'अविनाभावादित्युपलक्षणं आनुमानिककर्त्तव्यताप्रामाण्य-ग्रहायदृष्टत्वेन ततः प्रवृत्त्यसम्भवादित्यपि बोध्यं, एतच्च 'ततः प्रवृत्ति-रिति प्रागुक्तमपि सङ्गच्छते इति ध्येयं। 'तत एव' उक्तवेदमूलकत्व-साधकादेव, 'प्रत्यक्षत्व इति, प्रत्यक्षविषयत्वस्य उच्छेदाभावव्याप्यत्वा-दिति भावः। तथाचानुमाने बाध इति भावः। 'उच्छेदः' अध्य-यनविषयत्वाभावः, नातस्तन्मतेऽसिद्धिः[१]।

(१) 'इत्येति, तत्र विभक्त्यादिसमभिव्याहारमुखीयान्वयधीत्वल्लोपमजान-तोऽप्यन्वयधीरेव नेत्याशयः। ननु घटः कर्मत्वमित्यादावभेदान्वयस्वरूप-योग्यत्वात् तत्तदन्वयविरोधिपदाजन्यत्वं वाच्यं तथाननुगमस्तदवस्थ एवेति लाघवाद्विभक्त्यादिमत्पदत्वेनैव तद्ग्रहोऽस्त्वित्यस्वरसेन मतान्तरमाह, 'वस्तु-तस्त्विति, प्रतिबन्ध्याभिप्रायेण दृष्टान्तमाह, 'तवेति, 'अतएवेति तथा धर्म्मिग्राहकप्रमाणसिद्धत्वादेवेत्यर्थः, तद्घटितत्वेनाज्ञातस्येत्यस्य विवरणं 'अखण्डस्य', 'सखण्डस्य' तद्घटितत्वेन ज्ञातस्य, 'वाशब्दोऽनास्थायां इवार्थो वा। 'पदार्थेति आहत्य वाक्यार्थ एव ज्ञायते न तु पदार्थस्मरणावान्तर-व्यापारापेक्षेत्यर्थः, तर्हि कथं वेदत्वमित्यत आह, 'प्रमाणेति, तथाच न तद्घटितं वेदत्वं किन्तु प्रमाणशब्दत्वघटितं तथाचाप्यस्त्वेवेति भावः। त्वयाप्युक्तसामग्री कल्प्येत्याह, 'अतएवेति, 'अनुमितेति, एते सूत्रार्थाः

यत्तु अष्टकाः कर्त्तव्याः कार्य्या अष्टका इत्येवंरूपमेव वाक्यमनुमेयं उपस्थितत्वात्, एवञ्च तस्यैवार्थे प्रतिपुरुष-

---

'उपस्थितत्वादिति, यस्यानुमितिपूर्व्वसमये यदुपस्थितं तस्य

परस्परं संसर्गवत्त्वः वेदजन्यानुभवविषयत्वादित्यादेरित्यर्थः, अत्र नाविषयत्वं न वाऽप्राधान्येन विषयत्वं इत्यनुवादकतावश्यकीति भावः। 'योग्यतादि-मानेति, 'आदिपदात् तात्पर्य्यादिपरिग्रहः । अभ्युपगमवादेनाह, 'योग्यतादीति, उक्तरीतिमाचारस्यजेऽप्यतिदिशति, 'एवमिति, एतदनु-मानं प्रत्यक्षप्रकाशे व्याख्यातं। 'सा' मङ्गलाचारेयेत्यर्थः, तथाच पक्षतावच्छेदकावच्छेदेन साध्यसिद्धिरिति मते मङ्गलाचारविशिष्ट-कर्त्तव्यतायां वेदबोधितत्वानुमितौ समानसंवित्संवेद्यतया मङ्गलाचारवि-शिष्टकर्त्तव्यताबोधकत्वेन वेदसिद्धेस्तत्कालीनः तदर्थज्ञापकत्वज्ञानमात्रस्यैवात्र सामग्रीत्वात् तदिदमाह, 'तद्बोधकत्वेनानुमितवेदादिति, 'नन्विति, अत्र कर्त्तव्यतामात्रबोधकत्वेन वेदसिद्धेन ततो मङ्गलाचारविशिष्टकर्त्तव्यताबोधः स्यादिति भावः। न च वक्त्रभिप्रायार्थपर्य्यालोचनया अत्रापि मङ्गलकर्त्तव्यता-बोधकत्वेनैव तत्सिद्धिरिति वाच्यं। वस्तुगत्या या मङ्गलकर्त्तव्यता तद्बोध-कत्वेन सिद्धावपि मङ्गलांशबोधकत्वेनासिद्धेस्तद्बोधकत्वानुपपत्तेः। न चा-काशः श्रोत्रग्राह्यगुण इत्यनुमितावाकाशेऽपि श्रोत्रग्राह्यत्वभानसम्भव इति, तर्हि मङ्गलांशं विभक्त्यादिसमभिव्याहाररूपसामग्र्येव बोधयत्वित्यत आह, 'विभक्तीति अनुमितवेदे विभक्त्यादिसमभिव्याहाररूपसामग्र्यभावादित्यर्थः। तर्हि तत्समभिव्याहृत एवानुमीयतामित्यत आह, 'मङ्गलमिति, 'तस्येति मङ्गलाचारस्येत्यर्थः, 'तद्बोधकेति मङ्गलाचारविशिष्टकर्त्तव्यताबोधकस्येत्यर्थः, 'अविनाभावादित्युपलक्षणं अन्धपरम्परानिरासनाश्वासार्थञ्चेत्यपि द्रष्टव्यं, एवं 'ततः प्रवृत्तिरिति पूर्व्वोक्तमपि सङ्गच्छते इति ध्येयं। अत्र च कथं नानु-वादकत्वमिति चिन्त्यं। इति व्याख्यान्तरं ।

मन्यान्यवेदानुमानं न दोषाय एकार्थानेकपदोपस्थितौ चानेकवाक्यानुमानमेवेति, तन्न, आचारतो वेदानुमाने मङ्गलमाचरेदित्याद्यन्यतरोपस्थितौ नियमाभावात्। अनेकवेदकल्पने च स्वानुभवविरोधः, मनुस्मृतिमूलस्यानेकं वाक्यं नावश्यकमिति कथमाधुनिकोऽनेकमनुमिनुयात्। न च स्मृत्यर्थबोधको वेदः स्मृतिसदृश एवानुमेयः नियमतः स्मृतेरुपस्थितत्वात् इति वाच्यं। तदर्थस्मृतेरपि नानाप्रकारकत्वात् तस्य च प्रदोषादौ अनुच्चरितवेदस्येव वेदत्वं श्रोत्रग्रहणार्ह-

---

तदेव उपनीतं सदनुमितौ भासते इति नियमादिति भावः। 'न दोषायेति, सामग्रीबलसिद्धत्वेन प्रामाणिकगौरवस्यादोषत्वादिति भावः। ननु यत्र एकस्मिन्नेवार्थे अनेकवाक्योपस्थितिस्तत्र का गतिरित्यत आह, 'एकार्थेति, 'वेदानुमाने' वेदानुमानदशायां, दूषणान्तरमाह, 'अनेकेति, 'स्वानुभवेति अनुमातुर्लाघवसहकृतेनानुमानान्तरेण वेदस्य नानाप्रकारकत्वाभावनिश्चयादित्यर्थः। एवं स्मृतिमूलकवेदानुमानेऽप्याह, 'मनुस्मृतीति मन्वादिस्मृतीत्यर्थः, लाघवादेकस्यैव तन्मूलस्य कल्पनादिति भावः। 'नानेति, तथाचानेकवेदकल्पने स्वानुभवविरोध इति भावः। वस्तुतोऽनुमितावुपनीतभाने मानाभाव इति ध्येयं। 'तस्य च' नित्यानुमेयस्य च, 'प्रदोषेति यथा प्रदीपकाले तेषामप्युच्चारणाविषयत्वेऽपि स वेदस्तथायमपीत्यर्थः, 'श्रोत्रेति, स्वरूपयोग्यतावच्छेदकस्य वर्णत्वं श्रोत्रसमवेतविशेषण-

तथा च शब्दत्वं वाक्यत्वमर्थबोधकत्वादित्येतदेव युक्तं स्मृत्याचारेण चानुमितो वेदोऽर्थं बोधयतीति पूर्व्वपूर्व्वेणानुमितवेदात् उत्तरोत्तरस्मृत्याचाराविति नान्धपरम्परा शब्दार्थशक्तिग्रहवत् स्वतः प्रमाणमूलकत्वात्। तस्मान्नित्यानुमेयत्वं वेदस्य न तूच्छेद इति। अत्रोच्यते। उच्छिन्नवेदादर्थं प्रतीत्य स्मृत्याचारयोरुपपत्तेः न सामग्र्यन्तरकल्पनं अतएव नाश्रयासिद्धिर्बाधो वा स्मृत्या-

---

त्वात्। न च नित्यस्य स्वरूपयोग्यत्वे फलोपधानप्रसङ्ग इति वाच्यं। तैर्नित्यस्य स्वरूपयोग्यस्य फलावश्यम्भावनियमस्यानङ्गीकारादिति भावः। 'पूर्व्वपूर्व्वेणेति पूर्व्वपूर्व्वस्मृत्यादिनेत्यर्थः, 'नान्धपरम्परा' नाप्रामाण्यसन्देहः, 'शब्देति यथा शब्दशक्तौ व्यवहारलिङ्गकानुमानादिमूलं तथात्रापि वेदमूलमित्यर्थः, 'नित्यानुमेयत्वमिति नित्यत्वे सत्यनुमेयत्वमित्यर्थः, 'न तूच्छेदः' न तु ध्वंसः। 'उच्छिन्नेति, न च तदर्थज्ञापकत्वज्ञानमेव सर्व्वत्र सामग्र्यस्त्विति वाच्यं। तदभावेऽपि श्रूयमाणवाक्यात् योग्यतादिप्रतिसन्धानेऽन्वयदर्शनादिति भावः। स्मृत्यसामग्रीं विना न योऽनुभावक इत्यत्र तदुक्तं दोषमुद्धरति, 'अतएवेति[1]। नन्वेवमिदानीं विभक्त्यादिविशिष्टस्य मङ्गलमाचरेदित्यादिवत् तस्य वेदस्यानुमातुं शक्यत्वादनुमितवेदात् कर्त्तव्यता-

---

(१) 'सत्त्विति, तथाच विमतत्वादिसमभिव्याहारवत एवानुमानान्न सामग्र्यन्तरकल्पनमिति भावः। यद्यपि तादृशवेदेन समं न व्याप्तिस्तथाप्युपनीतमानमतेनेदं बोध्यं। 'अत्रोच्यतेति, कालादेरेव तदनुच्छेदकत्वादिति भावः।

चारानुमितवेदस्यास्माभिरभ्युपगमात्। इदानीञ्च(१) स्मृतेरर्थं प्रतीत्याचाराच्च कर्त्तव्यतामनुमाय प्रवृत्तिः। न चैवं किं वेदेनेति वाच्यं। तुल्यत्वात् अविनाभावाच्च तत्कल्पनं तुल्यं तथाच स्मृत्याचारयोर्वेदजन्यानुभवमूलत्वानुमानादेव पक्षधर्म्मताबलात् प्रत्यक्षवेदमूलकत्वसिद्धिः। अन्यथा तस्यानुभावकत्वाभावेन मूलत्वा-

आनासम्भवेन कथं प्रवृत्तिरित्यत आह, 'इदानीञ्चेति। 'एवं' स्मृत्यर्थज्ञानादितः प्रवृत्त्युपपत्तौ, 'किं वेदेनेति किं वेदानुमानेनेत्यर्थः, 'तुल्यत्वात्' तवापि तुल्यत्वात्, 'कल्पनं' वेदानुमानं, 'पक्षधर्म्मतेति अप्रत्यक्षे वेदमूलकत्वेन बाधादित्यर्थः, पक्षधर्म्मताबलमेव दर्शयति, 'अन्यथेति, अप्रत्यक्षे मन्त्रकारिमूलानुपूर्व्यादिज्ञानाभावात् सामग्र्यन्तरकल्पनस्य गौरवपराहतत्वादिति भावः। अनुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियममभिप्रेत्य स्वपक्षे स्थापनां दर्शयति,

'वाक्यत्वमिति, आचारमूलाभिप्रायेणेदं तेन न पौनरुक्त्यमित्याहुः। ननु स्मृत्याचारमूलत्वं स्मृत्याचारयोरेवास्तु किं वेदेनेति प्रश्नं निरस्यति, 'स्मृतीति, 'उच्छिन्नेति, न च तदर्थज्ञापकत्वज्ञानमेव सर्व्वत्र सामग्र्यस्त्विति वाच्यं। तदभावेऽपि अयमाद्यवाक्याद् योग्यतादिप्रतिसन्धानेऽन्वयधीदर्शनात् वाक्यार्थस्यापूर्व्वत्वेन तज्ज्ञापकत्वेन प्रागज्ञानाच्च इति भावः। 'अन्यथेत्यादिप्रागुक्तमुद्धरति, 'अतएवेति।

(१) नन्विदानीं विभक्त्यादिविशिष्टस्यानुमातुमशक्यत्वात्तदर्थज्ञापकत्वेनैवानुमितस्योच्छिन्नवेदस्यानुभावकत्वमिति सामग्र्यन्तरकल्पनमावश्यकमित्यत आह, 'इदानीञ्चेति, तथाच प्रत्यक्षतादशायामेव परं तस्यानुभावकत्वमिति न तत्कल्पनमिति भावः। 'नन्विति, तथाच प्रामाणिकं गौरवमिति भावः।

नुपपत्तेः । तस्मात् स्मृत्याचारानुमितो वेदः प्रत्यक्षोऽध्ययनविषयश्च वेदत्वात् सम्मतवत्, अन्यथा सामग्र्यन्तरकल्पने गौरवप्रसङ्गः । ननु स्तुति-निन्दार्थवादेन कल्पितात् विधि-निषेधकवाक्यात् कथमर्थमवगम्य प्रवृत्ति-निवृत्ती, न हि तत्र वर्ण-पद-विभक्ति-विधि-प्रत्ययक्रमविशेषाणामनुमानं सम्भवति, व्यभिचारादिति चेत्, न, स्तुति-निन्दावाक्याभ्यां प्रवृत्ति-निवृत्ति-पराभ्यां प्रवृत्ति-निवृत्तिहेतुरर्थ एव कल्प्यते लाघवात्

'तस्मादिति, अध्ययनपदेन अदृष्टजनकाध्ययनं बोध्यते तेन हेतौ न वैयर्थ्यं, प्रथमसाध्ये तु वाक्यत्वमेव हेतुस्तथा विवक्षितं । अप्रयोजकत्वमाशङ्क्याह, 'अन्यथेति, 'स्तुतीति स्तुति-निन्दारूपो योऽर्थवादस्तेनेत्यर्थः, 'अर्थवादः' विधिसमभिव्याहृतं वाक्यं 'कल्पितात्' अनुमितात्, 'प्रवृत्ति-निवृत्तिहेतुरिति प्रवृत्त्यादिहेतुज्ञानविषय इत्यर्थः, स च इष्टसाधनत्वादिकमनिष्टसाधनत्वञ्च, 'कल्प्यते इति सोमो राजानममृतात् सोमो ब्राह्मणानां राजा इत्यादौ सोम इष्टसाधनीभूतोपास्यको वेदे स्तूयमानत्वात् वायुर्वै क्षेपिष्ठा देवता वायव्यं श्वेतमालभेतेत्यर्थवादः, वायुवदित्यनुमीयते इत्यर्थः, 'सोमः' चन्द्रः, 'स्तूयमानत्वात्' उत्कर्षवत्त्वेनावधारणात्, 'क्षेपिष्ठा' क्षिप्रफलदात्री,

---

'अर्थ एवेति इष्टसाधनत्वादिकमनिष्टसाधनत्वञ्चेत्यर्थः, 'गौरवादिति, अवश्यकार्थ्यकल्पनेनैवोपपत्तेरिति भावः। 'उक्तेति विभक्त्यादिमतोऽनुमातुमशक्यत्वात् सामग्र्यन्तरकल्पने गौरवमित्यर्थः, 'न त्विति, 'तत्कल्पनापि' अर्थकल्पनापी-

स्वशाखात्वस्याप्रयोजकत्वात्। यद्यपि वेदसहस्रशाखाविदो व्यासादयः सन्त्येव, तथाप्यध्ययनाभाव एव शाखोच्छेदः। ननु शाखोच्छेदे वर्ण-पदवाक्यहानिशङ्कया प्रत्यक्षवेदादपि वाक्यार्थ-प्रयोगयोरनिश्चये वैदिकव्यवहारमात्रं लुप्येतेति चेत्, न, श्रूयमाणमात्रस्यैव महाजनपरिगृहीतत्वात् तन्मात्रबोधिताङ्गेतिकर्त्तव्यत-

---

दीनां सत्त्वात् कथं तदुच्छेद इत्यत आह, 'यद्यपीति, 'अध्ययनाभाव इति निमित्तसप्तमी उच्चारणाभावनिमित्तक उच्छेद इत्यर्थः, 'वाक्यार्थ-प्रयोगयोरिति, प्रयोगो मन्त्रादिशरीरं। न च श्रूयमाणरूपवाक्यार्थप्रतीतौ किं बाधकमिति वाच्यं। तात्पर्य्यविरहात्। 'परिगृहीतत्वं' अध्ययनाध्यापनविषयत्वं, 'तन्मात्रेति श्रूयमाणमात्रेत्यर्थः, 'इतिकर्त्तव्यता' कर्म्मपरिपाटी, 'अनुष्ठीयमानत्वात्' कर्म्मणः क्रियमाणत्वात्, वर्णादिहानिशङ्काविरहेणेति शेषः। यदि वर्ण-पदहानिस्स्यात् तदा तदवच्छिन्नस्य शाखात्वाभावेन तेषां तदध्ययनादिकं तन्मात्रबोधिताङ्गेतिकर्त्तव्यतया कर्म्मानुष्ठानञ्च विरुध्येतेति भावः। प्रयोगविषयोऽप्येवमेव बोध्यः श्रूयमाणमात्रस्य महाजनपरिगृहीतत्वात् अन्यथा यदि वर्ण-पदहानिः स्यात् तदा तदन-

---

दावतद्गुणसंविज्ञानबहुव्रीहिवशादर्थवादान्तरे यत्र तदवगमस्तत्र न तत्कल्पनमत्र तु तत्कल्पनमेवेत्याहुः। विधेयत्वव्याप्तिर्यद्यस्ति तदाऽस्त्वविनाभावात् कल्पनं प्रशस्त्यर्थन्तु न तथैव ब्रूमः। वस्तुतो प्रयोजकत्वादविनाभाव एव नेति भावः। 'शाखात्वस्येति, स्वम्मत इति शेषः। अनिश्चयो नानुमेयपदार्थ-

यैव शिष्टैरनुष्ठीयमानत्वाच्च तदर्थनिश्चयात्। न च उच्छिन्नशाखाबोधितेतिकर्त्तव्यताशङ्कया एकस्मिन्नपि कर्म्मण्यनाश्वासप्रसङ्गः, नानाशाखेतिकर्त्तव्यतापूरणीयत्वात् तस्येति साम्प्रतं, सन्ति हि तत्तत्कर्म्मणि नानाशाखाबोधितसकलेतिकर्त्तव्यताबोधनायैनमेव कालक्रमभाविनमनाश्वासमशङ्कमानैर्महर्षिभिः प्रणीता महाजनपरिगृहीताः स्मृतयइति नानाश्वासः। अन्यथा

च्छिन्नस्य मन्त्रत्वाभावेन तेषां तदध्ययनादिकं विरुध्येतेति भावः। नन्वेवं उच्छिन्नशाखाबोधितकर्त्तताशङ्कया शिष्टानां कर्म्ममात्रानुष्ठानमेव न स्यात् इत्याशङ्कते, 'न चेति, 'अनाश्वासः' निष्कम्पप्रवृत्त्यभावः, पूर्व्वं प्रत्यक्षशाखैकदेशावच्छेदेन शङ्काधीनः कर्म्मलोपः परिहृतः सम्प्रति उच्छिन्नशाखाबोधितार्थशङ्काधीनः स परिह्रियत इति भेदः। 'अनाश्वासः' उच्छिन्नशाखाबोधितेतिकर्त्तव्यतासन्देहः। 'नानाश्वास इति नेतिकर्त्तव्यतासन्देह इत्यर्थः, इदमुपलक्षणं तन्मात्रबोधितेतिकर्त्तव्यतयैव शिष्टैरनुष्ठीयमानत्वान्न सन्देह इत्यपि बोध्यं। अत एव यत्र स्मृतिर्नास्ति तत्रापि न सन्देहः अन्यथोच्छेदानभ्युपगमे सर्व्वशाखानध्यायिनां शाखान्तरबोधितेतिकर्त्तव्यतासन्देहादितिकर्त्तव्यतानिश्चयो न स्यादित्याह, 'अन्यथेति, 'नार्थनिश्चय इति ततएवेति-

---

इत्यत आह, 'वेदत्वं चेति, 'अतएवेत्यस्य विवरणं, 'बाधादिति, 'निश्चितेति, यदि च सामान्यतोऽन्यतमत्वादिना पक्षत्वं, यदि वा तावदन्यतमत्वं वेदत्वसमानाधिकरणमिति साध्यं तदा बाध एव मूलं, यद्वा एतदस्वरसादेवाह, 'धर्म्मेति, 'प्रत्यक्षत्वादिति, उपनयमर्य्यादयेदं बोध्यं, तथाच सिद्धसाधनाशङ्कानु-

एकस्य सकलशाखानवगमात् शाखान्तरबोधितेतिकर्त्तव्यतासंशयेनैकशाखातो नार्थनिश्चयः स्यात् ।

यत्तु विभक्त्यादिमत्तत्तत्पदानां तत्समुदायानाञ्च प्रत्यक्षत्वन्तेष्वपि कश्चिद्वेदः तत्रायं समुदायो वेद इत्यनिश्चय एव नित्यानुमेयार्थः, वेदत्वं वा तत्रानुमेयमिति, तन्न, प्रत्यक्षवेदातिरिक्तवाक्ये तदभियुक्तानां महाजनानां वेदत्वाभावनिश्चयात् । अतएव वेदत्वं तत्र

कर्त्तव्यतानिश्चयो न स्यादित्यर्थः । 'प्रत्यक्षत्वमिति इदानीमपि प्रत्यक्षत्वमित्यर्थः, 'तेष्वपीति तेष्वेवेत्यर्थः, 'कश्चिद्वेद इति यः कश्चिद्वेदस्तत्रेत्यर्थः । ननु अनिश्चयो न नित्यानुमेयशब्दार्थ इत्यस्वरसादाह, 'वेदत्वं वेति, 'तत्र' यत्किञ्चिद्वेदे, तथाचायमेव नित्यानुमेयशब्दार्थ इति भावः । 'वेदातिरिक्तेति वेदत्वेन निश्चीयमानातिरिक्तेत्यर्थः, 'वाक्ये' प्रत्यक्षसिद्धवाक्ये, 'वेदत्वाभावनिश्चयादिति, तथाच वेदस्य नित्यत्वासत्त्वमनायातमिति भावः । यद्यपि निश्चायकं प्रमाणं दुर्वाच्यं तथापि पूर्व्वपूर्व्वेषां वाक्यमेव तथेत्यभिप्रायः(१) ।

मानमिति भावः । न च स्मृतावतिप्रसङ्गः, अनपेक्षेति विशेषणादित्याशयः । 'नाध्ययनेति अदृष्टहेत्वध्ययनविषयत्वमित्यर्थः । 'तदभावादिति, न हि तादृशानुपूर्व्वीविशिष्टः केनचित्तथापाद्यत इति भावः । 'अनभ्युपगमादिति, देवदत्तप्रभवत्वाद्यनुमापकजातिभिः सङ्करप्रसङ्गादिति भावः । यद्यपि शब्दतदुपजीवीत्यादिरूपवेदत्वानुमाने नोक्तदोषस्तथापि वेदस्य नित्यानुमेयत्वविवादे वेदत्वस्य तथात्वसाधने अर्थान्तरमिति तात्पर्य्यं, इति व्याख्यान्तरम् ।

नानुमेयं बाधात् विशिष्य पक्षाप्रसिद्धेश्च धर्मवेदना-जनकत्वञ्च वेदत्वं नानुमेयं तज्जनकत्वस्य प्रत्यक्षत्वात्, नाध्ययनविषयत्वं तदभावात्, न जातिरनभ्युपगमा-दिति ।

'अतएवेति, विवृणोति, 'बाधादिति, 'विशिष्येति, व्याप्यवत्त्वेनेत्यर्थः; कीदृशञ्च वेदत्वं तच्चानुमेयमित्याह, 'धर्मेति धर्मज्ञानजनकत्वमि-त्यर्थः। न च निषेधवाक्याव्याप्तिः तस्य धर्माबोधकत्वादिति वाच्यं। धर्मपदस्यापूर्व्वमात्रपरत्वात् तस्यापि निषेधापूर्व्वबोधकत्वात् । न च स्मृतावतिप्रसङ्गः, अपौरुषेयत्वस्य प्रयोगोपाधित्वात् । न च स्तोमे-ऽव्याप्तिः तस्यासत्त्वादिति ध्येयं। 'प्रत्यक्षत्वादिति उपनयसहकारेण मनोवेद्यत्वादित्यर्थः, तथाच सिद्धसाधनात्रानुमानमिति भावः । 'अध्ययनेति अदृष्टविशेषजनकाध्ययनविषयत्वमित्यर्थः, यथाश्रुतस्या-तिप्रसक्तत्वेन वेदरूपत्वासम्भवात् अध्ययनविषयत्वमात्रस्य प्रत्यक्षसिद्ध-त्वेन 'तदभावादित्युत्तरग्रन्थासङ्गतेश्च । बाधमाह, 'तदभावादिति, 'अनभ्युपगमादिति त्वया गुणगतजातेरनभ्युपगमात् कत्व-खत्वादिना जातिसाङ्कर्य्याच्चेति भावः ।

भट्टास्तु स्मृत्याचारानुमितो वेदः इदानीमप्यत्राध्ययनगोचरो न त्वन्यत्रेति वेदः प्रबुद्ध एव न तु नित्यानुमेयो न वा उच्छन्न-इत्याहुः । तद्वत् गौरवात्प्रमाणाभावाच्चेति द्रष्टव्यं ।

स्यादेतत् स्मृत्याचारयोर्वेदमूलत्वे तयोश्छेदादिविवादस्तदेव त्वसिद्धं, तथा हि वेदसमानार्था महाजनपरिगृहीता च स्मृतिः स्वार्थोपस्थित्यनन्तरं स्मृत्यर्थानुभावकवेदानुमाने लिङ्गं तथाच प्राथम्यात् साध्यप्रसिद्ध्यर्थमुपजीव्यत्वाच्च स्मृतेरेवापूर्व्वादिवाक्यार्थज्ञानमस्तु किं वेदेन तदर्थस्य स्मृतित एव सिद्धेः अपूर्व्वस्यापि

तटस्थः शङ्कते, 'स्यादेतदिति,[१] 'वेदेति वेदसमानार्थकत्वेनाभिमतेत्यर्थः, 'लिङ्गमिति पक्षीभूय तदनुमानप्रयोजिकेत्यर्थः, तादात्म्येन स्मृतिरेव वा लिङ्गमित्याशयः, 'प्राथम्यादिति प्रथमं स्मृतेः स्मृत्यर्थस्य ज्ञानव्यञ्जकोपस्थितिकत्वादित्यर्थः, 'साध्यप्रसिद्ध्यर्थमिति स्मृतिज्ञानं विना स्मृतितः साध्यघटकीभूतस्मृत्यर्थज्ञानासम्भवादिति भावः। 'तदर्थस्येति दृष्टसाधनत्वादिज्ञानद्वारा वेदप्रयोजनस्य प्रवृत्त्यादेरित्यर्थः, किञ्च उक्तरूपेणानुमितवेदार्थप्रत्यये स्मृतिजज्ञानमात्रस्य ज्ञापकत्वेन वेदस्यानुवादकतापत्तिरित्याह, 'अपूर्व्वस्यापीति अपूर्व्वस्य यदि वेदैकगम्यत्वं स्यात्तदा वेदस्य स्मृतितो ज्ञातमात्रज्ञापकत्वं न स्यान्नचैवं, किन्तु शब्दैकगम्यत्वमतः 'स्मृतितो ज्ञातस्य' स्मृतिज्ञातमात्रस्य ज्ञापकत्वेनेत्यर्थः।

---

(१) तटस्थः प्रत्यवतिष्ठते, 'स्यादेतदिति, 'तदर्थस्येति वेदप्रयोजनस्य प्रवृत्त्यादेरित्यर्थः, वेदं विनापि अपूर्व्वोपस्थितावपूर्व्वत्वव्याघात इत्यत आह, 'शब्दैकेति, न तु शब्दविशेषवेदैकवेद्यत्वं, गौरवादिति भावः। ननु वेदं

शब्दैकगम्यत्वेन स्मृतितोऽज्ञातस्य ज्ञापकत्वेनानुवादकतापत्तेश्च, सा च स्मृत्यन्तरादित्यनादिरेव स्मृतिधारावश्यकी। अन्यथा मनुस्मृतेः पूर्व्वन्तवापि वेदानुमानं न स्यात्। सर्व्वा च स्मृतिः स्मृतिजन्यवाक्यार्थप्रमाजन्यत्वेन महाजनपरिगृहीतत्वेन च प्रमाणमिति नान्यपरम्परा, प्रत्यक्षा च स्मृतिः स्मृतिमूलं नानुमिता अनुमि-

---

उपाध्यायास्तु ननु स्मृतितो यदि अपूर्व्वादिवाक्यार्थज्ञानं तदा अपूर्व्वस्य वेदैकगम्यत्वमायातमित्यत आह, 'अपूर्व्वस्यापि शब्दैकगम्यत्वेनेति, तथाच वेदैकगम्यत्वमेव असिद्धमिति भावः। तृतीयान्तं स्वतन्त्रो ग्रन्थः, दूषणान्तरमाह, 'स्मृतित इतीत्यादिः।

'अनुवादकतापत्तेश्चेति, वेदस्येत्यादिः। ननु वेदमन्तरेण मन्वादिस्मृतिरेव कथं भविष्यति वाक्यप्रयोगं प्रति वाक्यार्थज्ञानस्य हेतुत्वादित्यत आह, 'सा चेति, प्रलयादिकं नास्तीति भावः,। 'तवापीति नित्यानुमेयतावादिनस्तवेत्यर्थः, परोक्षीभूतस्मृत्यन्तराभावादिति भावः। नन्वेवं वेदामूलकत्वे स्मृतानप्रामाण्यशङ्का स्यादित्यत आह, 'सर्व्वा चेति, 'प्रमाणं' निश्चितप्रामाण्यकं। न चैवं मूलभूततावत्स्मृतिकल्पनापेक्षया च एकवेदकल्पनैव लघीयसीति

विना मूलाभावे स्मृतिरेव न स्यादित्यत आह, 'सा चेति, प्रलयादिकं नास्तीत्यभिमानः। उत्पादकमुक्त्वा प्रामाण्यज्ञापकमप्याह, 'महाजनेति, मूलं स्मृतिरतीन्द्रिया चेत् तदा किमपराद्धं नित्यानुमेयवेदेनेत्यत आह,

तवेदवक्तस्याननुभावकत्वात्। वेदार्थस्मृतितामसिद्धिस्तु प्रत्यक्षवेदमूलस्मृतिसाहचर्य्येण भ्रमात् प्रत्यक्षवेदाबोधितलोभ-न्यायमूलस्मृताविव तान्त्रिकाणां लिङ्गाभासजन्यवेदमूलत्वभ्रमाद्वा भवन्ती न सम्भवन्मूलान्तराणां वेदमूलकत्वं कल्पयति। अथ स्मृतिरिव तद्वेदमूलकत्वप्रसिद्धिरपि महाजनपरिगृहीता एवञ्च सा वेदमूलत्वनिबन्धना अविगीतमहाजनपरिगृहीतवेदमूलत्वप्र-

---

बाध्यं। सिद्धान्तेऽस्य बोध्यत्वात्। स्मृतिरपि नित्यानुमेयैव स्मृतिमूलमस्त्वित्यत आह, 'प्रत्यक्षा चेति, कथं तर्हि तस्य वेदसमानार्थकत्वप्रसिद्धिरित्यत आह, 'वेदार्थेति, 'प्रसिद्धिः' व्यवहारः, 'वेदाबोधितेति वेदाबोधितार्थकेत्यर्थः, प्रत्यक्षभ्रममुक्त्वा आनुमानिकं तमाह, 'लिङ्गेति स्मृतित्वादिलिङ्गाभासजन्यवेदमूलकत्वभ्रमादित्यर्थः। ननु महाजनपरिगृहीततया वेदमूलकत्वप्रसिद्धेर्भ्रममूलकत्वकल्पनमशक्यमिति शङ्कते, 'अथेति, 'महाजनेति, 'परिग्रहोऽत्र प्रामाण्यनिश्चयो- बोध्यः, 'वेदमूलकत्वेति वेदमूलकत्वयथार्थधीजन्येत्यर्थः, 'अविगीतेति, अविगीतवेदमूलकत्वप्रसिद्धित्वात् महाजनपरिगृहीतवेदमूलकत्वप्रसिद्धित्वात् इति हेतुद्वये तात्पर्य्यं, अन्यथा 'अविगीतेत्यस्य वैयर्थ्या-

---

'प्रत्यक्षा चेति, तर्हि वेदमूलत्वेन महाजनानां कथं तत्प्रसिद्धिरित्यत- आह, 'वेदार्थेति, 'साहचर्य्येणेति प्रत्यक्षभ्रमाभिप्रायं, 'भ्रमात्' वेदमूलकत्वभ्रमादित्यर्थः, 'वेदाबोधितस्वं' वेदाबोधितार्थत्वं, 'लिङ्गेति विवादास्पदं स्मृतिर्वेदमूला स्मृतित्वात् इति भ्रमादित्यर्थः। ननु [illegible]

सिद्धत्वात् प्रत्यक्षवेदमूलस्मृतौ तत्प्रसिद्धिवत्, एवं वेदार्थताप्रसिद्धिरपि। अन्यथा महाजनपरिगृहीतानादरे वेद-स्मृत्योरपि प्रामाण्यं न स्यादिति चेत्, न, यूपहस्त्यादिस्मृतेस्तत्प्रसिद्धौ व्यभिचारात्, कृपणलोभादित एव तत्सम्भवात् विचारकाणां विप्रतिपत्तेश्च सच तत्प्रसिद्धौ विगानं महाजनानामिति चेत्, न,

पत्तेः, अविगीतत्वं वेदमूलकत्वप्रमानधीनत्वेन शिष्टनिश्चीयमानत्वं, महाजनपरिगृहीतत्वञ्च महाजनैर्निर्णीतप्रामाण्यकत्वमिति हेत्वोर्भेदः, 'तत्प्रसिद्धिवदिति, 'वेदार्थतेति वेदसमानार्थताप्रसिद्धिरपीत्यर्थः, वेदसमानार्थतायथार्थधीजन्येति शेषः। अनुकूलं तर्कमाह, 'अन्यथेति, 'अन्यथेत्यस्यैव विवरणं 'महाजनपरिग्रहानादर इति[1]। 'युपेति युपे युपे हस्तिनो बद्ध्वा इतिलोभादिमूलकस्मृतावित्यर्थः, 'तत्प्रसिद्धौ' वेदमूलकत्वप्रसिद्धौ। शङ्कते, 'कृपेति, 'तत्सम्भवात्' इत्यादेः स्मृतिसम्भवात्, 'विगानं' वेदमूलकत्वप्रमाधीनत्वेन निश्चयाभावात् प्रा-

(१) महाजनपरिगृहीतानादर इत्यत्र महाजनपरिग्रहानादर इति पाठान्तरं।

कृत इत्यत आह, 'सम्भवन्मूलेति, तथाचासम्भवन्मूलान्तरत्वमेव तत्रोपाधिरित्याभासत्वमेवेति भावः। 'एवमिति वेदार्थताप्रसिद्धिः वेदार्थत्वनिबन्धना तादृशवेदार्थताप्रसिद्धित्वादित्यर्थः, 'अन्यथेत्यस्य विवरणं 'महाजनपरिग्रहानादर इति। गूढाभिसन्धिराह, यूपेति, असम्भवन्मूलान्तरत्वमविगीतत्वं विचारकाणां तत्त्वेन प्रतिपत्त्यविषयत्वं वा लिङ्गविशेषणमित्याशङ्क्य, 'कृपणेति, अभिसन्धिमुद्घाटयति, 'अथापीति, तथाच स्वरूपासिद्धिरिति

अत्रापि मूलान्तरसम्भवाद्विप्रतिपत्तेश्च विनाशमेव तेषां। अतएव स्मृतीनां न्यायमूलत्वे सम्भवति वेदमूलत्वप्रसिद्धावपि न वेदमूलत्वं। न च वेदमूलेयमिति कृत्वा स्मृतेर्महाजनपरिग्रहात् तन्मूलत्वं, वेदमूलेयमिति प्रथमं ज्ञातुमशक्यत्वात् शक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेन प्रकारेण महाजनपरिग्रहः, असिद्धेः, मन्वादिस्मृतित्वेन पूर्व्वमहाजनपरिग्रहेणोत्त-

---

माण्यनिश्चयाभावः, 'तेषामिति, तथाच हेतुद्वयमेव स्वरूपासिद्धमिति भावः, 'प्रसिद्धावपि' प्रसिद्धिसत्त्वेऽपि। नन्विदं स्मृतिर्वेदमूला वेदमूलेयमिति कृत्वा महाजनपरिगृहीतत्वादिति तदनुमेयमित्याशङ्कते, 'न चेति, 'परिग्रहः' निश्चयः, 'तन्मूलत्वं' वेदमूलत्वं। ननु किं वेदमूलत्वं तद्विशेष्यक-वेदमूलत्वप्रकारकमहाजननिश्चयविषयत्वं, वेदमूलकत्वप्रकारकमहाजननिश्चयविशेष्यत्वमात्रं वा, आद्ये वेदमूलकत्ववदेतदित्येव प्रथमं दुर्ग्रहमित्याह, 'वेदेति, प्राथम्यं तदनुमानापेक्षया, तथाच हेतोरज्ञानरूपासिद्धिरिति भावः। अन्त्यमाशङ्क्य निराकरोति, 'न चेति, 'परिग्रहः,' निश्चयमूलवेदकत्वसाधक इति शेषः, 'असिद्धेरिति, तादृशनिश्चयस्यैवात्रानभ्युपगमादिति भावः। ननु तदसिद्धौ प्रामाण्यनिश्चयासम्भवेन कथं महाजनानां तदर्थानुष्ठानं

भावः। न चाविगीतत्वं वेदाभिधिद्धत्वमिति नासिद्धिरिति वाच्यं। तथा सति न्यायादिमूलकस्मृतेस्तत्प्रसिद्धौ व्यभिचारापत्तेः। वस्तुतोऽप्रयोजकत्वं बोध्यं। अज्ञानरूपासिद्धिमुक्त्वाथ स्वरूपासिद्धिमाह, 'न चेति। आचारेऽपि

होलाकेषां परिग्रहादनुष्ठानाद्युपपत्तेः, एवं होलाकाद्याचारेऽपि वेदलिङ्गेनैव कर्त्तव्यताज्ञानोपपत्तेः किं वेदेन, तदर्थस्य लिङ्गादेवोपपत्तेः। अविगीतालौकिकविषयकशिष्टाचारस्य वेदमूलत्वदर्शनात् वेदानुमाने चाविगीतशिष्टाचारत्वेन भोजनाद्याचारोऽपि वेदमूलः स्यात्, वेदं विनापि तत्कर्त्तव्यताधीसम्भवात् न तदर्थं वेद-

वेदमूलकत्वनिश्चयादेव प्रामाण्यनिश्चय इत्यत आह, 'मन्वादीति, मन्वादिस्मृतित्वेन पूर्व्वमहाजनपरिग्रहेण चेति हेतुद्वयं, अत एव क्वचिच्चकारसम्बलितोऽपि पाठः। 'उत्तरोत्तरेषां' महाजनानां, 'परिग्रहात्' प्रामाण्यनिश्चयात्, सर्व्वः स्मृतिवदाचारोऽपि न वेदमनुमापयतीति व्यवस्थापयति, 'एवमिति, 'होलाकाद्याचारेऽपि' होलाकादिक्रियायामपीत्यर्थः, 'वेदलिङ्गेन' अविगीतशिष्टाचारविषयत्वेन, 'तदर्थस्येति कर्त्तव्यतादिज्ञानद्वारा वेदप्रयोजनस्य प्रवृत्त्यादेरित्यर्थः, 'अविगीतेति, 'अविगीतत्वं बलवदनिष्टाननुबन्धित्वं परदारादिप्रवृत्तौ व्यभिचारादिवारणाय, 'अलौकिकत्वं प्रत्यक्षदृष्टेष्टसाधनताकविषयान्यत्वं भोजनाद्याचारे व्यभिचारवारणाय, 'शिष्टेति, 'शिष्टत्वं इष्टसाधनतांशे भ्रमरहितत्वं चैत्यवन्दनाद्याचारे व्यभिचारवारणाय, एवमलौकिकत्वविशेषणमपि त्यज्यतां गौरवादित्यत आह, 'अविगीतेति, 'न तदर्थं वेद इतीति, तथाचा-

वेदमूलत्वं निरस्यति, 'एवमिति, 'तुल्यमिति, तथाचाप्रयोजकत्वमुभयत्रेति भावः। सिद्धसाधनमाह, 'अनुमानस्येति, 'अन्यथा' सापेक्षस्याप्रामाण्ये, 'न

इति इहापि तुल्यं। आचार-कर्त्तव्यतानुमानयोरेकादित्वेनाचाराणां कर्त्तव्यत्वानुमानमूलकत्वात् नान्धपरम्परा। न च पूर्व्वानुमानसापेक्षमुत्तरानुमानमिति स्वतन्त्रप्रमाणमूलकत्वाभावात् सा, व्याप्ति-पक्षधर्म्मतासत्त्वेन सर्वेषां स्वतन्त्रप्रमाणत्वात्। नापीतरप्रामाण्याधीनं सर्व्वस्य प्रामाण्यमिति न निरपेक्षत्वं, प्रत्यक्षादेरपि तथात्वापत्तेः। एतेन विवादपदमाचारो निरपेक्षप्रमाणमूलकः अविगीतमहाजनाचारत्वात् प्रत्यक्षवेदमूलाचारवदिति निरस्तं। अनुमानस्य निरपेक्ष-

---

प्रयोजकत्वमिति भावः। 'नान्धपरम्परेति न भ्रममूलकत्वप्रसङ्ग इत्यर्थः, 'सा' अन्धपरम्परा, स्वातन्त्र्यं हि प्रमारूपे फले जननीये प्रमाणान्तरनिरपेक्षत्वं, स्वतोऽपि तत्प्रामाण्यानधीनप्रामाण्यकत्वं वा, आद्यं प्रकृतेऽप्यस्तीत्याह, 'व्याप्तीति, 'सर्व्वेषामिति कर्त्तव्यतानुमानानामित्यर्थः, अन्त्यं निरस्यति, 'नापीति, 'सर्व्वस्य' कर्त्तव्यतानुमानस्य, 'तथात्वेति अस्वातन्त्र्यापत्तेरित्यर्थः, प्रत्यक्षादिप्रामाण्यस्यापि अनुमानप्रामाण्याधीनसिद्धिकत्वादिति भावः। अधीनत्वस्यापि दुर्वचत्वाच्चेत्यपि बोध्यं। 'अविगीतेति, अत्राविगीतत्वं बलवदनिष्टाननुबन्धित्वं, महाजनत्वं इष्टसाधनतांशे भ्रमशून्यत्वं, प्रमारूपे फले जननीये प्रमाणान्तरानपेक्षत्वं स्वातन्त्र्यमित्यभिप्रायेणाह, 'अनुमानस्येति,

---

चेति, आचारो वेदमूलकः वेदमूलकत्वेन प्रसिद्धेरित्यर्थः। अत्र प्रामाणिकप्रसिद्धिर्विवक्षिता प्रसिद्धिमात्रं वा, आद्ये दोषमाह, 'असिद्धेरिति अन्यतरा-

प्रमाणत्वात् प्रमाणमूलत्वेनैव हेतोरुपपत्तेः निरपेक्ष-त्वस्य गौरवेणाप्रयोजकत्वाच्च । न च सापेक्षत्वेन न प्रमाणता, व्याप्त्यादिसत्त्वात् । अन्यथा प्रमाणे नैरपे-क्षस्य वैयर्थ्यात् । न चाचारे वेदमूलत्वप्रसिद्धेस्तदनु-मानं, असिद्धेः व्यभिचारादन्यथोपपत्तेश्च । न च वेद-मूलत्वेनैव महाजनपरिग्रहात्तथा, न हि वेदमूलोऽय-

मयाच सिद्धसाधनमिति भावः । 'हेतोः' अविगीतमहाजनाचारत्वस्य । 'सापेक्षत्वेन' पूर्व्वपूर्व्वानुमानसापेक्षत्वेन, 'न प्रमाणता', उत्तरोत्तरानु-मानस्येति शेषः, 'अन्यथा' सापेक्षस्य प्रमाणत्वाभावे, 'नैरपेक्षस्य' निर-पेक्षत्वविशेषणस्य, प्रमाणपदेनैव सापेक्षस्य वारणादिति भावः । 'न चेति अयमाचारो वेदमूलकः वेदमूलकत्वप्रसिद्धत्वादिति प्रकारेणेत्यर्थः, 'असिद्धेरिति, तादृशप्रसिद्धेरेव तैरनभ्युपगमादिति भावः । 'व्यभि-चारादिति लोभमूलके आचारे व्यभिचारादित्यर्थः, अप्रयोजकता-माह, 'अन्यथेति न्यायादिमूलकाचारवदन्यथोपपत्तेर्न वेदमूलत्वमि-त्यर्थः । 'परिग्रहात्' निश्चयात्, 'तथा' वेदमूलत्वं, पूर्व्वं स्मृतेः स्मृति-मूलत्वे इदमाशङ्कितं इदादीनामाचारस्थले इति न पौनरुक्त्यं । पूर्व्वं वेदाज्ञानरूपासिद्धिमाह, 'न हीति । ननु वेदमूलकत्वप्रकारक-

सिद्धेरित्यर्थः, अन्ये त्वाहुः, 'व्यभिचारादिति, न्यायादिमूलकाचार इति शेषः । 'अन्यथेति, न्यायादिमूलकाचारवन्मूलान्तरसम्भवात्तथाचाप्रयोजकत्व-मिति भावः । पूर्व्ववदसिद्धिमाह, 'न हीति । 'न चेति वेदमूलत्वेन महाजन-परिगृहीतोऽयमिति ज्ञात्वा महाजनपरिग्रहमात्रस्यैव हेतुत्वेऽधिकस्य व्यर्थ-

मिति कृत्वा महाजनानां तत्परिग्रहः, वेदमूलत्वस्य प्रथमं ज्ञातुमशक्यत्वाच्छक्यत्वे वा किमनुमानेन। न च वेदमूलत्वेनैव महाजनपरिगृहीतोऽयमाचार इति ज्ञात्वा तत्र महाजनपरिग्रहः, गौरवादसिद्धेश्च। पूर्व्व-महाजनपरिग्रहादेवोत्तरोत्तरेषां परिग्रहादनुष्ठानोपपत्तेः। तादृशस्मृत्याचारयोर्वेदमूलत्वेन व्याप्तेर्वेदसिद्धि-

---

महाजननिश्चयविषयत्वेन महाजननिश्चयो हेतुरस्तु इत्यत आह, 'न चेति, 'महाजनपरिग्रहः', परिग्रहे हेतुरिति शेषः, 'गौरवादिति मूलभूतवेदकल्पने गौरवादित्यर्थः, तथाचाप्रयोजकत्वमिति भावः।

केचित्तु वेदमूलत्वेन महाजनपरिगृहीतत्वस्यैव हेतुत्वे द्वितीय-महाजनपरिग्रहस्य वैयर्थ्यादित्यर्थ इत्याहुः।

'असिद्धेश्चेति तादृशनिश्चयस्यैवासिद्धेरित्यर्थः। ननु महाजन-प्रवृत्तावेव तद्विषयत्वेन कर्त्तव्यताज्ञानं स्यात् सैव च कथं स्यात्तस्य कर्त्तव्यताज्ञानाभावादित्यत आह, 'पूर्व्वेति पूर्व्वपूर्व्वमहाजनाचार-विषयत्वेनैवेत्यर्थः, 'उत्तरोत्तरेषां परिग्रहादिति उत्तरोत्तरमहा-जनानां कर्त्तव्यतानिश्चयादित्यर्थः, 'अनुष्ठानं' प्रवृत्तिः। 'तादृशेति अविगीतादिरूपेत्यर्थः। यद्यपि आचारस्थले इदमाशङ्कितं तथापि

त्वादित्यर्थः, वेदमूलत्वकल्पने गौरवं तथाचाप्रयोजकत्वमित्यन्ये। 'असिद्धे-रिति वेदमूलत्वज्ञानं विनापि परिग्रहस्योपपत्तेस्तद्घटितहेतोरसिद्धेरित्यर्थः। तदेव स्फुटयति, 'पूर्व्वेति, पूर्व्वशङ्कितमप्युपाधिदानाय शङ्कते, 'तादृशेति। पूर्व्वपूर्व्वस्मृतेरुत्तरोत्तरस्मृतिरित्यादिक्रम उक्त इदानीमाचारात् स्मृतिः

रिति चेत्, न, असम्भवन्मूलान्तरत्वस्योपाधित्वात्। अन्यथा लोभ-न्यायमूलस्मृतेरपि वेदमूलत्वप्रसङ्गः। अस्तु वा स्मृत्याचारयोरनादित्वं। न चाचारात् स्मृतिः स्मृतेराचार इत्यन्धपरम्परा मूलभूतप्रमाणाभावात् इति वाच्यं। स्मृत्याचारयोरुभयोरपि प्रमाणत्वात्। अन्यथा न ततो वेदानुमानमपीति। उच्यते। प्रलये पूर्व्वस्मृत्याचारयोरुच्छेदात् सर्गादौ नित्यसर्व्वज्ञेश्वरप्रणीतवेदमूलत्वं स्मृत्याचारयोः। अन्यथा मूलाभावे-

---

दूषणान्तरदानाय तथाप्युन्नीतमिति ध्येयं। 'असम्भवदिति, नन्विदं प्रत्यक्षवेदमूलकस्मृतिमूलतो साध्याव्यापकं। न च वेद-तदुपजीविप्रमाणातिरिक्तप्रमाणमूलकत्वमर्थः, साधनव्यापकत्वादिति, नैवं, साधनव्यापकतासंशयेन सन्दिग्धोपाधित्वसम्भवात् प्रत्यक्षवेद-मूलकत्वं वा तस्यार्थः, 'अन्यथेति अलौकिकत्वं विहाय अविगीत-महाजनपरिगृहीतस्मृतित्वेन हेतुत्व इत्यर्थः, पूर्व्वपूर्व्वस्मृतेरुत्तरोत्तर-स्मृतिरिति पूर्व्वमुक्तं इदानीमाचारात् स्मृतिः स्मृतेराचार इत्याह, 'अस्तु वेति। नैयायिकः समाधत्ते 'प्रलय इति, 'वेदमूलत्वमिति वेदजन्यज्ञानजन्यत्वमित्यर्थः, तदानीं स्मृत्याचारान्तरयोरभावादिति भावः। ननु मन्वादीनां पूर्व्वसर्गानुभूततत्तदर्थस्मरणादेवाचारादे-

---

स्मृतेराचार इत्याह, 'अस्तु वेति, 'उच्छेदादिति, नित्यानुमेयवेदवादिमतेऽपीदं बोध्यं। 'मन्वादीनामिति तथाच तत्प्रणीतस्मृतिरेव तन्मूलमस्तु किं वेदेनेत्यर्थः।

नान्धपरम्पराप्रसङ्गः। न च मन्वादीनामतीन्द्रियार्थदर्शित्वं, तदुपायश्रवणादेस्तदानीमभावात्। पूर्व्वसर्गसिद्धसर्व्वज्ञमन्वादय एव ते इति चेत्, न, प्रमाणाभावात्। स्मृत्याचारयोः प्रमाणमूलत्वमेव तत्कल्पकमिति चेत्, न, प्रतिसर्गं तेषामन्यान्यत्वकल्पने गौरवमित्येकस्यैव नित्यसर्व्वज्ञस्य कल्पनात्। न च स्मृतय एव तत्प्रणीताः, तासां मन्वादिकर्तृकत्वेन स्मृतौ बोधनात्

रुपपत्तेः किं वेदेनेत्यत आह, 'अन्यथेति सर्गादौ आचारादिजनकतज्ज्ञानस्य वेदजन्यत्वाभावे इत्यर्थः, 'मूलाभावेनान्धपरम्परेति तस्मिन्नज्ञाते अनाश्वासप्रसङ्ग इत्यर्थः, वेदमूलकत्व-स्मृतिमूलकत्व-शिष्टाचारमूलकत्वादिज्ञानानामेव विश्वासमूलत्वादिति भावः। 'न च मन्वादीनामिति, तथाच प्रत्यक्षमूलत्वात् तस्मिन् ज्ञाने नाप्रामाण्यशङ्केति भावः। 'पूर्व्वसर्गेति पूर्व्वसर्गसर्व्वज्ञत्व-वर्त्तमानयोगज-धर्म्मजनितविश्वविषयसाक्षात्कारवन्त इत्यर्थः, 'प्रमाणाभावादिति मन्वादीनां सर्व्वज्ञत्वे इति शेषः। 'तेषां' मन्वादीनां, 'नित्य-सर्व्वज्ञस्येति नित्यसर्व्वविषयकज्ञानवतः कल्पनादित्यर्थः, तद्वचनादेव सर्गादौ स्मृत्याचाराविति भावः। 'तत्प्रणीताः' ईश्वरप्रणीताः, तथाच किं वेदेनेति भावः। 'स्मृताविति "वक्तारो धर्म्मशास्त्राणां मनु-

---

'एकस्यैवेति, तथाच मन्वादीनां सर्व्वज्ञत्वश्रुतिः शाब्दसर्व्वविषयकज्ञानवत्त्वविषयेति भावः। 'तासामिति, 'स्मृताविति "वक्तारो धर्म्मशास्त्राणां

स्मृतावेव स्मृतीनां वेदमूलत्वस्मरणाच्च । एवञ्च स्मृत्याचारयोर्महाजनपरिग्रहाद्वेदमूलत्वसाधकमपि भगवति प्रमाणं। अतएव "प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयते" इत्यागमोऽपि । एवञ्च पूर्व्वं प्रत्यक्षमूलावेव स्मृत्याचारौ, अग्रे च कालक्रमेणायुरारोग्य-बल-श्रद्धा-ग्रहण-धारणादिशक्तेरह्रसरह्रसपचीयमानत्वात् तदध्ययनविच्छेदेन शाखोच्छेदात् स्मृत्याचाराभ्यामेव कर्त्त-

---

र्विष्णु-र्यमोऽङ्गिराः"। इत्यादिस्मृतावित्यर्थः, 'स्मृतावेवेति "यः कश्चित् कस्यचिद्धर्म्मो मनुना परिकीर्त्तितः। स सर्व्वोऽभिहितो वेदे" इत्यादि स्मृतावित्यर्थः, 'भगवतीति परम्परया भगवति प्रमाणमित्यर्थः, 'अतएवेति यत एव प्रलये विच्छेदे भगवता वेदः प्रणीयते अतएवेत्यर्थः, 'उपसंहरति, 'एवञ्चेति, 'प्रवृत्तिरिति, आनुपूर्व्यादिविशिष्टस्य वेदस्यानुमातुमशक्यत्वात् तस्याननुमापकत्वादिति भावः। नन्विदानीमाचारलिङ्गकज्ञानादेव प्रवृत्तिस्तर्हि सर्गादावपि तथा-

---

मनुर्विष्णुर्यमोऽङ्गिराः"। इत्यादि स्मृतावित्यर्थः, 'स्मृतावेवेति "यः कश्चित् कस्यचिद्धर्म्मो मनुना सम्प्रकीर्त्तितः। स सर्व्वोऽभिहितो वेदे" इत्यादावित्यर्थः। 'अतएवेति यतः स्मृत्याचारादेरीश्वरप्रणीतोच्छिन्नवेदमूलत्वं तत एवेत्यर्थः। उपसंहरति, 'एवञ्चेति, 'प्रवृत्तिरिति, आनुपूर्व्यादिविशिष्टवेदस्यानुमातुमशक्यत्वेन तस्याननुभावकत्वादिति भावः। 'बहुव्यापारेति, एतच्चोपलक्षणं वस्तुत ईश्वराचारसम्भवेऽपि तत्र स्वेष्टसाधनताद्युपसाध्यप्रसिद्ध्यभावेन वृद्धान्तमूलव्याप्त्या नाचारान्तरसम्भव इत्याहुः ।

प्यतामधिगत्य प्रवृत्तिः। नन्वेवं स्मृतिरस्तु वेदमूला मङ्गलाद्याचारस्त्वीश्वरादेव भविष्यति घट-लिप्यादि-सम्प्रदायवदिति चेत्, न, बहुव्यापारघटितस्य तत्तदाचारस्य गुरुत्वेन [1]मङ्गलमाचरेदित्यादिवाक्यस्यैव लाघवेन कल्पनात्। न च मङ्गलादिपदशक्तिग्रहार्थमाचार आवश्यक इति वाच्यं। स्वर्गादिपदवद्वाक्यार्थे तदुपपत्तेः। अतएव यत्र वचनमात्रात् परप्रतिपत्तिस्तत्र

स्त्विति शङ्कते, 'नन्वेवमिति, 'मङ्गलाद्याचारः' आद्यमङ्गलाचारः, 'ईश्वरेति ईश्वरस्याचारादित्यर्थः, 'घट-लिप्यादीति, यद्यपि स्मृतिरप्याचारवदीश्वराचारमूला सम्भवति तथाप्यदृष्टार्थकस्मृतेर्वेदमूलकत्वानुरोधेन स्मृतौ नाशङ्कितं। 'बहुव्यापारेति वाक्यापेक्षया बहुतरकायादिव्यापारसाध्यस्येत्यर्थः, 'तत्तदाचारस्येति पूजादिरूपमङ्गलादिक्रियाया इत्यर्थः, 'मङ्गलमिति, तत्रानुपूर्व्वीविशेषोऽविवक्षितः तदनुमानस्यासम्भवात्, 'शक्तिग्रहार्थमिति, ईश्वरस्यैव प्रयोज्य-प्रयोजकदेहं परिगृह्य प्रथमं शक्तिग्राहकत्वादिति भावः। 'स्वर्गादिपदवदिति, यथा स्वर्गादिपदस्य "यन्न दुःखेन सम्भिन्नमित्यादिवाक्यस्थस्य शक्तिग्रहस्तथा मङ्गलादिपदस्यापि तदुपपत्तेरिति, तथाच वाक्यघटकीभूतस्य शक्तिग्रहः प्रकारान्तरादिति भावः। मङ्गलपदं नति-स्तुत्यादिपरं, 'अतएवेति यत एव व्यापारापेक्षया

(१) 'मङ्गलमाचरेदिति देवतास्तुत्यादिकमाचरेदित्यर्थः, तदपि वास्तवाभिप्रायं, वस्तुत इदानीमानुपूर्व्यमिच्छय एव वेदत्वेनैव तदनुमानमिति। 'अतएवेति वाक्यापेक्षया आचारस्य गुरुत्वादेवेत्यर्थः। नन्वस्तु वाक्यस्य

चाचारः परीक्षकाणां, तस्य च वेदत्वं नेश्वरप्रणीतत्वेन शक्तिग्रहणार्थतद्वचने व्यभिचारात्, किन्तु तादृशाचारस्य वेदमूलत्वनियमादिति। स्यादेतत्, प्रलये सत्येवमेव तत् स एव तु नास्ति प्रमाणाभावात् इति

वाक्यस्य लघुत्वमत एवेत्यर्थः, 'परीक्षकाणां' पण्डितानां। ननु सर्गादौ सत्याचाराद्यन्यथानुपपत्त्या मूलभूतं सिद्धं तस्य वेदत्वं कुतः ईश्वरप्रणीतत्वस्य शक्तिग्रहार्थतद्वचने व्यभिचारादित्यत आह, 'तस्य चेति, 'तद्वचन इति घटमानयेत्यादितद्वाक्य इत्यर्थः, 'किन्त्विति, इदमुपलक्षणं तस्य ईश्वरज्ञानजन्यत्वादेव शब्दजन्यवाक्यार्थज्ञानजन्यत्वं दृष्टार्थकत्वाभावादेव सत्यन्तदलं तथाच किमपर आशङ्क्यते वेदत्वे इत्यादि द्रष्टव्यं। 'प्रलये सतीति काले कार्य्यद्रव्याधिकरणभेदे सतीत्यर्थः, 'एवमेतदिति, 'एतत्' अष्टकादिबोधकं स्मृत्यादिकं, 'एवं' वेदमूलमित्यर्थः, 'स एव' काले कार्य्यद्रव्याधिकरणभेद एव, यथाश्रुते

कल्पनं तथापि तस्य वेदत्वं कुत इत्यत आह, 'तस्य चेति, 'तद्वचनं' घटमानयेत्यादौ, 'किन्त्विति। न चात्राप्रयोजकत्वं तथाच शक्तिग्राहकतद्वचनवत् तन्मूल-तद्वाक्यस्यापि वेदत्वं मास्त्विति वाच्यं। शब्द-तदुपजीवीत्यादिलक्षणाक्रान्तत्वेन तस्य वेदत्वादन्यथाश्वमेधेन यजेतेत्यादेरप्यवेदत्वप्रसङ्गः स्यादिति भावः। उपोद्घातसङ्गतिमाह, 'स्यादेतदिति, 'कालेत्युपलक्षणं कालोपाधि-दिगुपाध्यादिकमपि बोध्यं। एतच्च घटप्रागभावस्याकाशवृत्तितया अर्थान्तरं मा भूदिति बाधस्फोरणाय, तेन कार्य्यद्रव्यानधिकरणत्वेन कार्य्यद्रव्याधिकरणभिन्नत्वस्य विवक्षितत्वात् कपालस्यातथात्वात् पक्ष-

चेत्, न, काल-कपालान्यावृत्तिघटप्रागभावः कार्य्यद्रव्यानाधाराधारः कार्य्यद्रव्यानधिकरणकार्य्याधिकरण-

---

सिद्धसिद्धिव्याघातात्। तथाच कालो न कार्य्यद्रव्यानाधारः तद्वत्ताप्रमित्यविषयत्वादिति फलितं। अत्र सुखादिसिद्धिमाह, 'कालकपालेति, कार्य्यद्रव्यानाधारत्वं कार्य्यद्रव्यानधिकरणवृत्तित्वं तथाच कालादेः सौरालोकादिकार्य्यद्रव्याधारत्वसामान्याभावेन तद्वृत्ति-

---

धर्म्मतावलेन तादृशकालसिद्धिरिति। न च दिशार्थान्तरं तादृशकालासिद्धौ दिशोऽपि तादृप्यासिद्धेः, न हीदानीं कापि दिक् सकलकार्य्यद्रव्यशून्या, तथाच तादृशकालावच्छेदकत्वेनैव दिशोऽपि तादृप्यसिद्धिरिति तत्सिद्धिरप्रत्यूहैव। न च भूतलादिवृत्तित्वेनार्थान्तरं, घटप्रागभावाधिकरणीभूतभूतलादेः कार्य्यद्रव्याधिकरणत्वनियमात् प्रागभावस्य प्रतियोगिसमानदेशत्वात्। न च कालस्यापि कार्य्यद्रव्याधिकरणत्वेन तद्भिन्नत्वाभावाद्बाध इति वाच्यं। अखण्डस्य तथात्वेऽप्येककालोपाधिः तथात्वेन बाधाभावात्। घटप्रागभावः एतत्कालीनघटस्य प्रागभावः तेन खण्डप्रलयसिद्धिः, अतएव प्रागित्यपि, एकदैव सर्व्वब्रह्माण्डनाश इति मतेनेदं। केचित्तु एतद्ब्रह्माण्डवृत्तित्वं कार्य्यद्रव्ये विशेषणमित्याहुः। अतएव खण्डप्रलयसिद्धये द्वितीयसाध्ये कार्य्याधिकरणपदं तस्यैव खण्डप्रलयपदार्थत्वात्। यत्तु महाप्रलयेनार्थान्तरवारणाय 'तदिति, तन्न, प्रागभावस्य महाप्रलयवृत्तित्वाभावादेव तदसम्भवात्, कार्य्याधिकरणत्वञ्च भावकार्य्याधिकरणत्वं, 'अभावत्वादिति। नन्विदं कार्य्यद्रव्याधिकरणान्योन्याभावे व्यभिचारि अन्योन्याभावस्य प्रतियोगितावच्छेदकासमानाधिकरणत्वेन तत्र साध्यासत्त्वादिति चेत्, न, तस्यापि कार्य्यद्रव्यानधिकरणे सिषाधयिषितकाले सत्त्वेन पक्षसमत्वात् अन्यथा नित्यत्वव्याघातात्।

समाद्याधारान्तरं स्यादिति तद्वृत्तित्वे बाधस्फोरणाय पक्षे 'काल-कपालान्यावृत्तिरिति, काल-कपालान्यावृत्तित्वञ्च स्वप्रतियोगिसमवायिनि वृत्तावपि नाश्रयासिद्धिः। यद्यपि कपालस्यापि कालोपाधितया कालान्यावृत्तेरस्यावश्यकं, तथापि शब्द एव कालोपाधिरिति निष्कृष्टमतेनेदं, कपालपदञ्च स्वप्रतियोगिसमवायिपरं, तेनोद्दारीभवत्तादृशकपालान्तरसिद्ध्या नार्थान्तरं। घटध्वंसप्रागभावे बाधवारणाय घटपदं, घटप्रागभावत्वावच्छेदेन च कार्य्यद्रव्यानधिकरणवृत्तित्वसिद्धिरुद्देश्या तेन भाविप्रलयसिद्ध्या नार्थान्तरं, 'खण्डप्रलयसाधनादित्यनुपदं वक्ष्यमाणतया अस्यानुमानस्य खण्डप्रलयसाधकत्वात्, खण्डप्रलये कार्य्यगुणादिसत्त्वान्महाप्रलये प्रागभावासत्त्वात् स्वमते बाधवारणाय साध्ये द्रव्यपदं। न चैवमपि तदानीं ब्रह्माण्डान्तरे कार्य्यद्रव्यसत्त्वाद्बाधः युगपत् सर्व्वब्रह्माण्डप्रलयाभावादिति वाच्यं। कार्य्यद्रव्यस्य एतद्ब्रह्माण्डीयत्वेन विशेषणात्। वस्तुतस्तदानीं ब्रह्माण्डान्तरसत्त्वे मानमेव नास्तीत्यनेनैव तदभावस्यापि साधनात्। कार्य्यद्रव्यानधिकरणत्वञ्च सम्बन्धसामान्येन बोध्यं, अन्यथा संयोगेन समवायेन वा अनधिकरणत्वांशे ध्वंसकालीनध्वंसाधात्मककालवृत्तितया सिद्धसाधनं, कालिकसम्बन्धेन तदंशे जन्यमात्रस्य कालोपाधित्वानङ्गीकर्तृमते कपालवृत्तितया सिद्धसाधनापत्तेः। वृत्तित्वञ्च प्रतियोगिसमवायिनि यादृशविशेषणताविशेषेण प्रागभावस्तादृशविशेषणता-कालिकान्यतरसम्बन्धेन विवक्षितं, अन्यथा कालिकसम्बन्धेन वृत्तित्वाभिधाने तत्रैव प्रागसिद्धेः, संयोग समवायाभ्यां तदभिधाने प्रागभावस्य पक्षत्वे बाधापत्तेः, सम्बन्धसामान्येन

तदभिधाने विशेषणताविशेषेणाकाशादिवृत्तित्वमादायार्थान्तरताऽऽपत्तेः पर्योक्तान्यतरसम्बन्धेन काल-कपालान्यावृत्तित्वस्यैव पक्षविशेषणत्वात्। न चैवमपि कथं प्रलयसिद्धिरिति वाच्यं। कपालस्य कार्य्यद्रव्यानधिकरणभिन्नत्वसम्भवात् पक्षधर्म्मताबलेन कालस्यैव तादृशस्य सिद्धेः। न च कालभिन्नदिग्विशेषसिद्ध्यार्थान्तरं, तदन्यावृत्तित्वविशेषणेनैव तद्वारणादिति। अन्यच्च महाप्रलयपूर्व्वक्षणवृत्तित्वमादायार्थान्तरं प्रलये द्रव्यगुणादीनां क्रमेण नाशाभ्युपगमात् तत्पूर्व्वक्षणस्यापि कार्य्यद्रव्यानधिकरणत्वात्। न च प्रागभावस्य तदुभयवृत्तित्वबाधादेव नार्थान्तरमिति वाच्यं। गुरुणा तस्याविनाशिनोऽभ्युपगमादित्यस्वरसात् साध्यान्तरमाह, 'कार्य्यद्रव्येति, उक्तरीत्या महाप्रलयं तत्पूर्व्वक्षणञ्चादाय अर्थान्तरवारणाय 'कार्य्याधिकरणेति, 'कार्य्यपदञ्च अविनश्यदवस्थविनाशिपरं, तेन ध्वंसं विनश्यदवस्थगुणादिकं वादाय न तद्दोषतादवस्थ्यं। शेषं दर्शितदिशावसेयं।

मिश्रास्तु प्रागभावस्य महाप्रलय-तत्पूर्व्वक्षणवृत्तित्वबाधादेव पूर्व्वसाध्येऽपि महाप्रलय-तत्पूर्व्वक्षणमादाय नार्थान्तरं किन्तु कार्य्यद्रव्यानधिकरणत्वविशिष्टकार्य्याधिकरणत्वस्यैव खण्डप्रलयस्य खण्डप्रलयत्वरूपतया तत्साधनाय द्वितीयसाध्याऽभिधानमित्याहुः(१)।

तदसत्। प्रागभावस्य महाप्रलय-तत्पूर्व्वक्षणवृत्तित्वे बाधवान् कार्य्यद्रव्यानधिकरणत्वे सति प्रागभावत्वस्यैव खण्डप्रलयत्वरूपतया पर्योक्तस्य खण्डप्रलयत्वानात्मकत्वादिति।

---

(१) तन्मतानुसारेणाल्पस्थावान्तरप्रलयपदार्थतया तत्साधनाय विशिष्टं प्रतिज्ञातं कार्य्येति तन्मतमित्युक्तं मिश्रैः।

इत्यर्थो अभावत्वात् आकाशवृत्त्यन्योन्याभाववदिति

न च कार्य्यद्रव्यानधिकरणान्योन्याभावादौ कार्य्यद्रव्यानधिकरणत्वप्रकारविशेष्यत्वाधिकरणान्योन्याभावादौ च व्यभिचार इति वाच्यं। प्रलयकालेऽपि कालिकसम्बन्धेन तेषामन्योन्याभाववत्त्वात् दैशिकविशेषणताविशेषेणैव प्रतियोगितावच्छेदकान्योन्याभावयोर्विरोधात्। न च द्वितीयसाध्ये महाप्रलयात्मकध्वंसे महाप्रलयाव्यवहितपूर्व्ववृत्तिपदार्थध्वंसे च व्यभिचार इति वाच्यं। एतत्कालीनाभावत्वस्य तत्र हेतुत्वात्। न च तन्मते व्यर्थविशेषणत्वं महाप्रलयानङ्गीकारादिति वाच्यं। स्वमते च तदभावात्। 'आकाशेति, साध्यसत्त्वप्रदर्शनायाकाशवृत्तित्वोपादानं, तच्चोपलक्षणं आकाशवृत्तिशब्दप्रागभाववदिति च दृष्टान्तान्तरं बोध्यं। न चाकाशस्य नीरालोकादिकार्य्यद्रव्याधारतया दृष्टान्तासिद्धिरिति वाच्यं। तथा प्रतीत्यभावेन तस्य तदाधारत्वासिद्धेः कार्य्यद्रव्यसंयोगितामात्रेण कार्य्यद्रव्याधारत्वे वैपरीत्यस्यापि दुर्व्वारत्वापत्तेरिति भावः। 'खण्डप्रलयसाधनादिति खण्डप्रलयत्वेन खण्डप्रलयसाधनादित्यर्थः, घटप्रागभावत्वावच्छेदेन कार्य्यद्रव्यानधिकरणवृत्तित्वस्य खण्डप्रलयं विनानुपपत्त्या पक्षधर्म्मताबलात् खण्डप्रलयत्वरूपेण तत्सिद्धेः, खण्डत्वञ्च भेनत्सर्गाव्यवहितपूर्व्ववर्त्तित्वमपि तु तत्सर्गपूर्व्ववर्त्तित्वमात्रं तेन घटप्रागभावत्वावच्छेदेन खण्डप्रलयवृत्तित्वं न बाधितमिति भावः। भाविसर्गीयघटप्रागभावस्यापि खण्डप्रलयमादायैव कार्य्यद्रव्यानधिकरणवृत्तित्वसम्भवेन घटप्रागभावपक्षकानुमानाच्च भविष्यत्प्रलयत्वेन सिद्धिसम्भव इत्यतो-

न्तप्रलयसाधनात्। (१)एवमेव घटध्वंसं पक्षीकृत्या-गामिप्रलयसाधनं। यदा घटः कार्य्यद्रव्यानधिकरण-

ध्वंसं पक्षीकृत्य भाविप्रलयं साधयति, 'एवमिति, अत्र कार्य्य-द्रव्यानधिकरणकार्य्याधिकरणवृत्तित्वं साध्यं, प्रथमसाध्ये महाप्रलये-नार्थान्तरापत्तेः पक्षे घटपदं तत्कालीनघटपरं, अतो न चरम-ध्वंसे बाधो न वा खण्डप्रलयेऽर्थान्तरं। न चैवमपि महाप्रलयपूर्व्वक्षणेन सिद्धसाधनं प्रलये द्रव्यगुणादीनां क्रमेण नाशाभ्युपगमादिति वाच्यं। कार्य्याधिकरणत्वं हि अविनश्यदवस्थविनश्यधिकरणत्वं प्रागभावैकत्ववृत्त्यधिकरणत्वं वा। न चैवं आकाशवृत्त्यन्योन्याभावस्य कथं दृष्टान्तत्वं आकाशस्यादृष्टाधिकरणत्वाभावादिति वाच्यं। अदृ-ष्टाधिकरणान्यस्यापि प्रकृते दृष्टान्तत्वसम्भवात्। एतत्कालीनपदार्थ-प्रतियोगिकत्वस्य हेतौ विशेषणं देयं अन्यथा अभावत्वमात्रस्य महा-प्रलयाव्यवहितसर्गोत्पन्नघटध्वंसे व्यभिचारापत्तेरिति ध्येयं। 'आ-गामिप्रलयसाधनमिति भाविप्रलयत्वेन भाविप्रलयसाधनमित्यर्थः, एतत्कालीनघटध्वंसे कार्य्यद्रव्यानधिकरणकार्य्याधिकरणवृत्तित्वस्य भाविप्रलयं विनानुपपत्त्या पक्षधर्मताबलाद्भाविप्रलयत्वेन भाविप्रल-यसिद्धिरिति भावः। प्रकारान्तरेणागामिप्रलयं साधयति, 'यदेति,

(१) न चैवमन्योन्याभावस्य प्रतियोगितावच्छेदकविरोधनियमभङ्गापत्तिः, कालविशेषः कार्य्यद्रव्यानधिकरणभिन्न इति प्रतीत्यभावेन देशत्वया तस्य तदनधिकरणत्वेऽपि इदानीं कार्य्यद्रव्यानधिकरणान्योन्याभाव इति प्रतीत्या-कालत्वेन तस्य तदधिकरणत्वाभ्युपगमात्। अतएव कालान्योन्याभावस्य नित्य-

कार्य्याधिकरणवृत्तिध्वंसप्रतियोगी कार्य्यत्वाच्छब्दवत् ।

'घटः' एतत्कालीनघटः, अतो न महाप्रलयाव्यवहितसर्गवृत्तिघटे बाधः, कालकपालान्यवृत्तिध्वंसाप्रतियोगित्वेनापि घटो विशेषणीयः तेन दिगाकाशादिवृत्तित्वेन नार्थान्तरं, महाप्रलयेनार्थान्तरवारणाय साध्ये 'कार्य्याधिकरणेति, 'कार्य्यपदमविनश्यदवस्थविनाशिकार्य्यपरं, तेन विनश्यदवस्थकार्य्यमादाय न तद्दोषतादवस्थ्यं, न वा महाप्रलयाव्यवहितप्राक्कालमादायार्थान्तरं, तत्समवेतगुणनाशादृष्टादिनाशयोर्युगपदेव स्वीकारेण तत्कालस्याविनश्यदवस्थेनाधिकरणत्वाभावात् प्रागभावोपादानेन भाविप्रलयसिद्धिरतो 'ध्वंसेतीति भावः । 'कार्य्यत्वादिति एतत्कालीनभावकार्य्यत्वादित्यर्थः, तेन ध्वंसे महाप्रलयाव्यवहितसर्गीयकार्य्ये न व्यभिचारः । अतीतानागत-

---

तया कालवृत्तित्वेऽपि देशतया कालो नाधिकरणं कालः कालभिन्न इति प्रतीत्यापत्तेः । नन्वेतदेव कथमिति चेत्, न, अनन्यगत्या वृत्तिभेदेन तथाभ्युपगमादित्याहुः । द्वितीयसाध्ये त्वभावत्वमनाद्यभावत्वमत एवान्योन्याभावत्वपर्य्यन्तमुक्तं दृष्टान्ते, तेन महाप्रलयाव्यवहितपदार्थध्वंसे न व्यभिचारः । केचित्तु एतत्कालीनाभावत्वादित्यत्र तात्पर्य्यमित्याहुः । न चाकाशस्य नीरालोकादिकार्य्यव्याघारतया दृष्टान्तासिद्धिरिति वाच्यं । तथा प्रतीत्यभावेन तस्य तदधिकरणत्वानुपपत्तेः, संयोगितामात्रेण तथात्वे वैपरीत्यापत्तेरिति भावः । प्रसङ्गादाह, 'घटध्वंसमिति, न च एतत्कालीनध्वंसप्राक्कालेनार्थान्तरं द्रव्यगुणादीनां क्रमेण नाशादिति वाच्यं । सूक्ष्मकालोपाधिभिन्नत्वेन कार्य्याधिकरणत्वस्य विशेषणात् युगपदेव सर्व्वनाश इत्यन्ये । न च महाप्रलयाव्यवहितवृत्तिकार्य्यध्वंसे व्यभिचारः, एतत्कालीनाभावत्वादित्यत्र तात्पर्य्यात् । 'कार्य्येति, पूर्व्ववन्न महाप्रलयपूर्व्वक्षणेनार्थान्तरं, 'कार्य्यत्वात्'

यद्वा कार्य्यद्रव्यत्वं कार्य्यद्रव्यानधिकरणकार्य्याधिकरण-वृत्तिध्वंसप्रतियोगिवृत्ति कार्य्यमात्रवृत्तित्वात् शब्दत्व-

---

खण्डनमात्रं साधयति, 'कार्य्यद्रव्यत्वमिति, कार्य्यत्वमात्रस्य पक्षत्वे शब्दवृत्तित्वमादाय सिद्धसाधनमतो 'द्रव्यपदं, स्वरूपासिद्धिवारणाय 'कार्य्यपदं, पूर्व्ववदाकाशादिमादायार्थान्तरवारणाय समानद्रव्यसमवायिभिन्नवृत्तिध्वंसप्रतियोगित्वेन च कार्य्यद्रव्यत्वं विशेषणीयं, साध्ये महाप्रलयमादायार्थान्तरवारणाय 'कार्य्याधिकरणेति, कार्य्यपदञ्च, अविनश्यदवस्थविनाशिपरं, तेन न ध्वंसमादाय तद्दोषतादवस्थ्यं, न वा महाप्रलयाव्यवहिततथाकार्य्यमादायार्थान्तरं, 'कार्य्यमात्रेति, अनन्तत्वे व्यभिचारवारणाय 'मात्रपदं साधारणार्थकं। न च ध्वंसत्वे व्यभिचारः 'कार्य्यपदस्य भावकार्य्यपरत्वे मात्रपदवैयार्थ्यापत्तेरिति वाच्यं। तादात्म्येन भाववृत्तित्वे सतीत्यनेन विशेषणात् तथाच ध्वंसत्वे न व्यभिचारः, न वा मात्रपदवैयर्थ्यं आकाशध्वंसान्यतरत्वे ध्वंसाप्रतियोगित्वरूपानन्तत्वे च व्यभिचारवारकत्वात्, महाप्रलयाव्यवहितसर्गीयकार्य्यमात्रवृत्तौ तत्तत्क्रियात्वे तादृशादृष्टत्वादिजातौ व्यभिचारवारणाय इदानीन्तनेति भावविशेषणं, 'शब्दत्ववदिति स्वनये, परनये सुखत्वादिकं दृष्टान्तः तन्मये वर्णस्य

इदानीन्तनभावकार्य्यत्वात्, एतेन महाप्रलयाव्यवहितकार्य्ये ध्वंसे च न व्यभिचारः। 'शब्दवदिति इदानीन्तनशब्दवदित्यर्थः, 'कार्य्यद्रव्यत्वमिति, अत्रापि पूर्व्ववदर्थान्तरं, तादृशसुखादिवृत्तित्वेनार्थान्तरवारणाय पक्षे द्रव्यपदं, 'कार्य्यमात्रेति। ननु ध्वंसत्वे व्यभिचारः, न च कार्य्यपदं भावकार्य्य-

वत् । यद्वा एककालीनाः सर्व्वे परमाणवः समवेतोपादेय-प्रबन्धशून्या आरम्भकत्वात् नष्टपवनारम्भकपरमाणु-

वित्यत्वात् । 'परमाणव इति, अत्र परमाणुत्वं नित्यपृथिवीत्वादि-कमेव न तु नित्याणुपरिमाणवत्त्वं मीमांसकमते आश्रयासिद्धेः तैरणुपरिमाणानभ्युपगमात् स्वोपादेयद्रव्याप्रसिद्धत्वेनांशतः साध्या-प्रसिद्ध्यापत्तेश्च । 'समवेते'ति यावत्समवेतप्रबन्धशून्या इत्यर्थः, 'शू-न्यत्वमत्यन्ताभावः, अत्र यत्किञ्चित्समवेतप्रबन्धप्रतियोगिकाभाव-मादाय सिद्धसाधनवारणाय 'समवेते'ति समवेतसामान्याभावला-भाय । न च प्रलयेऽपि गुणादेः सत्त्वाद्बाधः प्रबन्धपदस्य कार्य्य-मात्रपरत्वादिति वाच्यं । समवेतं कार्य्यं प्रबध्नातीति व्युत्पत्त्या प्रबन्धपदस्य द्रव्यपरत्वात्, समवायसम्बन्धावच्छिन्नप्रतियोगिकाभाव-लाभाय समवेतेति सम्बन्धान्तरावच्छिन्नाभावमादाय न सिद्ध-साधनमिति ध्येयं । 'आरम्भकत्वात्' द्रव्यसमवायिकारणतावच्छेद-

कं, मात्रपदवैयर्थ्यापत्तेः । न च भाववृत्तित्वे सति कार्य्यवृत्तित्वसमर्थत्वधाभा-वस्त्वे व्यभिचारवारणाय मात्रपदमिति वाच्यं । तथापि चरमक्रियात्वादौ व्यभिचारापत्तेरिति चेदत्राहुः मात्रपदस्य कात्स्न्र्यपरत्वेन कार्य्यपदस्य भाव-वृत्तिविभाजकोपाध्यवच्छिन्नपरत्वेन च भाववृत्तिविभाजकोपाध्यवच्छिन्नयावत्-कार्य्यवृत्तित्वादित्यर्थः, तेन नोक्तदोषः । न च व्यर्थविशेषणत्वं विशेष्यमात्रस्य स्वरूपासिद्धमिति वाच्यं । विकाशकविशेषणे तस्यादोषत्वात् नीलधूमवत् सङ्कोचकविशेषण एव तथात्वात् इति । यत्तु कार्य्यतावच्छेदकधर्म्मत्वादित्यर्थः इति, तन्न, सत्ताप्रलयाद्यवच्छिन्नवृत्तिसम्बन्धिचैत्रप्रभवत्वाद्यनुमापकवाक्य-वृत्तिजातौ व्यभिचारापत्तेः । न च व्योमैव कार्य्यद्रव्यानधिकरणमादाय

वत्। सर्व्वैव पक्षतावच्छेदकावच्छिन्नं साध्यं प्रतीयते इति एककाले शून्यता लभ्यते। न च पवनपरमाणूनामपि पक्षत्वेनांशतः सिद्धसाधनं, पक्षधर्म्मताबललभ्य-

---

कावच्छिन्नत्वात् द्रव्यत्वादिति यावत्। न च साध्यस्य केवलान्वयितया प्रमेयत्वादित्येव कथं न कृतमिति वाच्यं। तथापि हेत्वन्तरत्वात्। न च महाप्रलयमादायार्थान्तरं, अदृष्टाधिकरणत्वेन पक्षतावच्छेदककालविशेषणात्, कालपदस्य स्थूलकालपरं तेन तादृशक्षणमात्रसिद्धा नार्थान्तरमिति मन्तव्यं। 'सर्व्वैवेति, बाधाद्यनवतारदशायामिति शेषः। 'एककाले' एककालावच्छेदेन, 'पवनपरमाणूनां' महत्पवनारम्भकपरमाणूनां, 'अंशतः सिद्धसाधनमिति, तस्य दृष्टान्तत्वात् अपक्षत्वे प्रत्ययासिद्धिरिति भावः। उद्देश्यप्रतीतेरसिद्धेर्नांशतः सिद्धसाधनमित्याह, 'पक्षेति एककालावच्छिन्नसाध्येत्यर्थः। ननु मा भूत् सिद्धसाधनं तथापि कथं तस्य दृष्टा-

---

न्तत्वासत्त्वमिति वाच्यं। शब्दवद्घटादावपि कुम्भकारादिविशेषप्रयोज्यत्वनिश्चयेन तत्र तथापि व्यभिचारात्। केचित्तु अनादित्वावच्छेदकधर्म्मत्वादित्यर्थः, अनादित्वञ्च स्वजातीयध्वंसव्याप्यप्रागभावप्रतियोगित्वमित्याहुः। 'एककालीना इति, स्वध्वंसवन्त इत्यपि पूरणीयं, अन्यथा सम्प्रति स्वध्वंसवति बाधापत्तेः, 'उपादेयपदस्य स्वोपादेयद्रव्यपरत्वादन्यथा बाधापत्तेः गुणादिसत्त्वात् अन्योपादेयशून्यत्वाभावाच्च, शून्यपदस्य कादाचित्काभावपरत्वात्, अतएव 'आरम्भकत्वादिति हेतुरुक्तः, अन्यथा मेयत्वादित्यस्यैव सिद्धेरिति भावः। कार्य्यसमानकालीनतादृशप्रध्वंसकादाचित्काभाववन्त इति साध्यं तेन न महाप्रलयेनार्थान्तरं, 'आरम्भकत्वात्'

साध्याप्रतीतेः, अभेदानुमानवच्च पक्षस्य दृष्टान्तत्वा-
विरोधः । यद्वा परमाणवः कार्य्यद्रव्यानधिकरण-
वृत्तिकार्य्यवन्तः नित्यद्रव्यत्वात् आकाशवत्, भूगोलक-

न्तत्वं पक्षस्य दृष्टान्तत्वविरोधादित्यत आह, 'अभेदेति धूमवान् वह्निमान् आलोकात् यथा महानसमित्याद्यनुमानवदित्यर्थः, निश्चितसाध्य-साधनवत्त्वं हि दृष्टान्तत्वप्रयोजकं न तु पक्षान्यत्वमपीति भावः । 'परमाणव इति, यद्यप्येकपरमाणुपक्षत्वेऽप्युद्देश्यं सिद्ध्यति तथापि सर्व्वे एव प्रलये दोधूयमानाः कार्य्यद्रव्यविरहिण एव तिष्ठन्ति इति बोधनाय बहुवचनं, 'कार्य्येति, परमाणूनां कार्य्यद्रव्यानधिकरणत्वाभावात् तादृशकालसिद्धिः अत्र दिगन्यत्वं कार्य्यद्रव्यानधिकरणे विशेषणं तेन न तादृशदिशार्थान्तरं न तु परमाण्वाकाशसंयोगमादाय सिद्धसाधनं, द्वितीयकार्य्यपदस्यैकाश्रितकार्य्यपरत्वात् अतो न ध्वंसमादाय महाप्रलयेनाप्यर्थान्तरं, 'नित्यद्रव्यत्वादिति, कपालादौ व्यभिचारवारणाय 'नित्येति, गुणादौ व्यभिचारवारणाय 'द्रव्येति । न चेश्वरे व्यभिचार इति वाच्यं । नित्येऽपि

द्रव्यसमवायिकारणत्वात्, अन्यथा उक्तसाध्याभाववति मनःप्रभृतौ व्यभिचारापत्तेः, 'सर्व्वेषेति, यद्यप्येवं तथोक्तमनुमानप्रकाशे । 'न चेति, अपक्षत्वेऽप्यौत्सुक्या सिद्धिरिति भावः । उद्देश्यप्रतीत्यसिद्धेर्नाप्यतः सिद्धसाधनमित्याह, 'अस्येति, 'अभेदेति, निश्चितसाध्यवत्त्वं दृष्टान्तत्वे प्रयोजकं न तु पक्षान्यत्वमपीति भावः । 'परमाणव इति, अत्रैव पार्थिवपरमाणुपक्षत्वेऽपीष्टसिद्धिरिति बोध्यं । अत्र 'कार्य्यवन्त इत्यत्र 'कार्य्यपदमथास्यवृत्तिभावकार्य्यपरं

सन्तानोऽयं भूगोलकसन्तानानधिकरणवृत्तिध्वंसप्रति-योगी कार्य्यत्वात् घटवत् । यद्वा एतत्कर्म्मातिरिक्तानि

कालिकाधारत्वाभ्युपगमेन तथापि साध्यसत्त्वादिति भावः । ईश्व-रान्यत्वेन आत्मान्यत्वे वा विशेषणीयं इति कश्चित्, तदसत्, परमा-णावेव व्याप्यत्वासिद्ध्यप्रसिद्ध्योरन्यतरापत्तेः ।

केचित्तु कार्य्यद्रव्यानधिकरणवृत्तिस्पर्शवद्वृत्त्यनेकाश्रितान्यभाव-कार्य्यवत्त्वं साध्यत इत्याकाशेश्वरवृत्तित्वादिकमादाय साध्यसत्त्वान्न व्यभिचारः साध्ये चोपरञ्जकविशेषणं न दोषायेत्याहुः ।

'भूगोलेति, 'भूगोलः' ब्रह्माण्डं, द्व्यणुकं वा, 'सन्तानः' समूहः, इदञ्च स्वरूपकथनमात्रं प्रत्येकपक्षतायामप्युद्देश्यसिद्धेः । 'कार्य्यत्वात्' इदानीन्तनभावकार्य्यत्वात्, तेन चरमशब्दोत्पन्ने ध्वंसे न व्यभिचारः । 'एतदिति, क्रियत इति कार्य्यद्रव्यं, न तु स्पन्दः, प्रलये परमाणु-कर्म्मणामभ्युपगमात् । यद्यपि कर्म्मत्वावच्छेदेन यत्किञ्चित्कर्म्मप्रति-बन्धकत्वसाधनेऽपि उद्देश्यसिद्धिर्भवति, तथापि पक्षातिरिक्तस्यैव

तेन परमाणवाकाशसंयोगादिना न सिद्धसाधनं न वा महाप्रलयेनार्थान्तरं । कपालादौ व्यभिचाराच्च, 'नित्येति, गोत्वादौ व्यभिचाराच्च, 'द्रव्येति, न चेश्वरे व्यभिचारः, तदन्यत्वेनापि विशेषणात् । वस्तुतो 'भावपदं न देयं, 'कार्य्यपदं जातिमत्परं, तथाच ज्ञानादिकमादाय ईश्वरे साध्यसत्त्वान्न व्यभि-चारः । भावकार्य्याधिकरणत्वमपि कार्य्यद्रव्यानधिकरणविशेषणं अतो महा-प्रलयकालीनगुणमादाय नार्थान्तरमिति । 'भूगोलकेति, अवयवनाशनाशापो-द्धारेण भूगोलकस्याधुना नाशादर्थान्तरमित्यत उक्तं 'सन्तानेति, कार्य्याधिक-रणत्वमपि विशेषणं देयं तेन महाप्रलयेन नार्थान्तरं, 'कार्य्यत्वात्' भावकार्य्य-

कर्म्माणि एतत्प्रतिबन्धकप्रतिबध्यानि कर्म्मत्वात् एतत्कर्म्मवत् । न चात्र व्यभिचारशङ्का, सर्वेषामेवंरूपत्वादनेवम्भावे च स्वभावप्रच्यवात् । अन्यथा नियम-

---

दृष्टान्तत्वमित्यभिमानेन 'एतत्कर्म्मातिरिक्तानीति पक्षविशेषणं, 'एतत्प्रतिबन्धकेति, एतावता पक्षधर्म्मताबलात् सकलकार्य्यद्रव्यप्रतिबन्धक एकः कालः सिद्ध्यतीति मिश्राः, तदसत्, एतावता सकलकार्य्यद्रव्योत्पत्तिप्रतिबन्धकप्रसिद्धावपि कार्य्यद्रव्यानधिकरणकालासिद्धा प्रलयासिद्धेः तदानीं द्रव्यानुत्पादेऽपि उत्पन्नद्रव्याणां सत्त्वे बाधकाभावात् । वस्तुतस्तु 'एतत्कर्म्मप्रतिबन्धकेत्यस्य एतत्कर्म्मानधिकरणकालेत्यर्थः, तत्प्रतिबध्यत्वञ्च कालिकविशेषणतया तन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वं, एवञ्च सकलद्रव्यानधिकरण एकः कालः प्रसिद्ध इति तत्त्वं । 'न चात्रेति, 'सर्व्वेषामिति सर्व्वेषामेव हेतूनां, 'एवंरूपत्वात्' साध्याव्यभिचरितत्वनिश्चितत्वात्, 'अनेवम्भावे' साध्यव्यभिचारित्वे, 'स्वभावः' अनौपाधिकत्वानुभवः, 'प्रच्यवात्' प्रच्यवापत्तेः, तथाचानौपाधिकत्वमेव व्यभिचाराभावनिश्चाय-

---

कत्वात्, 'एतत्कर्म्मेति, अत्र प्रतिबध्यत्वं प्रतिबन्धकस्वरूपयोग्यत्वं बोध्यं तेन एतेन भागेन नष्टेऽपि कर्म्मणि साध्यसत्त्वान्न बाधो व्यभिचारो वा, तथाच पक्षधर्म्मताबलेन सकलकर्म्मप्रतिबन्धकतया एकः कालः सिध्यतीति भावः । कर्म्मत्वमेव पक्षतावच्छेदकमस्त्विति वाच्यं । पक्षान्यस्यैव दृष्टान्तत्वमिति नियमादित्येके । व्याप्तिग्रह एव साध्यसिद्धिप्रसङ्गादित्यपरे । 'एवंरूपत्वादिति एतत्प्रतिबन्धस्वरूपयोग्यत्वादित्यर्थः । 'स्वभावेति, कर्म्मत्वावच्छेदे-

मेऽपि नियामकान्तरापेक्षायामनवस्थितेः। आगमोऽप्य-
नुमेयार्थं संवदतीति कृतं प्रसक्तानुप्रसक्त्या॥

कमिति भावः। ननु निरुपाधिरव्यभिचार इत्यत्र नियमे को नियामक इत्यत आह, 'अन्यथेति। नन्वनौपाधिकत्वानुभव एवा-नौपाधिकत्वसिद्धिः। न च पक्षेतरत्वादपि तादृशः सम्भवतीति वाच्यं। कार्य्यद्रव्यानुपादानदेशकालत्वादेः सम्भवात् पक्षेतरत्वस्याप्यनुकूल-तर्के सन्दिग्धोपाधित्वसम्भवात् अन्यथा अयं घट एतद्रूपाद्यतिरिक्त-धर्म्मवान् घटत्वात् अपरघटवदित्यतो रूपाद्यतिरिक्तातीन्द्रियधर्म्म-सिद्धेर्दुर्वारत्वापत्तेः। अथ आस्तां केषु केषुचित् व्यभिचारशङ्का न तु एककालीनसर्व्वे परमाणव इत्यत्र तथा हि द्रव्यमेवासमवायिका-रणमन्यतयान्यनिखिलद्रव्यगुणमित्यविवादं, आद्यावपि द्रव्योत्पत्ति-प्राक्समये निखिलद्रव्यगुणानित्यत्र केषामपि सन्देहः। न च तथापि अनुकूलतर्काभावे कथं व्याप्तिग्रह इति वाच्यं। कर्म्मण्यव्याप्ति-ग्राहकत्वादिति चेत्,(१) न, एतादृशानुमानादपि व्याप्तिसिद्धौ प्रागभावाधिकरणकालीनाः सर्व्वे परमाणवः यावत्समवेतकार्य्य-शून्या द्रव्यत्वात् उत्पत्तिकालावच्छिन्नघटवदित्यनुमानात् प्रागभाव-

---

(१) तथा चोत्यादिः चेदित्यन्तः पाठः आदर्शानुरूप एव मुद्रितः परन्त्वयं पाठः सम्यक् परिशुद्धत्वेन न प्रतिभाति।

नैव तादृशस्वभावनिर्णयादिति भावः। ननु तादृशस्वभाव एव किं नियामक इत्यत आह, 'अन्यथेति, तत्रापि नियामकान्तराभिधानप्रसङ्गे तु अनवस्थापत्तौ बाधान्तरावतारो न स्यादित्यनवस्थार्थः। तदिदमुक्तं 'कृतं प्रस-

इति श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ शब्दाख्यतुरीयखण्डे उच्छन्न-प्रच्छन्नवादः ॥०॥

...कालावच्छेदेनापि सकलपरमाणूनां यावत्समवेतकार्य्यशून्यत्वसिद्धा-
...ते:। द्रव्यं हि यथैव सावयवं निरवयवञ्च तथायं उत्पत्तिका-
...वच्छेदेन निखिलसमवेतकार्य्यशून्यमित्यविवादं अन्यमपि, महा-
...वच्छेदेन निखिलकार्य्यशून्यमित्यत्रापि भवतां न विप्रति-
...त्यक्षरथाद्याह, 'आगमोऽपीति, 'संवदति' समुदितं प्रमा-
...अस्मिन्नेव पक्षे प्रमाणं यावत्, श्रूयते हि "सदेव सौम्येद-
...दैकमेवाद्वितीयमिति अस्यार्थः, 'एकं' एकत्वसङ्ख्यायोगि,
...मेव, 'अग्रे' प्राक्, 'सौम्येति सम्बोधने, तेन प्राक्
... कार्य्यद्रव्यमित्यागतं, प्रागभावाधिकरण-
... रात्रिरित्यागमेऽप्यनुसन्धेय इति

...गमचिरण्यां